UNIVERSITY OF TORONTO
3 1761 00664157 5

BOUND BY
MR. DHUNJIBHOY SHORABJI,
Fort Bombay.
બુક બાંધનાર
મી૦ ધનજીભાઇ સોરાબજી,
મુંબઇ કોટ.

0..

Sahasrāksah

van

Sadānandagiri

ed.

Mathurādās Lawji

A. 65.–
454 | 1032
H. KERN
LEIDEN

To the Professor Kern
Leyden
from Mathuradas Lavji
Bombay

सहस्राक्षः

परमहंसपरिव्राजकाचार्यश्रीसदानन्दगिरिविरचितः

लवजित्पुत्रेण मथुरादासेन स्वर्गतात्मतनया

लाडकाँबाईनामस्मरणाय

मुंबापुर्यां गणपतकृष्णाजीमुद्रायंत्रालये

इक्झिक्युटरसाख्याधिकारिनियुक्तेन डुमाळइत्युपाभिख्येन

नारोकृष्णाभिख्येनांकयित्वा

प्रसिद्धिं नीतः

शकाब्दाः १७९२.

सन १८७०.

B
131
S34
1870

LIBRARY
JUL 31 1973
UNIVERSITY OF TORONTO

प्रस्तावना.

श्रीमदुमारमणचरणकोकनदेषु विलसन्तु सर्वदा चेतश्चञ्चरीकास्सज्जनानामनवरतानन्दभरपूर्णाः ॥ आसीत्कश्चिदौत्तराहोऽनेकनगनगरारामरमणीयस्य निरुपमकमलकुलसंकुलसरस्सहस्रस्य कविविद्वन्मस्करिगणकमनीयस्य कश्मीरमण्डलस्य निकटनिवासीकात्यायनीकान्तकृपापात्रंसारस्वतोविप्रः ॥ तेन चानपत्यतातप्तचेतसा कस्यचित्कर्मन्दिनोनुग्रहेण चिराद्दृष्टाः पुत्रमुखसुधांशवः ॥ तन्मध्यात्प्राथमिकस्तनूजन्मा स्वप्रतिज्ञापालनपरेण कुरुक्षेत्रारण्यपुण्यावनिनिवासशालिने तस्माएव यतिवर्याय समर्पितः । सचप्राक्तनसंस्कारबलादल्पेनैव कालेनाधिगतपाणिनीयगोनर्द्दीयशास्त्रसर्वस्वोनवद्वीपगमनेन संपादितकणभुक्चरणाक्षसिद्धान्तसंपत् भाट्टप्राभाकरमतपारावारपारदृश्वा व्याससूत्रशारीरकादिनिखिलनिगमान्तपयःपयोधिपारीणः काश्यादिपत्तनेषु स्वदिग्विजयं नाटयन्दिग्गजइव देशिकमण्डलाखण्डलश्रीशङ्करार्यसिद्धान्तसन्मार्गाऽवरोधिनो वादिविटपानामूलं समुत्पाटयँस्तत्तद्देशक्ष्मापालपूजितपादपद्मोऽनेकभूजानिलब्धच्छत्रचामराद्यखिलराजचिन्हउत्तरदिक्स्थशङ्कराचार्याभिमानितामुद्वहन्सकलसद्गुणरत्नरोहणगिरिस्सदानन्दगिरिरित्यभिख्यामलङ्कुर्वन्निखिलदेशावलोकनकौ

तुकी हरिच्चक्रचंक्रमणक्रमेण समाससाद मेदपाटविषयराजधानीम् ॥

अथ तत्सत्कीर्त्तिश्रवणसमुत्पन्नदर्शनाभिलाषेण योजनपरिमितभूभागं सन्मुखसमागतेन श्रीमच्चन्द्रचूडचरणदत्तावधानेन सद्गुणसंपन्निधानेन सरूपसिंहाभिधानेनोदयपुटभेदनाधिपतिना समानीय निजनगरं स्वगुरुवर्यतया स्थापितः ॥ तदनन्तरं प्रतिदिनवर्द्धमानप्रतापैर्निजविद्याविभववशीकृतानेकविद्वद्भिस्स्वसिद्धान्तप्रतिपादनपुरस्सरापरमतोत्पाटनप्रबलयुक्तिकप्रचुरप्रबन्धकृद्भिर्वागीश्वरीविहारभूभृद्भिस्तैस्तथा चरितं यथाऽऽकल्पमप्याल्हादिताखिलविद्वद्वरविहङ्गानिस्तापनिर्मलीकृतसमस्तमनुजमानसभूमयस्सत्कीर्त्तिकूलंकषानिर्विरामाभवितारः ॥ येषाञ्च सद्विद्यावैदग्ध्यवाक्पाटवप्रौढप्रतापान्निखिलावनिमण्डलमंडनानि विद्वन्मण्डलानि न प्रेम्णाद्यापि विस्मरन्ति ॥ कदाचित्तीर्थयात्राप्रसंगवशादुदयपुरं प्राप्ताविद्वांसोगोस्वामिनः श्रीजीवनजिच्छर्माणः समर्पयामासुरात्मरचितां बालकृष्णचंपूमुदयपुरभूजानिसरूपसिंहाय तांविलोक्यसोपि स्वामिनां सकाशे प्रेषयामास तद्विलोकनसमुत्पन्नतत्समागमाभिलाषैश्चयैःसमागमायामंत्रिताअपि ते गोस्वामिनः कस्माच्चित् कार्यवशात् प्रयाणप्रणयिनः संबभूवुः ॥ एवमनेकप्रतिद्वंद्विविद्वदनुभूतप्रौढप्रतापाः प्रत्यक्ककुप्स्थतीर्थयात्राप्रसङ्गेन सौराष्ट्रभूभागं भूषयन्तोभावनगरक्षितिजानिमान्येन वेदशिखरनिहितनिष्ठेन चमत्कारनगरनिवासिनागरगृहस्थविप्रेण सन्तोषरामनामकेन श्रीवल्लभसिद्धान्तखण्डनपूर्वकाद्वैतसिद्धान्तमण्डनाय प्रार्थितास्सन्तस्स्वयमुपशमशीलाअपि प्रज्ञाविरहिणां संसारकूपाद्बहि

निःसारणं स्वधर्मं जानन्तस्समवलोक्य तदीयाणुभाष्यविद्वन्मण्डनशुद्धाद्वैतमार्त्तण्डादीन्ग्रंथान् परार्थमेव धृतशरीरास्ते श्रुतिस्मृत्यविरुद्धानेकप्रौढोक्तिभिः प्रथमतश्शुद्धाद्वैतमार्त्तण्डमनन्तरञ्च विद्वन्मण्डनं सटीकं खण्डयन्तस्सहस्राक्षनामकमपूर्वनिबन्धमिमं रचयामासुः ॥ सचश्रीवल्लभार्यमतानुयायिना सर्वश्रेयोभिलाषिणा भट्टिवंशजेन लवजित्तनूजन्मना मथुरादासवमर्णा शौरनयननन्दनिशाकरप्रमितविक्रमवर्षान्तर्गतोर्जमासवलक्षपक्षचतुर्दशीसमासादितनिर्लिपनिलयवासायालाडकौंबाईसमाख्यायानिजाङ्गजायाः प्रचुरकालातिक्रमणेनाप्यनुन्मूलनीयमूलः प्रचण्डवातवर्षातपैरप्यलोपनीयलावण्यस्सकललोकलोचनानन्दजनकः कोपिस्मरणस्तंभइवायमनेकद्वैतमतान्धकारसंभ्रान्तदृग्भ्योजनेभ्यः सन्मार्गावबोधप्रदानप्रवीणो मयाङ्कयित्वा प्रसिद्धिनीतः ॥ विलोक्येमंनिबन्धं संभूय सर्वेपि श्रीवल्लभवंशीयास्स्वकीयसिद्धान्तानुसारेण तत्खण्डनाय बद्धपरिकराभवितारइति महतीमाशांमन्मनसि स्थापयामि ॥ हन्तायमसन्तोषोयत्केपि ते वीणावेणुमृदङ्गाद्यनेकवाद्यवादननिष्ठचित्तास्सङ्गीतमेव संसारसारं मन्यमानाःप्रबलेन शङ्करसिद्धान्तिसिन्धुरेणामूलतउन्मूलितं स्वसिद्धान्तशाखिनं दृष्ट्वापि नपश्यन्तीति ॥ हाहंतनिगमागमोक्तस्वधर्मपालनप्रीतिस्वकीयसिद्धांतदृढीकरणबद्धपरिकरताव्यासूत्रभाष्यकरणशक्तिमत्ताशमदमतितिक्षोपरतिब्रह्मण्यताब्रह्मनिष्ठताद्यखिलाचार्यचिन्हविरहिणां केवलमाचार्यकुलउत्पत्तितएवाचार्यपदाभिमानमुद्वहतां तेषां नैतत्किंचिदपि त्रपाकरमस्ति॥ तद्दयामयात्माऽनवरतनिखिलजगज्जनहितपरा

यणस्सर्वज्ञस्सर्वशक्तिमानीश्वरस्तेभ्यस्सन्मार्गदर्शिनीं दृशं प्रयच्छता दितिप्रार्थये परात्मानम् ॥

जयंत्वद्वैतार्यास्सकलवसुधाख्यातयशसः श्रिताद्वैताभासाः परमततमश्चण्डकिरणाः॥ यशोदेहेनास्मिन् जगति सततं सुस्थिति- जुषो विपश्चिद्वर्यास्ते यतिवरसदानन्दगिरयः ॥

अनुक्रमणिका.

१ अस्य ग्रंथस्य भागद्वयमस्ति ॥ तत्र पूर्वभागएकादशपद्येस्सटीकस्य शुद्धाद्वैतमार्त्तण्डस्य खण्डनं चोत्तरभागे सटीकविद्वन्मण्डनखण्डनमस्ति ॥ अथ प्रथम भागप्रथमश्लोके तट्टीकायाञ्चसकलाचार्यचूडामणीभूतश्रीशङ्कराचार्यनमस्कारपूर्वकशप्तब्राह्मणकुलनिर्णयोत्तरं ग्रन्थनामनिर्देशः

२ द्वितीयपद्ये तद्व्याख्याने च खंडनीयग्रन्थद्वयोक्त्यनन्तरं सटीकशुद्धाद्वैतमार्त्तण्डोक्तशुद्धाद्वैतनिरुक्तिखण्डनम्

३ तृतीयपद्ये तट्टीकायाञ्चेश्वरेच्छाया जगद्धेतुवादस्य सविस्तरं खण्डनम्

४ चतुर्थश्लोकतद्विवरणयोस्साकारब्रह्मवादखण्डनम्

५ सव्याख्ये पञ्चमपद्ये जगतोमायिकत्वनश्वरत्वे निर्णीते

६ सटीके षष्ठश्लोके ब्रह्मणः कर्त्तृत्वविचारः

७ सप्तमे सव्याख्ये पद्ये जीवाणुत्वादिवादनिराकरणम्

८ अष्टमपद्ये सव्याख्याने प्रतिबिम्बवादस्थापनम् ॥

९ नवमे श्लोके सटीके क्रीडार्थं ब्रह्मणोजगन्निर्माणमित्यस्य सविस्तरं खण्डनम् ॥

१० दशमे श्लोके तट्टीकायाञ्च सर्वस्य नामरूपात्मकप्रपञ्चस्य ब्रह्मरूपतोक्तिखण्डनम् ॥

११ एकादशमितपद्ये सटीके सर्वद्वैतमतेभ्यस्तिलाञ्जलिप्रदानानन्तरं ब्रह्मात्मावगतिनिरूपणम् ॥ एवंसमाप्तःपूर्वभागः

अथोत्तरार्द्धे विद्वन्मण्डनस्य पञ्चाशत्खण्डानि कल्पयित्त्वा प्रत्येकं २ ग्रन्थकृतस्स्वामिनः सविस्तरं खण्डयित्वा दिग्विजयडिण्डिममिमं निबन्धं सर्वजनाँच्छ्रावयामासुः ॥

द्वैतध्वान्तक्षयकरो ग्रन्थार्कोऽयंसमुद्धृतः॥ यतस्सजयतान्नित्यं सदानन्दगिरिर्गिरिः ॥

श्री

सहस्राक्ष

प्रारंभः

श्रीगणेशायनमः ॥ ओंतत्सत्स्वनिषेवितिष्यमलस्त्वच्छ्रीशंकरं देशिकं न्याय्यश्रौतमतस्य शिष्यसहितं नत्वा पुरा ब्राह्मणैः ॥ शर्मैर्विप्रकुलोद्भवैः श्रुतिपथादृष्टार्थबोधैर्नरा माप्रच्याविषतेति तान्प्रति मया ज्ञाप्यः सहस्रेक्षणः॥ १ ॥

॥ श्रीगणेशायनमः ॥ ॐश्रीसदानन्दायनमः ॥ ओमित्यादिपदत्रयेण ब्रह्मनिर्दिश्यते ॥ ओंतत्सदिति निर्देशोब्रह्मणस्त्रिविधस्स्मृतइति भगवदुक्तेः ॥१॥ श्रीशङ्कराचार्यस्य स्वभक्तकलिमलहर्तृत्वं श्रौतधर्मोपदेष्टृत्वंच कौर्मे पूर्वखण्डे त्रिंशोऽध्याये वर्णितम् ॥ तथाहि ॥ करिष्यत्यवताराणि शंकरोनीललोहितः ॥ श्रौतस्मार्त्तप्रतिष्ठार्थं भक्तानां हितकाम्यया ॥ १ ॥ उपदेक्ष्यति तज्ज्ञानं शिष्याणां ब्रह्मसंज्ञितम् ॥ सर्ववेदान्तसारं हि धर्मान्वेदनिदर्शनान्॥२॥ ये तं प्रीत्या निषेवन्ते येनकेनोपचारतः ॥ विजित्य कलिजान्दोषान्यान्ति ते परमं पदं ॥ ३ ॥ अनायासेन सुमहत्पुण्यं ते या-

न्ति मानवाः ॥ अनेकदोषदुष्टस्य कलेरेषमहान्गुणः ॥ ४ ॥ इति॥ करिष्यत्यवताराणीत्यत्राऽवतारशब्दोऽवेतॄस्त्रोरित्यधिकरणघञन्तः॥ तेन पुल्लिङ्गनियमोन ॥ अत्र इहाऽवतरिता लोके इत्येवाऽसंदिग्धं शिवमात्राऽवतारबोधकवाक्यप्रयोगे कर्त्तव्येऽवताराणि करिष्यतीति स्वेतरसाधारणाऽवतारकरणबोधहेतुवाक्यप्रयोगं कुर्वता अवतरन्ति येष्वित्यर्थसूचनात्स्वस्य परेषां चाऽवताराणि करिष्यतीति सूचितम् ॥ तत्र च के तइतरइत्याकांक्षा उपदेक्ष्यति तज्ज्ञानं शिष्याणां ब्रह्मसंज्ञितमिति प्रत्यासन्नेन वाक्येन शाम्यते एवञ्च शिष्याणामप्यवतारत्वं बोधितम् ॥ एतेन कलीनां बहुत्वेन प्रतिकलि शङ्करावतारसत्त्वेन चावतारबहुत्वसिद्धौ बहुवचनस्य प्रक्षीणशक्तिकतया शिष्याणामवतारत्वे न मानमिति कस्यचिदुक्तिः प्रत्युक्ता ॥ किञ्च चतुर्भिः सह शिष्यैस्तु शङ्करोऽवतरिष्यतीति वायुपुराणमप्यत्र मानम् ॥ तत्रहि शिष्याणामवतारक्रियया साहित्यमुक्तम् ॥ एवंच तच्छिष्याणां सामान्यतोऽवतारत्वे सिद्धे बुद्धाद्युक्तिष्विवेहाऽप्रामाण्ये मानाभावेन तदुक्तीनां व्यासाद्युक्तिवत्प्रामाण्ये शङ्करदिग्विजयादिरूपतदुक्तिभिर्विशिष्य तेषां तत्तदवतारत्वं निश्चेतव्यमिति तेषां सर्वेषामपि कलिमलहर्तृतया नमनीयत्वेन शिष्यसहितमित्युक्तम् ॥ प्रत्यक्षत्वाऽनुमितत्वाभ्यां द्विविधया श्रुत्योक्तस्य धर्मस्य पुराणे श्रौतस्मार्त्तेतिभेदेन कीर्त्तनेऽपि इहाऽभेदविवक्षया श्रौतत्वेनैव कीर्त्तनं श्रौतेति॥ ज्ञानमुपदेक्ष्यति उपदेशेन संपादयिष्यति ॥ ब्रह्मसंज्ञितम् ब्रह्मविषयकं सर्ववेदान्तानां सारं फलम् ॥ यद्वा ब्रह्मसंज्ञितं ब्रह्माऽऽख्यं ॥ सर्ववेदान्तसारं सर्ववेदान्ततात्पर्यविषयभूतं ॥ ज्ञानं चिद्रूपम् उपदेक्ष्यति व-

र्णयिष्यति ॥ धर्मान्वेदनिदर्शनानित्यत्रोपदेक्ष्यतीत्यनुवर्त्त्य पृथ-
ग्वाक्यता ज्ञेया ॥ निदर्श्यन्तेऽनेनेति निदर्शनम् वेदोनिदर्शनं येषां
ते वेदनिदर्शना वेदप्रमाणकास्तानित्यर्थः ॥ ननु पुराणे विजित्य
कलिजान्दोषानित्यत्र दोषजयादिकं प्रति सेवकानामेव कर्तृत्वमु-
क्तं तत्कथं शङ्कराचार्यस्य कलिमलहर्तृत्वमुच्यते इतिचेद् वक्ष्यमा-
णरीत्येश्वरस्य कर्मफलदातृत्वे जीवानां तद्द्वारैव फलाऽऽप्त्येति गृहा-
ण ॥ इदमुपलक्षणं तेन पुण्यहेतुत्वं तद्द्वाराहितसम्पादकत्वं चाऽना-
यासेन सुमहदिति भक्तानां हितकाम्ययेतिच कौर्मोक्तं बोध्यम ॥
व्याकुर्वन्व्याससूत्राऽर्थं श्रुतेरर्थं यथोचिवान् ॥ श्रुतेर्न्याय्यः सएवा
ऽर्थः शङ्करः सवितानन इति शिवपुराणवाक्यमवष्टभ्याह ॥ न्या-
य्येति ॥ विताननोव्याख्याता ॥ क्वचित्सवितानना इति पाठः तत्र
ननेत्यस्य नरोनेत्यर्थः ॥ न्यायादनपेतोन्याय्यः ॥ न्यायोयुक्ति-
स्तत्सहितस्तदविरुद्धश्चेति निष्कर्षः ॥ श्रौतेऽर्थे युक्तेरपेक्षोत्तरभा-
गे षोडशखण्डखण्डनावसरे उपपादयिष्यते ॥ २ ॥ ब्राह्मणैरि-
ति ॥ गौतमादिभिरित्यर्थः ॥ उक्तंहि कौर्मे पूर्वखण्डे सप्तविंशेऽ-
ध्याये श्रीकृष्णेन भृग्वादीन्प्रति ॥ द्विषन्तोदेवमीशानं युष्माकं
वंशसंभवाः ॥ शप्ताश्च गौतमेनोर्व्यां नसंभाष्याद्विजोत्तमैः ॥ १ ॥
तत्रैवैकोनत्रिंशेऽध्यायेऽर्जुनं प्रति व्यासेन ॥ कुर्वंति चावताराणि
ब्राह्मणानां कुलेषु वै ॥ देवीशापविनिर्दग्धाः पुरा दक्षाऽध्वरे द्वि-
जाः ॥ १ ॥ निन्दन्ति च महादेवं तमसाऽऽविष्टचेतसः ॥ वृथाधर्मं
चरिष्यन्ति तस्मिन्काले युगान्तके ॥ २ ॥ येचाऽन्ये शापनिर्दग्धा-
गौतमस्य महात्मनः ॥ सर्वेतेऽवतरिष्यन्ति ब्राह्मणास्तासु योनिषु ॥
॥ ३ ॥ इत्याद्युक्तोक्तम् ॥ मोहयन्ति जनान्सर्वान्दर्शयित्वा फला-

नि वै इति ॥ कौर्मे पूर्वखण्डएव दक्षं प्रति दधीचेन ॥ भविष्यन्ति त्रयीबाह्याः सर्वेऽपीश्वरविद्विषः ॥ निंदन्तोहीश्वरं मार्गं कुशास्त्राऽऽसक्तचेतसः ॥ १ ॥ मिथ्याऽधीतसमाचारामिथ्याज्ञानप्रलापिनः॥ प्राप्य कलियुगं घोरं कलिजैः परिपीडिताः ॥ २ ॥ त्यक्त्वा तपोबलं कृत्स्नं गच्छध्वं नरकान्पुनः ॥ भविष्यति हृषीकेशः स्वाश्रितोऽपि पराङ्मुखः ॥ ३ ॥ ये ये शापाऽग्निनिर्दग्धादधीचस्य महर्षयः ॥ द्विषन्तोमोहितादेवं संभूतास्ते कलिष्वथ ॥ ४ ॥ इत्याद्युक्त्वा त्यक्त्वा तपोबलं कृत्स्नं विप्राणां कुलसम्भवाः ॥ इतिचोक्त्वा कल्पान्ते रौरवादिषु निपात्यमानाः कालेनेत्युक्तम् ॥ तत्र द्विषन्तोदेवम् इत्यत्र लक्षणहेत्वोः क्रियायाइति सूत्रेण लक्षणे हेतौ वा शता अदन्विप्रोन नमनीयः पचन्विप्रोन श्राद्धे भोजनीयइत्यादिवत् ॥ तेन शिवद्वेषः शप्तानामेकं लक्षणमुक्तम् ॥ द्वेषस्याऽसंभाव्यत्वहेतुत्वं तु स्पष्टमेवोक्तम् ॥ द्वेषोऽप्रीतिः कलिमलहर्त्तरि श्रौतधर्मवक्तरि च तस्मिन्ननभिरञ्जनम् ॥ निन्दन्तीत्यादिलट्प्रयोगआर्षः ॥ अनेन तेषां द्वितीयं लक्षणमुक्तम् ॥ निन्दा चाऽविद्यमानदोषकथनम् ॥ तच्च शिवोमोहनायाऽवतीर्णइत्येवं शुद्धाऽद्वैतमार्त्तण्डटीकाविद्वन्मण्डनाद्युक्तरीत्या प्रलपनम् ॥ तन्निन्दाफलं धर्माऽऽचरणस्य वृथात्वम् ॥ त्रयीबाह्यत्वं नाम त्रयीतदर्थग्रहणाऽयोग्यत्वं ॥ कथंचित्तद्ग्रहणेऽपि तत्फलानर्हत्वं च ॥ मूर्खत्वाच्छूद्रवदनधिकाराच्च ॥ तत्राऽपि सर्वेऽपीश्वरेत्यादिनैकोहेतुर्लक्षणं चोक्तम् ॥ भागवतेऽपि यएतन्मर्त्यमुद्दिश्य भगवत्यप्रतिद्रुहि ॥ द्रुह्यत्यज्ञः पृथग्दृष्टि स्तत्त्वतोविमुखोभवेदित्युक्तम् ॥ तत्त्वं तु वेदार्थएव ॥ ऐश्वरमार्गश्चाऽत्रेशसंमतश्रुत्यर्थवर्णनरूपएव ॥ तन्नि-

न्दयैव त्रयीबाह्यतायायुक्तत्वात् ॥ योयं निन्दति सतद्वेष्योभवतीति न्यायाऽऽनुकूल्यात् ॥ अस्य वाक्यस्याऽपि कौर्मस्थत्वेनोक्तविधशङ्करनिष्ठोपदेष्टृत्वबोधककौर्मवाक्यैः प्रत्यासत्त्याऽत्रापि शिवनिन्दायाः प्रसङ्गेन चोक्तविधमार्गग्रहणस्यैव युक्तत्वाच्च ॥ ईश्वरसंमतमार्गनिन्दाऽपि त्रय्यनधिकारस्यहेतुर्लक्षणंच ॥ शप्तानां त्वियं तृतीयं लक्षणम् ॥ कुशास्त्रमपि उक्तविधेश्वरमार्गभिन्नमार्गरूपं ॥ प्रकरणस्वारस्यात् ॥ एवं मिथ्याऽधीतसमाचारत्वमपि शङ्कराऽनभिमताऽधीतसमाचारत्वं ॥ मिथ्याज्ञानप्रलापित्वमपि शिवाऽनभिमतज्ञानप्रलापित्वमेव ॥ शप्तानामिदमपिलक्षणत्रयम् ॥ ननु वैष्णवानां नः कथं नरके पातोविष्णोरक्षायां समर्थत्वादतआह ॥ भविष्यतीति ॥ सत्यं तस्याऽस्तितत्र सामर्थ्यं सोऽपि चेत्पराङ्मुखस्स्यात् कस्तर्हि त्रातेतिभावः॥ स्वाश्रितोऽपीत्यपिशब्देन कथंचिदाश्रितस्य ग्रहणम् नत्वनाश्रितस्य ॥ तथाभूतस्य पराङ्मुखतायाः प्राप्तत्वेन तत्कथनस्य निष्फलत्वापत्तेः ॥ सुशब्दस्वारस्यभङ्गापत्तेश्च एवञ्च तादृशानां ॥ सम्यग्विष्णोराश्रयणमेव न संभवति ॥ यदि केषांचित्तत्स्यात्तथाऽपि सपराङ्मुखोभविष्यतीत्यपिना सूचितम् ॥ तथाच विष्णोस्सम्यगसम्यग्वा यदाश्रयणं तत्तेषां सप्तमं लक्षणम् ॥ परंतु इदं लक्षणमितरस्य कस्यचित्संदिग्धस्याऽपि सत्त्वे एव शप्तत्वनिर्णायकम् ॥ मुक्तिभुक्तिसाधनविष्णुभक्तिमात्रस्य तल्लिङ्गतायावक्तुमनुचितत्वात् ॥ विष्णोः पराङ्मुखता शिवद्वेषादेः फलम् ॥ एवंच शापेन चेतसि तमसः प्रवेशः तासुयोनिषुकलौजन्मच तमःप्रवेशेनमोहः तेनपरस्त्र्यासक्त्यादिप्रयुक्तकलिजपापपरिपीडितत्वम् कुशास्त्राऽऽसक्तचेतस्कताच तयामिथ्याऽधीतसमा-

चारता मिथ्याज्ञानप्रलापिता शिवद्वेषः शिवनिन्दा शिवोक्तवेदार्थनिन्दा ऐहिकाऽऽमुष्मिकानांफलानांबोधनेनजनमोहकत्वंच मिथ्याऽधीतसमाचारत्वादिभिश्चयथायथंब्राह्मणैरसंभाष्यत्वं धर्माचरणस्यवृथात्वं तपोबलहानिस्त्रयीबाह्यत्वं विष्णोःपराङ्मुखत्वं ततोनरकेपातइति॥ नच नहि निन्दा निन्द्यं निन्दितुं प्रवृत्ता किन्तु स्तुत्यं स्तोतुमिति न्यायेन शप्तविप्रनिन्दायां नैतत्तात्पर्यमिति वाच्यं॥ तत्रतत्र स्तुत्यन्तराऽभावेनैतन्न्यायाऽनवतारात्॥ किञ्च शापादिविषयेऽपि तन्न्यायाऽवतारे पुराणकथानां बहुविप्लवः स्यादितिदिक्॥ अत्र ब्राह्मणैरित्युपलक्षणं तेन देव्या शप्तैरित्यपि बोध्यम्॥ अत्रचेदानीम्पदमध्याहृत्य पुरा ब्राह्मणैरिति पदद्वयमावर्त्यैत्थं व्याख्येयम्॥ पुरा पूर्वजन्मनि ब्राह्मणैस्तत्रैव ब्राह्मणैः शप्तैरिदानीं विप्रकुलोद्भवैरिति॥ अनेनेदानीं विप्रकुले जन्मसत्वेऽपि ब्राह्मण्यनियमोनेति सूचितम्॥ अतएव कौर्मे विप्राणां कुलसम्भवाइति तासु योनिषु इतिचोक्तम्॥ माप्रच्याविषतेति॥ मोहयन्तिजनानिति कौर्मवाक्येन तेषां मोहनसामर्थ्यस्याऽवधारणात्॥ तान्प्रतीति॥ नरान्प्रतीत्यर्थः॥ एतेन शप्तानामसंभाष्यत्वं सूचितम्॥ तत्र मानन्तु द्विषन्तोदेवमित्यादिकौर्मवाक्यमुदाहृतमेव॥ ३॥ नच वैष्णवग्रन्थेषुधृतेन मात्स्यं कौर्मं तथा लैङ्गं शैवं स्कान्दं तथैवच॥ आग्नेयं च षडेतानि तामसानि निबोध मे॥ १॥ इति पाद्मोत्तरखण्डवाक्येन कौर्मस्य तामसतया सात्विकामोक्षदाः प्रोक्ताराजसाः स्वर्गदामताः॥ तथैव तामसादेवि निरयप्राप्तिहेतवः॥ १॥ इति तत्रधृतेन पाद्मवाक्येन तामसस्य निरयहेतुत्वेन च शिष्टैस्तदुक्ताऽर्थस्याऽग्राह्यत्व-

मिति वाच्यं॥लिङ्गार्चनचन्द्रिकादिशैवग्रन्थधृतेन तत्र शैवानि शैवं च भविष्यञ्च द्विजोत्तमाः॥मार्कण्डेयं तथा लैङ्गं वाराहं स्कान्दमेवच॥ मात्स्यमन्यत्तथा कौर्मं वामनं च मुनीश्वराः॥ब्रह्माण्डंच दशेमानीति ब्राह्मं पाद्मं ब्रह्मणो द्वे इतिचोपक्रम्य पठितेन दशशैवपुराणानि सात्विकानिविदुर्बुधाइत्यनेन ब्राह्मे तुराजसे वैश्यसेव्ये इत्यनेनच स्कांन्दवाक्येन सात्त्विकतया निश्चितस्य कौर्मस्य राजसतया निश्चितेन पाद्मेन शिष्टाऽनादेयार्थकताया वक्तुमशक्यत्वात् ॥ अतएव वैष्णवग्रन्थधृतेन वैष्णवं नारदीयं च तथा भागवतं शुभम् ॥ गारुडं च तथा पाद्मं वाराहं शुभदर्शने ॥ १ ॥ षडेतानि पुराणानि सात्विकानि मतानिमे इतिपाद्मेनैव सात्त्विकतयोक्ते नारदीये एतत्कूर्मपुराणं तु चतुर्वर्गफलप्रदम् ॥ पठतां श्रृण्वतां न्दृणां सर्वोत्कृष्टगतिप्रदम् ॥ १ ॥ इत्यादिनोक्तःकौर्मपुराणतच्छ्रवणादिमहिमासंगतस्तस्य तामसत्वेतुसनसङ्गच्छेत ॥ येषां श्रवणमात्रेणेति वक्ष्यमाणतदध्यायोपक्रमवाक्यविरोधात् ॥ तामसस्य निरयप्राप्तिहेतुत्वाच्च ॥ एवञ्च पुराणनिन्दावाक्यं पाद्मे प्रक्षिप्तमेव ॥ किञ्च पाद्मे मात्स्यमपि तामसेष्वेव गणितं ॥ तत्र सात्विकेषु गणिते भागवते तु मात्स्यमुपक्रम्य पुराणं वेदसंमितमित्युक्तम् ॥ अतएवाऽस्य महतोभूतस्य निश्वसितमेतद्यदृग्वेदोयजुर्वेदः सामवेदोऽथर्वाङ्गिरसइतिहासपुराणं विद्योपनिषदइत्यादिना बहुषु स्थलेषूपनिषत्सु सामान्यतोवेदवत्पुराणानामपि ब्रह्मनिश्वसितत्वादिश्रूयते ॥ अतएवच पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः॥वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दशेति याज्ञवल्क्यस्मृतावविशेषेण पुराणानां विद्याधर्मयोः स्थानत्वमुक्तम् ॥ अतएव सात्त्विकतया

त्वदभिमते नारदीयेऽष्टादशानामपि प्रत्येकं महिमा वर्णितः॥तत्सर्वञ्च तादृशवाक्यस्य प्रामाणिकत्वे न संगच्छते॥अतएव पाद्मे वङ्गदेशजकायस्थविशेषेण प्रक्षेपः कृतोऽस्तीति विदुषां किंवदन्ती संगता॥ अतएव व्यासवाक्येषु नविश्वासोच्छेदः॥प्रक्षेपकर्त्ता मूर्खइत्यपिभाति॥ अतएव तथैव स्मृतयः प्रोक्ताऋषिभिस्त्रिगुणान्विताः॥ सात्त्विकाराजसाश्चैव तामसाः शुभदर्शने॥ १॥ वासिष्ठं चैव हारीतमिति तदीयसर्वपुस्तकस्थपाद्मपाठे लिङ्गनियमो न दृश्यते॥ अग्रेपि भारद्वाजं काश्यपं च सात्त्विकामोक्षदाः शुभाः इत्यादिना स्मृतीनां क्लीबत्वेन निर्देशः सात्त्विकराजसतामसशब्दानां पुल्लिङ्गेनैव निर्देशोऽस्ति॥ एवञ्च स्थालीपुलाकन्यायेन विज्ञानभिक्ष्वादिधृततदध्यायस्थश्लोकान्तरोक्तशास्त्रान्तरनिन्दापि हेयैव॥ प्रधानकारणवादाद्यप्रामाण्यं तु व्यासादिदर्शितप्रकारान्तरेण बोध्यम्॥ तस्माद्येषु पुराणादिषु विदुषां प्रक्षेपसंभावना प्रमाणांन्तरविरुद्धांऽशोपलब्धिर्वा तेषु प्रमाणान्तरविरुद्धांऽशोहेयएव अंशान्तरं तु सतिसंवादे ग्राह्यम्॥ एवञ्च लिङ्गार्चनचन्द्रिकादिधृतस्कान्दवाक्यस्याऽपि यदि प्रक्षिप्तत्वमुच्यते नारदादिपुराणान्तरविरोधात्तर्ह्यपि न नोविद्वेषः॥ यत्तु स्तुतिनिन्दारूपद्विविधवाक्यदर्शनेन कश्चिदंशोहेयः कश्चिद्ग्राह्यइति॥ तन्न॥ स्कान्दवाक्ये शैवेतरांऽशनिन्दायां पाद्मवाक्ये वैष्णवेतरांशनिन्दायां च तात्पर्येण बहुविप्लवापत्तेः॥ अतात्पर्यविषयहानोपादानस्वीकारस्तु न युक्तोनिर्मूलत्वात्॥ पाद्मवाक्यानामत्यसंगत्या तद्विरोधस्याऽकिञ्चित्करत्वाच्च॥ नहिनिन्दानिन्द्यमितिन्यायेनाऽपि न पाद्मवाक्यमुदाहरतांसंतोषसंभावना॥ शृणु देवि प्रवक्ष्यामि ता-

मसानि यथाक्रमम् ॥ येषां श्रवणमात्रेण पातित्यं ज्ञानिनामपि इत्युपक्रम्य निन्दायामेव समाप्त्या स्तुत्यलाभादितिदिक् ॥ सहस्रेक्षण इन्द्रस्तत्सादृश्यं त्वस्य ग्रन्थस्य सयुक्तिकवेदान्तवाक्यरूपमेघैः शुद्धाऽद्वैतमार्त्तण्डस्य तिरस्कारेण तादृशमेघोद्भूतभङ्ग्यन्तररूपवज्रेण विद्वन्मण्डनस्य चूर्णीकरणेनचेति ग्रन्थान्तेवक्ष्यते किञ्च सहस्रेक्षणोविष्णुः सहस्राक्षःसहस्रपादितिश्रुतेः समया तदर्थं ज्ञाप्यइमे नरारक्ष्यन्तामिति प्रार्थ्यः इति वाक्यान्तरकल्पनयाऽऽदृत्यादिनाऽर्थइति विष्णोः स्मृत्याच मङ्गलम् ॥ १ ॥ ४ ॥

नानात्वेऽपिच शप्तविप्रवचसां जिज्ञासया कस्य चिच्छुद्धाद्वैतनिरूपणं प्रथमतः संखण्ड्यतेऽत्राऽपि तु ॥ शुद्धाद्वैतमतोष्णरश्मिरवरे प्रायेण टीकायुतो भागेऽन्यत्र तथैव वाल्लभिकृतं विन्मण्डनं खण्ड्यते ॥ २ ॥

ननु गौतमादिशप्तविप्रवचांसि शुद्धाऽद्वैतविशिष्टाऽद्वैतद्वैतभेदाऽभेदतदवान्तरभेदैर्विभिन्नानां मिथ्याज्ञानानां प्रलापरूपाणि नानोपलभ्यन्ते तथाच कथं मतान्तराणि विहाय शुद्धाऽद्वैतमतमेव खण्ड्यते इत्यतआह ॥ नानात्वेऽपीति ॥ कस्यचित् भावनगरवासिनोनागरस्य संतोषरामशर्मणः जिज्ञासया खण्डनज्ञानेच्छया अत्रापि शुद्धाऽद्वैतमतखण्डनेऽपि अवरे पूर्वभागे टीकायुतः सटीकः शुद्धाद्वैतमतोष्णरश्मिः शुद्धाऽद्वैतमार्त्तण्डः कस्यचिज्जिज्ञासयेतीहापि संबध्यते प्रायेण बाहुल्येन खण्ड्यते ॥ अन्यत्र उत्तरभागे

तथैव सटीकं प्रायेणच विन्मण्डनं विद्वन्मण्डनं ॥ मार्त्तण्डशब्दं विहायोष्णरश्मिशब्दोपादानमुक्तरीत्या मोहकत्वेन तन्मताऽऽश्रयिणां संतापएवफलमितिबोधनाय ॥ वल्लभशब्दस्य नानार्थकोशेषु अश्वाऽध्यक्षादिवाचित्वकथनात्तदपत्यस्याऽपि तद्वत्साधारणजनतायास्तत्कृतग्रन्थस्यान्धेषु काणोराजेतिन्यायेन तादृशेषु येविद्वांसस्तन्मण्डनतायाश्च बोधनाय वाल्लभिकृतमिति विन्मण्डनस्य विशेषणं दत्तम् ॥ अस्मिन्ग्रन्थे क्वचित्सटीकैतद्ग्रन्थद्वयस्योक्तिभ्योऽन्याउक्तयोऽपि खण्डिताः क्वचित्तु नैयायिकादिमतदूषणपरास्संरम्भेण प्रवृत्त्या प्रपञ्चमात्रपराश्च तदुक्तयः प्रयोजनाऽभावादुपेक्षया नखण्डिताइति आधिक्यन्यूनतयोः परिहाराय प्रायेणेत्युक्तम् ॥ ५ ॥ तत्रतावच्छुद्धाऽद्वैतमार्त्तण्डोक्तः शुद्धाऽद्वैतपदार्थोऽसंगतः॥ तथाहि द्विधा ज्ञानं तु यत्तत्स्यान्नामरूपात्मना मुहुः ॥ ईशजीवात्मनावाऽपि कार्यकारणतोऽथवा ॥ द्वीतं तदेव द्वैतं स्याददैतं तु ततोऽन्यथा इति शुद्धाद्वैतपदार्थउक्तः॥ तट्टीकाकृता तु ये गत्यर्थकास्ते ज्ञानार्थकाइति न्यायेन गत्यर्थकादिण्धातोर्भावे क्ते इतमितिसिद्धौ द्विधा इतं द्वीतं तस्मात्स्वार्थेऽणि द्वैतमिति निष्पन्नं॥ तस्य च द्विप्रकारकं ज्ञानमित्यर्थः ॥ अन्यथा भेदज्ञानाऽभावोनद्वैतम् अद्वैतमिति व्याख्यातम् ॥ अग्रे एतन्मते सुनिष्पन्नं सांकर्यक्षयकारणम् ॥ तन्निवृत्त्यर्थमाचार्यैः पदं शुद्धं विशेषितम् ॥ शुद्धाऽद्वैतपदे ज्ञेयः समासः कर्मधारयः ॥ अद्वैतं शुद्धयोः प्राहुः षष्ठीतत्पुरुषं बुधाः ॥ मायासंबन्धरहितं शुद्धमित्युच्यते बुधैः ॥ कार्यकारणरूपंहि शुद्धं ब्रह्म नमायिकम् ॥ इत्युक्तम् एतदपि तट्टीकाकृता एतन्मते शङ्कराचार्यमते अविद्याऽवच्छिन्नचैतन्यं

कार्यं मायाऽवच्छिन्नचैतन्यं कारणमिति साङ्कर्यं ॥ तन्निवृत्त्यर्थं साङ्कर्यनिवृत्त्यर्थं ॥ कर्मधारयइति ॥ शुद्धं च तदद्वैतमिति विग्रहः ॥ नचाऽद्वैते सति साङ्कर्याऽभावः स्पष्टएवेति शुद्धपदमपार्थकमितिवाच्यं ॥ परेषां मते पूर्वं साङ्कर्यं ततोऽद्वैतं मन्मते तु सदैव शुद्धत्वमिति ज्ञेयम् ॥ अतएव स्पष्टतयाबोधार्थं षष्ठीतत्पुरुषमाहुरित्यादिना व्याख्यातम् ॥ तन्न युक्तम् समासद्वयस्याऽप्यसंगतेः ॥ तथाहि ॥ स्वसम्मततयोपन्यस्ते कर्मधारयपक्षे तावच्छुद्धपदार्थमायासंबन्धरहितकार्यकारणात्मकस्य ब्रह्मणोऽद्वैतपदार्थेन भेदज्ञानाभावेनतादात्म्यस्य बाधादसंगतिः ॥ किञ्च नीलघटादिसमासघटकनीलादिपदैरनीलादिघटस्येव शुद्धाऽद्वैतसमासघटकशुद्धपदेनाऽशुद्धाऽद्वैतस्य व्यावृत्तेर्वाच्यतया तादृशस्य तव मतेऽप्रसिद्धत्वेन व्यावर्त्याऽलाभः ॥ एतेनाऽहंताममतापाशस्य मायाकृततायाअत्रैव टीकाकृतोक्तत्वेन मायासंबन्धस्य तन्मतेऽपि संभवात्तद्युक्तएवाऽशुद्धइति सएव व्यावर्त्य इतिपरास्तं ॥ जीवस्याऽशुद्धत्वेऽप्यद्वैतपदार्थस्य तत्वाऽभावात् ॥ मायायाअपि भगवच्छक्तितया ततोऽभिन्नत्वेन न परमतवन्मायासंबन्धः ॥ किञ्चाऽध्यासएव मायिकोनजीवइति तेनैवोक्तत्वेन मायायास्तत्संबन्धिनोवाऽशुद्धत्वस्य वक्तुमशक्यत्वाच्च ॥ मायाकार्याऽहंताद्यध्यासस्य कथंचिदशुद्धत्वेऽपि तद्विशिष्टस्य जीवस्य तन्मतेऽशुद्धत्वाऽभावाच्च ॥ तद्व्यावृत्तेस्तदुक्त्यैव तदसंमतत्वप्रतीतेश्च ॥ अन्यथाहि द्वैतापत्तिः ॥ सर्वं खल्विदमित्यादिश्रुतिविरोधश्च ॥ एतेन शङ्कराचार्यवदद्वैतं न मम संमतमिति बोधनमेवेतरनिवृत्तिरिति प्रत्युक्तम् ॥ अन्वयासम्भवव्यावर्त्याऽलाभयोर्दर्शि-

त्वात् ॥ किञ्चैवमद्वैते शुद्धत्वं विधीयतइत्यायाति एवञ्चैक- प्रसरताभङ्गभयादपि नसमासोपपत्तिः ॥ एवञ्च ननु अद्वैतपदस्य तदुक्तार्थत्वे भवत्वन्वयानुपपत्तिर्नास्ति द्वैतं यस्मिन्नित्यर्थकत्वे तु नसेत्यप्यपास्तम् ॥ एकप्रसरताभङ्गप्रसङ्गात् ॥ अशुद्धाऽद्वैताभावेन व्यावर्त्यालाभाच्च ॥ किञ्च शङ्कराचार्यमतेऽद्वैतज्ञानात्पूर्वमपि ब्रह्म- णः शुद्धत्वमेव ॥ त्वन्मते स्वाभिन्नायामायायाः संबन्धोऽस्ति तन्मते तस्याअपि मिथ्यात्वेन सोऽपि नेति तन्मते एव शुद्धाऽद्वैतं स्यात् ॥ एवञ्चैतन्मते इत्याद्यसंगतं ॥ साङ्कर्यस्य तन्मतेऽभावात् ॥ एवं शुद्धयोस्तत्त्वंपदार्थयोस्तन्मतेऽद्वैतसत्त्वेन षष्ठीतत्पुरुषपक्षेऽपि शङ्क- राचार्यमते शुद्धाऽद्वैतपदसंगतिः ॥ त्वन्मतेतु तत्पक्षे उक्तविधशुद्ध- पदार्थस्य संबन्धः केतिवाच्यं ॥ भेदेवा तज्ज्ञानेवा तज्ज्ञानाऽभा- वेवा ॥ नाद्यः ॥ अप्रसिद्धेः ॥ नहि ते शुद्धब्रह्मसंबन्धी भेदः प्रसि- द्धः ॥ सामर्थ्याऽभावेन समासाऽभावप्रसङ्गाच्च ॥ अतएव न द्वि- तीयः ॥ नहि देवदत्तस्य यद्घटज्ञानं तदभावोयज्ञदत्ते इत्यर्थे देवद- त्तस्याऽघटज्ञानं यज्ञदत्ते इति विज्ञाः प्रयुञ्जते ॥ किञ्च शुद्धस्य भेदज्ञानेन कः संबन्धः ॥ नतावद्विषयिता ॥ तवाऽप्रसिद्धेः ॥ भ्र- मात्मकस्याऽपि तस्य सत्त्वे त्वत्संमतस्य शुद्धाऽद्वैतस्याऽसिद्धेश्च ॥ नहि तत्सत्त्वे तन्निषेधः कर्त्तुं शक्यः ॥ किञ्चेदमेव शङ्कराचार्याः स्वीकुर्वन्ति यद्ब्रह्मणोघटादिविषयकमिथ्याज्ञानविषयत्वं तच्चेत्त्व- मपि स्वीकुर्यास्तर्हि कर्मधारयपक्षे स्वमतेन सहैव तन्मतंव्याव- र्त्तयेः ॥ नाप्याश्रयाश्रयिभावः ॥ ज्ञानस्य सत्यत्वे भेदसिद्धेः ॥ असत्यत्वे ईश्वरस्य भ्रान्तत्वापत्तेः ॥ नापि तृतीयः ॥ तत्राऽनुयो गितयाऽन्वये सप्तमीप्रसङ्गात् ॥ त्वत्संमतार्थासिद्धेश्च ॥ प्रतियोगि-

तया तु नान्वयसंभवः ॥ भेदज्ञानस्य तथान्वितत्वात् ॥ किञ्च शुद्धप्रतियोगिकोऽद्वैतप्रतियोगिकोऽभावइत्यर्थे का तवेष्टसिद्धिरिति संक्षेपः ॥ २ ॥ ६ ॥

ईशानः सृजतीच्छयैव यदि तां केनाऽऽत्मनाऽऽत्माश्रयान्नान्येष्ट्यापिभयात् श्रुतिस्मृतिगणैरिच्छोद्भवः कालतः ॥ उद्बुद्धाज्जनकर्मणोबत तथाऽविद्याख्यमायावशात् हेतुत्वं च परस्य लक्षणमिदं शास्त्रेन्दुवद्वाऽन्यगम् ॥ ३ ॥

अथ रमणार्थमिदं सर्वं ब्रह्मैव स्वेच्छयाऽभवदिति शुद्धाऽद्वैतमार्त्तण्डोक्तमीश्वरेच्छामात्रस्य जगद्धेतुत्वं खण्डयति ॥ ईशानःसृजतीति ॥ एवकारेण कर्मादिव्यावृत्तिः ॥ तत्र यदीश्वरेच्छा नित्या स्यात्तदा सर्वदा सर्वं कार्यं स्यात्तस्य च सर्वे भावविकाराः स्युः ॥ एकस्याअपीच्छायाः प्रतिवस्तु कालभेदेनाऽऽकारस्य धर्मस्य वा भेदकल्पने तु लोकविरोधः ॥ लोके ज्ञानादिवदिच्छायाअपि अनुभवबलेन समानविषयकत्वेन स्थित्यङ्गीकारात् ॥ तत्र लौकिकेच्छातोऽत्यन्तवैलक्षण्येऽपीच्छाशब्दप्रयोगस्त्वादिचोर्वृद्धिशब्दप्रयोगइव पारिभाषिकःस्यात् ॥ स्याद्वेच्छाशब्दस्य नानार्थता ॥ सोऽकामयतेति श्रौतव्यवहारस्य तथाप्युपपत्तेः ॥ तस्यानित्येच्छापक्षपरतायावक्ष्यमाणत्वाच्च ॥ किञ्च तदाकारास्तद्धर्मावा यावन्तः कल्प्यन्ते तावत्यइच्छाएवकल्प्यन्तां नतुएकामिच्छाम्प्रकल्प्य तदाकारादयः ॥ इच्छाकल्पनायाआधिक्यात् ॥ इच्छैवच धर्मपदेनोच्यतां ॥ तस्याइच्छाश्रयधर्मत्वात् ॥ एतेन धर्मकल्पनातोधर्मि-

कल्पनायागुरुत्वान्नेच्छावहृयः कल्प्यन्तइतिप्रत्युक्तम् ॥ वचनमात्रेण गौरवादिव्यवस्थायाअसिद्धेश्च ॥ नह्यसति यौक्तिकगौरवे धर्मिकल्पनात्वेनैव गौरवम् ॥ मानाभावात् ॥ नचेदृशी श्रुतिः स्मृतिर्वा काचिदस्ति यद्बलात्सत्यपिगौरवे बहुधर्मानुगतैकेच्छाऽऽश्रीयेत ॥ एवंच नित्येच्छायास्तैस्तैः सृज्यमानैः संबन्धमात्राङ्गीकारपक्षोपिनिरस्तः ॥ अनुत्पन्नेन पदार्थेन तदाविर्भावेन वा इच्छायाःसंबन्धाऽयोगात् ॥ समानविषयतयैवोपक्षयेण विरम्यव्यापाराभावाच्च ॥ अन्यथा लाघवेन जीवेच्छानामपि नित्यत्वप्रसङ्गात् ॥ नच जीवेच्छानां न नित्यत्वमनुभवेनोत्पत्तिनाशयोः सिद्धत्वादिति वाच्यम् ॥ ईश्वरेच्छायाअपि सोऽकामयतेत्यादिश्रुत्योत्पत्तिनाशयोः सिद्ध्यानित्यत्वस्य वक्तुमशक्यत्वात् ॥ ईश्वरेच्छायामुत्पत्तिनाशयोर्व्यपदेशस्य संबन्धोत्पत्तिनाशाभ्यां स्वीकारे तु जीवेच्छायामपि तयोरनुभवस्ताभ्यां स्वीक्रियेतेति समानम् ॥ किञ्च लाघवमात्रेण श्रुत्यर्थस्यौपचारिकत्वस्वीकारे स्वमादेरप्यनित्यत्वाऽसिद्धिः ॥ कश्चायमिच्छाविषययोस्त्वन्मते संबन्धः ॥ किं स्वरूपात्मक उत तद्भिन्नः ॥ आद्येऽपि किमिच्छास्वरूपात्मक आहोस्विद्विषयस्वरूपात्मकः ॥ नतावदाद्यः ॥ इच्छायानित्यत्वेन तस्य नित्यत्वानपाये उक्तदोषाऽनिस्तारात् ॥ संबन्धत्वरूपेणेच्छायाअप्यनित्यत्वे तु तदीयनित्यरूपमजागलस्तनायमानमेव ॥ अनित्यरूपस्य स्वीकृतत्वेन गौरवाऽनपायात् ॥ किञ्च स्वरूपस्य संबन्धत्वसम्भवे संयोगादिर्व्यर्थः स्यात् ॥ एतेन संबन्धस्य विषयस्वरूपत्वमपि निरस्तम् ॥ घटादेस्तदाविर्भावस्य वाऽनुत्पत्तिदशायां तत्स्वरूपाऽभावेनेश्वरस्य तदिच्छाऽनुपपत्तेश्च ॥ नाप्युभयभिन्नः संबन्धः ॥ नि-

र्वक्तुमशक्यत्वात् ॥ किञ्च तस्याऽपि संबन्धान्तरकल्पनायामनव-
स्था ॥ समवायाभ्युपगमाच्च साम्यादवस्थितेरितिन्यायात्॥ ममतु
तत्तद्विषयाऽऽकारोमायायावृत्तिविशेषईश्वरेच्छा तस्याश्च तत्त-
द्विषयाऽऽकारतैव तत्तत्संबन्धव्यपदेशप्रयोजिका एवमन्तःकरण-
वृत्तिविशेषोजीवेच्छा संबन्धव्यपदेशस्तु पूर्ववज्ज्ञेयः ॥ तथाचेश्व-
रेच्छायाअनित्यत्वे तत्कारणं वाच्यमित्याह ॥ तांकेनेति ॥ तामि-
च्छां केन सृजतीत्यर्थः ॥ ननु तामपीच्छयैव सृजतीतिचेत्किंत-
यैवेच्छयोतान्यया ॥नतावदाद्यः आत्माश्रयप्रसङ्गादित्याह ॥ आ-
त्मनाऽऽत्माश्रयान्नेति॥ आत्माश्रयप्रसङ्गदात्मना नसृजतीत्यर्थः ॥
नद्वितीयः ॥ अनवस्थापत्तेः ॥ एकैककार्यार्थमेकैकाऽनादीच्छा-
सन्ततेः कल्पनेऽनन्तकार्यार्थमनन्तेच्छासन्ततीनां कल्पनेऽत्यन्तगौ-
रवाच्चेत्याहान्येष्ट्यापिभयादिति ॥ अपिशब्दबलान्नसृजतीति सं-
बध्यते ॥ भयन्त्वनवस्थादिरूपम् ॥ ७ ॥ स्वमतेऽपीच्छायाः सृष्टि-
हेतुत्वेनाऽनित्यत्वेनच तत्कारणमाह ॥ इच्छोद्भवइत्यादि ॥ काला
दुद्बुद्धाज्जनकर्मणइच्छोद्भवः ॥ कालेन कर्मोद्बोधस्तु संहाराऽव्य-
वहितप्राक्क्षणे भविष्यत्फलकजनकर्मभिरनुद्बुद्धैरेव स्वज्ञानद्वारा
जनितयैतावताकालेन जनकर्माण्युद्बोधयिष्यामीतीश्वरेच्छया ॥
दृश्यतेहि योगिनइच्छायाअपि व्यवहितकाले फलजनकत्वम् ॥
अमुष्मिन्कालउत्थास्यामीति संकल्प्य युञ्जतस्तस्मिन्नेव कालउ-
त्थानदर्शनात्॥ आगन्तुकं कारणमागन्तुककार्येऽपेक्षितमितिन्या-
यसम्भावितमर्थं प्रमाणेन विशिष्य द्रढयितुमाह ॥ श्रुतिस्मृतिग-
णैरिति ॥ निश्चीयतेइतिशेषः ॥ ज्योतिष्टोमेन स्वर्गकामोयजेते-
त्यादिभिः पुण्योवैपुण्येन कर्मणा भवति पापःपापेन साधुकर्मका-

रीसाधुर्भवति पापकर्मकारीपापोभवति पुण्यःपुण्येनकर्मणाभवति पापःपापेन यइहरमणीयचरणाः एषह्येवसाधुकर्मकारयति इत्यादिभिश्चश्रुतिभिः योद्रव्यदेवतात्यागसम्भूतोरसउत्तमः ॥ देवान्संतर्प्यसरसोयजमानंफलेनचेति समवायीतुपुरुषोमोहेच्छाद्वेषकर्मजःइति विपाकःकर्मणांप्रेत्यकेषांचिदिहजायते ॥ इहचामुत्रचैकेषांभावस्तत्रप्रयोजनम् इत्यादियाज्ञवल्क्यादिस्मृतिभिश्च कर्मणां फलहेतुत्वमुक्तम् ॥ जडस्य च चेतनमन्तरा हेतुत्वायोगादीशःकल्प्यते एषएवसाधुकर्मेत्यादिश्रुतिभ्यश्च॥तस्यचेच्छाद्वारैवहेतुता लोकेतथैवदर्शनात् विलक्षणसामग्रीमन्तराकार्यवैलक्षण्यानुपपत्तेश्च ॥ अतएवसोऽकामयतेत्यादिश्रुतीनांसंगतिः ॥ अतएवफलमतउपपत्तेरितिसूत्रंसंगतम् ॥ वस्तुतस्तु लोके राजसेवाचौर्यादेराजतोषरोषद्वारैव हेतुत्वदर्शनादिहाऽपि कर्मभिरीशतोषादिकमेवकल्प्यते ॥ इयमेवयुक्तिःसूत्रउपपत्तिशब्देनोक्ता ॥ एवञ्चाऽन्यथाऽनुपपत्त्या कल्प्यमानमदृष्टमेवफलदानार्हं कल्प्यतामित्यपास्तम् ॥ अस्मन्मतेऽदृष्टस्याऽभावात् ॥ अचेतनस्यतथाकल्पयितुमशक्यत्वाच्च ॥ अतएव वैषम्यनैर्घृण्ये न॥ जीवसुखदुःखेच्छांप्रति कर्मणोहेतुत्वात् ॥ अन्यथा स्वेच्छया कस्मैचित् सुखस्य कस्मैचिद्दुःखस्य दानेन वैषम्यं क्लेशाऽभावकरणसमर्थस्य तदकरणेननैर्घृण्यं चापद्येत ॥ ननुकर्मणः फलजनकत्वे ईश्वरस्य कर्माऽऽधीनतया स्वातन्त्र्याऽभावात्कर्तृत्वानुपपत्तावीश्वरत्वाऽसिद्धिरितिचेन्न ॥ अस्वतन्त्रस्याऽपि देवदत्तः पचति काष्ठानि पचन्तीत्यादौ देवदत्तकाष्ठादेः कर्तृतायादर्शनात् ॥ नच स्वतन्त्रः कर्त्तेतिसूत्रविरोधः ॥ तस्य स्वातन्त्र्येणाविवक्षितोऽर्थःकर्त्तेतितद्व्याख्यातृभिर्व्याख्याततया

तद्विरोधाभावात् ॥ उपादानगोचरज्ञानेच्छाइत्यादिरूपकर्तृत्वस्य सहकारिसमवधानेऽबाधाच्च ॥ अतएव कर्त्ताशास्त्रार्थवत्त्वादित्यधिकरणस्थानि जीवस्य कर्तृत्वप्रतिपादकानि बहूनि सूत्राणि तेषांविषयवाक्यानिच संगतानि ॥ अन्यथासापेक्षतरस्य जीवस्य सुतरां कर्तृत्वाऽभावे तानि नसंगच्छेरन् ॥ अन्यथाच त्वन्मतेऽपीच्छायाः सहकारित्वेनेश्वरस्य कर्तृत्वं नोपपद्येत ॥ नह्यभेदवादिनस्ते इच्छाकर्मणोरभेदेवैलक्षण्यं वर्णयितुं शक्यं येनेच्छासमवधानेनास्वतन्त्रता कर्मसमवधानेत्वस्वतन्त्रता स्यात् ॥ एतेन यत्र कर्मानुसारेण फलदातृत्वमुक्तं तत्राऽपि कर्मकारयितृत्वमीश्वरस्यैव॥ तथाचाहश्रुतिः ॥ एषह्येवसाधुकर्मकारयति तमित्याद्या ॥ एतदनुरोधेन साधुकर्मकारी साधुर्भवतीति श्रुतावपि भगवत्प्रेरणया साधुकर्मकर्तृत्वं बोध्यमिति वैषम्यनैर्घृण्ये इतिश्लोकटीकोक्तं प्रत्युक्तम् ॥ सहकारिसमवधानरहितत्वरूपस्वतन्त्रत्वस्वरूपकर्तृत्वस्येश्वरेसत्त्वे प्रमाणाभावात् ॥ परमेश्वरस्येच्छया साधुकर्म ततउन्नयनमित्यर्थस्य तस्याः श्रुत्याः प्रतीत्या इच्छायाः सर्वत्रहेतुत्वेन कर्म प्रत्यपि हेतुत्वेऽप्यनन्यथासिद्धनियतपूर्ववर्त्तिनः कर्मणः फलहेतुतायादुर्वारत्वाच्च ॥ ईश्वरस्येच्छाद्वारा तदिच्छायावा दृष्टिन्यायेन हेतुत्वमित्यन्यत्रविस्तरः ॥ एवमेव परात्तुतच्छ्रुतेरितिसूत्रं परादीश्वराज्जीवस्य कर्तृत्वमित्यर्थकं लब्धव्यवस्थं बोद्धव्यम् ॥ एतेन वैषम्यनैर्घृण्ये इतिदूषणेद्वेपरेस्थिते ॥ अनादिकर्मचाश्रित्य समाधानेत्वनीशता ॥ अत्राऽपिशाङ्कराःशैवामाध्वारामानुजादयः॥ निम्बार्काभास्कराभिक्षुर्येऽन्येतेदोषसंश्रिताःइतिप्रत्युक्तम् ॥ तट्टी-

कायां दोषशब्देन याऽनीश्वरत्वापत्तिरुक्ता तस्याउद्धृतत्वात् ॥ यत्तु तत्रवैषम्यनैर्घृण्यपरिहारार्थं आत्मसृष्टेर्नवैषम्यं नैर्घृण्यं चाऽपि विद्यते ॥ श्रीमदाचार्यचरणैर्निबन्धइदमीरितम् ॥ श्रीमत्प्रभुवरैर्विद्वन्मण्डनेपिनिरूपितम् ॥ रमणार्थमिदंविश्वमुच्चनीचादिभावतः ॥ आत्मरूपंचकारातोहरिर्यस्माददूषणम् इत्युक्तं ॥ तन्नयुक्तम् ॥ तट्टीकायामात्मसृष्टेरित्येतत्तात्पर्यविषयाऽभेदमात्रस्यैव तादृग्दोषाऽभावे हेतुत्वोक्त्या तावतादोषाऽनुद्धारात् ॥ तथाहि ॥ किमिमे जीवास्ततोऽभिन्नाअपिदुःखंजानन्तिनवा ॥ आद्ये दोषानपायोदुःखानिरासात् ॥ अन्त्येऽनुभवविरोधः ॥ किञ्चात्मनिदुःखोत्पादकआत्महादिरिवेश्वरोनिन्द्येतप्रेक्षावद्भिः ॥ एतेन भैक्षवमतमुपन्यस्य तन्मायावादिविध्वंसध्वस्तप्रायमित्यस्य टीकायां भेदवादेवैषम्यादिदोषाभिधानमपि प्रत्युक्तम् ॥ अभेदवादेप्यनिरस्तत्वात् ॥ यच्च तट्टीकाकारेण विद्वन्मण्डनोक्तं किञ्चिदनूदितम् ॥ कृतप्रयत्नापेक्षस्तुविहितप्रतिषिद्धावैयर्थ्यादिभ्यः प्रपञ्चेनरमणेच्छयाहिभगवान् क्रीडार्थंकृतविविधमर्यादादिरूपप्रयत्नोजन्मकालादारभ्यमोक्षपर्यन्तंविचारितवान् तत्रहि क्रीडैवमुख्याऽन्यत्सर्वमुपसर्जनीभूतं तथाच तदपेक्षोभगवांस्तदनुसारेणैव कारयति यतोविहितस्य यागादेः प्रतिषिद्धस्य विप्रहननादेर्वैयर्थ्यमेवंभवेत् ॥ मर्यादाऽभावेतु ईश्वरस्यैव स्वर्गनरकादिदातृत्वेन विधिनिषेधवैयर्थ्यं भवेदिति ॥ तच्च नसम्यक् ॥ एतादृशसत्यसंकल्पपरमेश्वरसंकल्पस्य दुःखादिप्रयोजकत्वेन परमेश्वरे वैषम्यादेर्दुष्परिहरत्वात् ॥ किञ्च तवैवतत्सूत्रविरोधः ॥ सापेक्षतायाःसूत्रात्स्पष्टंप्रतीतेः ॥ स्वनिर्मितजीवकर्मणामिव स्वनिर्मितविचारादेरपेक्षायामपिसापेक्ष-

त्वानपायात् ॥ सूत्रार्थस्तु जीवकृतप्रयत्नापेक्षइत्यादिः न्यायानुरोधात् नतुविचारितमर्यादापेक्षइत्यादिः मानाऽभावात् ॥ किञ्च तथासतिस्वविचारापेक्षइतिवामर्यादापेक्षइतिवास्पष्टंब्रूयात् ॥ एवं वैषम्यनैर्घृण्ये न सापेक्षत्वात् पत्युरसामञ्जस्यादितिसूत्रद्वयविरोधोपितन्मतेबोध्यः ॥ प्रपञ्चितश्चायमर्थस्तत्रतत्र भगवत्पादैरितिनात्राधिकंप्रयत्यते ॥ तादृशकर्मणामिच्छां प्रतिहेतुत्वं तु ज्ञानद्वारा तदैक्षतेत्यादिश्रुत्या ज्ञानस्याऽपिहेतुत्वात् लोकेऽपिकर्मणां तैर्जाततोषादिकस्य भूपादेर्ज्ञानद्वारैवेच्छां प्रतिहेतुत्वदर्शनाच्च ॥ क्रीडार्थं यथासृष्टिरनुपपन्ना तथावक्ष्यते ॥ ८ ॥ कर्मणांच स्वाऽव्यवहितोत्तरक्षणएव फलाऽनुकूलेश्वरेच्छाजनकत्वाभावेनोद्बुद्धानामेव तथात्वं वाच्यं ॥ तदुद्बोधार्थं च कालविशेषोऽपेक्षितः ॥ अतएव कालःकलयतामहमिति भगवदुक्तं कालस्य कलयितृत्वं संगच्छते ॥ यद्यपिचाऽनेनसामान्येनैव कालस्यहेतुत्वमुक्तं तथाप्यतिप्रसङ्गवारणाय विशिष्यहेतुताकल्पनीया साऽपिकर्मोद्बोधद्वारैव कर्मणामुद्बोधकापेक्षायां तस्याःक्लृप्तहेतुताकेन कालेनैवोपशान्तौ कारणान्तरकल्पनस्याऽयोगात् ॥ इयंच कालतःकर्मणामुद्भवस्यप्रक्रिया अदृष्टकल्पनावादिरीत्यामूलेप्रोक्ता ॥ स्वमतेत्वीश्वरतोषादेः फलोपधायकत्वलक्षणमौत्कट्यं कालेनक्रियते इतिबोध्यम् ॥ यद्वा कर्मशब्देन तज्जन्येश्वरतोषादिकमेवलक्षणयागृह्यते ॥ उद्बोधश्चतादृशमौत्कट्यम् ॥ वस्तुतस्तु कालस्यविशिष्यहेतुत्वकल्पने तादृशसहकार्यभावादेव कालान्तरेफलानतिप्रसक्तौ कर्मणांनोद्बोधकापेक्षा ॥ एवंच कालस्याऽपिसहकारित्वात्सुतरांत्वन्मतेस्वतन्त्रतास्यात् ॥ नचकालईश्वरादभिन्नएव अतएव सदेवसोम्ये द-

मयआसीदितिश्रुतिःसंगच्छते अन्यथाऽवधारणंनसंगच्छेत काल-
स्यतदानींसत्त्वात् अन्यथाऽग्रेपदासंगतेः तथाचकालसत्त्वेऽपिना-
ऽस्मदभिमतस्वतन्त्रताहानिरितिवाच्यम्॥ आत्माश्रयप्रसङ्गात्॥ स-
र्वस्येश्वरभिन्नत्वेन कर्मणांहेतुत्वनिराकणप्रयासनैष्फल्यापत्तेश्च॥
कालोऽस्मिलोकक्षयकृदित्यत्रतु कालशब्देनयमोदानधर्मप्रथमा-
ध्यायोक्तस्तत्सहचारीवाकश्चिद्विवक्षितोनतुक्षणादिरूपः॥ लोक-
क्षयकृदितिविशेषितत्वात्॥ सर्वाऽऽत्मकस्यतस्ययमाद्यात्मकता-
याअविरोधाच्च॥ एवंकालरूपोऽवतीर्णइत्यत्राऽपिबोध्यम्॥ एत-
त्समानाऽर्थत्वलाभात्॥कालःकलयतामितितु विभूतिवर्णनम् अतो
मनआदिष्विवतत्राऽपिपरमात्मदृष्टिमात्रविधितात्पर्यकम्॥ नचैवं-
कालादेरतिरिक्तत्वे सदेवेत्यवधारणविरोधइतिवाच्यम्॥ कल्पित-
स्याऽधिष्ठानाऽनतिरिक्ततयाऽवधारणाऽविरोधात्॥ ९॥ इन्द्रोमा-
याभिःपुरुरूपईयते मायांतुप्रकृतिंविद्यादित्यादिश्रुतिभिः सम्भ-
वाम्यात्ममाययेत्यादिस्मृतिभिश्च मायायाअपिजगद्धेतुत्वं निश्ची-
यतइत्याह॥ तथेति॥ श्रुतिस्मृतिगणैरित्यर्थः॥ ईशानःसृजती-
ति इच्छोद्भवइति चाऽनुवर्त्तते॥ यत्तु अत्रैवशाङ्कराःप्राहुर्मायिकं
नश्वरंजगत्॥ मायासंबन्धतोब्रह्मकारणंनाऽन्यथैवहि इतिश्लोके-
तट्टीकाकारऊचे॥ रूपंरूपंप्रतिरूपोबभूव यत्तस्यरूपंप्रतिचक्षणा-
य इन्द्रोमायाभिःपुरुरूपईयतइति मन्त्रान्माया ज्ञानस्यकारणं
नतुब्रह्मणोबहुस्वरूपत्वस्य अन्यथापूर्वार्द्धएवमायाभिःपुरुरूपोब-
भूवेतिवदेदित्युक्तम्॥ तन्न तथोक्तावपिविधेयभेदेन वाक्यभेदाऽ-
निवारणाच्छब्दगौरवस्य स्पष्टप्रतिपत्त्यर्थत्वेनाऽदूषणत्वात्॥ पुरु-
रूपविज्ञानस्यमायिकत्वे पुरुरूपत्वस्यसुतरांमायिकत्वसिद्धेश्च॥

विवर्त्तवादेदृष्टेरेवस्रष्टित्वात्॥मायिकविज्ञानविषयस्यामायिकत्वा-
सिद्धेः॥ नहिशुक्तिरजतविज्ञानविषयस्य रजतस्यामायिकत्वम्॥
नच तत्रसतएवरजतस्याऽऽविर्भावः सर्वत्रसर्वसत्त्वस्यसत्कार्यवादे-
ऽभ्युपगमादिति नरजतंमायिकमितिवाच्यम्॥आविर्भावस्यदूष-
यिष्यमाणत्वेन सत्कार्यवादासंभवात्॥किञ्च स्वमादेर्मायिकतायाः
स्त्वयोक्तत्वेन तज्ज्ञानेषुमायिकेषुमायिकविषयकत्वदर्शनेनेहाऽपि-
तादृशज्ञानस्यमायिकविषयकत्वंस्यात्॥तत्राऽपिविषयस्याविर्भा-
वाभ्युपगमेत्वपसिद्धांतः॥ किञ्चैवंविज्ञानस्याऽपिस्वाश्रयेसतएवघ-
टादिवदीश्वरेच्छातआविर्भावोपपत्तौ तत्रापिमायिकत्वासित्ध्याप-
त्तिः॥ईश्वरतदिच्छयोर्ज्ञानाकारणत्वे ईश्वरस्य सर्वकारणत्वरूपंस-
र्वात्मकत्वंतदिच्छायाश्चसर्वकारणत्वं नस्यात्॥किञ्च पारमार्थिकवस्तु-
विज्ञानेकृत्नप्रमाणातिरिक्तसामग्र्यपेक्षाभावेन तत्रमायानापेक्ष्येत
तस्मान्निर्विशेषस्यतथाभवनासंभवशङ्कायां तन्निवृत्त्यर्थं वाक्यशेषो-
बहुरूपज्ञानमेवतथाभवनमितिवदन्विवर्तवादमेवपुष्णाति॥पुराणे-
षुतु प्रपञ्चस्यमायिकत्वंबहुशउक्तं तत्तुविदुषांसुविदितमितिनास्मा-
भिरुपन्यस्तम्॥ यत्तु मायिकत्वंपुराणेषुवैराग्यार्थमुदीर्यते इतितद्गु-
रुवाक्यं तत्रोच्यते॥ कथं भूतार्थवादरूपस्यतस्यस्वार्थेतात्पर्याभा-
वउच्यते॥ किञ्च प्रपञ्चस्यवस्तुतोमायिकत्वाभावेत्वदीयसंगतस्त्व-
द्गोष्ठीकुशलोनैतैर्वाक्यैर्वैराग्यभाक्स्यादिति परमतस्थपुरुषाणांबो-
धार्थंतानिवाक्यानीतिवाच्यम् नचतेषांमोक्षाधिकारस्त्वत्संमतइति
तानिवाक्यानिव्यर्थान्यप्रमाणानिचस्युः तस्माच्छ्रौतवाक्यार्थोपबृं-
हकत्वमेवैतेषांवक्तुमुचितम्॥ यत्त्वसतोहेतुत्वादर्शनान्नासतोऽज्ञा-
नस्यकार्यंजगत्सम्भवतीत्याह॥ तन्नयुक्तम्॥ अज्ञानस्यासत्त्वा-

नङ्गीकारात् ॥ नासदासीदितिश्रुतेः ॥ सद्विलक्षणस्यतुकूटकार्षापणस्वप्नादेर्हेतुत्वंदृष्टम् ॥ अतएवमिथ्याभूतस्वप्नहेतुत्वपरा यदाकर्मसुकाम्येषुस्त्रियंस्वप्नेनुपश्यति ॥ समृद्धितत्रजानीयात्तस्मिन्स्वप्ननिदर्शने इतिश्रुतिःसंगता ॥ विस्तरेणचैतदद्वैतसिद्धौस्थितम् ॥ यत्तु षष्ठश्लोकव्याख्यायांतट्टीकाकारेण सन्मूलाःसौम्येमाःप्रजाःसदायतनाःसत्प्रतिष्ठाः कथमसतःसज्जायेत तत्सत्यंयदिदंकिंचित्तत्सत्यमित्याचक्षते इत्यादिश्रुतीरुपन्यस्य असत्यत्वेनज्ञानंत्वासुराणामेव ॥ तथाचगीतायाम् ॥ असत्यमप्रतिष्ठन्तेजगदाहुरनीश्वरमित्युक्तं ॥ तत्र सन्मूलाइत्यादेःसतोजगद्भ्रमाधिष्ठानत्वेननानुपपत्तिः ॥ प्रकृतिमात्रहेतुत्ववादेऽपितस्यभ्रमाऽधिष्ठानताऽऽश्रीयतएवेतिनदोषः ॥ कथमसतःसज्जायेतेत्यस्यास्तु सत्त्वेनाऽप्रतीयमानात्सत्त्वेनप्रतीयमानंकथंजायेतेत्यर्थः ॥ अन्यथा वाचारम्भणंविकारोनामधेयमितिविरुध्येत ॥ वस्तुतस्तु एकआहुरसदेवसौम्येदमग्रआसीत्ततोवैसदजायतेत्युपक्रम्यप्रवृत्तयेयंश्रुतिरसद्धेतुकसत्कार्यवादंखण्डयतीतिभाति ॥ तथाचतद्वादप्राप्तसत्कार्यानुवादेनकारणासत्त्वनिराकरणेतस्यास्तात्पर्यान्नतद्विरोधः ॥ सदितित्वधिष्ठानाभेदमारोप्यस्याह ॥ जगतःसद्विलक्षणत्वस्वीकारेऽप्यसद्विलक्षणत्वस्याऽपिस्वीकारान्नभगवद्वाक्यमस्मन्मतनिन्दापरं किन्तुशून्यवादनिन्दापरम् ॥ अतएवाप्रतिष्ठमित्युक्तम् ॥ अस्मन्मतेतु जगतःसत्प्रतिष्ठत्वमस्ति ॥ तद्वाक्यस्यजगत्सत्यत्वपरत्वेतु वाचारम्भणश्रुतिविरोधः ॥ ननु योविकारःपृथुबुध्नोदरादिःसवाचारम्भणःवाचिकक्रियात्मकोनतुकारणाद्व्यक्तिभेदापादकः ॥यथासुप्तउत्थितउपविष्टेच पुरुषेऽवयवविन्यासभेदोनपुरुषभेदोऽतोनामधेयं का-

रणस्यैवनामधेयं कारणमेवहितत्तदर्थक्रियानिष्पत्त्यर्थं घटशरावा-
दिनाम्नाऽऽहूयतइतिकारणादभिन्नंकार्यंतदाम्रत्तिकेत्येवसत्यं ॥ अ-
न्यथा कार्याभावेन ब्रह्म कस्य कारणंस्यात् ॥ कारणत्वाभावेका-
रणत्ववादिकायतोवाइत्यादिकाःश्रुतयोविरुध्येरन् ॥ यदिविकारे-
वाङ्मात्रतामभिप्रेयाद्वाचारम्भणंविकारोमृत्तिकैवसत्यमितिवदेत् ॥
तावतैवकार्यस्यमिथ्यात्वसिद्धेः ॥ वदतितु नामधेयपदेतिपदाभ्यां-
घटितम् ॥ तेनकारणादभिन्नं कार्यमितितात्पर्यादुक्तएवार्थः ॥
किञ्च वाचारम्भणमितिवाक्यमुपक्रम्याऽग्रे कथमसतःसज्जायेतेति
सदेवसौम्येदमग्रआसीदिति पठितम् ॥ अतएव सूत्रकारइमामे-
वश्रुतिं विषयीकृत्य तदनन्यत्वमारम्भणशब्दादिभ्यइत्यवदत् ॥ अ-
र्थस्तुवाचारम्भणमित्यादिशब्देभ्यस्तदनन्यत्वंकारणानन्यत्वंकार-
णादभिन्नत्वंबोध्यतइति ॥ आत्रादिपदेनेतिपदं नामधेयपदं स-
देवेत्यादिवाक्यानि गृह्यन्तेइतिचेन्न ॥ नतुकारणादित्यर्थस्यलक्ष-
णांविनावाचारम्भणशब्देनाऽबोधात् ॥ नामधेयपदस्यकारणस्यै-
वनामधेयमित्यर्थोऽपिनाऽध्याहारमन्तरासंगतः ॥ कारणमेवही-
त्यादित्वसंगतमेव मृदोघटइतिकथनेनजलाहरणासिद्धेः ॥ तस्मा-
द्वाचारम्भणंविकारइत्यत्रान्यतरस्यान्यतरंप्रतिहेतुत्वम् ॥ इतिश-
ब्दस्यपूर्वत्रान्वयेनइतिमृत्तिकैवेतिव्याख्येयम् ॥ अतोनपदद्वयवै-
यर्थ्यम् ॥ सूत्रआदिपदेनैतदात्म्यमिदंसर्वमित्यादिकारणाभेदबोध-
कं नेहनानास्तीत्यादिचगृह्यते ॥ अनन्यत्वशब्दार्थस्तुअन्यत्वाभा-
वोनतुतादात्म्यम् ॥ प्रमाणाभावात् ॥ सचकार्यस्य मिथ्यात्वात् ॥
अतएवारम्भणशब्दादिभ्यइत्युक्तं नतुसच्छब्दादिभ्यइति ॥ का-
र्यस्याऽसत्त्वेऽपिकारणस्यसत्त्वंतुत्वन्मतेभेदादेरसत्त्वेपितत्कारणस्य-

यथासत्त्वंतथाबोध्यम् ॥ किञ्च स्वानन्यावयवविन्यासान्यतद्वि-
न्यासान्तरानन्यस्यस्वतोऽनन्यतायाअयुक्तत्वेनावयवविन्यासभे-
दोनपुरुषभेदइत्यप्यसंगतम् ॥ अतस्तत्रापितादृग्विन्यासानांकल्पि-
तत्वेनैवपुरुषभेदाभावइतिबोध्यम् ॥ यच्च मायिकतयोभयसंमत-
स्वप्नवैधर्म्यप्रतिपादकस्य वैधर्म्याच्चनस्वप्नादिवदितिसूत्रस्यविरोध-
मुक्तवांस्तच्चनसम्यक् ॥ तथाहि नाभावउपलब्धेरित्यनेनसर्वथा-
बाह्यार्थासत्त्वमभ्युपगच्छतोविज्ञानवादिनोमतस्य खण्डनमुपक्र-
म्य स्वप्नादिष्वन्तरेणाऽप्यर्थंबासनानिमित्तस्यवैचित्र्यस्योभाभ्या-
मभ्युपगम्यमानत्वात्॥ अन्तरेणतुबासनामर्थनिमित्तस्यज्ञानवैचि-
त्र्यस्य मयाऽनभ्युपगतत्वात् ॥ अभावोबाह्यार्थस्येतितदभ्युपगतं-
स्वप्नेसर्वथार्थशून्यत्वमभ्युपगम्य जागरितप्रत्ययेषुतदभाववैधर्म्या-
च्चेत्यनेनाह ॥ एवंच यथास्वप्नेऽर्थशून्यत्वमाश्रीयते तथाजागरि-
तेनाश्रयितुंशक्यम् ॥ वैधर्म्यात् ॥ वैधर्म्यंचजागरितेबाधाभावःस्व-
प्नेबाधः ॥ अस्मद्रीत्यातु अविद्यादशायामेवस्वप्नस्यबाधइतरस्य-
तुनेतिबोध्यम् ॥ एवञ्च कथंतद्विरोधः ॥ स्वाप्नप्रत्ययैःसर्वथासादृ-
श्यस्याऽनिषेधात् ॥ अन्यथा सर्वस्यकथंचित्सर्वसदृशत्वेनअहंता-
दिप्रपञ्चस्यभेदादेरासुरव्यामोहायासत्यस्यैवप्रतीयमानतयाऽभ्युप-
गतस्यप्रभासलीलादेश्च त्वन्मतेपिमायिकत्वेनच तवापितद्विरोधो-
दुर्वारःस्यात् ॥ अहंत्वादिषुव्यभिचारेणसूत्रासंगतिश्च ॥ एतेन मो-
क्षसाधनेप्रवृत्त्यनुपपत्तेश्चेतितत्सूत्रस्थचकारस्यतात्पर्यंवर्णयतष्टी-
काकारस्योक्तिःप्रत्युक्ता ॥उक्ताशयेनविज्ञानवादिनंप्रतिसूत्रस्यप्र-
वृत्तत्वात् ॥ एवंच सर्वनामरूपात्मकंजगन्मायिकमितिसिद्धम् ॥
एतेन अस्तिभातिप्रियंरूपंनामचेत्यंशपञ्चकम् ॥ आद्यंत्रयंब्रह्मरू-

पंमायारूपंद्वयंपरमिति यन्नामरूपयोर्मायिकत्वमुक्तं तदसहमाने-
न जगद्रूपं द्वयं परमिति पाठस्य कथंचित्स्वसंमतत्वप्रतिपादनाय
नामरूपविभेदेनजगत्क्रीडतियोयतइति स्वगुरुसंमतिमुपन्यस्येश्व-
रस्य नामरूपयोः प्रकाशकत्वेन कर्तृत्वान्नामरूपयोरीश्वररूपत्वं
यदुक्तं तदपि निरस्तम् ॥ एतयोर्मायारूपत्वस्य दर्शितत्वात् ॥ अ-
न्यथा पञ्चानामपि ब्रह्मरूपत्वेन त्रयाणां विशिष्य तद्रूपत्वकथ-
नं न संगच्छेत ॥ अतएव विद्वान्नामरूपाद्विमुक्तइतिश्रुतिः संग-
ता ॥ अत्रचोद्देश्यतावच्छेदककालावच्छिन्नत्वस्यौत्सर्गिकस्य वि-
धेये भाननिर्वाहाय ज्ञानसमकालमेव मुक्तिरिति केचित् ॥ एतेन
प्रपञ्चस्याऽज्ञानकार्यत्वे ज्ञानेनाऽज्ञाननाशे तत्कार्यस्य देहादेरस्थि-
त्या जीवन्मुक्त्यनुपपत्तिरित्यपास्तम् ॥ अपरोक्षकल्पपरोक्षज्ञान-
वत्येव जीवन्मुक्तव्यवहारस्य शास्त्रीयस्योपपत्तेः ॥ अज्ञानसंब-
न्धिन्या आवरणशक्तेरेव विद्ययाविरोधः ॥ विक्षेपशक्तेस्तु प्रार-
ब्धनाशसहकृतया तया ॥अवरणनाशाच्चजीवन्मुक्तइत्यादयोऽपि-
पक्षास्तस्यतावदेवचिरंयावन्नविमोक्ष्येऽथसंपत्स्ये अनारब्धकार्ये-
एवतुपूर्वेतदवधेः भोगेनत्वितरेक्षपयित्वाऽथसंपद्यते इत्यादिश्रुति-
सूत्रादिसिद्धाः सिद्धान्तलेशादिषु सोपपत्तिकादर्शितास्तेतु विस्त-
रदिदृक्षुभिस्ततएव द्रष्टव्याः॥ अन्येतु ज्ञानिनोऽदृष्टाभावेऽपि स्वा-
दृष्टैरेव जीवन्मुक्तशरीरादिस्थितिः शिष्यादिभिरेवकल्पिता यथा-
कश्चित्क्षत्रियादिः काश्यां मृतस्तत्पत्नीतु ग्रामान्तरे तत्पादुकादि-
कमादायाऽनुगमनं कृतवती तत्र तस्यायथाशास्त्रं फलोपभोगार्थं
स्वादृष्टेनैव पतिदेहादिकल्पना पत्युस्त्वदृष्टंनास्त्येव मुक्तत्वात् ॥

अत्रहि जन्तोः प्राणेषूत्क्रममाणेषु रुद्रस्तारकं ब्रह्म व्याचष्टे येना- ऽसावमृतीभूत्वा मोक्षीभवतीतिश्रुतेः ॥ एवंजीवन्मुक्ताऽदृष्टाऽभा- वेऽपि परेषामदृष्टैरेव तद्देहादिकल्पनेत्याहुः ॥ अधिकमुत्तरभागे षष्ठखण्डखण्डने वक्ष्यते ॥ एतेनैव भैक्षवमतमुपन्यस्य यदुक्तं त- न्मायावादिविध्वंसध्वस्तप्रायमिति तदेवध्वस्तम् ॥ मायाहेतुवाद- स्य निवारयितुमशक्यत्वात् ॥ अध्यासितुर्वास्तवत्वमध्यास्यस्याऽ- न्यत्रवास्तवत्वंवानाध्यासे प्रयोजकं प्रमाणाभावाद्गौरवाच्च ॥ एव- ञ्च जीवस्योपाधेरवास्तवत्वेऽपि संसारस्याऽन्यत्राऽवास्तवत्वेऽपिच माययाऽध्यस्तत्वरूपस्य मायिकत्वस्य नानुपपत्तिः ॥ नच ब्रह्म- णोघटपटाद्यात्मना भासे ब्रह्मणस्तत्सदृशत्वापत्तौ साकारता स्या- त् नहि रज्जौ हयाऽऽकाराऽऽभासः किन्तु सर्पाऽऽकाराऽऽभासएवेति वाच्यम् ॥ अध्यासे सादृश्यस्य साक्षादप्रयोजकत्वात् ॥ संस्कारोद्बो- धद्वारा हि सतत्रप्रयोजकः संस्कारोद्बोधस्य तु न सादृश्यज्ञानमेव कारणं किन्त्वदृष्टाद्यपि रज्जावश्वाऽध्यासाऽभावस्तु केनाऽपि हेतु- ना तत्संस्काराऽनुद्बोधात् ॥ अन्यथा भुजगदण्डभूच्छिद्रमालाज- लधाराद्यध्यासोयुगपद्रज्जौ स्यात् ॥ पृथक्तदध्यासदर्शनेन सादृश्य- स्याऽप्रत्याख्येयत्वात् ॥ पूर्वपूर्वाऽध्यासजन्यसादृश्यस्य ब्रह्मण्यङ्गी- कारे साकारतापत्तेरभावाच्च ॥ १० ॥ साचेयं मायाऽनादिः ॥ नासदा- सीन्नोसदासीत्किंतुतमः इतिश्रुतेः ॥ लाघवाच्च अनादिसंसारकार- णतासिद्धौ तस्याः सादितायावक्तुमशक्यत्वाच्च ॥ पूर्वपूर्ववासनाना- मुत्तरोत्तराध्यासंप्रति पूर्वपूर्वकर्मणामुत्तरोत्तरजन्म प्रतिच हेतुत्वात् बालस्य स्तन्यपाने प्रवृत्तिदर्शनेन पूर्वसंस्कारसिद्धौ संस्कारप्रवाहस्य कल्पनीयत्वाच्च संसारस्याऽनादितासिद्धिः ॥ अतएव बन्धोऽस्याऽ-

विद्ययाऽनादिरितिस्मृतिः संगता ॥ नच बन्धस्याऽनादित्वेऽविद्य-
येति तृतीयाऽनुपपत्तिरिति वाच्यम् ॥ गोपेन गावइत्यादिवदुपप-
त्तेः ॥ नच तत्र जीवन्तीत्यादिपदाध्याहारइतिवाच्यम् ॥ इहाऽ-
पि तिष्ठतीत्यध्याहारस्य सुलभत्वात् ॥ अतएव भागवते तृतीय-
स्कन्धे विश्वंवैब्रह्मतन्मात्रंसंस्थितंविष्णुमायया इत्यत्र संस्थितमि-
त्युक्तम् ॥ सादित्वंतु बन्धस्य नाङ्गीकर्त्तुं युक्तम् ॥ अस्यां स्मृतौ
अनादिशब्दार्थस्य त्यागे बीजाभावात् ॥ प्रवाहाऽनादौतु संसारो-
ऽनादिरित्यादौ नैयायिकादीनां सर्वेषां प्रचुरः प्रयोग इति तत्रा-
ऽनादिशब्दस्य शक्तिरेव निरूढलक्षणावा ॥ देवेषु त्वमरशब्दस्य
रूढिरेव ॥ योगासंभवे तस्याः सर्वसम्मतत्वात् ॥ तस्य देवेष्वौप-
चारिकत्वेऽपि यथा तत्र तद्यथेहकर्मचितोलोकइत्यादिश्रुतिरनु-
ग्राहिकाऽस्ति तथाऽत्र किञ्चिदनुग्राहकं नोपलभ्यते इति नेहाऽ-
ऽमरशब्दवदुपचरितार्थता ॥ प्रत्युत तथात्वे धातायथापूर्वमकल्प-
यदितिश्रुतेः ऋषीणांनामधेयानियाश्चवेदेषुदृष्टयः ॥ शर्वर्यन्ते-
प्रसूतानांतान्येवैभ्योददात्यजः इत्यादिस्मृतीनां समाननामरूप-
त्वाच्चाऽऽवृतावविरोधोदर्शनात्स्मृतेश्चेतिसूत्रस्य च विरोधः स्यात् ॥
सूत्रार्थादिकन्तु उत्तरभागे एकोनचत्वारिंशखण्डखण्डने स्फुटीभ-
विष्यति ॥ बन्धस्य सादित्वेऽकृताऽभ्यागमादिदोषप्रसङ्गश्चस्यात् ॥
तथाच यथापूर्वं विनाकारणान्तरमीश्वरोमां संसारान्धकूपेऽक्षि-
पत्तथा पुनरपि क्षेप्स्यतीति विचारयन्नकोऽपि प्रेक्षावान्मोक्षार्थं
यतेतेति मोक्षमार्गएवोच्छिद्येत ॥ संसाराऽनादित्वबोधकवाक्ये-
ष्विव नसपुनरावर्तते यद्गत्वाननिवर्त्तन्ते अनावृत्तिःशब्दादित्या-
दिष्वपि कुतर्कप्रवृत्तेरप्रतिबन्धात् ॥ प्रत्युत मोक्षस्य नाशे जन्य-

स्य नाशइति नियमोऽनुकूलः स्यात् लयरूपस्य तस्योत्पन्नत्वा- दित्यलम् ॥ सान्ताचेयंमाया ॥ विद्वान्नामरूपाद्विमुक्तइतिश्रुतेः ॥ तरत्यविद्यांविततांहृदियस्मिन्निवेशिते ॥ योगीमायाममेयायत- स्मैविद्यात्मनेनमः ॥ मायामेतांतरन्तिते ॥ विभेदजनकेऽज्ञानेना- शमात्यन्तिकंगते इत्यादिस्मृतिभ्यश्च ॥ नचयदनादितदनन्तमिति- व्याप्तिः संगता ॥ प्रागभावेव्यभिचारात् ॥ घटादेराविर्भावस्यैव स्वीकारेऽपि भेदस्योत्पत्तिस्वीकारेण तवाऽपि तत्प्रागभावप्रत्याख्या नस्याशक्यत्वात् ॥ नचानादिर्भावोऽनन्तइतिवाच्यम् ॥ भावत्वस्य निरूपयितुमशक्यत्वात् ॥ अस्तीतिप्रतीत्यर्हत्वस्याऽभावेऽपि स- त्वात् ॥ अभावभिन्नोभावइतितु अन्योन्याश्रयग्रस्तम् ॥ अभा- वस्य भावनिरूपणाधीननिरूपणत्वात् ॥ अधिकन्तुखण्डनादि- भ्योज्ञेम् ॥ किञ्चाऽविद्याया अभाववैलक्षण्येनैव भावव्यवहारोऽ- स्माकं नतु त्वदभिमतभावरूपत्वेन ॥ तदाहुर्भावाभावातिगाऽवि- द्यातत्त्वेदृष्टान्तितंतमइत्यादि ॥ यद्विचाऽनादिपदार्थानाम्भेदस्य सादिता नयुक्ता सादिस्तु नकोऽपिपदार्थइत्युच्यते तर्हि सर्वमन- न्तमित्येव त्वया वाच्यं ॥ यत्तच्छब्दयोरव्यावर्तकत्वात् ॥ नचत- थाऽपि वक्तुं युक्तमुक्तश्रुत्यादिविरोधात् ॥ आविर्भावतिरोभावा- वेवाद्यन्ततयाविवक्षिताविितिचेन्न ॥ मायायानाशेऽपि तिरोभा- वानङ्गीकारेण तन्नियमविरोधानवतारात् ॥ सतःपूर्ववज्ज्ञानाऽभा- वस्यैव तिरोभावपदार्थत्वात् ॥ अन्यथा नाश्यत्वेनाऽभिमतोभेदो- ऽपि तिरोभवतीति त्वयोच्येत ॥ नैयायिकाद्यैश्च कूर्मस्याङ्गानि तिरोभवन्तीतिवद्घटादयस्तिरोभवन्तीतिप्रयुज्येत ॥ एतेन किञ्चज- न्यात्वजन्यावामायाऽऽद्येजनकोहिकः ॥ अन्याभावात्तुब्रह्मैवंसवि-

शेषत्वमागतम् ॥ द्वितीयेत्वद्वैतभङ्गःकदाचित्त्वंत्वसङ्गतम् ॥ आत्मै-
वेदमग्रआसीदित्यादिश्रुतिबाधतः ॥ अनादित्वेतुसान्तत्वमिति-
पक्षोऽप्यसङ्गतः ॥ अनादित्वमनन्तत्वंमायायाइतिनिश्चयः इ-
तिप्रत्युक्तम् ॥ अनादिसान्तत्वपक्षे श्रुतिन्याययोर्विरोधस्योद्भत-
त्वात् ॥ अनन्तत्वस्योक्तरीत्यानिरस्तत्वाच्च ॥ ११ ॥ यत्तु माया-
संबन्धरहितमितिश्लोकटीकायामस्याभगवतोऽभिन्नत्वमुक्तम् ॥
तत्रब्रूमः ॥ किमिदमभिन्नत्वं तादात्म्यम् भेदाभावोवा ॥ आद्येऽ-
पि कथंचित् सर्वथावा॥ नतावदाद्यः॥ तत्रभेदोनचैवेत्यादित्वत्सि-
द्धान्तविरोधात् ॥ न द्वितीयः ॥शक्तिः शक्तिमानिति व्यवहारलो-
पप्रसङ्गात् ॥ सत्तादात्म्यनिषेधकनोसदासीदितिश्रुतिविरोधाच्च ॥
मायायाविनाशित्वस्योक्तत्वेन तदभिन्नस्य ब्रह्मणोविनाशित्वाप-
त्तेश्च ॥ विभेदजनकेज्ञानेनाशमात्यन्तिकंगते इत्यत्राऽत्यन्तनाशेन
तिरोभावग्रहणे प्रमाणाभावाच्च ॥ मायायान तिरोभावोक्तिस-
म्भवः ॥ किञ्चैवमप्यनिस्तारोब्रह्मणोऽपि तिरोभावप्रसङ्गात् ॥ भे-
दाभावपक्षस्त्विष्टएव ॥ शुक्तिकायां कल्पितरजतभेदाऽभावसत्त्वा-
त् ब्रह्मणि मिथ्याभूतमायाभेदाऽभावस्योचितत्वात् ॥ एतेन श-
क्तिशक्तिमतोर्भेदाभेदोयःसनबाधकः ॥ तत्रभेदोनचैवास्तिशक्ते-
र्ब्रह्मत्वनिश्चयात् ॥ भिन्नत्वेतुजडत्वंस्यादिति ॥ धर्मधर्मिविचारेऽ-
पिज्ञेयमेवंविचक्षणैः ॥ प्रकाशाऽऽश्रयदृष्टान्तेऽप्यभेदोबोध्यतेकि-
ल ॥ अरूपवत्सूत्रवाक्येधर्माणामपिब्रह्मता॥निरूपिताप्रभुवरैःश्री-
विद्वन्मण्डनेस्फुटम् इतिप्रत्युक्तम्॥भेदस्यासंमतत्वे भेदाभेदस्याबा-
धकत्वायोगात्॥उत्तरार्द्धेनविरोधाच्च॥जडतायाइष्टत्वाच्च ॥अतएव
किन्तुतमइतिश्रुत्युक्तंसंगच्छते॥प्रकाशाश्रयवद्वाऽरूपवदेवेत्यनयोः

सूत्रयोस्तु तात्पर्यं चतुर्थश्लोकव्याख्यायां वर्णयिष्यामः ॥ इयंच मायाऽविद्याशब्देनाऽपिव्यवह्रियते मायाचाविद्याचस्वयमेवभवति तरत्यविद्यांविततांहृदियस्मिन्निवेशिते इत्यादिश्रुतिस्मृतिभ्यस्तदेतदाहाविद्याख्यमायेति ॥ एवं सर्वस्य नामरूपात्मकस्य जगतोमायिकत्वसिध्या तदन्तःपातितद्धेतुत्वस्य च तथात्वमित्याह॥ हेतुत्वंचेति ॥ ननु ब्रह्मणोमाययाऽपि हेतुत्वे निर्विकारत्वाऽसङ्गत्वयोर्हानिरितिचेन्न ॥ मायया सिंहादिभूतस्यैन्द्रजालिकस्य विकाराद्यनुपलब्धेः ॥ ऐंद्रजालिकोवस्तुतोविकारादिमानितिचेदास्ताम् ॥ एतावता हि न विकारित्वादि तत्रप्रयोजकं गौरवान्मानाभावाच्च ॥ सिंहादिप्रकारकं भानमात्रं तत्रेतिचेन्न वयं ब्रह्मणोवस्तुतस्तथाभावं स्वीकुर्मः किन्तु तथाप्रतीतिमात्रं विवर्त्तवादाऽङ्गीकारात् ॥ अतएव मायया बहुरूपज्ञानमेव श्रुतिराह इन्द्रोमायाभिःपुरुरूपईयतइति॥ कारकस्य क्रियाऽन्वयनियमात् ॥ कारकविभक्तेरितरविभक्तितउचितत्वाच्च ॥ तस्मात्प्रातीतिकस्य जगतइव तद्धेतुत्वस्याऽपि मायिकस्य तत्रसम्भवान्नकाप्यनुपपत्तिः ॥ अतएवाऽक्षमाभवतःकेयंसाधकत्वप्रकल्पने ॥ किंनपश्यसिसंसारंतत्रैवाऽज्ञानकल्पितमित्यभियुक्तोक्तं संगच्छते ॥ एवंच ब्रह्मणस्तटस्थलक्षणं सिद्धमित्याह ॥ परस्यलक्षणमिदमिति ॥ प्रकारान्तरमाह॥शाखेन्दुवदिति॥शुद्धे उपादानत्वं नास्ति किंतर्हि शबले शबलगतं चोपादानत्वं तदनुगतस्य शुद्धस्य लक्षणं शाखेव चन्द्रस्य॥ मायैववोपादनं तद्गतं चोपादानत्वं तदधिष्ठानस्य लक्षणम्॥ एतेन निर्गुणब्रह्मजिज्ञासां प्रतिज्ञाय सगुणब्रह्मणोमायायावा लक्षणकथने व्यासस्य प्रतिज्ञाहान्युपक्रमविरोधौ स्यातामिति जन्माद्य-

स्येतिसूत्रं निर्गुणलक्षणपरतया व्याख्येयं तथाच तद्विरोधइत्यपास्तं ॥ शाखाचन्द्रवन्निर्गुणतटस्थलक्षणताया एवस्वीकारात्॥ अत्र शुद्धकारणत्वपक्षे तदैक्षतबहुस्यांप्रजायेयेत्यत्र प्रकृतः सत्पदार्थः परामृश्यते तस्य बहुभावोमायया ॥ नहि मायारूपसहकारिसमवधानऐन्द्रजालिकस्य तथाभावोगौणोद्वैतापादकोवा ॥ शबलकारणत्वपक्षेऽपि ऐन्द्रजालिकपरतच्छब्दघटिते सऐक्षतसिहोभवेयमिति वाक्यइव तच्छब्देन सत्पदार्थस्यैव परामर्शईक्षणंच मुख्यमेव नतु ताआपऐक्षन्तेतिवद्गौणं ॥ एवंमायामात्रहेतुत्वपक्षेऽपि सत्पदार्थस्यैव तच्छब्दवाच्यत्वमीक्षणंच तेचमुख्ये एव परन्तु सेनाऽभिप्रायेण यथा राज्ञोयोत्स्ये इतिवाक्यमौपचारिकं तथामायाभिप्रायेण बहुस्यामित्यौपचारिकम् ॥ सेयंदेवतैक्षतहन्ताहमिमास्तिस्रोदेवताअनेनजीवेनात्मनानुप्रविश्यनामरूपेव्याकरवाणीतिवाक्येऽपि सेयंदेवतैक्षताहंआत्मनाशब्दार्थामुख्याएव ॥ जीवाऽभेदोऽपि मुख्यः नामरूपव्याकरणमेव शुद्धऔपचारिकमिति गौणश्चेन्नाऽऽत्मशब्दात् तन्निष्ठस्यमोक्षोपदेशात् हेयत्वावचनाच्चेतिसूत्रत्रयस्य विरोधोनास्माकं किन्तु सांख्यमतखण्डनपरमेवतत् ॥ तन्मतईश्वराभावेनोक्तरीत्या योजनायाअसम्भवात् ॥ मायाकारणत्वपरबहुवाक्यबलेनेश्वरहेतुत्ववादिनीनां श्रुतीनां जन्मादिसूत्रस्यच केवलमौपचारिकत्वम् ॥ यथात्वन्मतेऽक्षरब्रह्मणोहेतुत्वेन पुरुषोत्तममुपक्रम्य कारणत्ववादिनीनां तत्रौपचारिकत्वमिति पुरुषोत्तमजिज्ञासां प्रतिज्ञाय पठितस्य जन्माद्यस्ययतइत्यस्याऽपि तथात्वम् ॥ १२ ॥ यत्तु टीकायां प्रकृतिगतं कर्तृत्वं ब्रह्मण्यारोप्यते ॥ एवं भृगुर्वैवारुणिरित्यत्राऽपि गौणमेवकर्तृत्वमनूद्यतइति

पूर्वपक्षेऽस्माकंमतं न्यस्य जन्माद्यस्ययतःशास्त्रयोनित्वात् इतिसू-त्रमेकं कृत्वावतारितम् ॥ अस्य प्रत्यक्षस्य जगतोजन्मादि जन्मस्थितिलया यतस्तत्कर्तृ कुतः शास्त्रयोनित्वात् शास्त्रं यो-निः शास्त्रयोनिस्तस्य भावः शास्त्रयोनित्वं तस्माच्छास्त्रोक्त-कारणत्वादित्यर्थइतिव्याचख्यौ ॥ तन्नसम्यक् ॥ तथाव्याख्या-ने हि जगज्जन्माद्याश्रयस्य शास्त्रोक्तकारणत्वेन हेतुनाकर्तृ-त्वमात्रमनेन सूत्रेण साध्यते ॥ तथाच पूर्वपक्षिणा भृगु-र्वैवारुणिरित्यत्राऽपि ब्रह्मणि प्रकृतिस्थं गौणमेव कर्तृत्वमनूद्यते इतिचेदुक्तं तर्हिजगज्जन्मादिकं प्रकृतेरन्यत्रास्थापयित्वा प्रवृत्ते-नाऽनेन सूत्रेण प्रकृतावेवकर्तृत्वमपि साध्यते इत्यापतति ॥ जी-वेशावाभासेनकरोति मायांतुप्रकृतिंविद्या दिन्द्रोमायाभिःपुरुरू-पईयतइत्यादिशास्त्रैः प्रकृतौ कारणत्वस्योक्तत्वात् प्रकृति-निष्ठकर्तृत्वस्य बोधने च जीवेशावितिश्रुतिरुपष्टम्भिका स्यात् ॥ सिद्धसाधनं चैवंव्याख्याने स्यात्कर्तृत्वस्यपूर्वपक्षिणा स्वीकृतत्वा-त् ॥ तथाच सुव्याख्याता ब्रह्मजिज्ञासाप्रतिज्ञोपपत्तिः ॥ तस्माद्ब्र-ह्मजिज्ञासां प्रतिज्ञाय ब्रह्मलक्षणमात्रमनेनोक्तवान् इतियुक्तं ॥ यथा पूर्वकाण्डेऽथातोधर्मजिज्ञासेतिधर्मजिज्ञासां प्रतिज्ञाय चो-दनालक्षणोऽर्थोधर्मइत्यनेन धर्मलक्षणमात्रमुक्तं तद्वत् ॥ ब्रह्मपद-स्य तत्रविशेषणत्वेऽपि पटोलपत्रंपित्तघ्नंमूलंतस्यविरेचनमित्या-दिष्विव बुद्ध्यासन्निकृष्टत्वाद्यच्छब्दापेक्षिततच्छब्देन युक्तः परा-मर्शः ॥ कर्तृपदाध्याहारस्त्वत्यन्तासन्निकर्षादयुक्तः ॥ किञ्च शौ-ण्डादिषु योनिशब्दस्य पाठाभावेन सप्तमीतियोगविभागस्य भा-ष्यानारूढत्वेन शास्त्रयोनिरिति विग्रहे सहसुपेतिसमासोवाच्यः

सचागतिकगतिः ॥ किञ्चोक्तशब्दाऽध्याहारेऽसामर्थ्यप्रसङ्गाच्छास्त्रशब्दस्य तदुक्ते लक्षणा वाच्या तथाच विग्रहोऽनुपपन्नः ॥ उक्रान्तिगत्यागतीनामित्यादिषु हेत्वदर्शनेन सूत्रेषु हेतुबोधिपदघटितत्वनियमोनयुक्तः ॥ ब्रह्मसूत्रपदैश्चैव हेतुमद्भिरित्यत्र हेतुपदं कारणपरं प्रयोजनपरंवा ॥ सूत्राणां कारणानितु विषयवाक्यानि ॥ किञ्चाऽत्र हेतुमद्भिरित्येतद्ब्रह्मसूत्रपदैरित्यस्य पदान्तप्रकृतिकसुबन्तस्य विशेषणमिति प्रतिपदं हेतोः पञ्चम्यन्तस्य कल्पनायां प्रयासस्तेस्यान्नचसा सम्भवति अस्माकंतु नकाप्यनुपपत्तिः ॥ यद्धेतुकत्वं वाक्यस्य तद्धेतुकतायाः पदेपि सत्त्वात् ॥ एतेन हेतुरहितत्वाज्जन्माद्यस्ययतः इति न पृथक्सूत्रं किन्तु शास्त्रयोनित्वादित्यनेन मिलितमेवंच तत्राऽपि साध्यलाभइत्यपास्तम् ॥ एवंच शास्त्रयोनित्वादितिसूत्रमपि साध्याध्याहारेण योज्यम् ॥ एवं तत्तुसमन्वयादित्यत्र समन्वयादित्यस्य सम्यगनुवृत्तत्वात् ॥ अनारोपिताऽनागन्तुकरूपेणाऽन्वयादिति तद्याख्याने तादृगर्थे लक्षणायां मानमन्वेष्यम् ॥ इत्यलम्प्रसङ्गागतेन ॥ १२ ॥ इयंच माया शुद्धचैतन्ये तिष्ठतीतिबहवः ॥ नचाऽविद्याश्रयत्वेऽज्ञत्वापत्तिरितिवाच्यम् ॥ अविद्यायास्तमःसदृशत्वेन तमसःस्वाश्रयविषयकज्ञानप्रतिबन्धकत्वेऽपि तन्निष्ठज्ञानप्रतिबन्धकत्वस्याऽदर्शनेन मायायामपि तथाकल्पनात् ॥ अतएव तमःस्थाजनाः प्रकाशस्थान्पश्यन्ति ॥ अन्यथा त्वन्मतेऽप्यविद्याश्रयत्वेन ब्रह्मणोऽज्ञत्वप्रसङ्गात् ॥ तस्याअविद्यायालौकिकाऽज्ञानवैलक्षण्ये तु अविद्यापदस्य तत्रपरिभाषात्वमेवस्यात् ॥ अविद्या जीवे तिष्ठतीत्येके ॥ यत्तुजी-

वोऽज्ञानस्वरूपत्वान्नाज्ञानाश्रयइत्याह ॥ तत्त्वनङ्गीकारपराहतम्॥ अस्मिन्पक्षेऽज्ञानस्य तिमिराख्यरोगवत्स्वाश्रयमात्रदोषत्वं नतु विषयावरकत्वम् ॥ अतोब्रह्मणोनाज्ञत्वम् ॥ अभेदस्य वास्तवत्वेऽप्यवास्तवभेदस्याऽपि सत्त्वेन जीवस्याऽज्ञानेऽपि ब्रह्मणोनाऽज्ञत्वम्॥ ३ ॥ १४ ॥

एवंमायिकमस्य पादकरकंवाक्यात्कमात्रत्वगीरानन्दस्य कृतेर्यतोनहि सुखं संस्थानवद्दृश्यते॥ अज्ञाभावगिरः सुवर्णवदयं स्यात्ते विकारी मते धेनुर्न प्रकृतिर्मतान्तरपरे सूत्रे निपातादितः॥ ४॥

इदानीं साकारंसर्वशक्त्येकंसर्वज्ञंसर्वकर्तृच ॥ सच्चिदानन्दरूपंहिब्रह्मतस्मादिदंजगदिति श्लोकोक्तमाकारसहितस्य सच्चिदानन्दरूपत्वं तथा तट्टीकोक्तं विश्वतश्चक्षुरुतविश्वतोमुखोविश्वतोबाहुरुतविश्वतस्पात् ॥ संबाहुभ्यांधमतिसंपतत्रैर्द्यावाभूमीजनयन्देवएकः इत्यादिश्रुतिभिःसाकारं ब्रह्मप्रतिपाद्यते ॥ श्रुतिस्थचक्षुरादिकमिन्द्रियान्तरस्योपलक्षणं॥ बाहुभ्यामितिद्विवचनेन ब्रह्मणोद्विभुजत्वं श्रुतिसिद्धं चतुर्भुजत्वं तु स्मृतिप्रसिद्धम् ॥ सर्वकामःसर्वगन्धःसर्वरसः इतिछान्दोग्ये रसोवैसइति तैत्तिरीये सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात् इति पुरुषसूक्ते साकारत्वमुक्तम्॥ अग्रेततोविराडजायतेतिकथनान्नायं विराट्पुरुषः॥ सर्वतःपाणिपादान्तंसर्वतोऽक्षिशिरोमुखमिति गीतायाम् ॥ आनन्दमात्रकरपादमुखोदरादीति नारदपञ्चरात्रे अथवापरमात्मानंपरमानन्दविग्रहमिति याज्ञवल्क्यस्मृतौ इति निरस्यति॥ एवंमायिकमिति॥ य-

था जगद्धेतुत्वं तथेत्यर्थः ॥ कंशिरः पादकरकमित्याकारमात्रस्यो- पलक्षणम् ॥ वाक्यादिति ॥ इन्द्रोमायाभिरितिश्रुतेः मायाह्येषा- मयासृष्टायन्मांपश्यसिनारद सर्वभूतगुणैर्युक्तंनैवंमांज्ञातुमर्हसि इ- तिस्मृतेश्चेत्यर्थः ॥ आनन्दरूपतोक्तिरानन्दजननादौपचारिकी- त्याहाऽऽनन्दस्येति ॥ इदमुपलक्षणम् रज्जुमात्रे सर्पइतिवदधिष्ठा- नाऽभेदेनाऽपि तथाव्यपदेशोपपत्तेः ॥ किञ्च मात्रंत्ववधृतौस्वार्थे- कात्स्न्यैमात्रापरिच्छदे अक्षरावयवेद्रव्येमानेऽल्पेकर्णभूषणे का- लेवृत्तेचेति हेमचन्द्रोक्त्या आनन्दोमात्रं स्वार्थोयस्य मात्राऽल्पो- यस्येतिवा नारदपञ्चरात्रवाक्यार्थः ॥ अथविग्रहः संग्रामेप्रविभा- गेचदेहविस्तारयोरपीति त्रिकाण्डशेषात्परमानन्दस्य विग्रहः प्र- विभागोविस्तारोवा यस्मादिति याज्ञवल्क्यवाक्यार्थः ॥ एतेन आ- नन्दमयोऽभ्यासादितिसूत्रमानन्दमयं हस्तादिकं ब्रह्मणआहेति त- ट्टीकाकारभ्रमः प्रत्युक्तः ॥ हस्तादिपदानुपादानात् ॥ सूत्रार्थस्तु आनन्दमयपर्याये पठ्यमानब्रह्मशब्दोब्रह्मबोधीत्यादिर्भाष्यादि- तोज्ञेयोवादिविवादेन शास्त्रार्थविस्तरादिहनोपन्यस्तः ॥ अनेनैव आहचतन्मात्रम् इत्यस्याऽप्यानन्दमात्रं तस्य करादिकमाहेत्यर्थः प्रत्युक्तः ॥ करादिशब्दाभावात् ॥ सूत्रार्थस्तु आहचश्रुतिः तन्मा- त्रम् चिन्मात्रम् रूपादिरहितमात्रं वा ब्रह्मेति ॥ अरूपवदेवेतिव्य- वहितपूर्वसूत्रे अरूपवद्ब्रह्मोक्त्वा तर्हि साकारत्वश्रुतीनां वैयर्थ्यमि- त्याशङ्क्य प्रकाशवच्चावैयर्थ्यमित्यनेन यथा प्रकाशः सौरश्चा- न्द्रमसोवा वियद्व्याप्याऽवतिष्ठमानोऽङ्गुल्याद्युपाधिसंबन्धात्तेष्वृजु- वक्रादिभावं प्रतिपद्यमानेषु तद्भावमिव प्रतिपद्यते एवं ब्रह्माऽपि पृथिव्याद्युपाधिसंबन्धात्तदाकारतामिव प्रतिपद्यते तदालम्बनो-

ब्रह्मणआकारविशेषोपदेशउपासनार्थोन विरुध्यते एवमवैयर्थ्य-
माकारवद्ब्रह्मविषयाणामपि वाक्यानां भविष्यति औपाधिका-
श्च धर्मानवास्तवाइति विरोधोनेत्यर्थकेनाऽवैयर्थ्यमुपपाद्य तत्र-
वृत्तेः ॥ अतएवचोत्तरत्र दर्शयतिचाथोअपिचस्मर्यते इति निर्वि-
शेषमेव ब्रह्मोक्तवान् नतुआनन्दमात्रहस्तादिकम् ॥ अर्थस्तु दर्श-
यतिच श्रुतिः परप्रतिषेधेनैव ब्रह्म अन्यदेवतद्विदितादथोअविदि-
तादधिइत्याद्या ॥ किञ्च बाष्कलिना पृष्टोवार्धोऽवचनेनैवप्रोवा-
चेतिश्रूयते सहोवाचाधीहिभोइति सहतूष्णींबभूवतंहद्वितीयेतृ-
तीयेवावचनउवाचब्रूमःखलुत्वंतुनविजानास्युपशान्तोयमात्माइ-
ति ॥ तथा स्मृतिष्वपि परप्रतिषेधेनैवोपदिश्यते ज्ञेयंयत्तत्प्रवक्ष्या-
मियज्ज्ञात्वाऽमृतमश्नुते ॥ अनादिमत्परंब्रह्मनसत्तन्नासदुच्यते इ-
त्येवमाद्यासु ॥ तथा विश्वरूपधरोनारायणोनारदमुवाचेतिस्मर्य-
ते मायाह्येषामयासृष्टेति तस्मादुपासनार्थमेव मायिककरादिक-
ल्पना ॥ यत्तु उपासनार्थं धर्मारोपइत्ययौक्तिकम् नहिशाखाव-
द्ब्रह्मप्रत्यक्षं यस्मिन्नरुन्धतीवधर्मआरोप्यते इत्युक्तम् ॥ तन्न ॥ प्र-
त्यक्षारोपेऽधिष्ठानस्य प्रत्यक्षत्वापेक्षायामपि परोक्षारोपे तदभावा-
त् ॥ आरोपस्य प्रत्यक्षत्वनियमे प्रमाणाभावाच्च ॥ अप्रत्यक्षेऽप्या-
काशे तलाद्यध्यासाच्च ॥ यत्तु अवकाशरूपेण वस्तुसामर्थ्यादेव
तस्य प्रत्यक्षत्वम् अन्यथाऽवकाशाद्यभिलाषोच्छेदप्रसङ्गादिति ॥
तन्न ॥ अपरोक्षेभिलाषनियमे प्रमाणाऽभावात्स्वर्गाद्यभिलाषाऽ-
भावप्रसङ्गाच्च ॥ आकाशं साक्षत्करोमीत्यप्रत्ययात् आकाशंनप-
श्यामीतिप्रत्ययाच्च चाक्षुषमात्रउद्भूतरूपस्य हेतुत्वमितिनियमावि-
रोधाच्च यत्साक्षादपरोक्षाद्ब्रह्म सर्वप्रत्ययवेद्येऽस्मिन्ब्रह्मरूपेव्यव-

स्थितइत्यादिश्रुतिस्मृतिभिः अस्तिघटः इत्यादिसत्ताद्यवगाहिप्र-
त्यक्षेणच ब्रह्मणः प्रत्यक्षत्वनिश्चयाच्च ॥ पराञ्चिखानिव्यतृणत्स्व-
यम्भूस्तस्मात्पराङ्पश्यतिनान्तरात्मन्नितितु निरुपाधिकब्रह्मज्ञाना-
ऽभावं संसारिणामाह ॥ अतएवोत्तरत्र कश्चिद्धीरःप्रत्यगात्मानमै-
क्षदिति प्रत्यागात्मदर्शनमेवसाधनविशेषसाध्यमित्याह ॥ यत्तूप-
हितस्य त्याज्यत्वेन पुत्रादिवत्त्यागापत्तिरिति॥ तत्तु इष्टापत्त्या प-
रिह्रियते ॥ अतएव नेदंयदिदमुपासते इतिसंगतम् ॥ कथंतर्हि त-
ज्ज्ञानेन चित्तशुद्धिरन्यथा प्रापञ्चिकज्ञानेनाऽपि चित्तशुद्धिःस्या-
दितिचेच्चित्तशुद्धौ नध्येयस्योपहितत्वाभावः प्रयोजकतया स्वी-
क्रियते प्रमाणाभावात् किन्तु शास्त्रेण तदर्थतया प्रतिपाद्यत्वं त-
च्चेदिहाऽस्ति तर्हि कथंनचित्तशुद्धिः स्यात् शास्त्रप्रतिपाद्यमेवहि
फलं कर्मणामुपासनादीनांवक्तुमुचितं नतुयौक्तिकम् ॥ अतएव-
च प्रापञ्चिकैश्चान्द्रायणादिभिर्निष्कामतया सम्पादितैरपि चित्त-
शुद्धिरितिसंक्षेपः ॥ १ ५ ॥ विपक्षेबाधकमाह ॥ यतोनहीति ॥ पा-
ण्याद्यभावे आनन्दमात्रपाण्याद्यभावः कैमुतिकन्यायसिद्धइत्य-
भिप्रेत्याऽङ्गाऽभावमेवाहाङ्गभावगिरइति ॥ शुद्धाऽङ्गशब्दस्याऽर्श-
आद्यजन्ताङ्गशब्देनैकशेषेऽभावशब्देनसमासः ॥ तेनावयवावय-
व्यभावबोधकशब्देभ्यइत्यर्थः ॥ तथाहि ॥ अपाणिपादोजवनो-
ग्रहीतापश्यत्यचक्षुःसश्रृणोत्यकर्णः अचक्षुष्कमश्रोत्रमवागमनो-
ऽतेजस्कमप्राणम् अशरीरंशरीरेषु अप्राणोह्यमनाःशुभ्रः नतस्यका-
र्यंकरणंचविद्यते इत्याद्याः श्रुतयस्तदभावंबोधयन्ति ॥ अङ्गाऽभा-
वः सर्वविशेषाभावोपलक्षकः ॥ निष्कलंनिष्क्रियंशान्तं नचक्षुषा-
गृह्यतेनापिवाचा यन्मनसानमनुते अनेजदेकम् नेहनानास्तिकि-

श्चन नेतिनेतीत्यादिश्रुतिभ्यः ॥ इदानीं सुवर्णस्याऽविकारित्वं कामधेनोर्मणेरपि इतिशुद्धाद्वैतोक्तं विविधकार्याकारतासद्भावेऽपि निर्विकारत्वं युक्त्या खण्डयति ॥ सुवर्णवदिति ॥ यत्तु वस्तुतोविविधाकारंब्रह्मेतित्वन्मतं ॥ तस्मिंस्त्वन्मते सुवर्णवद्विकारि स्यात्॥ नच परिणतेर्नविकारत्वमतः सुवर्णं नविकारीतिवाच्यं ॥ विकारोनामधेयमितिश्रौतव्यवहारविरोधात् ॥ नच यस्मिन्विकारः सोऽविकारीत्युपपद्यते विरोधात् ॥ किञ्च पूर्वाकारपरित्यागेनाकारान्तरापत्तिस्तत्रदृश्यते तथापिचेदविकारित्वं स्वीक्रियते उत्पत्तिविनाशयोः सतोरपि नित्यत्वं स्वीक्रियेत तस्मादर्थाङ्गीकारे शब्दापलापस्याऽयुक्तत्वादीश्वरस्य विकारित्वंस्यादेव ॥ एकरसतायानित्यतायाश्चाभावःस्यात् ॥ त्वन्मते रूपान्तरापत्तेरेवानित्यत्वव्याप्यत्वात् ॥ अन्यथा घटादेरप्याविर्भावतिरोभावयोरेव सत्त्वेन तार्किकसंमतविकारितायास्त्वन्मते क्वाप्यभावेनेश्वरेऽहिकुण्डलादिदृष्टान्तेनेतरविकारिवैलक्षण्यसंपादनप्रकारः यथा सर्पःस्वेच्छयाहिकुण्डलाकारतांगतः नविकारी तथा ब्रह्मव्याससूत्रैर्निरूपितम् इतित्वदुक्तोनसंगच्छेत॥सर्वाणि तैजसान्यविकृतानीति स्वगुरूक्तिंतु भवानेवस्वीकुर्यान्नान्य उक्तविरोधात्॥धेनुः कामधेनुः॥एतेन कामधेनोरनेकवस्तूत्पत्तावपि यथा तस्यानविकृतिरेवमीश्वरस्याऽपीति सुबोधिन्युक्तं प्रत्युक्तम्॥धेनोर्निमित्ततयाऽप्रकृतित्वेनेश्वरस्य प्रकृतित्वेन दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यात् ॥ धेनुर्मणेरप्युपलक्षिका ॥ एतेन सुवर्णस्याऽविकारित्वंकामधेनोर्मणेरपीति यद्विविधाकारसद्भावेऽपिनिर्विकारत्वमुक्तं तत्प्रत्युक्तम् ॥ १६ ॥ ननु प्रकृतैतावत्त्वंहिप्रतिषेधतितितोब्रवीतिचभूयइति सूत्रविरोधः ॥ अपाणिपादो-

जवनइतिलौकिकैतावत्त्वं निषेध्य जवनोग्रहीतेत्याह ॥ एवमस्थूलमनणुइतिनिषेध्यैतस्यैवाऽक्षरस्य प्रशासनेगार्गिइत्याहेतिचेन्न ॥ परत्रोक्तिमात्रस्य प्राबल्याप्रयोजकत्वेन श्रौतैतावत्त्वस्यैव तत्रनिषेधादतएव नतत्ररथारथयोगाःपन्थानोभवंत्यथरथान्नथयोगान्पथःसृजतीत्यत्र सृष्टेः परत्रोपन्यासेऽपि नसत्यत्वमिति मायामात्रंतुकात्स्न्र्येनेतिसूत्रेण स्वप्नस्य मायामात्रत्वं व्यासऊचे ॥ किञ्च प्रकृतशब्दस्योपक्रान्तार्थतायाः प्रसिद्धत्वेन लौकिकेतिव्याख्यानंनयुक्तम् ॥ एवं प्रकृते ब्रह्मणि यदेतावत्त्वं तत्प्रतिषेधतीत्यप्ययुक्तम् ॥ रूपद्वयस्यैव प्रकृतत्वात् ॥ द्वेवावब्रह्मणोरूपेमूर्त्तंचामूर्तंचेत्युपक्रम्य भूतपञ्चकस्य राशिद्वयेनाऽयेवर्णितत्वात् ॥ ब्रह्मणः षष्ठ्यन्ततया निर्दिष्टस्य तद्विशेषणत्वेनाऽप्रकृतत्वात् ॥ एतेन प्रकृते ब्रह्मणि प्रकृतस्य ब्रह्मणइतिव्याख्याद्वये ततोब्रवीतीत्याद्यनर्थकमापद्यते॥प्रकृतशब्देन ब्रह्मणः सत्त्वस्य सिद्धत्वात् इति विद्वन्मण्डनटीकोक्तं निरवकाशमस्माभिस्तादृशव्याख्यानस्यानादृतत्वात् ॥ कस्तर्हि सूत्रार्थइतिचेत् प्रकृतम् एतावत्त्वं वस्तुपरिच्छिन्नत्वं मूर्तामूर्तरूपत्वं प्रतिषेधति अथातआदेशोनेतिनेतीति ततो निषेधादनंतरं भूयश्च ब्रवीति अन्यत्परमस्तीति सूत्रार्थइति गृहाण ॥ नच प्रकृतैतावत्पदयोरन्यतरस्य वैयर्थ्यमितिवाच्यम् ॥ अवैदिकस्य निषेधकमिति त्वादृशवासनावासिताशयनिवारणाय प्रकृतपदस्य प्रकृतपदार्थस्वरूपप्रदर्शनायैतावत्पदस्यचसार्थक्योपपत्तेः ॥ नहिशब्दाधिक्यमात्रेणाऽर्थाधिक्यं युक्तमतिप्रसंगात् ॥ तस्मात्तवैवेदं सूत्रं प्रतिकूलम्॥ यत्तु स्वरूपलक्षणवाक्यशेषे कर्तृत्वस्याऽनिषेधाद्ब्रह्मणः कर्तृत्वमित्याह ॥ तन्न ॥ कार्यत्वस्याऽनिषेधात्तत्त्वस्या-

ऽप्यापत्तेः ॥ परिच्छेदमात्रनिषेधकानन्तपदेन कर्तृत्वनिषेधस्य सिद्धत्वाच्च ॥ नतस्यकार्यमितिवाक्यान्तरे कार्यस्य निषेधेन तन्निरूपितकारणत्वस्याऽर्थान्निषेधाच्च ॥ १७॥ यत्तु उभयव्यपदेशात्त्वहिकुण्डलवत् प्रकाशाश्रयवद्वातेजस्त्वादिति सूत्रे स्वमतोपष्टम्भकतयोपन्यस्ते तत्राह ॥ मतान्तरपरेसूत्रेइति ॥ तथाहि संराध्यसंराधकभावे सति परेतरात्मनोरन्यत्वं स्यादित्याशङ्क्य प्रकाशादिवच्चावैशेष्यं प्रकाशश्चकर्मण्यभ्यासात् यथा प्रकाशाकाशसवितृप्रभृतयोऽङ्गुलिकरकोदकप्रभृतिषु कर्मसु उपाधिषु सविशेषाइवाऽवभासन्ते नच तत्र स्वाभाविकीमविशेषात्मतां जहति एवमुपाधिनिमित्तएवायमात्मभेदः स्वतस्त्वैकात्म्यमेव ॥ तथाहि वेदान्तेषु अभ्यासेनाऽसकृज्जीवब्रह्मणोरभेदः प्रतिपाद्यते अतोऽनन्तेनतथाहिलिङ्गम् अतः स्वाभाविकत्वादभेदस्याऽविद्याकृतत्वाद्भेदस्य विद्ययाऽविद्यां विधूय जीवः परेणानन्तेन प्राज्ञेनात्मना एकतां गच्छति तथाहिलिङ्गम् सयोहवैपरमंब्रह्मवेदब्रह्मैवभवति ब्रह्मैवसन्ब्रह्माप्येति इतिसूत्रद्वयेनाऽभेदमुक्त्वा उभयव्यपदेशात्त्वहिकुण्डलवत् प्रकाशाश्रयवद्वातेजस्त्वात् इति मतद्वयमुपन्यस्तं ॥ स्वमतविशुद्धये भेदाभेदयोर्व्यपदेशादहिकुण्डलवदत्र तत्त्वं भवितुमर्हति यथाऽहिरित्यभेदः कुण्डलाभोगप्रांशुत्वादीनीतिभेद एवमिहापीति ॥ अथवा प्रकाशाश्रयवदेतत्प्रतिपत्तव्यम् यथा प्रकाशः सावित्रः तदाश्रयश्च सविता नात्यन्तभिन्नावुभयोरपि तेजस्त्वाविशेषादथच भेदव्यपदेशभाजौ भवतएवमिहापीति ॥ एवं मतान्तरमुपन्यस्य पूर्ववद्वाइत्युक्तम् ॥ यथावा पूर्वमुपन्यस्तं प्रकाशादिवच्चावैशेष्यं तथैतद्भवितुमर्हति तथाह्यविद्याकृतत्वाद्बन्धस्य विद्यया

मोक्षउपपद्यते ॥ यदिपुनः परमार्थतः संस्थानभूतोऽहिकुण्डलव-देकदेशभूतोवा प्रकाशाश्रयवदऽभ्युपगम्येत ततः पारमार्थिकस्य बन्धस्य तिरस्कर्तुमशक्यत्वान्मोक्षशास्त्रवैयर्थ्यं प्रसज्येत ॥ नचाऽत्रोभौ भेदाभेदौ श्रुतिस्तुल्यवद्व्यपदिशति अभेदमेवहि प्रतिपाद्यत्वेन निर्दिशति भेदंतु पूर्वप्रसिद्धमेवाऽनुवदति अर्थान्तरविवक्षया प्राप्तत्वेन शास्त्राप्रतिपाद्यत्वात् ॥ अतएवाहिकुण्डलसूत्रेतुशब्दः उत्तरसूत्रेवाशब्दः पूर्ववद्वेतिसूत्रंच संगतम् ॥ अतएव नस्थानतोपिपरस्योभयलिङ्गंसर्वत्रहि अरूपवदेवहितत्प्रधानत्वादिति सूत्रेच संगच्छेते ॥ तदेतदाह ॥ निपातादितइति ॥ निपातौ तुवाशब्दौ आदिनासूत्राणि तद्विषयवाक्यानि नञ्सामान्येत्यादिनावक्ष्यमाणायुक्तयश्चगृह्यंते ॥ १८ ॥ सूत्रार्थस्तु स्थानतः भूम्यादिरूपात् स्थानात् उपाधितइतियावत् अपिशब्देन स्वतस्तुनसंभवत्येव विरोधादित्यर्थः संगृह्यते ॥ परस्य ब्रह्मणः उभयलिङ्गम् उभेलिङ्गेयस्यतत् सविशेषत्वनिर्विशेषत्वसहितं हि यस्मात् सर्वत्रब्रह्मस्वरूपप्रतिपादनपरेषु वाक्येषु अशब्दमस्पर्शमित्यादिष्वित्यर्थः ॥ नह्युपाधियोगादप्यन्यादृशस्य वस्तुनोऽन्यादृशः स्वभावः संभवति ॥ नहि स्वच्छः सन्स्फटिकोऽलक्तकादियोगादस्वच्छोभवति भ्रममात्रत्वादस्वच्छत्वाभिनिवेशस्य ॥ यत्तु विरुद्धरूपता ब्रह्मणोलक्षणमिति तत्प्रतिवक्ष्यामः ॥ अरूपवदेव आकाररहितमेव हि प्रसिद्धं ब्रह्म तत्प्रधानत्वात् ॥ अस्थूलमनणुअह्रस्वमित्येवमादीनि वाक्यानि निष्प्रपञ्चब्रह्मात्मतत्त्वप्रधानानि नार्थान्तरप्रधानानि इत्येवंजातीयकेषु वाक्येषु यथाश्रुतं निराकारमेव ब्रह्म प्रतिपत्तव्यम् ॥

यत्तु रूप्यते व्यवह्रियते इतिरूपं सर्वव्यवहारविषयत्वं तद्वद्विश्वं-तद्विलक्षणं ब्रह्मेत्यादिव्याचक्षते ॥ तत्तुनयुक्तं ॥ यतोव्यवहारविषयोव्यवह्रियते नतुव्यवहारविषयत्वम् ॥ एवंतत्प्रधानत्वात् इत्यस्य सर्वेषां वेदान्तानां ब्रह्मैव प्रतिपाद्यम् ॥ यतः करादीनामपि ब्रह्मत्वेनैव निरूपणम् ॥ अन्यथा तेषामब्रह्मत्वे सर्वेवेदायत्पदमामनन्ति वेदैश्चसर्वैरिति नियमव्याहतिःस्यात् ॥ अतः करादिनिरूपकाः साक्षाद्ब्रह्मनिरूपकाएवेत्यपि न युक्तम् ॥ प्रधानपदस्वारस्यभङ्गात् ॥ अरूपवदेवहितत्परत्वादिति ब्रह्मैवहितत्परत्वादितिवा वक्तुमुचितत्वात् ॥ नतत्ररथारथयोगाः ज्योतिष्टोमेनस्वर्गकामोयजेत पृथगात्मानंप्रेरितारंचमत्वा जहात्येनांभुक्तभोगामजोन्यः इत्यादिना स्वमस्य कर्मणां भेदस्यच वेदप्रतिपाद्यत्वदर्शनेऽप्यभेदप्रतिपादनाग्रहाभावान्निर्मूलस्तवकरादीनामभेदप्रतिपादनाग्रहः ॥ सूत्रस्थप्रधानपदविश्वासेनाऽस्मद्रीत्याऽर्थकरणेतु नकोपिदोषः ॥ एवंच सर्वेवेदायत्पदं यत्पदप्राप्तिप्रयोजकमामनन्तीति सर्वेवेदाइत्यस्य लक्षणया त्वयाऽप्यर्थोवाच्यः ॥ एवं गीतावाक्यस्य सर्ववेदप्रतिपाद्यैर्धर्मैरित्यादिरर्थः ॥ एतेन विद्वन्मण्डनाद्युक्तस्तद्विरोधोपि परिहृतः ॥ १९ ॥ ननु स्वामरथादिकमपि ब्रह्मणोऽभिन्नमेव परन्तु तदक्षरब्रह्मणोऽभिन्नं करादितु पुरुषोत्तमादभिन्नम् ॥ नचैवं ब्रह्मभेदवादापत्तिः साच यउदरमन्तरंकुरुतेअथतस्यभयंभवति द्वितीयाद्वैभयंभवति भयंद्वितीयाभिनिवेशतःस्या दित्यादिश्रुतिस्मृतिविरुद्धा ॥ जीवस्यापि परेण भेदस्य निन्दितत्वेन परस्परेण भेदस्य सुतरां निन्दितत्वादितिवाच्यम् ॥ अक्षरपुरुषोत्तमयोर्वस्तुतोभेदास्वीकारात् ॥ पुरुषोत्तमस्यैवहिअक्षरंब्रह्मरूपान्तरं ज्ञानिभिरपी-

दमक्षरंब्रह्मैवगम्यते पुरुषोत्तमस्तुभक्तैः ॥ पुरुषोत्तमस्याऽक्षरात्पर-त्वंतु यस्मात्क्षरमतीतोहमक्षरादपिचोत्तमः ॥ अतोऽस्मिलोकेवेदे-चप्रथितःपुरुषोत्तमः इतिगीतायामुक्तम् इतिचेन्न ॥ तयोरभेदेऽ-क्षरादभिन्नमिदं पुरुषोत्तमादभिन्नमिदमिति निर्णयस्यावास्तव-त्वापत्तेः ॥ परापरभावस्यचानुपपत्तेः ॥ किंचोक्तभगवद्वचनेऽक्ष-रशब्देन ब्रह्म नोच्यते ॥ एकस्मिन्परापरभावस्य विरुद्धत्वात् कि-न्तु जडमेवेतिभाति तच्चमायैव अतएव अक्षरंस्यादपवर्गेपरमब्रह्म-वर्णयोः ॥ गगनेधर्मतपसोरध्वरेमूलकारणे इति परमब्रह्मणोमूल-कारणं पृथग्वदन्हेमचन्द्रकोशः संगतः ॥ अतएव तस्मिन्नेव प्रक-रणे कूटस्थोऽक्षरउच्यते इत्युक्तं भगवता तथाच कूटमित्युपक्रम्य सीराङ्गेनृततुच्छयो रिति हेमचन्द्रोक्त्या कूटमनृतं तुच्छं वा यथा-स्यात्तथातिष्ठतीति कूटस्थोमाया ॥ अतएव द्वाविमौपुरुषौलोक-इति उभयोरपि भगवता लौकिकत्वमुक्तम् ॥ अव्यक्तोऽक्षरइत्यु-क्तइतितु प्रकरणान्तरस्थमिति नेहोपयुज्यते ॥ किञ्चाव्यक्तम्प्रकृ-तावात्मनीति हेमचन्द्रकोशात् अव्यक्तशब्दस्याऽपि प्रकृतिवाचि-त्वमेव ॥ किञ्चाऽव्यक्तोऽस्फुटमूर्खयोरिति हेमचन्द्रकोशादस्फुटः लौकिकैरगृह्यमाणः अक्षरोऽपवर्गरूपः इत्यपिव्याख्यायुक्ता ॥ त-स्माद्गीतासु अक्षरपदेन जडस्य ग्रहणादक्षराख्यब्रह्मान्तराऽसि-द्ध्याऽक्षरब्रह्मणोऽभिन्नं जगदित्यादिनिर्मूलमेव ॥ एतेन अलौकि-काकारसिद्धौप्रवेशोहरिणोदितः ॥ अव्यक्तोऽक्षरइत्युक्तस्तमाहुः-परमांगतिम् ॥ यंप्राप्यननिवर्तन्तेतद्धामपरमंमम ॥ इतिवाक्येन-भगवद्गृहंब्रह्मप्रकीर्तितम्॥पुरुषःसपरःपार्थभक्त्यालभ्यस्त्वनन्यया ॥ इत्यग्रिमेणवाक्येनगेहाधीशोनिरूपितः ॥ भक्त्यालाभोहिनिर्दि-

ष्टोभक्तिश्चाचार्यसंश्रयात् ॥ श्रीमदाचार्यचरणभजनादेवनान्यथा इति अक्षरपुरुषोत्तमशब्दाभ्यां गृहतदधीशयोर्मुक्तभक्तप्राप्ययो-र्वर्णनमपि प्रत्युक्तम् ॥ किञ्च सर्वंखल्विदं यतोवा इत्यादौ यदि अक्षरं ब्रह्मवर्ण्येत तर्हि पुरुषोत्तमोऽश्रौतः स्याद्गीतावाक्यस्योक्त-विधयोपपत्त्याऽलीकःस्यात् ॥ यदिपुरुषोत्तमउच्येत तर्हिअक्षरस्य-जगदभेदवर्णनं व्याकुप्येत इत्यनया दिशा जीवाभेदप्रकरणादि-ष्वप्यूह्यम् ॥ किञ्च धामशब्दस्य नानार्थत्वाद्धामप्रसारिसर्वतइ-त्यादौ तेजोवाचकताया दृष्टत्वा त्तेजस्यपिधामस्यादित्यनेकार्थे-षु हलायुधकोशाच्च कथंनतेजोवाचकत्वं कथंचगेहवाचकत्वमेव कथंचपरमगतिशब्देनोक्ताज्ज्ञानीत्वात्मैवमेमतम् समहात्मासुदु-र्लभः नहिज्ञानेनसदृशंपवित्रमिहविद्यते इत्येवंसंस्तुतेन ज्ञानेन साध्यान्मोक्षा यद्वाचानभ्युदितं येनवागभ्युद्यतेतदेवब्रह्मत्वंविद्धि-नेदंयदिदमुपासते इत्यादिनाऽभ्यासेनाब्रह्मत्वेनयदुक्तं तद्विषयके-नोपासनेन तमेवविदित्वाऽतिमृत्युमेतिनान्यःपंथाविद्यतेऽयनाये-त्यादिश्रुतिविरुद्धायाः पुरुषोत्तमप्राप्तेः श्रेष्ठत्वमुच्यते ॥ एतेन येतु-ज्ञानैकसंनिष्ठास्तेषांतुलयएवहि ॥ भक्तानामेवभवतिलीलास्वादो-ऽतिदुर्लभः इत्यपिप्रत्युक्तम् ॥ २० ॥ यत्तु यद्वाचाइत्यस्यायमर्थः यद्वागाद्यगम्यं तत्प्रेरयितृ ब्रह्म विद्धि नेदं वागादि॥ कथंतर्हि तस्य ज्ञानं तत्राह॥ यदिदं श्रुतिप्रसिद्धमुपासते वैदिकाइतिशेषः॥ यद्यु-पास्यस्याब्रह्मत्वमभिप्रेयात्तर्हि पुनरिदंकारं नब्रूयात् नेदंयदुपास-तइत्येतावतैवसिद्धेरिति ॥ तन्न ॥ नेदंत्वयौषधंभोज्यं यदिदंशूद्रा-भुञ्जतेइतिवदुभयत्र प्रसिद्धिसूचनायेदंकारद्वयस्य सत्त्वात् ॥ अ-न्यतरोपादानेहि उपासनायां निषेधेचप्रसिद्धिर्नस्यात् ॥ किञ्च

त्वदुक्तव्याख्यायां तृतीयचरणेब्रह्मणउक्तत्वेन नेदंशब्दम्पुनर्ब्रूयात् तदव्यवहितं वाब्रूयादुत्थिताकाङ्क्षत्वान्नतुनिषेधाव्यवहितम् ॥ अनुत्थिताकाङ्क्षत्वात् ॥ ततोऽग्रेब्रुवन्प्रतियोगिनं समर्पयतीतिभाति ॥ आकाङ्क्षायाउत्थानात् ॥ किञ्चेदमः सन्निकृष्टपरामर्शकत्वेन वागादिसमुदायस्याऽसन्निकृष्टतया तेन परामर्शोऽयुक्तइति प्रत्येकमेव सवाच्यस्तथाच वाक्प्राणयोरनपुंसकत्वेन तत्र नपुंसकनिर्देशोऽप्यसंगतःस्यात् ॥ किञ्च वागादेर्ब्रह्मत्वं कथं प्रसक्तं यदनेननिषिध्यते ममतुसविशेषस्योपासनाप्रकरणानुरोधेन ब्रह्मत्वं प्राप्तं तन्निषिध्यते ॥ निषेधश्च न सर्वथा तदभावबोधनाय किन्तु ज्ञेयस्वरूपत्वाभावबोधनाय॥अतएव विद्धीत्युक्तमित्यास्तां-तावत् ॥ तस्मादुपासकानामुपास्यब्रह्मप्राप्तिर्या भवति सा न मुख्यब्रह्मप्राप्तिः॥ उपास्यब्रह्मणः करादिकमास्तां नतावता ज्ञेयब्रह्मणि तत्प्रसक्तिः ॥ ४ ॥ २१ ॥

नञ्सामान्यनिषेधकृद्यदुदिता नोर्वी सकुम्भाऽघटा संकोच्योविहितौ विशेषउपसंहारानपेक्षोबलात्॥ तुल्ये सापिविधेर्विशेषविषयोविध्यादिना न्यायतः संकोचः सफलं प्रपञ्चवचनं मिथ्यात्वभाविस्थितः॥ ५॥

इदानीम् अत्रैवशाङ्कराःप्राहुर्मायिकंनश्वरंजगदिति श्लोकटीकायामस्थूलमनणु निष्कलंनिष्क्रियंशान्तंनिरवद्यंनिरञ्जनमित्यादि-श्रुतीरूपन्यस्य तासामेतस्यैवानन्दस्यान्यानिभूतानिमात्रामुपजीवन्ति आसीनोदूरंव्रजति इत्यादिश्रुत्यनुरोधेन यज्जीवादिगतलौ-

किककलादिनिषेधपरत्वमुक्तं तत्रैवचार्थैं प्रकृतैतावत्त्वंहिप्रतिषेधतीति सूत्रमुपष्टम्भकतयोपन्यस्तं तन्न्यायविरुद्धमित्याह ॥ नञ्सामान्येति ॥ यद्यस्मात्कारणात्सकुम्भा पृथिवी अघटा नोच्यते अतोनञ्सामान्यनिषेधकृत् स्वान्वयिताऽवच्छेदकधर्मावच्छिन्नात्यन्ताभावबोधकइत्यर्थः ॥ नञित्युपलक्षणं निषेधार्थकपदान्तरस्यापि ॥ यतस्तादृशी भूमिर्निष्कुम्भापिनोच्यते तस्मान्निषेधवाक्येषु संकोचे न्यायविरोधइति ॥ यत्र विशेषेविहितिः विशेषविषयकं विधानमस्ति तत्र न्यायविरोधेऽपि तादृशवचनवलादेव सामान्यनिषेधकोऽपि नञ् विशेषेसंकोच्य स्तद्बलादेव सक्लेशः सह्यइतियावत् ॥ यथा नहिंस्यात्सर्वा इतिश्रुतिस्थस्य नञोऽग्नीषोमीयंपशुमालभेतेति विधिबलात् ॥ तथाच तत्र सर्वशब्दस्योक्तन्यायाविरोधाय विशेषेलक्षणा ॥ यतः सउपसंहाराऽनपेक्षः यथाहि विधिवाक्येन सामान्यार्थबोधे सामान्यस्य विशेषमन्तरा पर्यवसानाभावाद्विधिवाक्यस्य तदपेक्षत्वं तथा निषेधवाक्यस्य नास्ति उक्तविधाभावस्यैव तेन बोधात् ॥ तुल्ये निषेधशास्त्रादन्यूनानतिरिक्तेविधाने सापि विहितिरपि वचनवलादेव संकोच्या ॥ यथाऽतिरात्रेषोडशिनंगृह्णाति नातिरात्रेषोडशिनंगृह्णातीत्यत्र॥ पक्षान्तरांशेऽनुत्थिताकाङ्क्षत्वेन तत्रसंकोचस्य न्यायेनालाभात् निषेधेनावसरानवशेषणाच्च तथाचोभयत्र गौरवं सह्यम् ॥ विधेः सामान्यविधेः पुरोडाशंचतुर्धाकरोतीत्यस्य सस्यमिवमर्त्त्यःपच्यते सस्यमिवाजायतेपुनः ध्रुवंजन्ममृतस्यचेत्यस्यच विशेषविषये आग्नेयादिविषये विधिना ऽऽग्नेयंचतुर्धाकरोतीत्यनेन आदिपदेन निषेधोग्राह्यस्तेन नसपुनरावर्तते यद्गत्वाननिवर्तन्ते इत्यनेन न्यायत

उपसंहारापेक्षत्वादितिभावः ॥ एवञ्चास्थूलादिवाक्यप्रतिपाद्यस्य निषेधस्य कीदृशेनापिवाक्येन लौकिकस्थौल्यादिनिषेधबोधकत्वे संकोचेक्लेशएव ॥ नातिरात्रेइतिश्रुतिवन्नहिंस्यादितिश्रुतिस्थसर्वशब्दवद्वा तस्य दुर्वारत्वात् ॥ एतस्यैवानन्दस्येत्यादिवाक्यप्रतिपाद्यस्य तु समानविषयकनिषेधेन संकोचएवक्लेशः ॥ इन्द्रोमायाभिर्मायान्तुप्रकृतिमित्याद्युपसंहाराः अशरीरंशरीरेष्वित्यादयो ज्ञेयस्याकारनिषेधाश्च समानविषयकानसन्त्येवेति तैः संकोचे नास्ति क्लेशः ॥ एतस्यैवानन्दस्य आसीनोदूर मित्यादिजन्यमात्रागमनादिसामान्यधियः किंस्वप्नादिवदयं मात्रादिर्मायिकउतात्मवदमायिकइति किमयंज्ञेयस्योताज्ञेयस्येति च विशेषाकाङ्क्षत्वात् ॥ ॥ २२ ॥ स्वमते विशेषानुवादफलमाह ॥ सफलमिति ॥ हि यस्मात् अभाविस्थितः स्वात्यन्ताभावाधिकरणस्थो मिथ्येत्युच्यते तस्मात्तद्बोधनाय प्रपञ्चवचनं सफलमित्यन्यत्रविस्तरः ॥ यत्तु प्रत्यक्षं क्वापि वेदे मिथ्यात्वकथनं नास्तीत्युक्तं तदनेनैवनिरस्तम् ॥ अधिष्ठाननिष्ठात्यन्ताभावप्रतियोगित्वस्यैव मिथ्यात्वपदार्थत्वेन मिथ्यापदेनानुक्तावपि अविप्रतिपन्नरूपेण मिथ्यात्वस्योक्तत्वात् ॥ एवंच विशेषानुवादस्याभावे वायौ रूपस्य निषेधेपि तस्याग्न्यादाविव ब्रह्मणि विशेषाणां निषेधेपि प्रधानादौ तेषां सित्ध्या मिथ्यात्वाऽसिद्धे स्तदनुवादोयुक्तः ॥ ईक्षत्यधिकरणमपि ब्रह्मणि विशेषाधारत्वे सत्येव प्रधानादौ तदभावं बोधयितुमीष्टे ॥ तदाहुरध्यारोपापवादाभ्यांनिष्प्रञ्चंप्रपञ्च्यते इति ॥ ब्रह्मनिरूपकमहावाक्यप्रकरणे विशेषनिरूपणं बुद्धिसौकर्यार्थं ॥ क्वचित्तु शब्दवाक्यप्रदर्शनपरं लक्ष्यज्ञानसौकार्यार्थम् ॥ उपासनायाः प्रकरणेतु तद-

र्थमिति ॥ किञ्च श्रुतिषु विशेषनिरूपणाभावे निर्विशेषवाक्यानां लौकिकविशेषनिषेधपरत्वं स्यादपि सतिलौकिकालौकिकविशेषद्वयस्यसमूलत्वे ॥ सतितु श्रुतिषु तन्निरूपणे नैवंभवितुंशक्यं॥ प्रत्यासन्नप्रतियोगिनं विहायाऽप्रत्यासन्नप्रतियोगिनिषेधे न्यायविरोधात् ॥ अन्यथा नतत्ररथाइत्यनेनापि लौकिकरथादेरेवनिषेधः स्यादथरथानित्यादिनातु पारमार्थिकरथादिप्रतिपाद्येत ॥ मायामात्रंत्विति सूत्रं श्रुतिविरुद्धंस्यात् ॥ तादृशसूत्रबलेन कथंचित् श्रुत्यर्थस्यान्यथाकरणेतु इहापि प्रकृतैतावत्त्वमितिसूत्रबलेन श्रुत्यर्थोऽन्यथाक्रियेतेत्यलम् ॥ ५ ॥ २३ ॥

विष्णौ जीवगकर्तृतादि यदि नप्राप्तं निषेध्यं कथं
प्राप्तं चेत्प्रतिबन्धतोन तदसत्त्वाधीनं योगान्तरैः॥
सर्वैरेव हरौ यतस्तव जगद्योगैः समस्तात्मनि आ
विर्भावनिषेधने क्व सनचेत्सर्वात्मसर्वाश्रये॥ ६॥

इदानीमुक्तन्यायमनाश्रित्याऽपि निर्विशेषश्रुत्यादेर्युक्त्यन्तरेण तदुक्तार्थपरत्वं खण्डयति॥ विष्णाविति॥ जीवादिसंबन्धि यद्गन्तृत्वकलादिकं तदेवासीनोदूरंव्रजतिनिष्कलमित्यादावासीनादिपदैर्निषिध्यते इतिहि तदभ्युगमस्तत्र तावत्सप्रष्टव्यः किमिदं जीवादिगतगन्तृत्वादिकम् ईश्वरे न प्राप्तम् उत प्राप्तम् नाद्य इत्याह॥ यदिनप्राप्तमिति ॥ प्रसक्तंहिप्रतिषिध्यतेइतिन्यायादितिभावः ॥ जीवेत्युपलक्षणं जडस्यापि ॥ ननु सर्वंखल्विदंब्रह्मेत्यादिभिः सर्वाभेदबोधकैर्वाक्यैर्जगदिव तदन्तःपातिजीवादिसंबन्धिगन्तृत्वादिकमपि प्राप्तमेवेति कुतोनेत्युच्यते इति द्वितीयपक्षमाशङ्क्याह॥

प्राप्तंचेदिति ॥ प्रतिबन्धतइति ॥ विशिष्टतद्वत्ताबुद्धेस्तदभाववत्ताबुद्धिप्रतिबन्धकत्वा त्सर्वंखल्विति सर्वशब्देन विशिष्य तत्तद्धर्मोपादानेनाऽभेदबोधने तन्निषेधासम्भवात् ॥ अन्यथा नेतिनेतीतिवाक्यैर्लौकिकजगतस्तत्र निषेधे यतोवाइत्यादिवाक्यैरानन्दमयस्य-जगतः स्वीकारस्तत्र त्वन्मते स्यात् ॥ द्विविधवाक्यबलेन गन्तृत्वादेरिव जगतोऽपि द्वैविध्यसंभवात् ॥ ओमितिचेत् लौकिकजगतः किमुपादानं ॥ ब्रह्मैवेतिचेत्तत्रनिषेधानुपपत्तिरतएवनजगद्विषये द्वैविध्यकल्पनेति चेद्गन्तृत्वादिषु जीवधर्मेषु तन्न्यायावतारः॥ ननु जीवधर्माउपादानोपादेयभावेनेश्वरे सन्ति धर्मिधर्मभावेन तत्र निषिध्यन्ते तत्राह ॥ नयोगान्तैरिति ॥ उपादानस्यापि धर्मित्वेन धर्मिधर्मभावेन निषेधे उपादानतयाऽपि निषेधात् ॥ किञ्च येन संबन्धेन निषिध्यन्ते ससंबन्धश्चेद्धरौ नास्ति तर्हि सर्वात्मत्वहानिर्यद्यस्ति तर्हि तेन निषेधानुपपत्तिस्तेन सबन्धेन जगतस्तत्रसत्वात् ॥ नहि घटसंयोगवति भूतले संयोगेन घटोन भवति नवा तत्रसंयोगेन घटोनास्तीति प्रमाभवतीत्याह ॥ समस्तात्मनीति ॥ समवायाङ्गीकर्तृमतेतु येन संबन्धेनेत्यस्य स्थाने यन्निरूपितत्वविशिष्टेन येन संबन्धेनेतिनिवेश्यम् ॥ ननु जीवधर्माः सन्त्येव हरौ तेषामाविर्भावस्तत्रनिषिध्यते यतस्ते जीवे आविर्भूतास्तिष्ठन्ति तत्राह ॥ आविर्भावेति ॥ सः आविर्भावः यदा सर्वस्य सएवाश्रयस्तदा तत्रासत्त्वे क्वसत्त्वंस्यात् ॥ तस्य सर्वाश्रयत्वेन आविर्भूतानामपि तत्र सत्त्वाभ्युपगमस्यावश्यकत्वमितिभावः ॥ किञ्च जीवे तत्सत्त्वे सुतरामीशे तत्सत्त्वं जीवस्येशादभिन्नत्वादित्याह ॥ सर्वात्मेति ॥ ६ ॥ २४ ॥

नात्माऽणुः श्रुतितः स्मृतेरणुवचोगौणं परस्मिन्न्य
था एवं बुद्धिगुणैर्विसर्पिगुणता युक्तेर्विरोधान्नतु॥
अंशत्वं घटखाम्बुचन्द्रवदजोजीवोऽत्र कस्याऽपरं
ज्ञानस्याऽपि तिरस्कृतिर्यदि तदा प्रीतिश्च भानं क
थम्॥ ७॥

यत्तु त्रयश्चत्वारिंशश्लोकव्याख्यायाम् एषोऽणुरात्माचेतसावेदितव्यइति श्रुतेर्जीवस्याऽणुत्वम्॥ लिङ्गशरीराभिप्रायेणाणुत्वस्य गौणस्य वर्णनेतु न मानम्॥ सवाएषमहानजइतीयं श्रुतिस्तु ब्रह्मपरा॥ तत्प्रकरणस्थत्वात्॥ तथाच सूत्रं नाणुरतच्छ्रुतेरितिचेन्नेतराधिकारात्॥ अतच्छ्रुतेरित्यस्य महत्त्वश्रुतेरित्यर्थइत्युक्तं तत्राह॥ नात्माणुःश्रुतितइति॥ श्रुतिस्तु सवाएषमहानजआत्मायोयंविज्ञानमयः प्राणेषुहृद्यन्तर्ज्योतिरिति॥ नचेयंपरविषया॥ प्राणहृदयविज्ञानानां परस्मिन्नसंबन्धात्॥ विज्ञानंहि बुद्धिः॥ प्राणादिसहचारात्॥ प्रदेशान्तरेऽपि तत्सहचारदर्शनाच्च विज्ञानमयोमनोमयःप्राणमयइति॥ हृदयस्थानलिङ्गाच्चजीवविषया॥ जीवस्य हृदयस्थानंतु अवस्थितिवैशेष्यादितिचेन्नाभ्युपगमाद्धृदिहि इतिसूत्रसिद्धम्॥ प्रकरणन्तु लिङ्गादिभ्योदुर्बलम्॥ आलोमभ्यआनखाग्रेभ्यइतिश्रुतेश्च॥ साहि तत्रात्मसत्वं स्वरूपाभिप्रायेणाह नतुचैतन्याभिप्रायेण॥ मानाभावात्॥ लोमनखे तददर्शनाच्च मर्यादायामाङित्यङ्गीकारेऽपि नखाग्रात्प्राग्भागे तदुपलब्धिप्रसङ्गात् वर्धितनखेषु तददर्शनात्॥ गुहांप्रविष्टावितिश्रुतिप्रदर्शनंतु मौख्यादीश्वरस्याऽपि तथात्वापत्तेः॥ तत्रौपाधिकतयोपपादनेऽत्रापि तथा-

वक्तुंशक्यत्वात् ॥ तत्सहचारेण जीवेऽपि तथैववक्तुमुचितत्वेन त-स्याःश्रुतेस्तत्प्रतिकूलत्वाच्च ॥ स्मृतेरिति ॥ नित्यःसर्वगतःस्थाणुरचलोयंसनातनइतिस्मृतेरित्यर्थः ॥ यत्तु तत्र सर्वगतेन सहतिष्ठतीतिसर्वगतस्थः सचासावणुश्चेतिव्याचख्यौ ॥ तन्न ॥ सामानाधिकरण्येन स्थित्या तथाप्रयोगे रसस्य रूपेण सह स्थित्या रूपस्थोरसइतिप्रयोगापत्तेः ॥ तस्मात्तत्रासामर्थ्यान्नोपपदसमासः ॥ किञ्चैवं सर्वगतस्थपदं विफलं स्यात्प्रकृतानुपयोगात् ॥ नच यथाश्रुतेऽर्थेपि स्थाण्वचलपदयोः पर्यायत्वापत्तावन्यतरवैयर्थ्यमापद्येतेतिवाच्यम् ॥ स्थाणुपदस्य निर्विकारार्थकतया तत्राचलइत्यस्य हेतुर्गभितविशेषणत्वात् ॥ अस्माकं सविसर्गनिर्विसर्गपाठयोरुभयोः सङ्गतिस्तस्यतु सविसर्गपाठोऽसङ्गतःस्यात्सच तद्गुरुणा कृते विद्वन्मण्डने दृश्यते ॥ किञ्च तेनास्मदभिमतार्थपरत्वेनैवोपन्यस्तमिदंवचनम् ॥ एषोऽणुरात्माचेतसावेदितव्यइत्यत्रतु परस्यैवग्रहणं ॥ परस्यैवात्मनश्चक्षुराद्यगम्यत्वेन ज्ञानप्रसादगम्यत्वेन प्रकृतत्वात् ॥ इहापि वेदितव्यतया उक्तत्वाद्वेदितव्यश्च परएवात्मा ॥ किञ्च यथाऽणोरणीयानित्यादिवाक्यं महतोमहीयानितिवाक्यबलात् दुर्ज्ञेयत्वपरमित्यङ्गीक्रियते तथेहापि महानजः नित्यःसर्वगतःस्थाणुरित्यादिवाक्यबलाद्बालाग्रशतभागस्येत्यादिवाक्यं तत्परं स्वीक्रियतामित्याह ॥ परस्मिन्यथेति ॥ यथा दुर्ज्ञेयत्वाभिप्रायेण ब्रह्मण्यणुवचस्तथा जीवइत्यर्थः ॥ किञ्च बुद्धिस्थगुणैरेवात्रतथा व्यपदेशोऽस्तु तथाच श्रुतिर्बुद्धेर्गुणेनात्मगुणेनचैवआराग्रमात्रोह्यवरोपिदृष्टइति ॥ एतेनोत्क्रान्त्यादयोऽपि व्याख्यतास्तासामपि बुद्ध्युपाधिकत्वात् ॥ तमुत्क्रामन्तंप्राणोनूत्क्रामतीत्यादौ प्राणादेरेव प-

श्वादुत्क्रमणमुक्तं नतु बुद्धेरिति तस्याः सहोत्क्रमणेऽपि नतद्विरोधः॥ अनोर्लक्षणार्थत्वेनापिविरोधाभावाच्च॥ तथाच भगवद्गीतायां शरीरंयदवाप्नोतियच्चाप्युत्क्रामतीश्वरः ॥ गृहीत्वैतानिसंयातिवायुर्गन्धानिवाशयात् ॥ श्रोत्रंचक्षुःस्पर्शनंचरसनंघ्राणमेवच ॥ अधिष्ठायमनश्चायंविषयानुपसेवते इत्यत्र ग्रहणपूर्वकं गमनमुक्तम् ॥ तथाचसूत्रम् तद्गुणसारत्वात्तुतद्व्यपदेशःप्राज्ञवदिति ॥ तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः ॥ एतेन नाणुरतच्छ्रुतेरिति सूत्रविरोधः परिहृतस्तस्य पूर्वपक्षस्थत्वात् ॥ सूत्रार्थस्तु तस्याबुद्धेर्गुणास्तद्गुणास्ते सारः प्रधानं यस्यात्मनः संसारिभावे संभवन्ति कारणत्वात् सतद्गुणसारस्तद्भावस्तद्गुणसारत्वं तस्मात् ॥ तद्व्यपदेशः अणुत्वोत्क्रान्त्यादिव्यपदेशः ॥ प्राज्ञवत् यथा प्राज्ञस्य परमात्मनः सगुणेषूपासनेषु उपाधिगुणसारत्वादणीयस्त्वादिव्यपदेशोऽणीयान्व्रीहेर्वायवाद्वा इत्येवंप्रकारस्तद्वदिति ॥ यद्वा सारोबलेस्थिरांशेचेतिमेदिनीकोशाद्बलवाची सारशब्दः ॥ एतेन बुद्धिगुणानामनर्थरूपत्वात्कथं सारत्वमित्यपास्तं ॥ संसारित्वे सारत्वाच्च ॥ तदेतदाह ॥एवंबुद्धिगुणैरिति ॥ किञ्चात्मनोऽणुत्वे निदाघे सकलदेहव्याप्यौष्ण्यं युगपन्नप्रतीयेत एवं गङ्गाह्रदनिमग्नस्य शैत्यम् ॥ नच यथा गुणिनोमण्यादेरेकदेशस्थत्वेऽपि तत्प्रभास्तद्गुणाअधिकं देशं व्याप्नुवन्ति एवं जीवस्याणोर्हृद्देशस्थस्यापि ज्ञानं गुणः सर्वत्र देहे प्रसरति तेन तद्व्यापिशैत्यौष्ण्योपलब्धिरितिवाच्यम् ॥ प्रभाया विरलसंयोगवत्तेजोद्रव्यत्वेन गुणत्वे प्रमाणाभावात् ॥ यत्तु विद्वन्मण्डनटीकायाम् आलोकस्य द्रव्यत्वे व्योम्नि वर्तमानस्य तस्य तदातिरेकेण तद्रूपग्रहणापत्तिरित्युक्तं ॥ तन्न ॥ ज्वालादौ तददर्शनात् ॥ सचदीपजन्य-

इति दीपस्याऽऽलोकइत्युच्यते ॥ प्रदीपाद्यालोकस्य गुणत्वे प्रकाशवत्सूत्रविरोधः ॥ एवंच विशेषाभावान्मण्याद्यालोकोपि द्रव्यम् ॥ एवंच वस्तुतस्तु आलोकोऽत्र मणेरेव ग्राह्यइति कुशकाशावलम्बनमपि प्रत्युक्तम् ॥ ज्ञानस्य गुणत्वे पदार्थान्तरेण संयोगसमवाययोरसम्भवेन साक्षात्संबन्धान्तरस्य वक्तुमशक्यत्वेनाऽसंबद्धस्य भानेऽतिप्रसङ्गेनच शैत्यादिभानानुपपत्तिः॥ एवं प्रभायागुणत्वमित्यादिना तस्याःसंबन्धोदुर्वचः॥ एवंच चक्षुषा भित्त्यादेर्ग्रहणमपि दुष्करं तेजः संबन्धाभावात्॥तथाऽऽलोकस्य चाक्षुषसत्त्वेन गुणचाक्षुषे स्वसंयुक्तद्रव्यद्वाराचक्षुषोहेतुत्वं व्याकुप्येत ॥ एतेन गन्धस्यापि निराश्रयस्य गमनं प्रत्याख्यातम् ॥ घ्राणेनासंबन्धेनाप्रत्यक्षत्वप्रसङ्गात् ॥ द्रव्यद्वारकस्य घ्राणहेतुत्वस्य भङ्गाच्च ॥ तस्माद्गन्धोऽप्यवयवैस्सहैव याति तेषां च यथाद्रव्यस्वभावमेव प्रसरणं द्रव्यैश्चाकर्षणमिति नातिदूरे गन्धभानं नवा द्रव्यस्य देशान्तरे गगमनेऽवयवान्तरप्रसरणम् ॥ अतिसौक्ष्म्याच्च नतदपगमेऽपि द्रव्यस्य लघुत्वादिभानम् ॥ त्वयापि हि गुणभूतस्य गन्धस्यातिदूरगमनाभावाय न्यूनत्वाभावाय च तत्रितयं कल्पनीयमिति समं कल्पनागौरवम् ॥ सूक्ष्मावयवान्तरपूरणंवा कल्प्यते त्वयापि न्यूनताभयाद्गन्धान्तरोत्पत्तिः कल्पनीया ॥ एवमनेकचर्मपुटवेष्टितमृगमदादिषु गन्धस्येवावयवानामपगमागमौ बोध्याविति साम्यम्॥ कर्पूरेऽवयवानागमाल्लघुतैव ॥ गन्धमात्रापगमे सा कथं स्यादितिविचार्यम्॥परिमाणसाम्येऽल्पगन्धतातु पूर्यमाणावयवानामल्पगन्धत्वेन वक्तुंशक्या ॥ प्रसारितमुखस्य तद्रसानुपलंभस्तु रसनेन्द्रियस्याऽत्यल्पवस्तुरसाग्राहकताया दृष्टत्वात् ॥ अतएव कर्पूरस-

न्निधौ तद्गन्धज्ञानेऽपि नतद्रसज्ञानम् ॥ नच सकृत्स्पृष्टस्यापि लशुनादेर्हस्तादीनां क्षालनेऽपि गन्धोनापैतीति गन्धमात्रस्य करादौ संबन्धोनावयवानां तेषां सकृत्स्पर्शेनागतानां सकृत्क्षालनेनापगमस्यौचित्यादितिवाच्यं ॥ सकृत्स्पर्शेनागतस्य गन्धस्याऽपि सकृत्क्षालनेनापगमौचित्यात् यदितु गन्धे तदर्थं सामर्थ्यं किञ्चित्कल्प्यते तर्हि तत्तदाश्रयएव कल्प्यताम् ॥ यथावृक्षस्यसंपुष्पितस्यदूराद्गन्धोवात्येवंपुण्यस्यकर्मणोदूराद्गन्धोवातीतिश्रुतौ गन्धशब्दोगन्धवद्द्रव्यपरोलेशपरोवा ॥ गन्धःप्रतिवेश्यामोदलेशसंबन्धगन्धकेइतिमेदिनीकोशात् ॥ दूरत्वंतु वृक्षापेक्षया तस्योपात्तत्वात् नतु स्वाश्रयापेक्षया मानाभावात् ॥ पृथिवीं परित्यज्य गन्धस्थितेः सर्वथाऽयुक्तत्वात् ॥ तथाचव्यासः॥उपलभ्याप्सुचेद्गन्धंकेचिद्ब्रूयुरनैपुणाः ॥ पृथिव्यामेवतंविद्यादपोवायुंचसंश्रितमिति ॥ यत्तु केचिच्छब्दवदनाश्रयस्य चैतन्यस्य गतिमाहुस्तन्न ॥ श्रोत्रेन्द्रियस्य गत्वा ग्राहित्वेन शब्दस्य चलनाभावात् ॥ यत्तु यथा चन्दनस्यैकदेशस्थस्य सर्वदेहव्यापिशैत्यसंपादकत्वमेवं जीवस्यापि हृद्देशस्थस्य सर्वदेहव्यापिज्ञानसम्पादकत्वमिति ॥ तन्न ॥ चन्दनस्य सावयवत्वेन सूक्ष्मतदवयवप्रसरणेन देहव्यापिशैत्यापादकत्वसम्भवात्॥एतेनगुणाद्वालोकवत् व्यतिरेकोगन्धवत् अविरोधश्चन्दनवदितिसूत्राण्यपिसमाहितार्थानि ॥ तेषांपूर्वपक्षपरत्वात् ॥ कथमन्यथा प्रकाशाश्रयद्वातेजस्त्वादित्यनेन विरुद्धं गुणाद्वालोकवदितिसूत्रकारोवदेत् ॥ अधिकजिज्ञासुभिस्तु शारीरके द्रष्टव्यम्॥ तदेतदभिप्रेत्याह ॥ विसर्पिगुणतायुक्तेर्विरोधान्नतुइति ॥ एतेन विसर्पिगुणचैतन्योऽणुर्जीवइति प्रत्युक्तम् ॥ २५ ॥ यत्तु विसर्पि-

गुणचैतन्योऽणुर्जीवोंशोहरेःस्मृतइति यच्चाऽभेदोवास्तवःस्वांशा-
जीवाइतिनिजेमतेइति च जीवस्य ब्रह्मावयवत्वमुक्तम् तत्खण्ड-
यति ॥ अंशत्वमित्यादिनातृतीयचरणेन ॥ अंशोनानाव्यपदेशा-
दित्यत्रांशइवांशः सचावच्छेदवादेन प्रतिविम्बवादेन वासमर्थ-
नीयः ॥ नच सूत्रे मुख्यांशपरित्यागे प्रमाणाभावइतिवाच्यम् ॥
हस्तमात्रेऽयंदेवदत्तइति व्यपदेशस्य मुख्यत्वाभावेन विप्रहस्तच्छे-
दने ब्रह्महत्याप्रायश्चित्तस्य धर्मशास्त्रज्ञैरनुपदेशेन च अवयवे मु-
ख्याभेदव्यपदेशाभावेन गौणाभेदव्यपदेशस्यावयवत्वव्याप्त्या ते-
न तत्साधने तवापि मुख्यार्थस्यैकत्रत्याज्यत्वात् ॥ किञ्चौपचारि-
कोऽपि अभेदव्यपदेशोव्यभिचारवाणाय विशिष्यैवहेतुर्वाच्यः स-
च दुर्वचइत्यवयवसदृशोंऽशशब्देन ग्राह्यस्तत्रच मुख्योऽभेदव्यप-
देशो भेदव्यपदेशस्तु गौणोव्याप्यः ॥ एवंचोक्तविधं विभुत्वमप्यु-
पपन्नम्॥ एवमेव ममैवांशोजीवलोके इति गीतापि व्याख्येया॥ सू-
त्रैकवाक्यतालाभात् ॥ अतएव निष्कलमिति ब्रह्मणि कलानिषे-
धश्रुतिःसंगता ॥ तत्र न्यायोपबृंहितश्रुतौ संकोचापेक्षयाऽन्यत्र
संकोचएव युक्तः ॥ नचावच्छेदवादे ऽवयवसादृश्येऽपि प्रतिबिम्ब-
वादे कथंतदितिवाच्यम् ॥ परिच्छिन्नोपाधिप्रतिबिम्बस्योपाधिप-
रिच्छेदेन परिच्छिन्नतयाऽवयवसादृश्योपपत्तेः ॥ किञ्च त्वदुक्तरी-
त्या ईशस्योपचयापचयाभ्यां विकारित्वापत्तिः॥ जीवस्य तत्तद्दे-
शगमनार्थं निस्सरणे हरेस्सच्छिद्रत्वापत्तिश्च ॥ सन्निहितावय-
वान्तराणां तत्र प्रसर्पणेतु शैथिल्यापत्तिः॥ परास्यशक्तिर्विविधै-
वश्रूयतेइतिश्रुतिर्मायाविषयैव ॥ मायायामेवाघटितघटनापटी-
यसीत्वस्य लोके दृष्टत्वेन ततोऽतिरिक्तायाः शक्तेः सत्त्वे तस्यां

तादृशसामर्थ्यवत्त्वकल्पने च प्रमाणाभावादितीयमपि श्रुतिर्जीवेशावाभासेनकरोति मायाचाविद्याच स्वयमेवभवति इत्यादिश्रुत्यन्तरोक्तमेवार्थं द्रढयति नत्वेतया श्रुत्या जीवानां तदवयवत्वेपि तस्य निरवयवकत्वं ॥ तेषां ततोनिस्सरणेऽपि सच्छिद्रत्वाद्यभावं विचित्रशक्तिमत्वेनेशस्यबोधयितुं युक्तं ॥ लोकविरोधाच्छ्रुत्यन्तरविरोधाच्च ॥ २६ ॥ इदानीमग्नेर्यथाविस्फुलिङ्गास्तथाजीवोद्गमः स्मृतइति तदुक्तं जीवस्योद्गमनं खण्ड्यते ॥ अजोजीवइति ॥ प्राणवज्जीवस्य व्युच्चरणे समानश्रुत्या तद्वदेवोत्पत्तौ नाशोऽपि तस्यस्यात् ॥ उत्पन्नस्य नाशध्रौव्यात् ॥ जातस्यहिध्रुवोमृत्युरितिभगवदुक्तेः ॥ नन्वस्तु तथा येतु ज्ञानैकसन्निष्ठास्तेषांतुलयएवहीत्यस्मदीयैर्मुक्तौ लयस्यैवोक्तत्वादितिचेत्सुव्याख्यातमात्मविनाशार्थं यतामहेइतिवदता ॥ अधिकमुत्तरभागे वक्ष्यते ॥ तस्मादुपाध्युद्गमेनैव जीवोद्गमः ॥ अतएव काण्वानां सर्वएतआत्मानइति पाठोनास्ति उपाध्युद्गमेन तदुद्गमस्य सिद्धत्वात् ॥ माध्यंदिनानान्तु उपाधिनिर्गमेनात्मनिर्गमइति स्पष्टप्रतिपत्यर्थं तथापाठः ॥ अतएव नात्माऽश्रुतेर्नित्यत्वाच्चताभ्यइतिसूत्रंसंगतं ॥ नजायतेम्रियतेवाविपश्चित्इतिश्रुतिर्नजायतेम्रियतेवाकदाचिदितिस्मृतिश्च संगता ॥ ॥ २७ ॥ इदानीं जडेचिदानन्दयोस्तुतथाऽऽनन्दस्यसर्वशः तिरोधानंहरीच्छातोनिबन्धादिषुवर्णितम् ॥ आविर्भावेतुसर्वेहिब्रह्मैवेतिनसंशयः इतिखण्डयति ॥ अत्रकस्येति ॥ अत्र जीवे कस्य सुखस्य तिरस्कृतिर्यदि तदा प्रीतिप्रतीतिः कथम् अपरे जडे ज्ञानसुखयोर्यदि सा तदा भानप्रीतिप्रतीती कथमित्यन्वयः ॥ नहि तिरस्कृतस्य भानं संभवति ॥ यच्चाऽनुभवयोग्यत्वंवर्तमानस्यवस्तु-

नः आविर्भावःसविज्ञेयस्तिरोभावस्ततोऽन्यथा इति त्वदुक्त्या भा- नायोग्यत्वस्यैव तिरस्कारपदार्थतया त्वया स्वीकारात्॥ किञ्च चि- दानन्दौ सतोभिन्नावभिन्नौ वा ॥ आद्येऽपसिद्धान्तः ॥ चिदानन्द- योरसत्त्वापत्तिश्च ॥ द्वितीये तु त्रिषु तेषु तिरोभावातिरोभाववैल- क्षण्यानुपपत्तिः ॥ किञ्च जीवजडयोर्ब्रह्मणाऽत्यन्ताभेदेन एतयोः सुखादितिरोभावे ब्रह्मणोऽपि सस्यात् ॥ एतेन जीवस्यानन्दतिरो- भावेन ब्रह्मणोभेदइत्यपि प्रत्युक्तम् ॥ पूर्वमभेदसत्त्वेनातिरोभाव- तिरोभावयोः समानयोगक्षेमत्वात्॥ किञ्च व्युच्चरणसाम्ये प्राणा- दिजडे ज्ञानस्याऽपि तिरोभावे किं कारणम् ॥ ईश्वरेच्छां प्रति तु वक्ष्यते॥ तर्कस्तु त्वया श्रौतेऽर्थे नाश्रीयते॥ श्रुतौतु अंशांशिभाव- मनादृत्य ब्रह्ममात्रतएव व्युच्चरणमुक्तम् ॥ तस्मात्सर्वत्राऽस्तिभा- तिप्रियमितिप्रतीत्या ब्रह्मणः सर्वत्र सर्वदा सर्वथैकरसत्वेन समा- नैवोत्पत्तिर्वाच्या ॥ वस्तुस्थितिस्तूक्ता ॥ २८ ॥ ७ ॥

मायायां प्रतिबिम्बते चितिरसौ स्वच्छा हि सत्त्वे न सा गाम्भीर्यस्य जले रवस्य गगने भानान्नभः शब्दयोः॥ छाया तत्र परैस्तिरस्कृतिवशात्पश्चीकृ तौ चाम्बरे रूपं नोद्भवतीत्यतोनियमनं सामान्य तोबाधितम्॥ ८ ॥

एवं जीवस्य परसंमतमंशत्वं निराकृत्य स्वसंमतं पन्थानं निष्क- ण्टकं चिकीर्षुः यथाह्ययंज्योतिरात्माविवस्वानपोभिन्नाबहुधैको- नुगच्छन् उपाधिनाक्रियतेभेदरूपोदेवःक्षेत्रेष्वेवमजोयमात्मा

जीवेशावाभासेनकरोतिमायाचाविद्याचस्वयमेवभवति छायात-
पौब्रह्मविदः रूपंरूपंप्रतिरूपोबभूव एकएवतुभूतात्माभूतेभूतेव्यव-
स्थितः एकधाबहुधाचैवदृश्यतेजलचन्द्रवदित्यादिश्रुतिसंमतम्
आभासएवच अतएवचोपमासूर्यकादिवदित्यादिसूत्रसंमतं च जी-
वस्य ब्रह्मप्रतिबिम्बत्वमाह ॥ मायायामिति ॥ अत्र कश्चित्प्रत्य-
वतिष्ठते ॥ मायात्वेनाभिमता नप्रतिबिम्बभाक् अस्वच्छत्वात् १
दारुवत् ॥ निरवयवत्वात् २ रूपाभावात् ३ रूपवत् ॥
अपरिच्छिन्नात्वात् ४ आत्मवत् आकाशवद्वा ॥ एतेषु प्र-
तिबिम्बापत्तिरेव विपक्षे बाधकस्तर्कः ॥ एवम् आत्मा न प्रतिबि-
म्बते अनवयवत्वात् ५ अपरिच्छिन्नत्वात् ६ आकाश-
वत् ॥ अरूपत्वात् ७ तद्वत् वायुवच्च ॥ एतयोः प्रतिबिम्बा-
पत्तिरेव विपक्षे बाधकस्तर्कः ॥ एवंच स्वच्छे सावयवे रूपवति
परिच्छिन्नएवोपाधौ सावयवस्य रूपवतः परिच्छिन्नस्य प्रतिबि-
म्बनियमेन तर्कपराहतत्वान्नेमानि वाक्यानि प्रतिबिम्बत्वपराणि
किन्त्वंशत्वप्रतिपादकवाक्यवदन्यथाव्याख्येयानि इति ॥ तत्र
अजामेकां सत्त्वंरजस्तमइतिप्रकृतेरित्यादिवचनैः स्रष्ट्र्याःप्रकृतेः
सत्त्वगुणकत्वेन मायांतुप्रकृतिमितिश्रुत्या तस्याएव मायाशब्दवा-
च्यत्वेन विद्वद्व्यवहारात्सत्त्वात्संजायतेज्ञानमितीश्वरवाक्याच्च स-
त्त्वस्य स्वच्छत्वेन आत्मावरकतयाऽस्मदीयैस्तमस्सादृश्यस्य त-
त्र स्वीकृतत्वेपि स्वपृष्ठगतघटावरकरजतादिपात्रवत्प्रतिबिम्बग्रह-
प्रयोजकस्वच्छतायाः प्रत्याख्याने प्रमाणाभावेन सजलकज्ज-
लादिलिप्तपात्रादौ दीपादिप्रतिबिम्बदर्शनात्तदनुगतस्य माया-
व्यावृत्तस्य स्वच्छत्वस्य वक्तुमशक्यत्वेनच प्रतिबिम्बग्रहरूपफल-

कल्प्यस्वच्छतायाअदृश्यआकाशादाविव तत्र कल्पने बाधका-
भावेनचाद्योहेतुःस्वरूपासिद्धइत्याह ॥ स्वच्छाहिसत्त्वेनेति ॥
॥ २९ ॥ द्वितीयोपि मायायास्त्रिगुणात्वेन गुणानां सावयवत्वेन
च स्वरूपासिद्धोहेतुरित्यपि अनेनैव सूचितम् ॥ सव्यभिचारश्चे-
त्याह ॥ खस्यगगनेइति ॥ अतएव तृतीयचतुर्थावपि सव्यभिचा-
रौ ॥ आकाशे सावयवत्वस्योत्पत्तिमत्वेन परिच्छिन्नत्वस्य च पा-
दोस्यविश्वा अत्यतिष्ठद्दशाङ्गुलम् एकांशेनस्थितोजगत् विकारा-
वर्तिचेत्यादिवाक्यैः स्वीकारे तु उक्तरीत्या सावयवत्वस्य श्रुत्या-
दिभिरेव परिच्छिन्नत्वस्य च मायायामपि सत्त्वेन स्वरूपासिद्धिरेव
द्वितीयचतुर्थयोर्बोध्या ॥३०॥ ननु स्वच्छत्वमात्रस्यैवोपाधौ प्रति-
बिम्बग्रहप्रयोजकत्वे स्वच्छरूपेऽपि प्रतिबिम्बः स्यादितिचेन्न ॥
रूपस्य स्वच्छत्वे प्रमाणाभावात् ॥ अस्वच्छद्रव्यगतरूपस्य स्वच्छ-
त्वाभावेन स्वच्छगतस्य तत्त्वेऽपि स्फाटिकपात्रस्थजलप्रतिबिम्ब-
स्य तादृक्पात्रगतप्रतिबिम्बादपृथक्त्ववद्रूपप्रतिबिम्बस्य द्रव्यप्र-
तिबिम्बादपृथक्त्वात् ॥ आधाराधेयगतयोः प्रतिबिम्बयोरव्यति-
रेकात् ॥ रूपस्य द्रव्यादपृथक्त्वाच्च ॥ एवं गुणान्तरे क्रियादिषुच
समाधेयम् ॥ अस्वच्छत्वादेव वायुकालदिशासु न प्रतिबिम्बा-
शङ्का ॥ आत्मनि प्रतिबिम्बाभावस्तु प्रभायामिव प्रतिबिम्बग्रा-
हिविजातीयस्वच्छत्वाभावेन बोध्यः ॥ नचास्मन्मते जल-
क्षित्योरेव प्रतिबिम्बस्वीकारात्प्रभायां तदतिप्रसक्तेरभावेन तादृ-
ग्वैजात्यस्वीकारोव्यर्थइतिवाच्यम् ॥ ईदृशनियमस्वीकारस्य श्रु-
त्यादिप्रामाण्याकल्पनलाघवेनैव ततोलघुत्वात्॥ आकाशे शब्दप्र-
तिबिम्बदर्शनेन व्यभिचारित्वाच्च॥ नच त्वन्मते वाय्वादावपि श-

ब्दस्य सत्त्वेन शब्दान्तरस्य वाय्वादिगुणत्वेन प्रतिध्वनेरेवाकाशगु-णत्वं तथाच तस्याकाशेएव समुत्पत्त्या कथं प्रतिबिम्बत्वमिति वाच्यम् ॥ नैयायिकादिरीत्या अङ्गीकारे द्वितीयादिशब्दानांसामान्याकाशस्य तस्या अनङ्गीकारे वर्णात्मकशब्दानां वाग्रूपाकाशस्य गुणत्वात् ॥ दन्ताद्यभिघातजन्यशब्दानामनभिव्यक्तत्वेन वर्णानां दन्तादिजन्यत्वायोगात् ॥ शास्त्रविरोधाच्च ॥ नच वागिन्द्रियं नाकाशःकिन्तु तद्विकारइतिवाच्यम् ॥ प्रकृतिविकृत्योरभेदात् ॥ प्रतिबिम्बशब्दस्यैवाकाशगुणत्वस्वीकारे बाधकाभावाच्च ॥ नहि प्रतिबिम्बत्वप्रयोजकसामग्र्याजन्यत्वे तत्रोत्पत्तिमात्रेण तद्गुणत्वेनवा प्रतिबिम्बत्वाभावः शक्यनिश्चयः ॥ प्रतिवर्णस्य प्रतिबिम्बत्वमन्तराऽनुपपत्तेश्च ॥ नच वर्णाभिव्यञ्जकध्वनिनिमित्तकप्रतिध्वनेर्मूलध्वनिवदेव वर्णाभिव्यञ्जकत्वेन तदुपपत्तिरितिवाच्यम् ॥ अष्टौस्थानानिवर्णानामिति पाणिनीयशिक्षाविरोधात् ॥ तत्प्रामाण्येन तत्तस्थाने वाय्वभिघातजन्यध्वनेरेव वागिन्द्रिये वर्णाभिव्यञ्जकत्वात् ॥ तन्निमित्तकध्वनेरपि व्यञ्जकत्वे प्रमाणाभावात् ॥ वागिन्द्रियस्य निष्फलत्वापत्तेश्च ॥ बहिराकाशवदन्तराकाशएव वर्णोत्पत्तिसंभवात् ॥ किञ्च स्वस्मात्पूर्वतोभेर्यादिध्वनिसमुत्पत्तौ नियमतः प्रतिध्वनिः पश्चिमतएवश्रूयते तदुत्पत्तिपक्षे न संगच्छते ॥ तथाहि ॥ यद्याकाशे प्रतिध्वनिरुत्पद्यते तर्हि किञ्चिद्देशावच्छेदेनैव तद्वाच्यं तथाच तद्देशात्पश्चिमतः स्थितस्य पूर्वतस्तत्प्रतीतिः स्यान्नचैवमस्ति प्रतिबिम्बत्वे तु स्वव्यवहितदेशे एव तत्कल्पनान्नानुपपत्तिः ॥ किञ्च प्रतिबिम्बातिरिक्तं कार्यं मणिमन्त्रादिभिन्नसामग्र्या व्यवहितदेशे न जन्यतेइति कथंप्रतिध्वनिर्न-

शब्दस्यच्छाया॥ ३१ ॥ गगने शब्दप्रतिबिम्बदर्शनादेव पञ्चमोऽपिव्यभिचारी ॥ रूपादेःप्रबिम्बदर्शनाच्च॥ नच द्रव्यत्वे सतीति हेतोर्विशेषणान्नव्यभिचारइतिवाच्यम् ॥ आत्मनोगुणाद्यभावेन द्रव्यत्वासिद्धौ स्वरूपासिद्धेः ॥ द्रव्यत्वपरिभाषायानिर्मूलत्वेन शास्त्रार्थाव्यवस्थापकत्वाच्च ॥ जले आकाशप्रतिबिम्बदर्शनादृष्टान्ते हेतोरसिद्धेश्च ॥ यत्तु तद्गतप्रभामण्डलस्य जले प्रतिबिम्बोनाकाशस्येति ॥तन्न॥ गाम्भीर्यबुध्यभावप्रसङ्गात्॥नहि गाम्भीर्यमवकाशविशेषातिरिक्तं जानुदघ्ने जले वक्तुं शक्यते॥ प्रमाणाभावात् ॥ बहुदेशावच्छिन्नप्रभाप्रतिबिम्बेन गाम्भीर्यव्यवहारइतिचेन्न ॥ देशस्योपलक्षणत्वे यत्रयत्र प्रभामण्डलप्रतिबिम्बस्तत्रतत्र गाम्भीर्यप्रतीत्यापत्तिः ॥ नचैवमस्ति ॥ ममतु यत्राकाशप्रतिबिम्बस्तत्र गाम्भीर्यभानं यत्रतु नतत्प्रतिबिम्बस्तत्र नतद्भानमिति नाव्यवस्था॥प्रतिबिम्बाभावप्रयोजकंतु स्वगतमुपाधिगतं वा किञ्चिदुभाभ्यां कल्पनीयम् ॥ देशस्य विशेषणत्वे घट्टकुटीप्रभातन्यायः ॥ देशस्याकाशानतिरिक्तत्वात् ॥ दिग्रूपत्वे तु तत्कुट्यन्तरप्रभातन्यायः ॥ सएववा ॥ दिशआकाशानतिरिक्तत्वात् ॥ एवं दूरत्वधीरप्याकाशप्रतिबिम्बेनैव समर्थनीया॥तदेतदाह ॥ गाम्भीर्यस्येति ॥ इदं दूरत्वस्याप्युपलक्षणम् ॥ ३२ ॥ अतएव षष्ठोऽपिव्यभिचारी ॥ नचोपाध्यनन्तर्गतस्यैव प्रतिबिम्बइति कथं विभोराकाशस्यात्मनश्च प्रतिबिम्बइतिवाच्यम् ॥ अप्रयोजकत्वादनन्तर्गतत्वस्य ॥ तद्विकारस्य न तत्र प्रतिबिम्बइति नियमेनैव रेखाप्रतिबिंबाऽनवकाशात् ॥ आकाशस्योक्तरीत्या परिच्छिन्नत्वे तु दृष्टान्ते हेत्वभावोऽसाधारण्यंच॥ अभ्राकाशस्य जलाधारत्वं तत्र

प्रतिबिम्बितत्वं चेत्यवच्छेदभेदेन द्विधा जलेस्थितिरिति ब्रह्मजीवयोरप्येकत्र तथास्थितौ नबाधकम्॥ एतेन लोकेबिम्बप्रतिबिम्बयोरेकत्रस्थित्यदर्शनेन द्वासुपर्णा गुहांप्रविष्टौ इत्यादिश्रुतेर्गुहांप्रविष्टावित्यादिसूत्रस्य च विरोधइति आत्मनः सर्वगतस्य सर्वगतायां मायायां सत्त्वेन कथं प्रतिबिम्बः स्यादितिच विद्वन्मण्डनोक्तं प्रत्युक्तम्॥ आकाशवदेवोपपत्तेः॥ मायायाः परिच्छिन्नत्वस्योपपादितत्वात्॥ यत्तु विद्वन्मण्डने नचसंयोगसंबन्धेन तत्र वर्तमानत्वमप्रतिबिम्बेप्रयोजकम् एतयोश्च न संयोगोविभुत्वात् अतोनानुपपत्तिरितिवाच्यम्॥ संयुक्तस्याऽपि प्रभामण्डलस्य तथाप्रतीतेः॥ नच यदंशे संयोगस्तदंशे न तथेतिवाच्यम्॥ बिसिनीसूत्रमात्रान्तरिताङ्गुलीतलभागस्थप्रभाया अपि दर्पणे प्रतिबिम्बादित्युक्तं॥ तदपिनसम्यक्॥ संयोगस्याव्याप्यवृत्तितया ततोऽल्पान्तरितस्थायाश्चांशकल्पनायाः सम्भवेन चासमाधानत्वात्॥ विभ्वोरसंयोगे प्रमाणाभावान्मायायाः परिच्छिन्नत्वस्योक्तत्वात् पूर्वपक्षोप्यकिंचित्करः॥ २३॥ आकाशे व्यभिचारादेव न सप्तमः॥ प्रथमदृष्टान्तेसाध्याप्रसिद्धेश्च॥ यत्तु शुद्धाद्वैतमार्तण्डटीकाकृत्पञ्चीकरणेन तेजआदेरंशस्याऽऽकाशेऽपि सत्त्वेन रूपवत्त्वोपपत्त्या तत्र शब्दप्रतिबिम्बाङ्गीकारेऽपि रूपवत्येव प्रतिबिम्बइति नियमाव्यभिचारः॥वायौतु नातिप्रसङ्गोरूपस्याऽनुद्भूतत्वात्॥ उद्भूतरूपवत्येव प्रतिबिम्बनियमादित्याह॥ तन्न॥ सामग्र्याविशेषाभावेनैकत्रोद्भूतमन्यत्राऽनुद्भूतमित्यत्र गमकाभावात् आकाशस्य चाक्षुषत्वापत्तेश्च स्पर्शवत्त्वप्रसंगाच्च॥तस्मादर्द्धस्य स्पर्शवत्त्वेऽपि स्पर्शानुत्पत्तिवद्वायाविवांऽशत्रये रूपसत्त्वेऽपि अंशपञ्च-

के तदभावेन तत्प्रतिबन्धात्स्थूलाकाशे न रूपोत्पत्तिरित्याह ॥ परैरिति ॥अंशान्तरैरित्यर्थः ॥ प्रतिबिम्बस्याऽज्ञातसत्तास्वीकारे आस्तां वायोः प्रतिबिम्बस्तदग्रहस्तु त्वचः प्रतिबिम्बाग्राहकत्वादेवोपपद्यते ॥ चक्षुषा तु सन गृह्यते॥ वायोस्तदयोग्यत्वात् ॥ नचैवमाकाशप्रतिबिम्बोपि तेन न गृह्येत आकाशस्येन्द्रियागोचरत्वात् ॥ अतएवाप्रत्यक्षेऽपि ह्याकाशे बालास्तलमलिनताद्यध्यस्यन्तीतिभाष्यं संगच्छते इतिवाच्यम् ॥ आकाशे बलाकाउड्डीयंतइति प्रत्यक्षबलेनाकाशस्य साक्षिवेद्यतया तत्प्रतिबिम्बस्यापि साक्षिवेद्यत्वाङ्गीकारात् ॥ तस्मादिन्द्रियान्तरस्य प्रतिबिम्बग्राहकत्वाऽदर्शनेन तत्सामर्थ्याभावाद्घ्राणेन्द्रियेषु चक्षुषः श्रोत्रस्य च तदस्तीति बोध्यम् ॥ सर्वाचेयं कल्पनोक्तश्रुत्याद्यनुगृहीता परोक्तातु तद्बाधिताइत्याह॥इत्यतोनियमनमिति ॥ सावयवे एव प्रतिबिम्बतइत्यादिरूपं नियमनं नियमकरणं श्रुतियुक्तिभ्यां बाधितमित्यर्थः ॥ एवञ्च अम्बुवदग्रहणात्तुनतथात्वमिति पूर्वपक्षसूत्रमपि लब्धपथम् ॥ २४ ॥ यत्तु आभासएवचेत्यस्य यथाऽनाचारीब्राह्मणोब्राह्मणाभासस्तथा तिरोहितानन्दांशोब्रह्माभासइत्यर्थमाह ॥ तत्तु जीवेशावाभासेनकरोति इत्यादिश्रुतिद्वयमपर्यालोच्य ॥ यत्तु विद्वन्मण्डनटीकायां रूपंरूपमित्यत्ररूपंरूपंरूपयित्वाप्रतिपुस्तकन्यायेनमूलरूपोबभूवेतिव्याख्यातं ॥ तन्नयुक्तं ॥ रूढ्यर्थस्य वाक्यान्तरस्वारस्यस्यच भङ्गापत्तेः ॥ मूलरूपत्वोपपादानस्यास्मदुक्तार्थकत्वेपि सम्भवाच्च॥यच्च तत्रैव एकधाबहुधेत्यत्र चन्द्रदृष्टान्तेनांशप्रवेशोविवक्षितइत्युक्तं ॥ तदपिनयुक्तं ॥ चन्द्रमण्डलांशस्य जले प्रवेशाभावात् ॥ यच्च तत्रैव जीवेशावित्यत्र कार्यजीवेशग्रहणं ॥

हिरण्यगर्भादीनां कार्येश्वरत्वाज्जीवोजीवंविहायमामित्येकादशे कार्यजीवस्याऽभिधानाच्चेत्युक्तं ॥ तन्नयुक्तं ॥ तादृशयोरपि प्रतिबिम्बत्वे नियममात्रभङ्गापत्याऽन्तेरण्डाविवाहश्चेदादावेवकुतोनहीतिन्यायापातात् ॥ हिरण्यगर्भादेरीश्वरत्वे मानाभावाच्च ॥ जीवोजीवमित्यस्यत्वयमर्थः ॥ जीवः जीवात्मा जीवं जीवनकरणं लिङ्गशरीरं विहाय मां संपद्यते ॥ तथाच कुतोजीवान्तरस्यप्रमितिः ॥ येतु आभासएवचेतिसूत्रस्थाने आभासाइतिपाठं प्रकल्प्य अभेदयुक्तयआभासाइत्याहुस्तेतु सर्वं वक्तुं शक्नुवन्ति ॥ सर्वत्रपाठमन्यथाकर्तुं समर्थत्वात् ॥ किञ्चानेनैकेनैवसूत्रेण स्वप्रतिकूलं सर्वमाभासयितुं शक्नुवन्ति॥अभेदबोधकवेदानामेव तथाकरणे इतरत्र तत्सम्पादने श्रमाभावात् ॥ किञ्चैवमन्योप्यनेनैवैतदुक्तस्य सर्वस्य आभासत्वं कुर्यादित्ययं पाठोयमर्थश्च विश्वासभञ्जकएव विशृङ्खलत्वादित्युपेक्ष्यः ॥ २५ ॥ प्रतिबिम्बस्य च बिम्बोत्पत्तिविनाशाभ्यामुत्पत्तिविनाशौ उपाधिसमवधानेन प्रतिबिम्बस्याविर्भावस्तत्रबिम्बाभेदतिरोभावश्चजायते तथा प्रतिबिम्बत्वबिम्बत्वयोरुत्पत्तिः उपाधिसमवधाननाशेनच तादृगाविर्भावतिरोभावयोर्बिम्बत्वप्रतिबिबत्वयोश्चनाशोजायते ॥ प्रतिबिम्बस्यबिम्बस्वरूपेणस्थितिरितियावत् ॥ बिम्बस्यच प्रतिबिम्बोत्पत्तिनाशप्रयोजकोत्पत्तिनाशप्रतियोगित्वं न बिम्बत्वेन किन्तु स्वरूपेण ॥ उत्पत्तिरपि प्रतिबिम्बस्य तादात्म्येन ॥ इदंच सादिबिम्बे ॥ बिम्बस्यानादित्वेतु तदुत्पत्तिविनाशयोरभावेन प्रतिबिम्बोत्पत्तिविनाशयोरप्यभावः ॥ उपाध्यसन्निधानेऽसन्नपि प्रतिबिम्बोबिम्बरूपेणैव गृह्यते नतु प्रतिबिम्बरूपेण ॥

तादृक्स्वरूपस्यानाविर्भावात् ॥ अभेदस्याऽतिरोभावाच्च ॥ बिम्ब-त्वादेरभावाद्बिम्बादिपदैर्व्यवहारोऽपि न ॥ एवंच सत्कार्यवादे तं-न्तुसंयोगस्योत्पत्तेः पूर्वं नाशात्पश्चाच्च पटस्य तन्तुमात्रत्ववत्तन्तु-संयोगकाले वाचारम्भणपरिणाहायामशालिद्रव्यस्वरूपत्वतन्तु-भेदवत्त्ववच्च प्रतिबिम्बस्यापि उपाधेरसमवधाने बिम्बमात्रत्वं त-त्समवधाने तादृशप्रतिबिम्बत्वबिम्बत्ववत्त्वं बिम्बभेदवत्त्वं च भ-वति ॥ आविर्भावकोपाधिकृता देशान्तरसंबन्धप्रतीतिः प्रतिबिम्बे पटादितोऽधिका ॥ एतेन अविद्यायां ब्रह्मप्रतिबिम्बोजीवइति मोक्षश्चाविद्यानाशइति वदतस्तव मते जीवस्वरूपनाशएव मोक्षइ-तिसंपद्यते तथाचात्माहानमपुरुषार्थइति मोक्षस्यापुरुषार्थत्वमाप-द्येत जीवस्याऽलीकत्वं च स्यात्तथासति कोऽपि पारलौकिक-प्रयत्नं न कुर्यात् इति विद्वन्मण्डनोक्तं सर्वंप्रत्युक्तम् ॥ उपाधिनाशे-न प्रतिबिम्बस्यानाशात् ॥ सतएव पदार्थस्याविर्भावसम्भवाद्भेदा-विर्भावस्योपाधिना स्वीकारे बिम्बे प्रतिबिम्बभेदः स्वीकृतः स्यादि-ति अभेदतिरोभावस्यैव तेन स्वीकारइति तन्नाशेऽपि नभेदनाशः किन्तु अभेदातिरोभावनाशएव ॥ विभेदजनकेऽज्ञाने इत्यादौ विभे-दादिपदैरभेदतिरोभावएवोच्यते इति नकश्चिद्विरोधः ॥ उपाधेर्जल-स्यधर्मास्तु वृद्धिह्रासाद्याः प्रतिबिम्बेऽध्यस्यन्ते॥ तथाच पारमर्ष-सूत्रम् ॥ वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम् ॥ एवंच लौकिकप्रबिम्बविलक्षणं यदि किञ्चिज्जीवाख्ये प्रतिबिम्बे तव प्रतीयेत लोकेच तथास्वीकारआवश्यकःस्यात्तर्हि अत्राऽघटित-घटनापटीयस्यामायायाः प्रभावेन तत् स्वीकार्यम् ॥ तादृशवैल-

क्षण्येऽपि प्रतिबिम्बत्वं नापन्हवनीयम् ॥ यत्किञ्चिद्वैलक्षण्यस्य सर्वत्र सत्त्वेनानिवारणीयत्वात् ॥ यद्यपिचावच्छेदवादोपि भगवत्पादमुनेः सम्मतोस्ति पक्षान्तराणिचभाष्यादिसम्मतानि तत्रप्रतीयन्ते तेषां च वस्तुतोनविरोधइति वार्त्तिककारपादैः सिद्धान्तलेशकृदादिभिश्चोपपादितम् तथापि तत्रपरस्यातिप्रत्यवस्थानाभावान्नतदस्माभिरिह प्रतायते इतिदिक् ॥ ८ ॥ ३६ ॥

क्रीडायान फलं ततोऽस्ति विफलाऽजेच्छा तथाऽहेतुका श्रुत्यर्थोभवतोदितोन घटते किञ्च श्रुतौ तत्पदं ॥ न ब्रह्माऽपितु वक्ति तत्प्रकरणाज्जीवं तथाऽऽत्मा हरेर्ज्ञानार्होयदि कं ससर्ज नहिचेन्नज्ञोभिदिष्टानते ॥ ९ ॥

नन्वेकाकीनरमतेसद्वितीयमैच्छदिति श्रुत्या ब्रह्मणः क्रीडार्थं जगन्निर्माणमितिभाति ॥ क्रीडाच वैषम्यमन्तरा नघटतइत्यास्तामभेदेऽपि प्रयोजनानुसारेण चैतन्याद्यंशतिरोभावादिवैलक्षण्यमितिचेन्न ॥ निरस्तत्वात् ॥ वैषम्यनैर्घृण्यापत्तेरुक्तत्वाच्च ॥ किञ्च लोके क्रीडा स्वानन्दफला दृष्टा ॥ नचाऽऽप्तकामस्याऽऽविर्भूतनित्याऽऽनन्दस्वरूपाऽऽनन्दापेक्षास्ति ॥ नहि तदानन्दोन्यूनोयतोऽधिकार्थं सा स्यात् ॥ प्रलये न्यूनानन्दप्रसंगाच्चेत्याह ॥ क्रीडायानेति ॥ निरर्थकक्रीडाकल्पनं तु दृष्टविरुद्धमितिभावः ॥ एवंच क्रीडेच्छायाअपि फलं चिन्त्यमित्याह ॥ ततइति ॥ अजेच्छा ईश्वरेच्छा ॥ किञ्च कारणमन्तरा कार्यानुद्भवात्त्वयाऽदृष्टस्याऽनङ्गीकारात्कथं क्रीडेच्छेत्याह ॥ तथेति ॥ तस्मान्नोक्तश्रुतेर्भवत्संमतोर्थः ॥ किञ्च

तत्र क्रीडार्थमितिपदाभावात्तदर्थं द्वितीयमैच्छदिति कुतोलभ्यते ॥ समभिव्याहारादितिचेन्नोक्तयुक्त्याबाधितत्वात् ॥ किञ्च द्वितीयमन्तरैव तदनुपपत्त्युक्त्या तत्स्रष्टौ क्रीडोपपत्त्या तृतीयादिसृष्टिर्नस्यात् ॥ द्वितीयपदेन स्वान्यलक्षणायामसहायार्थे साधितेनैकाकिपदेन बहुसहायशून्यलक्षणायां च गौरवम् ॥ किञ्च तदानीमिच्छादेः सद्भावात्कथमेकाकित्वम् ॥ इच्छादिः स्वरूपभूतइतिचेत्किमन्यन्नस्वरूपभूतम् ॥ ओमितिचेत् अपसिद्धान्तः ॥ तस्मादेकाकीनरमतेइति स्रष्टेः प्रागौदासीन्यमात्रमुक्त्वा सद्वितीयमित्यनेन सृष्टिरेवोक्ता इत्याह ॥ श्रुत्यर्थइति ॥ किञ्चात्र सशब्देन ब्रह्मणोन ग्रहणं किन्तु संसारिणोहिरण्यगर्भस्य तदुत्पत्तिमुक्त्वा प्रवृत्तत्वात् अग्रेच मिथुनसृष्टेरेवोक्तत्वादित्याह ॥ किञ्चेति ॥ श्रुतौ तत्पदं ब्रह्म न वक्ति अपितु जीवमित्यन्वयः ॥ जीवोहिरण्यगर्भः ॥ सवैशरीरीप्रथमइतिश्रुतेः ॥ एतेन रमणार्थमिदं सर्वं ब्रह्मैवस्वेच्छयाऽभवदिति प्रत्युक्तम् ॥ ब्रह्मणोनित्यत्वेन तत्सत्त्वे तदभिन्नस्य जगतोऽपि सत्त्वेन सर्वभवनतदिच्छयोरयोगाच्च॥प्रलयेऽनाविर्भूतस्येच्छयाऽऽविर्भावइतिचेत् आविर्भावोऽनित्योनित्योवा॥ यद्यनित्यस्तर्हि आविर्भावतिरोभावौपदार्थानांयतस्ततः नाऽनित्यतातुविज्ञेयाशास्त्रविद्भिर्विचक्षणैः तिरोभावेतुकार्यंहिवर्त्ततेकारणात्मना आविर्भावेतुकार्यंहियथामृदिघटादय इत्यनेन विरुध्यते ॥ आविर्भावस्यापि पदार्थतया शास्त्रविचक्षणैरनित्यतायाअज्ञेयत्वोक्तेः ॥ यदि नित्यस्तर्हि तस्याविर्भावेऽनवस्था ॥ यत्रैवचानित्यत्वमङ्गीक्रियते तत्रैवोक्तविरोधः पूर्वोक्तनित्यत्वाङ्गीकारनैष्फल्यंच ॥ ३७॥ किञ्च सर्वं कार्यं यदि हरिर्नवेत्ति तदाऽ-

ज्ञः स्यात् यदिवेत्ति तर्हि सृष्टिर्मुधा ज्ञानार्हत्वरूपाविर्भावस्यैव त्वया कार्येऽङ्गीकारात् ॥ नच स्वस्वरूपेण स्थितस्य स्वयंज्ञातत्वेपि जीवानां तज्ज्ञानाभावात्तज्ज्ञानार्थं सृष्टिरितिवाच्यम् ॥ स्वरमणार्थमितिसिद्धान्तविरोधात् ॥ जीवानामेव रमणस्य निष्पत्तेः॥ क्रीडायानित्यत्वानित्यत्वयोरुक्तदोषावतारोऽनुसन्धेयः ॥ अधिकन्तूत्तरभागे वक्ष्यते ॥ तदेतदाह ॥ तथात्मेति ॥ भिदिष्टेति ॥ जीवस्येश्वराभिन्नत्वेनेशस्य ज्ञानं न जीवस्येत्युक्तिरेव नसंगता॥प्रागभावादयोनाङ्गीकार्याआभ्यांयतोऽखिलमितिश्लोकव्याख्यायामभावचतुष्टयस्याऽपि तट्टीकाकारेण दूषितत्वात् ॥ एतेन भेदःकार्यतयाजातःक्रीडार्थंतुहरीच्छया प्रलयेकारणेतस्यस्थितिर्दृष्टायथाम्हदि इति पूर्वापरव्याकुलं वाक्यं प्रत्युक्तम् ॥ नच भेदस्योत्पत्तिर्नाविर्भावइति नित्यत्वाभावाभिप्रायेण खण्डनमितिवाच्यम्॥ तत्र त्यटीकायां स्पष्टं खण्डितत्वात् ॥ भेदोत्पत्तेः प्राग्जीवस्य तथाज्ञानसत्त्वेन सृष्ट्यभावदोषस्य तादवस्थ्याच्च ॥ सत्यपि सर्वंखल्विदमैतदात्म्यमिदमितिसामान्येनाभेदबोधने भेदोऽनित्यइतरन्नित्यमित्युक्तिः किंनिबन्धनेतितु चिन्त्यम् ॥ विभेदजनकेऽज्ञाने इतिवदेतस्माज्जायते इत्यस्य जागरूकत्वाच्चेत्यलम् ॥ ९ ॥ ३८ ॥

सर्वात्मा चेत्सजीवेशकार्याकार्यविपर्ययः॥ अविरोधेऽव्यवस्था स्यात् तथेष्टेर्हेतुतामते॥ १० ॥

यत्तुतेन सर्वंहिखल्विदंब्रह्मतज्जलानितिपठ्यते सर्वंब्रह्मात्मकंविश्वमिदमावोध्यतेपुरः सर्वशब्देनयावद्धिदृष्टंश्रुतमदोजगत् बुध्यतेतेनसर्वंहिब्रह्मरूपंसनातनम् कार्यस्यब्रह्मरूपस्यब्रह्मैवस्यात्तुकारणम्

इति तथा यत्रयेनयतोयस्ययस्मैयस्माद्यथायदा स्यादिदंभगवा-
न्साक्षात्प्रधानपुरुषेश्वरः इतिभागवतेपद्येसर्वस्यब्रह्मताश्रुता श्रु-
तिसूत्रैःस्मृतिगणैर्दृष्टिःस्वर्णार्थिनोयथा सुवर्णस्यचयेखण्डाःक-
टकामुद्रिकादयः सुवर्णत्वेनगृह्णानितथाब्रह्मविदोमतिः यथासौ-
म्येत्यादिश्रुतौस्पष्टमेवनिरूपितम् तथातत्त्वमसीत्यत्राभेदोंशांशि-
विचारतः इतिसार्वात्म्यमीशस्यवर्णितम् तन्नयुक्तमित्याह ॥ सर्वा-
त्मेति ॥ यदि हरिः सर्वात्मा तर्हिजीवईशईशश्चजीवउच्येत एवं
तदभिन्नाभिन्नस्तदभिन्नएवेतिन्यायेन ब्रह्महत्याद्यभिन्नेश्वराभि-
न्नोयागोऽपि ब्रह्महत्यादिरूपःस्यात् ॥ एवं ब्रह्महत्यादिरपि याग-
रूपः स्यादिति तद्विधिनिषेधधीः संकीर्येत एवंच त्वयाकार्यमेव
क्रियेत विधिनिषेधप्रायश्चित्तादिशास्त्रं च व्यर्थं स्यात् ॥ ३९ ॥
यत्तु सर्वभवनसमर्थत्वाद्विरुद्धधर्माश्रयत्वस्य ब्रह्मणोलक्षणत्वमि-
ति तट्टीकाकारोजगाद तन्नेत्याहाविरोधइति ॥ लोकस्य ब्रह्मा-
भिन्नत्वेन लोकेऽपि तस्य लक्षणत्वे विरोधकथामात्रस्योच्छेदप्र-
सङ्गात् ॥ किञ्च ब्रह्मानित्यमज्ञमित्याद्यपि साक्षात्त्वयाऽङ्गीक्रिये-
त सर्वंखल्वित्यादिश्रुतिबलात् विरोधस्यब्रह्मण्यदूषणत्वात् ॥ ए-
वंच कथं त्वमेव प्रमाणविरोधोद्भावनेन परान्विजिगीषेथाः कथं-
च द्वितीयाध्यायस्थोब्रह्मपरवाक्यानां श्रुतियुक्तिविरोधोद्धारः सं-
गतः कथंवा त्वद्गुरोर्द्वितीयाध्यायस्थतादृशसूत्रव्याख्या युज्येत तव-
वाविरोधपरिहारयत्नः ॥ किञ्चैवमविरोधेऽप्यकार्ये प्रवृत्तिर्नपरिहृ-
ता ॥ ४० ॥ नन्वीश्वरेच्छैवसर्वत्रकारणं तथाच तयैवाकार्ये ममाप्रवृ-
त्तिः यदाच तस्येच्छा मदीयाऽकार्यकरणविषया जायते तदा
क्रियतएव तदितिचेन्नेत्याह ॥ तथेति ॥ अयमभिप्रायः ॥ किं ह-

रीच्छावशान्न्यायान्यायौ कुर्वन्नियमेन सुखदुःखे भुंक्ते किंवा कर्म कीदृशमपि तदिच्छया करोतु फलमप्यनियमेन सस्वेच्छया ददातीति ॥ नाद्यस्तृतीयश्लोकोक्तरीत्याकर्मणोहेतुत्वापत्तेः ॥ किञ्च यदिदं सुकृतादिकारयति तस्योक्तरीत्या दुष्कृतादितोऽनन्यत्वानपायादुक्ताऽनुपपत्तिर्दुरुद्धरा ॥ नद्वितीयोऽनाश्वासेनाप्रवृत्त्यापत्त्या भक्त्यादिमार्गोच्छेदप्रसङ्गात्॥ एवं निश्चितवतः कस्यापि प्रवृत्त्ययोगात् ॥ इष्टएव मोक्षमार्गध्वंसः पुष्टिमार्गस्थस्येतिचेत्तर्हैव पुष्टिमार्गेण मोक्षमार्गं नाशयेथाः ॥ न्यायस्य तुल्यत्वेन तत्रापि शङ्कया प्रवृत्त्यभावप्रसङ्गात् ॥ न्यायाद्यविरोधेतूक्तं वक्ष्यामश्च ॥ कुमार्गेप्रवृत्त्यापत्तेश्च॥ इष्यते इतिचेद्वाह्योसि ॥ कृतप्रयत्नापेक्षइत्युक्तसूत्रविरोधोप्यत्र पक्षेज्ञेयः॥ तस्मादिच्छाया अनियामकत्वात्कर्मणामेवतत्त्वंवाच्यं॥ तथाचोक्तदोषानिस्तारः ॥ यत्तु तत्रोत्तमामध्यामाश्चकनिष्ठाह्यधिकारिण इत्यादिना सर्वंब्रह्म सर्वंब्रह्मसदृशं सर्वंब्रह्मणोऽभिन्नं तत्कार्यभूतमित्यधिकारिभेदनेदंहिविश्वमिति भागवतश्लोकटीकारूपसुबोधिनीस्थस्वगुरुसंमत्या पक्षत्रयमुपन्यस्यान्तिमपक्षस्य भेदपरत्वेन दुष्टत्वमुक्त्वा मध्यमपक्षस्य मध्यमत्वं स्वानुरोधित्वेन स्वसंमतत्वं चोक्तं ॥ यच्च भेदाभेदप्रतीतिस्तुमध्यमानांप्रकीर्तितेत्येतद्व्याख्याने कार्यात्मनाभेदः कारणात्मनाऽभेदइति तट्टीकायामुक्तं ॥ तत्तुनयुक्तं ॥ तदभिन्नाभिन्नइतिन्यायेन कार्याणामप्यभेदापत्त्या कार्यात्मनाभेदासिद्धेः भेदाभेदयोः समसत्ताकयोरप्याविरोधे विरोधकथामात्रोच्छेदप्रसङ्गाच्च ॥ किञ्चैवं मतद्वयं स्वीकुर्वता त्वद्गुरुणा किं वस्तुन्यपि विकल्पस्स्वीक्रियते उत परप्रतारणायेतरःपक्षः ॥ उभयमपि विज्ञातशा-

स्रहार्दहास्यास्पदमेवेत्यलम् ॥ १० ॥ ४१ ॥

साकारध्यानतोध्येयं ध्यातारः शाश्वतत्पराः ॥ गच्छन्त्युपाधियोगाद्यद्घटते साकृतिश्चितिः ॥ ११ ॥

यत्तु शाक्तानांतुमतेब्रह्मविश्वोपादानमेवहि निमित्तकारणंशक्तिर्विकारित्वभयादतइति शाक्तमतमुपन्यस्य तत्रात्मनोविकारित्वं श्रुतिशास्त्रविरोधिहि प्रकृतिर्ह्यस्योपादानमाधारःपुरुषःपरः सतोऽभिव्यञ्जकःकालोब्रह्मतत्रितयन्त्वहम् इतिभागवतेपद्यउपादानत्वमीरितम् तद्विरुध्येतममतुब्रह्मतोनपृथक्त्वसा इति तन्मते भागवतविरोधं स्वमते प्रकृतेरीशादभिन्नत्वेन तदभावं चोपन्यस्य शङ्कराचार्यदुर्वासोवाक्यविरोधमुक्त्वा नास्तिशक्तेर्वर्णनंहिकारणत्वन्तुदूरतः व्यासैस्तुप्रकृतेःसर्वकारणत्वंतिरस्कृतम् ब्रह्मणःसमवायित्वनिमित्तत्वेनिरूपिते इत्युक्तं॥ तत्रब्रूमः॥ मायांतुप्रकृतिमित्यादिश्रुतिमार्कण्डेयपुराणाद्यनालोचनमूलकं तद्वर्णनाभावकथनम् ॥ व्यासानां तु साङ्ख्यसम्मतप्रधानहेतुवादखण्डने तात्पर्यं ॥ मायायथा हेतुत्त्वं तथोक्तमस्माभिस्तृतीयश्लोके ॥ यदितु शाक्तैः शक्तिशब्देन मायोच्येत ततोऽतिरिक्तं तत्त्वं नस्वीक्रियेत तदा स्यादेवदोषः ॥ यदितु स्मार्त्तरीत्या विष्ण्वादिशब्दैरिव शक्तिशब्देनापि केनचिदुपाधिना विशिष्टाचितिरेवोच्येत उपादानत्वेतु विवर्त्तोपादानत्वम् आकारस्तु ध्यानार्थोध्यानेन ध्येयमात्रप्राप्तिर्मुक्तिस्तुनिष्कृष्टतत्स्वरूपात्मकतत्पदार्थेन त्वम्पदार्थस्याभेदज्ञानात् तर्हि न दोष इत्याह ॥ साकारेति ॥ परन्तु दुर्वासःशङ्कराचार्यवाक्यविरोधेन तेषां हानिर्भवति नवेति ते प्रष्टव्याः ॥ विष्णुभागव-

तं नव्यासकृतं किन्तु देवीभागवतमिति मन्यमानांस्ताम्प्रति विष्णु-
भागवतविरोधोद्भावनन्तुउपहासावहम् ॥ नन्वेवं बौद्धादीनामपी-
श्वरप्राप्तिः स्यादतआह ॥ शास्त्रतत्पराः ॥ शास्त्रं वेदस्तन्मूलकमनु-
स्मृत्यादिच ॥ ४२ ॥ एतेन तन्त्रशास्त्रेणचेद्भूषेतद्वैदिकसंमतम् इ-
त्युक्त्वा वेदाःश्रीकृष्णवाक्यानिव्याससूत्राणिचैवहि समाधिभा-
षाव्यासस्यप्रमाणंतच्चतुष्टयम् एतद्विरुद्धंयत्सर्वंतन्मानंनकथंचन इ-
तिश्रीमन्निजाचार्यैरुक्तंतन्त्राणिनप्रमा श्रीमदाचार्यचरणैरतएव-
निरूपितम् शाक्तास्तांश्चेत्ततोब्रूयुस्तेसन्मार्गाद्बहिष्कृताः इतिसर्वे-
षुमार्गेषुदोषाःसन्तिततोहरिम् शुद्धाद्वैतावलम्बेनभजेतसुविनिश्चि-
तम् इतिप्रत्युक्तम् ॥ श्रीमद्भागवते एकादशस्कंधे यआशुहृदय-
ग्रन्थिनिर्जिहीर्षुःपरात्मनः विधिनोपचरेद्देवंतन्त्रोक्तेनचकेशव-
मित्यादिना तन्त्रानुसारेणार्चायाविहितत्वाच्च॥ शुद्धाद्वैतावलम्बेन-
यादृशंहरिपूजनं त्वत्संमतं तादृशं लिखित्वा सक्रमं खण्डयिष्या-
मोऽनुपदम् ॥ किञ्च वेदादिषु चतुर्षु यस्य वर्णनं नास्ति तद्विरुद्धंच
यत्तद्दोषवदिति ते संमतम् ॥ तत्र वेदादिप्रामाण्यमुभयसंमतं ॥
भागवतंचेत्तेऽप्रमाणंब्रूयुस्तर्हि तत्र त्वं किंब्रूयाः॥ स्वगुरुवाक्यमि-
तिचेन्न ॥ स्वगोष्ठीमात्रे विश्वास्यत्वात् ॥ अन्यथा तेऽपि भागव-
तमप्रमाणं तन्त्रंप्रमाणमिति कंचित्स्वगुरुं कृत्वाऽपि तद्वाक्येन
ब्रूयुः॥ ननु पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः इत्याद्येव
भागवतप्रमाण्ये प्रमाणमितिचेत् ॥ तत्र मीमांसायाअतिरिक्तत-
योपात्तत्वेन न्यायपदेन तर्कशास्त्रग्रहणंवाच्यं तत्रच परमा-
णुवादादि वेदविरुद्धंदृश्यते तद्दिव पुराणमपि कस्मिंश्चिदंशे प्र-
माणं वेदविरुद्धांशेऽप्रमाणमितिचेत्स्यात्तर्हितादृशभागवतांशावि-

रुद्धं चेदन्यत्र व्यासादिभिः सर्वज्ञैरिदानींतनैरदृश्यमानवेदमूलकं प्रोक्तं स्यात्तत्कथमप्रमाणं त्वद्गुरुवाक्येनोच्यते ॥ किञ्च विष्णुभागवतस्य तत्र विशिष्यनामनास्ति ॥ पुराणेष्वन्तर्भावेण प्रामाण्यं कौर्मादिभिःसमम् ॥ देवीभागवतस्य तत्रान्तर्भावेण संदिग्धंच ॥ किञ्च पुराणान्तरस्य भागवताज्जघन्यत्वे त्वदीयैर्विष्णोर्नैवेद्यं नभुज्येत ॥ अपिदीपावलोकंमेनोपयुञ्ज्यान्निवेदितमिति भागवते तन्निषेधात् ॥ प्रकरणान्तरेऽपि तद्विधिर्नोपलभ्यते यतोविकल्पादिकल्पनाऽवतरेत् ॥ निवेदितंतद्भक्तायदद्याद्भुञ्जीतवास्वयमितितु विकल्पः ॥ किञ्च नैवेद्यप्रतिपत्तिरियं भक्तालाभे स्वयमिति ॥ वाशब्दोऽनास्थायाम् ॥ एवंच भक्तः सात्वतः ॥ तथाच नैवेद्यप्रतिपत्त्यर्थंसात्वतश्चेन्नलभ्यते ग्रासमात्रंसमुद्धृत्त्यजलेऽग्नौवाविनिक्षिपेत् इति पुराणान्तरवचनार्थः सङ्गृहीतः ॥ अतएव ब्राह्मणभोजनादूर्ध्वं भुञ्जीततैरनुज्ञातःशेषंसेष्टःसभाजितैरित्यवशिष्टभोजनं पृथग्विहितम् नतु नैवेद्यभोजनमेव ॥ अतएवाग्रे त्रयोश्यामृत्विगादिबहुविप्रादिभोजनमनैवेद्येनैव विहितम् ॥ नैवेद्यंचातिगुणवद्दद्यात्पुरुषतुष्टिदम् इति पुरुषतुष्टिदस्यैव नैवेद्यत्वात् ॥ अग्रे भुक्तवत्सुचसर्वेषुदीनान्धकृपणेषुच विष्णोस्तत्प्रीणनंविद्वान्भुञ्जीतसहबन्धुभिरित्यत्र तत् दीनादिभोजनोत्तरं भोजनं विष्णोः प्रीणनमित्यर्थः ॥ यद्वा तदन्नाद्यं भुञ्जीत ॥ विष्णोःप्रीणनमिति क्रियाविशेषणम् नतु तच्छब्देन नैवेद्यपरामर्शोऽतिव्यवधानात् ॥ पुरुषतुष्टिदस्य सबहुबन्धूदरपूरकत्वासम्भवाच्च ॥ किञ्चेदं सर्वं काम्यव्रतप्रकरणस्थमिति ज्योतिष्टोमपशुसमानयोग-

क्षेमतामावेदयेत् ॥ उच्छिष्टभोजिनोदासाइत्यादितु लिङ्गादिशू-न्यमिति लिङ्गङ्भ्यांसहितेनानेन विरोधान्नविधिकल्पयितुं प्रभवति ॥ एतेन यज्ञशिष्टाशिनःसन्तोमुच्यन्तेसर्वकिल्बिषैरित्यपि व्याख्यातम् ॥ गीतायास्तन्मते भागवतादनुत्कृष्टत्वात् ॥ किञ्चाऽत्र यज्ञभोजनाशिष्टाशिनः यज्ञभुक्तांशातिरिक्ताशिनइत्यर्थप्रतीत्या न तेन तत्प्राप्तिः ॥ पुराणान्तराणि स्मृतयश्चैतद्विरोधेऽप्रमाणानीति तत्र यदि तद्विधायकं वचनं स्यात्तर्हि एतद्विरोधादप्रमाणमेव स्यादिति विशेषपरत्वं तद्बलान्नसम्भवति ॥ श्रुतिः सूत्रं च तादृशं नास्त्येव यन्निवेदितोपयोगं विदध्यात् इति वैदिकान्पृष्ट्वा निश्चिनु॥ यदि काचिच्छ्रुतिः कस्यां चिच्छाखायामुपलभ्येत तर्हि इत्थं निश्चिनु ॥ सति समानविषयत्वे विकल्पः विषमविषयत्वे यावानंशस्तत्राऽस्तिविहितस्तावानेव ग्राह्यो नेतरो ऽन्यथा भागवतवाक्याचारितार्थ्यप्रसङ्गात् ॥ नच भागवतवाक्यएव अन्यस्मै निवेदितं दीपावलोकमपि मे नोपयुञ्ज्यादित्यर्थइतिवाच्यम् ॥ अन्यनिवेदितस्य हरावुपयोगाप्राप्त्या निषेधानर्हत्वात् ॥ विष्णोर्निवेदननिषेधेऽपि त्वदुपभोगे बाधकाभावेन त्वयाऽन्यनिवेदितं भुज्येत ॥ अपिशब्देन दीपावलोकेऽनुज्ञाप्रतीत्या तत्त्वया विष्णवे उपयोज्येत॥किञ्च अन्यस्मैपदाध्याहारे मानमन्वेष्यं तच्च यदिपुराणान्तरादि तर्हि दुर्बलत्वान्नभागवतीयस्वारसिकार्थं संकोचयेत्॥ वेदादिकंतु नास्तीत्युक्तम्॥ दत्त्वाचमनमुच्छेषंविष्वक्सेनायकल्पयेदिति भागवतविरुद्धश्चायमर्थः ॥ आस्तांतावदेतत् ॥ किञ्च पुराणान्तरस्य यद्वैमनुरब्रवीत्तद्भेषजमितिश्रुत्यादिस्तुतमनुस्मृतेश्च जघन्यतायां किमानम् ॥ सन्मार्गाद्बहिष्करणन्तु स्वगुरुवाक्यैस्ते-

रपित्वाम्प्रत्युच्यते तस्माच्छास्त्रगन्धसत्त्वे शास्त्रेणैववाच्यं ॥ गालि-
प्रदानन्तुशिष्टगर्हितम् ॥एवं शैवादिमतेष्वपि ऊहनीयम् ॥ अस्मा-
कंतु शास्त्रमात्रे पक्षपातोनान्यत्र ॥ ४३ ॥ एवंच चेतस्तत्प्रवणंसे-
वाफलरूपातुमानसी तत्सिध्यर्थंदेहवित्तजनिःकार्याततोभवेत् सं-
सारदुःखनाशोहिब्रह्मात्मत्वाऽवबोधनमित्यत्र यदि देहवित्ताभ्यां
जनिर्यस्यास्सा तत्फलभूतमानससेवासिध्यर्थं तयाऽग्रेब्रह्मविद्या-
प्राप्तिरित्युच्येत तर्ह्यस्माकं नकोपि विद्वेषः ॥ यदितु तत्र तत्प्रवण-
ता ब्रह्मविद्योच्यते तर्हि देहवित्तयोस्तत्रनोपयोगः ॥ श्रवणादेरेवत-
त्रोपयोगात् ॥ इतीदं नास्माभिर्मृष्यते ब्रह्मात्मत्वावबोधनमित्यस्या-
सङ्गतेश्च ॥ यदितु भक्तिमात्रमुच्यते तर्हि नपरप्राप्तिः वासुदेवःस-
र्वमिति अहंब्रह्मास्मीतिज्ञानेनैव तत्प्राप्तेः ॥ एतेन मामेव ये प्रपद्य-
न्ते मायामेतां तरन्तिते इति वाक्यात्तु भक्तानामविद्याविनिवृत्ति-
तइत्यपिचिन्तितम् ॥ पद्यतेर्भक्त्यर्थकत्वाभावात् ॥ गत्यर्थानां
ज्ञानार्थतया ज्ञानेनैवाविद्यानिवृत्तेस्तेन वाक्येन प्रतीतेश्च ॥ यत्तु-
येतुज्ञानैकसन्निष्ठास्तेषांतुलयएवहि भक्तानामेवभवतिलीलास्वा-
दोऽतिदुलर्भ इति श्लोकव्याख्याने ऽक्षरब्रह्मप्राप्तस्याऽपुनरावृत्तिमु-
क्त्वा पुरुषोत्तमं प्राप्तस्य पुनरावृत्तिमाशङ्क्य मामुपेत्यतुकौन्तेयपुन-
र्जन्मनविद्यतइति भगवद्वाक्येन कैमुतिकन्यायेन समादधौ ॥ ब्र-
ह्मज्ञानेनाक्षरं प्राप्तस्य पुनरावृत्त्यभावे ततोऽपि परं प्राप्तस्य सुतरां-
तदभावसिद्धेरिति तन्न ॥ तेतुब्रह्मह्रदंनीताइति क्ष्यमाणभागवत-
श्लोकस्य त्वत्संमतार्थे सति तेषां गोपानामिव राधादीनामिवच त-
तोप्युत्कृष्टस्य वृन्दावनादिस्थश्रृगाललतात्वप्राप्तिपूर्वकमनुभूयमा-
नस्यापूर्वफलस्य प्राप्तौ पुनर्जन्मनस्त्वया वक्तुं त्वदीयैः शङ्कितुं चो-

चितत्वात् ॥ विद्वन्मण्डने भक्तानां पुनरागमनस्योक्तत्वाच्च ॥ तदपि तत्खण्डनावसरे खण्डयिष्यामः ॥ पुरुषोत्तमाक्षरयोरभेदोऽक्षरपदार्थश्चोक्तएव प्राक् ॥ एवमुपास्याज्ज्ञेयस्योत्कृष्टत्वमप्युक्तं ॥ निरतिशयत्वात् ॥ मुक्तानामपिसिद्धानांनारायणपरायणः सुदुर्लभइत्यादिपुराणवाक्यन्तु मुक्तेतरापेक्षया नारायणपरायणस्योत्कर्षमाहेत्यपिव्देन गम्यते ॥ यथा तपस्विभ्योऽधिकोयोगीज्ञानिभ्योपिमतोधिकइत्यत्रापिशब्दबलेन ज्ञानीतरापेक्षया योगिनआधिक्यं प्रतीयते ॥ अस्तु वा मुक्तानामित्यस्य कुटुम्बवासनाया मुक्तानामित्यर्थः सिद्धानामित्यस्य त्वणिमादिमतामिति तावतैवार्थवादत्वोपपत्तेः ॥ अतएव योवेदनिहितंगुहायां सोऽश्नुतेसर्वान्कामान्सहेत्याद्याः श्रुतयः यावानर्थउदपानेसर्वतःसंप्लुतोदके तावान्सर्वेषुवेदेषुब्राह्मणस्यविजानतइत्याद्याः स्मृतयश्च संगताः ॥ यानि तु पुराणवाक्यानि अनुग्रहेण लीलाऽऽस्वादे प्रमाणतया दर्शयति तानि लीलास्वादस्यानुग्रहप्रयोज्यत्वे एव प्रमाणानि नतु इतरापेक्षया तस्योत्कर्षेपि ॥ प्रमाणाभावाच्छ्रुत्यादिविरोधाच्चेत्यलं ॥ यत्तु टीकाकृता भगवत्कृपाङ्कुरस्य स्वतः संस्कारेण भगवन्मार्गीयसंगादिना वोद्बोधे मार्गेऽस्मिन् रुचिस्ततोऽस्मिन्प्रवेशेच्छा तत्राप्यङ्कुरस्य दृढत्वे ऽस्मिन्मार्गे दृढत्वभावनं ॥ प्रवेशश्च द्वारभूतश्रीमदाचार्यकुलगुरुद्वारा शरणागतिस्ततः शुद्धं कृष्णं भजेदित्युक्तं ॥ तन्नयुक्तम् ॥ अस्मिन्मार्गे इत्यादिनोक्तानां पदार्थानामेव शास्त्राप्रसिद्धतया तत्क्रमस्य शास्त्रीयत्वाभावे विप्रतिपत्त्यभावात् ॥ किञ्च भगवत्कृपाङ्कुरपदबोध्यस्योद्बोधं प्रति तस्यतस्य हेतुत्वं वदतोऽपसिद्धान्तः ॥ ईश्वरेच्छामात्रस्य त्वन्मते त-

षापि हेतुत्वात् ॥ द्वारभूतेत्यादित्वसङ्गतं॥समित्पाणिःश्रोत्रियंब्रह्म-निष्ठमित्यादिश्रुतिविरोधात् ॥ यत्तु ब्रह्मभावंतुसंपाद्यपरमानुग्रहा-द्विभुः गृहस्थितंस्वीयजीवंसमुद्धरतियत्नतः इत्युक्तोद्धृतौपरमक्ले-शः इत्यादि जगाद ॥ तन्निर्मूलम् ॥ ब्रह्मभावादुत्तरमुद्धारफलान्त-रयोः क्लेशस्य चोक्तप्रमाणाविरुद्धत्वात् ॥ तत्सद्भावे प्रमाणाभावा-च्च ॥ तस्यतावदेवचिरं तरतिशोकमित्यादिश्रुतिभिः कृतकृत्यत्व-निश्चयाच्च॥ यत्तु यमेवैषवृणुतेतेनलभ्यइतिश्रुतावेवकारो ज्ञानिनो-निरासायेति॥तन्न ॥ ज्ञानीत्वात्मैवमेमतमिति भगवदुक्त्या ज्ञानिन-एव स्वीकृतत्वेन प्रतीयमानत्वात् ॥ मुक्तिंददातिसकर्हिचिन्नभ-क्तियोगमितितु भक्तियोगस्तुतिपरं नतु अक्षरार्थे तात्पर्यवत् ॥ अ-न्यथा भक्तियोगदानस्य सर्वथा निषेधेन तवाशैवोच्छिद्येत॥ अ-नेकश्रुतिविरोधाच्च ॥ यत्तु समुद्धरतीत्यस्य पृथक्करोतीत्यर्थष्टीका-कृता कृतः तत्तु वास्तवभेदाभावादसंगतं॥ पृथक्त्वमपिन भेदादन्यत् प्रमाणाभावाद्गौरवाच्च ॥ यत्तु संपद्याविर्भावःस्वेनशब्दादितिसूत्रं स्वोक्ते ब्रह्मभावोत्तरं फलान्तरसद्भावे प्रमाणतयोपन्यस्तवान्व्या-ख्यातवांश्च ब्रह्म संपद्य स्थितस्य जीवस्य अथवा सम्पद्येत्यत्रा-न्तर्भावितण्यर्थः तथाच ब्रह्मभावं संपाद्य स्वेन पुरुषोत्तमेनावि-र्भावः क्रियते ॥ एवं कथमुच्यते तत्राह ॥ शब्दात् योवेदनिहितं-गुहायांपरमेव्योमन्सोऽश्नुतेसर्वान्कामान्सहब्रह्मणाविपश्चितेति अ-त्र पुरुषोत्तमसाहित्येन सर्वकामोपभोगोजीवस्य निरूपितः स-लीनस्योद्धरणंविना नसम्भवतीत्यस्मादुद्धरतीत्यर्थः॥ तथाच श्री-मद्भागवते तेतुब्रह्मह्रदंनीतामग्नाःकृष्णेनचोद्धृताः ददृशुर्ब्रह्मणोलो-कमित्युक्तमिति ॥ तन्नयुक्तम् ॥ प्रथमव्याख्याने सम्पद्यर्थेपृथ-

क्रर्त्रध्याहारे स्थितपदाध्याहारेच द्वितीयव्याख्याने णिजर्थकल्प-
ने उभयत्र क्रियते पदाध्याहारेच गौरवात् ॥ प्रथमान्तार्थस्य ति-
ङ्न्तार्थे ऽन्वयनियमोनसमूलोयेनक्रियतेइतिपदमध्याह्रियेत ॥
दशावताराहरेरित्यत्र विभागपरे त्रयःकालाइत्यत्रच तिङ्न्तार्था-
भावात् तात्पर्याभावेन ज्ञायन्तामित्यादेरप्यध्याहारायोगात्तद-
र्थाननुभवाच्च ॥ यस्यापि तन्नियमाग्रहस्तन्मतेऽपि औत्सर्गिकभव-
तिपदाध्याहारं परित्यज्य क्रियतेइत्यस्याध्याहारे नमानम् ॥ स्व-
शब्दस्य पुरुषोत्तमबोधकत्वे प्रमाणाभावाच्च ॥ शब्दादित्यनेन यो
वेदनिहितंगुहायामित्यस्यैवग्रहणे प्रमाणाभावाच्च ॥ तस्मात्स्वेन
रूपेणेतिश्रुतिस्थस्वेनशब्दस्य तृतीयान्तस्य सूत्रे स्वेनेत्यनुकरणम् ॥
तस्यच शब्दपदेन कर्मधारयः अनुकार्यादनुकरणस्य भेदान्नेनश-
ब्दस्य सुप्त्वमिति नतल्लुक् ॥ ततश्च एवमेवैषसंप्रसादोऽस्माच्छरी-
रात्समुत्थायपरंज्योतिरुपसम्पद्यस्वेनरूपेणाभिनिष्पद्यते इति श्रु-
तिस्थतृतीयान्तस्वशब्दादितिसूत्रार्थः ॥ सच मुक्तस्येति स्वस्वरूपे-
णेतिच अर्थात्तात्पर्याच्च लभ्यते ॥ नैवं तव किञ्चिद्गमकं भाति ॥
किञ्च त्वन्मते ज्ञानिनोर्लीलास्वादोनभवति किन्तूपासकस्य ॥ सो-
ऽश्नुतेसर्वानितितु ज्ञानिपरं नोपासकपरं ॥ योवेदेत्युक्रमात् ॥ ज्ञा-
निनश्च त्वन्मते न पुरुषोत्तमप्राप्तिरिति कथं पुरुषोत्तमेन सहेति-
व्याख्यायते ॥ तस्माद्ब्रह्मणासहइत्यस्य स्वस्वरूपभूतेन ब्रह्मणा यु-
गपदित्यर्थः ॥ सचक्रमित्यादौ सशब्दस्थानिनः सहशब्दस्य युग-
पदर्थतायाः प्रसिद्धत्वात् ॥ कामानां सर्वेषामपि ब्रह्मणोऽभिन्नत्वा
द्ब्रह्मावाप्तौ तदवाप्तेःसुलभत्वात् ॥ अतएव यावानर्थउदपानेसर्व-
तःसंप्लुतोदके तावान्सर्वेषुवेदेषुब्राह्मणस्यविजानतः इत्यनेन तुल्या-

र्थता ॥ त्वन्मतेतु सर्वपदसंकोचः स्यादतीतादिकामानुपभोगात् ॥ यस्तु भागवतश्लोकः सोऽपि न त्वदुक्तार्थकोगोपानां पुनरागमनदर्शनात् तस्माद्दर्शयामासलोकंस्वमित्युक्ते तत्र कथंभावाकांङ्क्षायां तेतुब्रह्मह्रदंनीतामग्नाब्रह्मणोलोकंददृशुः ॥ पुनश्चब्रह्मह्रदात्कृष्णेनोत्धृताइत्युक्तम् ॥ अक्रूरोयत्र दृष्टवांस्तस्य यमुनाह्रदस्य ब्रह्मह्रदइतिनामेत्यादि श्रीधरकृततट्टीकायां स्पष्टम् इत्यलम् ॥ ॥११॥४४॥ इतिश्रीपरमहंसपरिव्राजकाचार्यश्रीमत्स्वरूपानन्दस्वामिशिष्यश्रीमत्सदानन्दस्वामिकृतेसहस्राक्षग्रंथेमेघविस्तारोनामप्रथमोभागःसमाप्तः ॥ १॥ ॥७॥ ॥

सहस्राक्ष.

भाग २

श्रीगणेशायनमः ॥ श्रीसाम्बसदाशिवायनमः ॥ तदेवं सव्याख्यानैरेकादशभिः श्लोकैः प्रायेण शुद्धाद्वैतमार्तण्डतट्टीकोक्तं तत्रत्यक्रमं विहाय खण्डितम् प्रसङ्गात्त्वन्यदपि ॥ इतः परं विद्वन्मण्डनोक्तं तट्टीकोक्तञ्च प्रायेण खण्डयिष्यते ॥ तत्रच पूर्वं विद्वन्मण्डनस्य कंचित्कंचित्खण्डं लेखिष्यामः ततः परन्तु स्वकृतं तस्यतस्य खण्डनार्हतत्तट्टीकायाश्च खण्डनमिति क्रमोबोध्यः ॥ खण्डकल्पना च व्यवहारसौकर्यार्थमस्माभिरेवकृता ॥ १ ॥ तत्रतावत्श्लोकत्रयात्मकोविद्वन्मण्डनस्य प्रथमः खण्डोलिख्यते ॥ ॥

निजमुरलिकानादाव्हानागतव्रजसुन्दरीनिरुपमनवस्नेहाम्भोधेर्विचित्रतरोर्मिभिः॥ किमपि परितश्चार्द्रार्द्रोऽस्तु स्वयं प्रकटीभन्प्रतियुवतिसंभेदेनास्मदृशां विषयः सदा ॥ १ ॥ पितृचरणान्नत्वाहं हरिरितिमार्गाम्बुजातमार्त्तण्डान् ॥ तदनुग्रहतः किञ्चिल्लिखामि यत्नाद्यथाबुद्धि ॥ २ ॥ श्रुतिसूत्रादिमणिभिर्जटितं युक्तिमौक्तिकैः ॥ ग्रथितंकुरुतेविद्वन्मण्डनं विठ्ठलः सुधीः ॥ ३ ॥ ॥ १ ॥

अथैतत्कुत्सापरावस्मदीयौ श्लोकौ तथा तच्छ्लोकार्थादिदूषणरूपं प्रथमखण्डखण्डनम् ॥ आत्ताऽऽत्मार्थमनःसमर्पणपथा हर्त्तुं परस्त्रीधनं क्षुद्रान्तःकरणप्रसादनकृते गीतेशगोपीकथाः ॥ विद्वद्वाक्श्रवणप्रवीणजनताधीमोहनाय श्रुतिस्मृत्याद्यर्थविलोमतोद्यमपराः पुष्ट्याख्यमार्गस्थिताः ॥ १ ॥ यन्मोहाय पुराणकृष्णवचनश्रुत्यर्थशोत्थ्युत्तमयुक्तिष्वासुरगोचरत्वमितरास्त्वाङ्गबुंधाकल्पताम्॥ ताना-

चार्यविकाशितार्थवचनैः संबोधयामोयतोयुक्तार्थाः श्रुतयोभव-
न्ति फलदानस्वार्थतश्चाविताः ॥ २ ॥ आत्मा देहः ॥ यान्हिशि-
ष्यानिमे कुर्वन्ति तानिदं संस्कृतं मन्त्रतया ग्राहयन्ति ॥ सहस्रप-
रिवत्सरपरिमितकालजातकृष्णवियोगजनिततापक्लेशानन्दतिरो
भावोऽहं भगवते कृष्णाय देहप्राणेन्द्रियान्तःकरणानि तद्धर्मांश्च
दारागारपुत्राप्तवित्तेहापराण्यात्मना सह समर्पयामि दासोहं कृ-
ष्ण तवास्मि इति ॥ नास्मिन्मन्त्रादिरीतिरस्ति ॥ नवेदंमन्त्रशास्त्रा-
दिषूपलभ्यते ॥ तस्मादात्मादिहरणायैवाऽयं समर्पणमार्गः ॥ कि-
ञ्च तादृशकालस्य कृष्णवियोगं प्रति कृष्णवियोगस्य तापादिकं
प्रतिच हेतुत्वं तत्सिद्धान्तविरुद्धं ॥ तेन भगवदिच्छामात्रस्य सर्वत्र-
हेतुतायाअभ्युपगमात् ॥ अन्याप्यर्थासङ्गतिस्तु यथाऽस्य भवति
तथाऽग्रे तत्रतत्र स्फुटीभविष्यति ॥ प्रथमश्लोकद्वितीयचरणेन त-
दीयप्रथमश्लोकस्य दुरभिप्रायत्वं सूचितम् ॥ आर्द्रार्द्रइत्ययंप्रयो-
गश्चिन्त्यः ॥ द्वित्वे बहुव्रीहिवद्भावाद्यप्राप्त्या पूर्वभागे विभक्त्यभा-
वायोगात् ॥ प्रतियुवतीत्यस्य टीकोक्तरीत्या व्याख्याने ऽसंगति-
रेव ॥ तत्रहि प्रतिर्लक्षणे युवतिंयुवतिं लक्ष्यीकृत्य संभेदइत्युक्तम्
तच्च लक्षणे द्वित्वसमासयोरप्राप्त्याऽसंगतम् ॥ अत्रत्यटीकोक्ता
कामुकचर्या तूपेक्ष्यते ॥ ३ ॥ यत्तु टीकाकारेणाऽनिर्वाच्यत्वन्तुर-
सरूपस्यैव ॥ यतोवाचोनिवर्त्तन्तेअप्राप्यमनसासहेत्यनिर्वाच्यत्वं
यद्यपि ब्रह्मणः श्रावितं तथापि रसोवैसइति रसरूपत्वं पूर्वानुवा-
के प्रकृत्य तदुत्तरमेतस्य श्रावितत्वात्तादृशस्यैव तथात्वं नत्वीश्व-
रस्वरूपस्य ॥ तन्त्वौपनिषदंपुरुषंपृच्छामि अतोस्मिल्लोकेवेदेचप्रथितः

पुरुषोत्तमः सर्ववेदान्तप्रत्ययमित्यादिश्रुतिस्मृतिन्यायाविरोधादित्यु-क्तं ॥ तन्नयुक्तम् ॥ वक्ष्यमाणस्य तृतीयखण्डस्थस्य तथासति प्र-क्षालनादित्यस्य व्याख्याने वाचोमनश्चलौकिक्योऽशुद्धंचेतित-च्छ्रुत्यर्थवर्णनपरस्वोक्तेर्विरोधात्॥चतुर्विंशतिखण्डस्थमूलविरोधा-च्च॥तत्रहि॥वस्तुतोविरुद्धधर्माश्रयमपि॥तथाहि ॥ श्रोतव्योमन्तव्यः यतोवाचोनिवर्त्तन्तइत्युक्तम्॥अवदुक्तौतुविरोधाभावात्तन्न संगच्छे-त॥आनन्दंब्रह्मणोविद्वानित्युत्तरत्रानन्दपददर्शनेन तद्वाच्यस्यावा-ङ्मनसगोचरत्वप्रतीतेश्च तस्यैवरसशब्दार्थत्वाद्ब्रह्मत्वाच्च औपनिषद-त्वादिकन्त्वीश्वरस्य भक्त्येति न श्रुत्यादिविरोधः॥किञ्चानन्दरूपाद्ब्र-ह्मणः श्रृङ्गाररूपस्य तद्वृत्तेः रसरूपस्य भिन्नत्वेन सामानाधिकरण्या-नुपपत्तिः॥रसंह्येवलब्ध्वेति वाक्यशेषानुपपत्तिश्च॥लब्ध्वेति क्त्वाप्रत्य येनानन्दे लाभपूर्वकत्वभानेन परमेश्वरानन्दस्य नित्यतया तदसं-भवेनैकत्वैकरसत्वाभ्यां मुखंव्यादायस्वपितीत्यत्रत्यन्यायानवतारे-ण च परस्य तत्प्राप्तिसुखित्वे वाच्ये नच पररसः परेण लभ्यः॥किञ्च तत्पक्षे रसंह्येवेत्यत्रापि कर्त्तैश्वरएव वाच्यस्तथाचैवकारानुपपत्ति-रितरेषामपिसुखानुभवात्॥किञ्च ताद्रूप्येण भेदाङ्गीकारेऽपि नाऽत्र-तस्याऽवाङ्मनसगोचरतोच्यते किन्त्वानन्दरूपस्यैव ॥ प्रकरणाद्वा-क्यस्य बलवत्त्वात् ॥ पूर्वत्र यच्छब्ददर्शनेनोत्तरत्र तच्छब्दाध्या-हारस्यावश्यकत्वेन सर्वस्यैकवाक्यत्वात् ॥ किञ्चानन्दरूपस्येश्वर-स्य रसरूपाद्भेदे मानाभावः ॥ अतएव रसंह्येवेतिश्रुतिः संगता ॥ अतएवानन्दोब्रह्म एतस्यैवानन्दस्य एषएवानन्दयातीत्याद्याः श्रु-तयः संगताः ॥ एवंच नत्वीश्वररूपस्येत्यसंगतम् ॥ किञ्च रसस्य रसादिशब्दैर्व्यवहारादज्ञातस्यापुरुषार्थत्वाच्च कथं तस्यावाङ्मन-

सगोचरत्वम् ॥ अथ सामान्येन तद्गोचरत्वेऽपि विशेषेण तदगोचरत्वमभिमतमितिचेन्न ॥ रूपादेरपि विशेषस्य वागगोचरत्वेन सर्वत्र विशेषस्य वागगोचरतया रसमात्रे तदगोचरत्वकथनस्य न्यूनत्वाद् व्यर्थत्वाच्च ॥ रसगतविशेषस्य मनसाऽप्यगम्यत्वे तस्याऽपुरुषार्थतापत्तेश्च ॥ तस्माद् यन्मनसानमनुते पराञ्चिखानिव्यतृणत् कश्चिद्धीरःप्रत्यगात्मानमैक्षत् दृश्यतेत्वग्र्ययाबुद्ध्येत्यादिसमानार्थैव यतोवाचइतिश्रुतिः ॥ तत्रच प्रमेयस्यैकरसत्वेन विशेषाभावात्प्रमाणगतविशेषेणैव ग्रहणाऽग्रहणव्यवस्थेतियुक्तम् ॥ ४ ॥ यच्च स्नेहोभक्तिरितिप्रोक्तइतिवाक्यबलेन स्नेहपदेन भक्तिं गृहीत्वा स्नेहस्याम्भोधितुल्यत्वसूचनमपि तस्यानन्तत्वाय समुद्रइवाहिकामः नान्तोस्तिकामस्यनसमुद्रस्येतिश्रुतेः नतु स्वरूपतुल्यत्वाय ॥ तेन निरुपमत्वोक्तेर्नविरोधः॥स्नेहश्चात्मनोमनसोवा योग्योधर्मविशेषोनत्विच्छा ॥ तस्मिन्स्निह्यामिप्रीणाम्यनुरञ्जामिनेच्छामीत्यनुव्यवसायात् इति तेनोक्तं॥तदप्ययुक्तम्॥स्नेहस्येच्छायाभिन्नत्वाङ्गीकारे कामादपि तथात्वापत्तेः॥कामशब्दस्येच्छार्थककर्मनिष्पन्नत्वात्॥तथाच स्नेहानन्तत्वे प्रमाणतया नान्तोस्तिकामस्येतिश्रुत्युपन्यसोविरुध्येत॥स्नेहज्ञानस्येच्छाभावज्ञानस्यचानुव्यवसायत्वोक्तिस्तु अनुव्यवसायपदार्थाज्ञानात्॥यच्च तेनैव अत्रच वंशस्तुभगवान्रुद्रइति तापनीयश्रुतेर्वेदःशिवःशिवोवेदइतिवाक्याच्च मुरलिकायावेदात्मकत्वमित्युक्तं॥तदप्ययुक्तं॥समानशब्दवाच्ययोस्तत्तदात्मकत्वे हरिश्चन्द्रार्कवाताश्वेत्यादिकोशाच्चन्द्रादेः सूर्याद्यात्मकत्वापत्तेरित्यलम्॥विद्वद्वागित्यादिसार्द्धश्लोकेन स्वीयप्रथमार्द्धश्लोकोक्तं दृढंकृतं तदीयतृतीयश्लोकासङ्गतिरपि सूचिता॥तत्र क्षुद्रान्तःकरणेत्य-

त्रशीलहीनावाचकक्षुद्राशब्दक्षुद्रशब्दयोरेकशेषे षष्ठीतत्पुरुषः॥पु-
ष्ट्याख्येति॥यतः स्वयं पुष्टिमार्गगाः सन्ति अतोऽयं श्रमोमोहनायै-
वेतिनिश्चयः ॥ तेहि पुष्टिमार्गः प्रमाणमार्गइति मार्गद्वयं व्यवहर-
न्ति ॥ तत्र पुष्टिमार्गउत्तमः प्रमाणमार्गोऽधमइति वदन्ति ॥ अनेन
तेषां मोहकत्वं दृष्टसामग्रीतः प्रत्यायितं ॥ वाक्यानितु पूर्वभागे
प्रथमश्लोकव्याख्यायामुपन्यस्तानि ॥ द्वितीयश्लोकार्थेऽपि तत्रै-
व वाक्यानि प्रमाणानि द्रष्टव्यानि ॥ द्वितीयश्लोके यत्तेन हरि-
रतीत्याद्युक्तम् तदग्रे निराकरिष्यामोनिराकृतं च कौर्मवाक्यप्रद-
र्शनेन प्रथमश्लोकव्याख्यायाम् ॥ विठ्ठलःसुधीरिति ॥ आसीत्क-
श्चिदारूढपतितोदेवानांप्रियस्तस्य सुतोऽभवत् तस्य विठ्ठलेतियथा-
धिकारं नाम चक्रे ॥ युक्तमेवतु तादृशाज्जातस्य तादृशं नाम ॥
आर्यार्थमेवहि कृतंकुर्यादिति शास्त्रप्रवृत्तिः ॥ तेनचायंग्रन्थः कृ-
तोविद्वन्मण्डनाख्यः ॥ युक्तंचेदमपि मोहकानां ब्राह्मणत्वनियमा-
भावस्य कौर्मवाक्येन दर्शितत्वादित्यास्तांतावत् ॥ परन्तु साम्प्रतं
तत्सन्ततिगः कथंचिच्छ्रुतशास्त्रोजिज्ञ्यद्विठ्ठलपदं साधु चिकीर्ष-
न्कश्चित् विदा ठाः शून्याविठ्ठास्तॉंल्लाति आदत्ते स्वीकरोतीति वि-
ठ्ठलइति प्रलपति ॥ तत्रतावत्सप्रष्टव्यः किमियं तृतीया धनेन
हीनः प्रज्ञया रहितइत्यादौ दर्शनेन प्रयुक्ता ॥ सचेदोमिति ब्रूया-
त्तर्हि वाच्यं वत्स नवेत्सि हीनादिशब्दानां व्युत्पन्नत्वेन तत्र का-
रकतृतीयामिति कर्तरीत्यादौ दर्शनेन शब्दरि अर्थरि इत्यादाव-
रादेशं प्रयुञ्जानं तार्किकमनुकरोषि ॥ अथ धनेनशून्यइत्यत्रेव प्र-
कृत्यादित्वेन तृतीयेति वदेत् तर्हि वाच्यं प्रकृत्यादिषु शून्यशब्द-
समभिव्याहृतधनशब्दपाठोयदि प्रामाणिकस्तर्हि ठशब्दसमभिव्या

त्तविच्छब्दस्य तत्र पाठे प्रमाणं दर्शय ॥ यदि सन प्रामाणिक-
स्तर्हि दृष्टांन्तासित्ध्या दार्ष्टान्तिकासिद्धिः सुतराम् ॥ नहि प्रकृत्या
दिराकृतिगणइति यथेष्टं तृतीया प्रयुज्यते ॥ नीलेन घटइत्याद्या-
पत्तेः ॥ किञ्च तृतीयान्तार्थस्य ठशब्दार्थाभाववदेकदेशे ऽभावे प-
रम्परया ऽभाववति वाऽन्वये शिष्टसंमतिरपेक्षिता ॥ अन्यथा प-
दार्थःपदार्थेनान्वेतीत्यौत्सर्गिकव्युत्पत्तिलङ्घने ऽतिप्रसङ्गात् ॥ किञ्चा-
त्यन्तज्ञानाभावस्य शिलादिष्वेव सत्त्वेन विठशब्देन पारमार्थिक-
ज्ञानाभाववान्याख्यस्तच्च न सम्भवति ॥ यत्किञ्चिद्घटवति भूतले
निर्घटं घटहीनमित्यादिप्रयोगाऽदर्शनेनाऽभावेऽन्वयितावच्छेदक-
धर्मावच्छिन्नप्रतियोगिताकत्वेनैव प्रतियोग्यन्वयस्य व्युत्पन्नत्वात् ॥
किञ्च सूत्रान्तरेण समासाऽप्राप्त्या सहसुपेत्यनेन समासोवाच्यः स-
चक्लिष्टः ॥ किञ्च विदोदकारस्य ठकारः केनसूत्रेणेति वदतु देवा-
नाम्प्रियः ॥ नाऽत्र प्रथमष्ठकारः किन्तर्हि टकार इति वदता तु गु
लाबइति पितृनामशोधनाय कुलाभइति पितुर्नामकुर्वन् प्राज्ञोऽ-
नुकृतोभवति ॥ लोके देवविशेषे तादृशशब्दप्रयोगस्तु कनैयादि-
शब्दप्रयोगवज्ज्ञेयः ॥ इति श्लोकत्रयात्मकप्रथमखण्डखण्डनं ॥
॥१॥ ॥ इहहि विविधवृजिनतापोपतप्यमाननिखिलजनापवर्गा
य श्रुतिस्मृतिपुराणेषु श्रवणादयः प्रतिपाद्यंते॥६॥तेषां विषयश्चब्र-
ह्मैवोच्यते॥तन्निर्द्धर्मकं सधर्मकं वेति भवति विप्रतिपत्तिर्जिज्ञासू-
नां ॥ उभयरूपत्वेनाऽपि श्रूयमाणत्वात् ॥ तथाहि ॥ अथातआ-
देशोनेतिनेति अपाणिपादोजवनोग्रहीतापश्यत्यचक्षुःसश्रृणोत्य-
कर्णः सहोवाचैतद्वैतदक्षरंगार्गिब्राह्मणाअभिवदंत्यस्थूलमनण्वह्र-
स्वमदीर्घमलोहितमस्नेहमच्छायमतमोवाय्वनाकाशमसंगमस्पर्श-

मगंधमरसमचक्षुष्कमश्रोत्रमवागमनोऽतेजस्कमप्राणमुखमनामा गोत्रमजरममरमभयममृतमरजोऽशब्दमविवृतमसंवृतमपूर्वमनपरम नन्तरमबाह्यंनतदश्नोतिकश्चननतदश्नोतिकंचन दिव्योह्यमूर्त्तःपुरुषःसबाह्याभ्यंतरोह्यजः अशरीरंशरीरेष्वनवस्थेष्ववस्थितं महांतंविभुमात्मानंमत्वाधीरोनशोचति अप्राणोह्यमनाःशुभ्रः असंगोह्ययंपुरुषइत्यादिश्रुतिभिः अव्यक्तोयमचिंत्योयं नसत्तन्नासदुच्यते सवैनदेवासुरमर्त्यतिर्यङ्नस्त्रीनषंढोनपुमान्नजंतुः नायंगुणःकर्मनसन्नचासन्निषेधशेषोजयतादशेषइत्यादिपुराणवाक्यैश्च निर्विशेषं ब्रह्म प्रतिपाद्यते ॥ यतोवाइमानिभूतानिजायंते येनजातानिजीवंति यत्प्रयंत्यभिसंविशंतीति आनंदाद्ध्येवखल्विमानिभूतानिजायंतइत्यादि सईक्षांचक्रे सआत्मानमेवावेदहंब्रह्मास्मीति सर्वस्यवशीसर्वस्येशानः यःसर्वज्ञःसर्वशक्तिः विश्वतश्चक्षुरुतविश्वतोमुखोविश्वतोबाहुरुतविश्वतस्पात् सम्बाहुभ्यांधमतिसंपतत्रैर्द्यावाभूमीजनयन्देवएकः सर्वकामःसर्वगंधःसर्वरसइत्यादिश्रुतिभिः सर्वतःपाणिपादंतत्सर्वतोक्षिशिरोमुखं सर्वतःश्रुतिमल्लोकेसर्वमावृत्त्यतिष्ठति निर्दोषपूर्णगुणविग्रहआत्मंतंत्रोनिश्चेतनात्मकशरीरगुणैश्चहीनः ॥ आनन्दमात्रकरपादमुखोदरादिःसर्वत्रचस्वगतभेदविवर्जितात्मा इत्यादिस्मृतिभिश्च सविशेषं प्रतिपाद्यते ॥ ७ ॥ किमत्र युक्तं निर्विशेषमेवेति कुतः उपजीव्यत्वतःश्रौतवाक्यैश्चान्यपरत्वतः अन्तरङ्गत्वतश्चापिनिर्विशेषंनिरूप्यते ॥ तथाहि ॥ सविशेषवादिना विशेषाधारत्वेनाऽवश्यं ब्रह्मस्वरूपमप्यंगीकर्त्तव्यं ॥ अन्यथा कुत्र विशेषानिरूपिताः स्युः ॥ तथाचाऽऽधारनिरूपिका श्रुतिराधेयनिरूपिकया नान्यथयितुं शक्या उपजीव्यत्वात् ॥ नचधर्मिस्वरूपं

निरूप्य धर्मनिरूपणेनोभयसार्थकत्वमितिवाच्यं ॥ अस्थूलाद्यु-
क्तश्रौतवाक्यैर्धर्मनिषेधश्रवणात् ॥ ननु निर्विशेषब्रह्मनिरूपिका
श्रुतिर्धर्मान्विना न तन्निरूपयितुं शक्ता॥ तथाहि॥निरूपणंहि ल-
क्षणैः तानिचासाधारणधर्मरूपाणि अत्रच धर्माभावात्तन्निरू-
पणपूर्वकमभावमुखेनाऽस्थूलादिवाक्यैर्निरूपयंत्याधर्मनिरूपिका
श्रुतिरूपजीव्या ॥ अभावस्य प्रतियोगिनिरूपणाधीननिरूपण-
त्वात् ॥ तथाच श्रौतत्वोपजीव्यत्वयोरविशेषादन्यतरबाधोन यु-
क्तः ॥ विरोधात्तथाकरणेतूभयबाधोयुक्तः ॥ उक्तयुक्तेः ॥ तथा-
च शून्यवादआपद्येतेति वृश्चिकभिया पलायमानस्य विषमाशी-
विषमुखे निपातः॥नचैवमपि वक्तुं शक्यं असन्नेवसभवति अस-
द्ब्रह्मेतिवेदचेदिति निंदाश्रुतेरितिचेत् ॥ मैवं ॥ नहि श्रुतिसिद्धाध-
र्मा निषिध्यन्ते किंत्वनुवादपूर्वंलौकिकाः स्थौल्यादयः ॥ तथाच
क्व धर्माणां श्रौतानामुपजीव्यत्वं ॥ नचैवं निषेधस्य भिन्नविषय-
त्वाद्विरोधाभावेनैकतरबाधोनयुक्तस्तथाचोभयधर्मवत्त्वं सिद्धमि-
तिसांप्रतं ॥ श्रौतानामप्यर्थानां श्रोतव्यत्वादीनां यतोवाचोनिव-
र्तंतइत्यादिना निषेधात् ॥ नचोपजीव्यत्वबाधः ॥ एवंविधस्य त-
स्याप्रयोजकत्वात् ॥ अन्यथाऽभावनिरूपणोच्छेदप्रसङ्गात् ॥ न-
न्विदमसंगतं नहि लोके यस्मिन् यदा ये धर्माः सत्त्वेन निरूपि-
तास्ते तस्मिन्नेव तदैव निषेद्धुं शक्याः ॥ विरोधात् ॥ कालभेदेनतु
शक्यानिषेद्धुं पूर्वं श्यामत्वेन निरूपिते पाकरक्ते घटे श्यामत्वस्ये-
व ॥ नचैवं ब्रह्मणि संभवति ॥ सदैकरसत्वात् ॥ अतः कथं धर्म-
निरूपणं कथंवा निषेधइति तप्तसंदंशपतितोमिथ्यावादीतिचेत्
न ॥ धर्मनिरूपिकायाः श्रुतेरन्यपरत्वात् ॥ तथाहि ॥ सोपाधि

ब्रह्म निरूपयति धर्मनिरूपिका श्रुतिरुपासनार्थं तया चित्तशुद्धौ सत्यां निर्विशेषं ब्रह्म प्रतिपत्स्यतइतितात्पर्येण ॥ ततस्तादृशब्रह्मज्ञापनाय पूर्वोक्तान्निषेधति ॥ तेषामविद्याकल्पितत्वेनाङ्गीकारात् ॥ अतोऽपवादार्थं कर्तृत्वाद्युक्त्वा निषेधतीतिकल्पने सर्वं समंजसमितिचेत् ॥ अत्रब्रूमः ॥ अभेदादनुपाधित्वाज्जगदप्रत्ययाश्रितः सर्वाधारत्वतस्तावच्छक्तित्वान्नास्यबाधनं ॥ अत्र मिथ्यावादी प्रष्टव्यः जगत्कर्तृत्वेशितृत्वादिविशिष्टनिर्विशेषयोर्भेदमंगीकरोष्युताभेदं ॥ भेदपक्षेऽपि तात्त्विकमतात्त्विकंवा ॥ नतावदाद्यः ॥ सर्बत्र प्रसिद्धोपदेशादित्यधिकरणविरोधात् ॥ अस्यार्थस्तु सर्वत्र वेदान्तेषु प्रसिद्धस्य ब्रह्मणएवोपास्यत्वेनोपदेशान्मनोमयत्वादिविषयवाक्योक्तधर्मविशिष्टं ब्रह्मैवाऽस्मिन्वाक्यउच्यतइत्येतत्सर्वं व्याससूत्रभाष्ये विस्तृतं पितृचरणैः ॥ विस्तारभियाऽत्र नलिख्यते ॥ किंचैवं जीवे नितरां तथायातमिति तत्त्वमसीत्याद्यभेदबोधकश्रुतिविरोधः ॥ ब्रह्मानेकत्वापत्त्याचैकमेवेत्यादितद्विरोधः ॥ त्वया तथाऽनंगीकाराच्च ॥ येऽप्यंगीकुर्वंति तेषां मते वेदांतानां तादृग्भावनापरत्वमेव नतु वस्तु तादृशमित्युच्यते ॥ तदग्रे निराकरिष्यते ॥ नद्वितीयः ॥ सतूपाधिकृतएव संभवति घटादिकृतइवाकाशस्य प्रकृते तादृशउपाधिः कः सोऽप्यनादिः सादिर्वेति विचारणीयं ॥ अविद्यैवोपाधिः साचानादिरेवेति पक्षस्त्वसंगतः ॥ तथाहि ॥ उभयोरप्यनादित्वेनोपहितस्याऽप्यनादितया तादृशस्यैवच त्वन्मते कर्तृत्वेनाविरतं सर्गः स्यान्न जातु प्रलयः ॥ श्रुतौ ब्रह्ममात्रस्यैवेच्छाविशिष्टस्य कारणत्वोक्त्या कारणान्तरानपेक्षणात् ॥ स्मार्तमवलंब्य गुणापेक्षाकथनेतु गुणानां पौर्वापर्येणाविर्भावे हेतोरवश्य-

वाच्यत्वे तदिच्छैव तादृशी वाच्या ॥ तथासति तद्धेतोरेवेतिन्याये-नेच्छैव तथाऽस्तु कृतं गुणैः ॥ नचैवमपि त्वन्मते वक्तुंशक्यं ॥ उपहितस्येच्छाक्रमे हेत्वपेक्षायां तस्योपाध्यधीनतयेच्छायामपि तद्गुणाएव हेतुत्वेन वाच्याः ॥ गुणानां क्रमेचैवंसतिस्वभावएवहेतुर्वाच्यस्तथाच तादृक्स्वभावविशिष्टागुणाएव कारणानि संतु कृतं तदधीनब्रह्मणेत्यनीश्वरवादः प्रसज्येत ॥ सदेवसौम्येदमग्रआसीदितिश्रुतिविरोधश्च ॥ एवकारेण सतोब्रह्मणोऽन्यस्य व्यवच्छेदात् ॥ नच कालवाचकाग्रपदेन तस्याऽप्युक्तत्वादेवकारोनान्ययोगव्यवच्छेदकः किंतु तदानीमपि ब्रह्मासीदेवेत्ययोगव्यवच्छेदकएवेतिवाच्यं ॥ बोधनार्थमेवतथोक्तेः॥ अन्यथा सोनुवीक्ष्यनान्यदात्मनोपश्यदिति श्रुतिविरोधः ॥ एतच्छ्रुत्यनुरोधेनाग्रपदेन यदि कालस्याऽपि ब्रह्मत्वमेव मनुषे तदोमिति ब्रूमः॥ अतएव कालोस्मीति भगवद्वाक्यं कालरूपोऽवतीर्णइत्याद्यपि ॥ इदमेवोपक्रम्य सन्मूलाःसोम्येमाःसर्वाःप्रजाःसदायतनाःसत्प्रतिष्ठाइत्यादिश्रुतिभिः सतएव कर्तृत्वोक्तेश्च॥ किञ्च त्वन्मतेऽप्युपहितस्योपाध्यधीनतया स्वातंत्र्याऽभावात्कर्तृत्वानुपपत्तिः॥भवद्वा उपाधावेव स्यान्नतूपहिते घटक्रियेव॥एवमस्त्वितिचेन्न ॥यतोवाइमानि सन्मूलाःसौम्येति आनंदाद्ध्येवखल्विमानिभूतानिजायंतइत्यादि अहंसर्वस्यप्रभवइत्यादि जन्माद्यस्ययतइत्यादि श्रुतिस्मृतिन्यायव्याकोपात् ॥ नचायमुपचारएव सर्वत्रेति वाच्यं॥मुख्ये संभवति तथाकल्पनस्यायुक्तत्वात् मुख्याबाधाच्च॥अतएव व्यासोऽपीममर्थमसूत्रयत्॥ गौणश्चेन्नात्मशब्दादिति ॥ श्रुतावात्मपदमप्युपचारादुपाधिपरमेवेत्याशंकायां

पुनराह ॥ तन्निष्ठस्यमोक्षोपदेशात्इति ॥ यदात्मशब्देनोक्तं तन्निष्ठस्यैव श्रुतौ मोक्षोक्तेर्नौपचारिकमात्मपदं किंतु शुद्धब्रह्मपरमेवेत्यर्थः॥किञ्च त्वन्मते उपहितस्य जीवत्वेन पुत्रादितुल्यतया तद्धेयत्वोपदेशवन्मुमुक्षुसाधनोपदेशेषु तस्याऽपि तथात्वं वदेत् नतुतदुपासनां॥इतोऽपि हेतोर्निर्गुणमेव ब्रह्म जगत्कारणमित्याशयेन हेत्वंतरमाह सूत्रकारः हेयत्वावचनाच्चेति॥किंच अथाऽतोब्रह्मजिज्ञासेति निर्गुणब्रह्मजिज्ञासां प्रतिज्ञाय किंलक्षणं तदित्याकांक्षायां जन्माद्यस्ययतइत्यवदत् तच्च सगुणनिरूपकमितिवदन् व्यासस्य प्रतिज्ञाहान्युपक्रमविरोधावपश्यन् हृदयशून्योभासि॥ किंचैवं सर्वे वेदायत्पदमामनंति वेदैश्चसर्वैरहमेववेद्यइत्यादिश्रुतिस्मृतिविरोधोपि॥ अतोभेदपक्षस्त्वसंगतएव॥ ॥२॥ ॥ अथ श्लोकत्रयादग्निमइहहिविविधेत्यादिरतोभेदपक्षस्त्वसंगतएवेत्यन्तोद्वितीयः खण्डः खण्ड्यते॥ तत्रतावन्निखिलजनापवर्गाय श्रवणादयः प्रतिपाद्यन्ते इति प्रतिज्ञा मुक्तेरप्यधिकं भक्तियोगमीश्वरोभक्तेभ्योददातीति वक्ष्यमाणस्वसिद्धान्तेन विरुद्धा लक्षणया तप्यमानान्तविशेषणेन वा निखिलपदस्यार्थसंकोचेतु तस्य वैयर्थ्येनानुपादानमेववरम्॥ किञ्च श्रवणादीनां निखिलजनापवर्गार्थत्वमपशूद्राधिकरणविरुद्धम्॥ श्रवणस्य श्रोतव्यःश्रुतिवाक्येभ्यइतिवाक्येन वेदवाक्येभ्यएवकर्त्तव्यतया शूद्रस्य तेष्वनधिकारात्॥ अतएवाधिकारीतु त्रैवर्णिकएवेत्युक्तं प्रथमसूत्रव्याख्याने तवतातेन॥ वस्तुतस्तु त्रैवर्णिकस्यापि नसर्वस्याधिकारः किन्तु शान्तोदान्तइत्यादिश्रुत्युपात्तस्यैवेत्यन्यत्रविस्तरइति त्वत्तातोक्तमपि नकिञ्चित्॥ टीकोक्तेषु श्रुत्यर्थेषु यद्धेयं तदग्रे स्वयमेवस्फुटी भविष्यति॥

पूर्वपक्षे नहिश्रुतिसिद्धाइति यत्पूर्वं प्रतिज्ञातं ततोविरुद्धमग्रे श्रौतानामपीत्यादिकथनम् ॥ तत्र पूर्वप्रतिज्ञा ऽसंगता ॥ एवं प्राकरक्ते घटे श्यामत्वस्यैवेत्यत्र षष्ठ्यनुपपन्ना ॥ एवमङ्गीकारादित्यत्रल्यब्लोपे पञ्चमीत्युक्त्वाऽङ्गीकृत्येति टीकाकृतोव्याख्यानमयुक्तम्॥ अङ्गीकारमाश्रित्येत्यादिव्याख्यानस्यैवौचित्यात् ॥ अपवादार्थमित्यादेः पूर्वोक्तप्रकारेण मेलयित्वा कथनमसंगतमस्य फलान्तररूपत्वात् ॥ अतएवोभयत्रानेनाप्यर्थशब्दः प्रयुक्तः॥ अथ सिद्धान्तगद्यारम्भे मिथ्यावादीत्यस्यकोर्थः॥किं सर्वं मिथ्या वदति तच्छीलादिरिति किंवा किञ्चिन्मिथ्या वदतीत्यादिः उत जगन्मिथ्या वदतीत्यादिः ॥ नतावदाद्यः ॥ ब्रह्मणोमिथ्यात्वानङ्गीकारेण निरनुयोज्यानुयोगात् ॥ नद्वितीयः ॥ त्वय्यतिप्रसङ्गात् स्वप्नादेस्त्वन्मतेऽपिमिथ्यात्वात्॥अन्यथोत्पत्तिबाधश्रुत्योस्तत्रानुपपत्तेः॥ अहन्तादेरपि मायिकत्वाङ्गीकारेण तत्रापि मिथ्यात्वस्यत्वया वक्तव्यत्वात्॥माया मात्रन्त्विति सूत्रेण मायिकतयोक्ते स्वप्ने मिथ्यात्वदर्शनात्॥अतएव न तृतीयः॥जगन्मिथ्येत्येतावन्मात्रार्थवाचकत्वे प्रमाणाभावेन तदर्थमादाय त्वयेव स्वप्नाहन्तादि मिथ्येत्यर्थमादाय परैरपि प्रयोक्तुं शक्यत्वेन त्वय्यतिप्रसङ्गात् ॥ बाधितार्थवादित्वेन तथा प्रयोगस्तु अग्रिमनिर्णयाधीनः॥स्वमनस्येव निर्णीय तथाप्रयोगेतु अतिप्रसङ्गः ॥ गालीमात्रदाने पर्यवसानंच॥ तथाच ददतुददतुगालीर्गालिमन्तोभवन्तइतिन्यायावतारः ॥ एवं मायावादिशब्दार्थोपि विकल्प्य दूषणीयः ॥ किञ्च पराऽस्यशक्तिरित्यादिश्रुतिप्रामाण्येन सिद्धायास्त्वन्मते ईश्वरादभिन्नायाश्शक्तेस्त्वयापि अहन्तादिकं प्रति स्वप्नंप्रति आसुरज्ञानं प्रतिच हेतुत्वमुच्यते साच मा-

यान्तुप्रकृतिमित्यादिश्रुत्युक्तमायायानभिन्ना मानाभावाद्गौर-वाच्चेति त्वय्यतिप्रसङ्गः ॥ किञ्च पराऽस्यशक्तिरित्यादिश्रुतिसिद्धा-यामायायास्त्वन्मतईश्वराभिन्नत्वेनेश्वरस्य जगद्धेतुत्वे मायाया-स्तद्धेतुत्वं सुतराम् ॥ अतएव मायान्तुप्रकृतिमितिश्रुतिः संगता॥ त-स्याश्च मायायास्त्वन्मते सत्यत्वमेवेति मायावादित्वं त्वय्येवसंग-च्छते नास्मासु ॥ अस्माभिर्ब्रह्मातिरिक्तस्य सत्यत्वानङ्गीकारे-णास्मन्मते तस्या असत्कल्पत्वात् ॥ नहितमोद्रव्यंनास्तीतिवदंस्ता-र्किकस्तमोवादीत्युच्यते अभावोनास्तीतिवदन्प्रभाकरादिर्वाऽभा-ववादी किन्तु ब्रह्मवादित्वमेवास्मासु सङ्गच्छते ॥ तन्मात्रस्य सत्य-त्वाभ्युपगमात् ॥ त्वन्तु ब्रह्मणोग्रामीणतरगोपीविटत्वाङ्गीकारेण विटवाद्येव ॥ प्रकृतमनुसरामः ॥ विटवादिनस्तावदयं सिद्धान्तः ॥ पुष्टिमार्गवर्तिसिद्धान्तविरुद्धायायुक्तयस्ताआसुरमोहनायैवेति ॥ तथाच तावत्योक्त्यैव निर्वाहे व्यर्थः परमतखण्डनप्रयासः॥ किञ्च सर्वभवनसमर्थेऽस्मिन्विरुद्धमपि तथात्वसूचकत्वाद्भूषणमेवेति त-त्सिद्धान्तइति तथोक्त्यैव सर्वोपपत्तौविरोधपरिहारश्रमोऽपार्थ कः॥ इदञ्च स्वमताऽज्ञानेन पूर्वापरानुसन्धानाभावेन चायं प्रवर्त्त-तइति ख्यापनायोक्तमस्माभिर्नतु तथासिद्धान्ताश्रयणेन समाधा-तुं शक्यम् ॥ तादृशसिद्धान्ताङ्गीकारस्य दुष्टत्वादित्युक्तं वक्ष्यामश्च तत्रतत्र॥अथ तदुक्तयोदूष्यन्ते तदुक्तदूषणानिचोद्ध्रियन्ते॥तत्र पा-रमार्थिकभेदपक्षोन नः समंतः॥ अस्यार्थस्त्वित्युपक्रम्य मनोमय-त्वादिविषयवाक्योक्तधर्मविशिष्टं ब्रह्मैवास्मिन्वाक्ये उच्यते इत्ये-तत्कथनन्त्वसगतं ॥ सूत्रात्तथार्थाभानात् ॥ विवक्षितगुणोपपत्ते-श्चेत्युत्तरसूत्रेण मनोमयत्वादिगुणानामीश्वरउपपत्तिकथनाच्च ॥

एवञ्च विवक्षितानांगुणानां सत्यसंकल्पत्वादीनां स्वरूपेण मनोमयत्वादीनांच जीवाभेदेनोपपत्तेरिति विवक्षितगुणेतिसूत्रस्यार्थो न तु विवक्षितालोकान्तरेतादृशरूपप्राप्तिः साप्रकृतेऽप्युपपद्यते इत्यादिस्तत्पित्रुक्तस्तादृशरूपप्राप्तेर्गुणशब्देन ग्रहणे मानाभावात् ॥ मनोमयत्वादिगुणानामीश्वरउपपत्त्यनुक्तौ तद्वाक्यस्य जीवपरत्वशङ्कानपगमाच्चेति संक्षेपः॥ त्वया नङ्गीकारादित्यत्र पञ्चम्यसंगता तेषां मते इति पदद्वयस्थाने तैरितिवक्तुमुचितम् ॥यथाचाविद्याया अनादित्वं हेतुत्वंच तदनादित्वेपि नाविरतंसृष्टि र्नवासदेवेत्येवकारविरोधो यथाच कर्मणामिच्छांप्रतिहेतुत्वं यथाच कालस्यकर्मोद्बोधहेतुत्वेन तस्य सृष्टेःप्राक्सत्त्वेपि नैवकारविरोधो यथाचनेश्वरस्यनैष्फल्यं स्वतन्त्रत्वस्यकर्त्तृत्वस्यचविघातो यथाच कालोस्मीत्यादेर्नत्वदुक्तार्थकत्वं यथाच त्वन्मतेऽविरतसृष्ट्यनवस्थावैषम्यादिदोषस्तथोक्तं तृतीयश्लोकव्याख्यानावसरे ॥ मायास्वरूपातिरिक्तगुणापेक्षातु नोच्यतेऽस्माभिरिति तद्दोषोक्तिर्निरनुयोज्यानुयोगः॥ तद्धेतोरेवेतिन्यायस्तु कुलालादौ व्यभिचारी॥ सन्मूलाइत्यादेस्तु सतःप्रजाभ्रमाधिष्ठानतयोपपत्तिरुक्तापूर्वभागे ॥नतूपहितेघटक्रियेवेतितु नयुक्तम् ॥ आकाशस्य विभुत्वेन वास्तवक्रियानाधारत्वेन तादृशक्रियायाघटमात्रे सत्त्वेऽपि कल्पितक्रियायास्तादृशतलादेश्च यथाऽऽकाशे सत्त्वं कल्पकदोषसहितस्य चाकाशस्य तत्रहेतुत्वं क्रियादिकंप्रतिवितर्त्तोपादानतायाअविरोधात्॥तथाऽत्रापि सोपाधिकस्य तत्त्वोपपत्तेः॥अस्मदेकदेशिमायामात्रहेतुत्ववादिमते यथासर्ववाक्योपपत्तिरक्षरब्रह्महेतुत्ववादे यथा समानानुपपत्तिर्यथा चास्मन्मतेऽथातोगौणश्चेदित्यादेः संगति-

स्तथोक्तं तृतीयश्लोकव्याख्यायाम्॥शुद्धब्रह्मातिरिक्तनिरूपणस्य वेदेष्वप्राधान्यमिति सर्वेवेदाइत्यादेस्तात्पर्यंचारूपवदेवहीतिसूत्रव्याख्यानावसरे चतुर्थश्लोकव्याख्यायां वर्णितम्॥इतिद्वितीयखण्डखण्डनम्॥२॥ ॥ द्वितीयस्तुस्यात् नस्यात् विरोधादितिचेन्मैवं॥अस्थूलादिवाक्यैर्जडजीवधर्माएव ब्रह्मणि निषिध्यंते नश्रुतिसिद्धाजगत्कर्तृत्वादयः॥ तथासति प्रक्षालनाद्धिपंकस्येतिन्यायेनप्रतिपादनवैयर्थ्यापातात् ॥ किंच ब्रह्मनिरूपकमहावाक्ये त्वन्मते सृष्टिनिरूपकाणि वाक्यान्यसंगतानिस्युः॥ तदनिरूपकत्वात्॥नन्वस्तिसंगतिरध्यारोपापवादलक्षणा ॥ तथाहि ॥ शुद्धब्रह्मणोदुर्ज्ञेयत्वेन तज्ज्ञापनाय जगज्जननमुक्ता कर्तृत्वभोक्तृत्वे प्रतिपाद्य तद्वारा सोपाधिके ब्रह्मणि बुद्धौ सिद्धायां शाखारुंधतीन्यायेन पूर्वोक्तमपोद्य कर्तृत्वाद्यपेतं ब्रह्म पश्चाद्बोध्यतइतिचेत्॥ नैवंवक्तुंयुक्तं ॥ जगदप्रतीतिप्रसंगात्॥ तथाहि ॥ नहिजगत्प्रतीतिः श्रुतिसिद्धा येन पूर्वंबोधयति पश्चान्निषेधतीत्युच्येत किन्तु लोकसिद्धा॥ तथाच तत्र कर्त्रपेक्षायां कर्त्तारमेवोपदिशतीतिवक्तुंयुक्तं नतु लोकसिद्धमेव जगदनूद्य तत्र कर्तृत्वं बोधयित्वा पश्चान्निषेधतीति॥ तथासति कार्यस्य प्रतीतिसिद्धत्वेन कर्त्रंतरस्याभावाच्च जगतएवाऽसंभवेनाऽनुवादोबाधितविषयः स्यात्॥स्वारूढशाखाच्छेदनवन्मातावंध्येतिवाक्यवच्च सर्वार्थतत्त्वप्रतिपादिका श्रुतिः कथमेवं वदेत् सर्वतोबलवतीह्यन्यथानुपपत्तिः॥ ननूपलब्धिमात्रेण न वस्तुसत्त्वं वक्तुं शक्यं॥ स्वप्नादिषु तथाप्रसंगात्॥ तथाच निषेधिकायाः श्रुतेः प्रपञ्चासत्त्वमेवाभिप्रेतमितिचेत् तर्हि प्रतीतिमुपपादयतु देवानां प्रियः ॥ न तावद्भासनयेति वक्तुं

शक्यं ॥ तस्याअनुभवजन्यत्वेन जगतश्चासत्त्वेन पूर्वमनुभवासंभवात् ॥ नचानादित्वेन तदुपपत्तिः ॥ सर्वेषामनुभवानां वासनाजनकत्वानियमेन कदाचित्कस्यचिदर्थस्याप्रतीतिप्रसंगात् ॥ नियमे वा सर्वदा तदुद्बोधानियमेनापि तथाप्रसंगः ॥ उद्बोधकंच न दृष्टं ॥ अन्योन्याश्रयप्रसंगात् ॥ नाप्यदृष्टं ॥ दृष्टसामग्रीसंपादनद्वारैव तस्य कारणत्वात् ॥ वैधर्म्याच्चनस्वमादिवदिति तत्त्वसूत्रविरोधाच्च ॥ ३ ॥ ॥ अथ द्वितीयस्तु स्यादित्यादिर्विरोधाच्चेत्यन्तस्तृतीयः खण्डः खण्ड्यते ॥ ॥ तत्र जडवर्गस्य जीवस्य च धर्माणां ब्रह्मणि निषेधोन सम्भवतीत्युक्तं विष्णौजीवगेतिश्लोके ॥ ब्रह्मणिविशेषाननिरूप्य तत्र तन्निषेधे विशेषाणां मिथ्यात्वं नस्यादित्यपि तत्रैवोक्तम् ॥ उपासनार्थमपि क्वचिद्विशेषाणामनुवादइति ब्रह्मनिरूपकमहावाक्यप्रकरणेपि सृष्टिनिरूपकवाक्यानां नासंगतिरितिच तत्रैवोक्तम् ॥ तथाहीत्यादिनाऽध्यारोपापवादस्वरूपकथनन्त्वज्ञानात् ॥ अस्थूलमनण्वित्याद्युक्तोक्तस्यैतस्यैवाक्षरस्यप्रशासनइति वचनस्य गतिस्तु चतुर्थपञ्चमश्लोकयोरुक्तेति तद्विरोधोन ॥ अतोनिर्विशेषवाक्यानां तद्विरोधेन दौर्बल्यापादनं सुवर्णसूत्राख्यतट्टीकोक्तं नकिञ्चित् ॥ यद्यपि सविशेषवाक्यमात्रदर्शनेन जगदुत्पत्तिवर्णने कर्त्तुरपेक्षया तदुपदेशस्तात्पर्यविषयइति वक्तुं युज्येत तथापि निर्विशेषवाक्यदर्शनेन तदप्यनुवादकोटिगतमेव ॥ अनुवादस्य तु बाधितविषयत्वमिष्टमेव ॥ स्वारूढशाखाच्छेदनादिदृष्टान्तस्तु विषमः ॥ अथरथानूरथयोगान्पथःसृजति यदाकर्मसुकाम्येषुस्त्रियंस्वप्नेऽनुपश्यतीत्यादौ व्यभिचारीच ॥ बाधितत्वेन ज्ञातस्यापीश्वरेण निर्माणन्त्वैन्द्र-

जालिकवत् ॥ एतेन तट्टीकोक्तं सर्वज्ञस्य मायिकपदार्थनिर्माण-मसंगतमिति निरस्तम् ॥ श्रुतीनां सर्वार्थतत्त्वप्रतिपादकत्वंतु अथ-रथान्इत्यादौ व्यभिचारि॥ तात्पर्यविषयसर्वार्थतत्त्वप्रतिपादकत्व-न्त्विष्यते ॥ तात्पर्यविषयस्तु निर्विशेषं ब्रह्मैव ॥ प्रतीतिविषयेत्वि-यं व्यवस्था ॥ सद्विलक्षणस्य जगतः स्वमवत्प्रतीतिः ॥ हेतुभूतवा-सनायाः सत्यविषयकानुभवजन्यत्वे गौरवादनुभवजन्यत्वमेवा-ङ्गीक्रियते ॥ यावद्भिः संस्कारैः स्मृतिरूपमध्यासरूपं वा कार्य-मुत्पाद्यते तावतामनुभवेनोत्पत्तिर्जीवाऽदृष्टेनचोद्बोधः ॥ अदृष्टस्य दृष्टसामग्रीसम्पादनद्वारा कार्यहेतुत्वनियमस्तु अदृष्टस्य हेतुत्वमन-ङ्गीकुर्वतस्तेऽसङ्गतः ॥ सुषुप्त्युत्तरे स्वप्ने जागरणे चादृष्टमात्रस्य हे-तुत्वं वदन्त्या पुनश्चजन्मान्तरकर्मयोगात्सएवजीवःस्वपितिप्रबुद्ध-इति श्रुत्या विरुद्धश्च ॥ अदृष्टेन स्वकार्योत्पत्तये या दृष्टसामग्री सम्पाद्यते सापि तत्कार्यमेवेति तत्रापि दृष्टसामग्र्यपेक्षायां मू-लच्छेदकर्यनवस्थाऽऽपद्येत अनपेक्षणेतु नियमभङ्गइत्यप्रामाणि-कोऽयं नियमः ॥ सति सम्भवे इति वा नियमशरीरे निवेशनी-यम् ॥ वैधर्म्याच्चेतिसूत्रविरोधस्त्वीशानःसृजतीत्यादिश्लोकव्या-ख्यायामुद्धृतः ॥ इतितृतीयखण्डखण्डनम् ॥ ३ ॥ ॥ ननु जी-वाविद्यैव जगत्प्रतीतौ हेतुः ॥ तथाहि ॥ जीवब्रह्मणोरभेदबोधक-श्रुत्या भेदस्यच तत्रैव ज्ञाननिवर्त्यत्वोक्त्या भेदस्यातात्विकत्वम-ज्ञानकृतत्वं च निरूपितं ॥ यतः परमार्थतोभिन्नस्याभेदासंभवः॥ ज्ञानमप्यज्ञानस्यैव निवर्त्तकं ॥ तथाचानादिरविद्यैवाऽज्ञानरूपा-ऽहमज्ञइत्यनुभवसिद्धा भावरूपा तदवच्छेदिका मंतव्या ॥ जी-वब्रह्मविभागस्यानादित्वात् बंधोऽस्याऽविद्ययाऽनादिरिति बच-

नात् ॥ तथाच विचित्रपरिणामशीलया तयैव दोषरूपया विचित्रं जगत्प्रतीयते ॥ युक्तंचैतत्॥कार्यस्य तुच्छत्वेन तत्कारणेनापि तादृशेनैव भवितव्यं ॥ कारणसजातीयत्वात्कार्यस्य ॥ यथाच मुखसंबंधमात्रेण दर्पणादिकं बिम्बप्रतिबिम्बभेदनिमित्तं तथा चिद्रूपब्रह्मसम्बन्धमात्रेण तद्भेदनिमित्तं ॥ सतत्कृततदध्यासवशात्स्वस्मिन्नज्ञत्वं कर्तृत्वभोक्तृत्वे मन्यमानोजीवोविधिनियोज्यतादिभावं मनुते ॥ ततः शमदमादिभिर्गुरूपसत्तितदुपदेशश्रवणमननिदिध्यासनैश्चाधिष्ठानरूपस्यात्मनोऽद्वैतकूटस्थचिदेकरसत्वलक्षणस्वरूपज्ञानेनाज्ञाननिवृत्त्या तत्कार्यरूपप्रपञ्चस्यापि निवृत्तेर्ब्रह्मवेदब्रह्मैवभवतीत्यादिश्रुतिनिरूपितोमोक्षः संपद्यते ॥ रज्जुस्वरूपज्ञानेन प्राचीनसर्पानुभवतत्कृतभयनिवृत्त्या स्वास्थ्यमिव॥ननु ब्रह्मणः सर्वज्ञस्याऽविद्यासम्बन्धोऽशक्यवचनः॥अज्ञत्वापादकत्वात्॥ नच जीवाश्रयैव सेतिवाच्यं ॥ऐक्यांगीकारात्तयोः ॥ एतेन जीवस्याप्यज्ञत्वमनुपपन्नं वेदितव्यमितिचेत् न जपाकुसुमारुणस्फटिकस्तंभश्रेणिगतपुरुषप्रतिबिम्बस्यारुणत्ववज्जीवस्याज्ञत्वावभासोपपत्तेः ॥ तद्बिम्बस्योज्ज्वलतेव ब्रह्मणः सर्वज्ञत्वोपपत्तेरविद्याश्रयत्वेन नाभेदानुपपत्तिरित्येवंप्राप्ते ब्रूमः ॥ पूर्वं जीवस्वरूपं विचारणीयं यस्य सा शक्तिः ॥तत्र न तावत् ब्रह्मप्रतिबिम्बोजीवइति पक्षोयुक्तिसहः॥तथाहि ॥ ब्रह्मणोनीरूपत्वेन प्रतिबिम्बाश्रयस्याज्ञानस्य चास्वच्छत्वेन क कस्य प्रतिबिम्बः स्यात् ॥ रूपवतएव प्रतिबिम्बनियमात् ॥ दृष्टानुसारिणी हि कल्पनोचिता ॥ अन्यथा वायुदारुणोरपि बिम्बत्वप्रतिबिम्बाश्रयत्वप्रसङ्गात् ॥ ननु दर्पणादा-

वाकाशप्रतिबिम्बोदृश्यते न तावद्देशीयप्रभामण्डलस्यैव रूपवत्वेन तत्र प्रतिबिम्बप्रतीतेः ॥ किञ्च ॥ यत्र यदस्ति तत्र तन्न प्रतिबिम्बते ॥ दर्पणरेखावत् ॥ तथाच सर्वगतस्य ब्रह्मणोऽविद्यायामपि सर्वगतायां सत्त्वेन कथं प्रतिबिम्बः स्यात् ॥ नच संयोगसम्बन्धेन तत्र वर्त्तमानत्वं प्रतिबिम्बे प्रयोजकं एतयोश्च न संयोगोविभुत्वात् अतोनानुपपत्तिरितिवाच्यं ॥ संयुक्तस्यापि प्रभामण्डलस्य तथाप्रतीतेः ॥ नच यदंशे संयोगः तदंशे न तथेतिवाच्यं ॥ बिसिनीसूत्रमात्रान्तरिताङ्गुलीतलभागस्थप्रभायाअपि दर्पणे प्रतिबिम्बात्॥ किञ्च ॥ द्वासुपर्णासयुजा गुहांप्रविष्टौपरमेपरार्द्धे गुहांप्रविष्टावात्मानौहितद्दर्शनादित्यादिश्रुतिन्यायनिर्णीता जीवपरमात्मनोरेकत्र स्थितिर्बिम्बप्रतिबिम्बपक्षे न संगच्छते॥ तयोर्लोके तथा ऽदर्शनात्॥४॥ ॥अथ ननु जीवाविद्यैवेत्यादिस्तयोर्लोके तथादर्शनादित्यन्तश्चतुर्थः खण्डः खण्ड्यते॥ ॥तत्र यद्यप्यस्मन्मतोपपादनप्रयासोमूलटीकयोरस्मन्मताज्ञानपूर्वकत्वेन न नोरोचते तथापि विस्तरभयान्नतद्दूषणाय प्रयत्यते ॥ मायायाः स्वच्छत्वं रूपरहितस्य प्रतिबिम्बो यत्र यदस्ति तत्रापि तत्प्रतिबिम्बश्च मायायां प्रतिबिम्बतेइतिश्लोकव्याख्यायाम्प्रत्यपादि॥इतीयं कल्पना दृष्टानुसारिण्येव॥ किञ्च त्वदुक्तन्याये कल्पनाशब्देन श्रौतार्थज्ञानस्यापि ग्रहणे स्वर्गादिरलीकः स्यात् ॥ तज्ज्ञानस्य दृष्टानुसारित्वाभावात् ॥ अर्थापत्तेर्व्यतिरेक्यनुमितेर्वा ग्रहणे नात्रतन्न्यायावतारशङ्कापि॥श्रौतप्रतिबिम्बप्रमायाः कल्पनात्वाभावात् ॥ किञ्च प्रभायारूपमात्रत्वेन गुणत्वं मन्यमानस्य ते तत्प्रतिबिम्बस्वीकारे कुतोन रूपवतएव प्रतिबिम्बइति नियमविरोधः ॥ सकिरणायाः प्रभायाः प्रति-

बिम्बस्वीकारे तु न मानम् ॥ किञ्चैवं गमनमप्यालोकस्य सकिरणस्यैव स्यादिति त्वया सिद्धान्तपरतया मन्यमानेन गुणाद्वालोकवदितिसूत्रेण विरोधः स्यात् ॥ द्वासुपर्णा गुहांप्रविष्टौपरमइत्यादिश्रुतेः गुहांप्रविष्टावात्मानौहिइत्यस्य सूत्रस्य चाविरोधो मायायांप्रतिबिम्बतेइतिश्लोकव्याख्यायामुक्तः ॥ एवं टीकोक्तस्य रूपंरूपमित्यादिश्रुतिव्याख्यानस्य दूषणमपि तत्रैवोक्तम् ॥ किञ्च गुहांप्रविष्टावित्यत्र च्छायातपावित्युक्तत्वेन सा श्रुतिः प्रतिबिम्बत्ववादिन्येव॥छायास्यादातपाभावेप्रतिबिम्बार्कयोषितोरितिमेदिनीकोशेन छायाशब्दस्य प्रतिबिम्बपरत्वज्ञानात् ॥ मायायाब्रह्माश्रितत्वे जीवाश्रितत्वेवा ब्रह्मणोयथा नाज्ञत्वं तथोक्तं तृतीयश्लोकव्याख्यायाम् ॥ इतिचतुर्थखण्डखण्डनम् ॥ ४ ॥ ॥अपरंच॥ अविद्यायां ब्रह्मप्रतिबिम्बोजीवइति मोक्षश्चाविद्यानाशइति वदतस्तव मते जीवस्वरूपनाशएव मोक्षइतिसंपद्यते॥तथाचात्महानमपुरुषार्थइति मोक्षस्याऽपुरुषार्थत्वमापद्येत ॥ जीवस्यालीकत्वंच स्यात् ॥ तथासति कोऽपि पारलौकिकप्रयत्नं नकुर्यात् ॥ तथाहि ॥ मुमुक्षुर्हि मोक्षस्वरूपं बद्धत्वेन स्वस्वरूपं च ज्ञात्वा तत्साधने यतिष्यते ॥ तथाचोक्तोभयस्वरूपाज्ञाने सर्वं मिथ्येति ज्ञात्वा प्रवृत्तिश्चाविद्याध्यासकृतैवैहिकी पारलौकिक्यपीति ज्ञात्वा च वरमैहिक्येव नतु पारलौकिकी स्वरूपहानिहेतुत्वादिति सर्वाऽप्रवृत्तौ निवृत्तिमार्गएवोच्छिद्येत तूष्णीं वा तिष्ठेत्सर्वोऽपि निषिद्धविहितयोश्चाविशेषात् कुतोऽपि न निवर्त्तेतैवेति सन्मार्गमात्रोच्छेदनायेदृशं मतं प्रवर्त्तयन् व्यवहारमात्रे वेदमपि प्रमाणत्वेनोररीकुर्वन् प्रच्छन्नबौद्धोऽसि वेदमपि स्वाऽज्ञानकल्पितं ब्रुवन्नतिधृष्टो-

ऽसि ॥ नन्वखिलप्रपञ्चस्यैव तथात्वात्तन्मध्यपातित्वेन वेदेऽपि त-
थात्वं ब्रवीमि ॥ बाढं ब्रवीषि निरङ्कुशत्वात्ते तुण्डस्य नतु युक्ति-
युक्तं ब्रवीषि॥तथाहि ॥ नहि प्रतिबिम्बिताम्रतरुकदम्बफलाऽऽदा-
नाय प्रसारितबाहुः प्रतिबिम्बत्वं जानन् दृष्टचरः कश्चित् ॥ एवं
वेदे तथात्वं जानंस्तदुक्तस्वर्गापवर्गादिफलकयागसंन्यासादिषु ब-
ह्वायाससाध्येषु सर्वबंधुपरित्यागेन सर्वसुखवैमुख्येन च कोवा
प्रवर्त्तेत ॥ ननु स्वप्ने कल्पितफलार्थं प्रवृत्तिर्दृष्टचरा ॥ सत्यं दृष्टच-
रा तदा तत्सत्यमेवेति विदुषो नतु स्वप्नमिमंपश्यामि नपारमार्थि-
कमिति स्वप्नएव विदुषइति गृहाण ॥ ननु विशेषदर्शनस्य स्वस-
जातीयस्यैव भ्रमस्य निवर्त्तकत्वात्प्रकृतेच प्रापञ्चिकभ्रमस्याऽप-
रोक्षरूपत्वाच्छाब्दं ज्ञानं न तन्निवर्त्तनसमर्थमिति प्रवृत्तिरुपपद्य-
तइतिचेत् ॥ नैतत्सारं ॥ प्रतिम्बितत्वेनानुमितासत्वानामपि तरू-
णां चाक्षुषप्रतीतिवच्छाब्दज्ञानानंतरमपि प्रपञ्चप्रतीतिरास्तां नाम
नतु जातु प्रवृत्तिः॥अन्यथा तत्फलार्थापि प्रवृत्तिः स्यात्॥प्राग्जा-
तस्य यागब्रह्मज्ञानयोः स्वर्गमुक्तिफलकत्वज्ञानस्य पश्चाज्जातेन त-
न्मिथ्यात्वज्ञानेन बाधे बाधकाभावः॥उभयोरपि शाब्दत्वात्॥ननु
द्वैतप्रतीतिरेवाऽनर्थरूपा तन्निवृत्तिश्चाऽपरोक्षब्रह्मज्ञानं विना न भ-
वतीति तदर्थं प्रवृत्तिरितिचेत्॥अत्र मिथ्यात्ववादी प्रष्टव्यः॥तदनर्थ-
हेतुत्वैतत्कार्यकारणभावाऽवगतिस्तवकुतइति॥श्रुतितइति यदि ब्रू-
यात्तदा सवक्तव्यः निःश्वसितमस्यवेदाः योब्रह्माणंविदधातिपूर्वं-
योवैवेदांश्चप्रहिणोतितस्मै वेदोनारायणःसाक्षात्स्वयंभूरितिशुश्रुम
वेदैश्चसर्वैरहमेववेद्योवेदांतकृद्वेदविदेवचाहमित्यादिस्वस्मृतिविरुद्धं
यदज्ञानकल्पितत्वं स्वस्य लौकिकवाक्यावैशिष्ट्यापादकं कथं श्रु-

तिर्वक्तुमर्हतीति स्वयमेव विचारय॥किञ्च पूर्वं वेदानां पारमार्थिक-सत्त्वं ज्ञात्वा तदौदासीन्येन वा तच्छ्रवणे प्रवृत्तस्त्वदुक्तरीत्याच श्रुते-स्तदुक्तसाधनानां चाऽज्ञानकल्पितत्वं श्रुत्वा स्वाप्निकभोजनेन पर-मार्थतस्तृप्तिवदसत्तुल्यैर्गुरुवाक्यैः कथं परमार्थसद्रूपं ब्रह्म फलिष्य-तीति शंकयाऽवधारणेन वा न कश्चित्प्रवर्त्तेत॥ननु यतएवाऽवधारणं ततएव प्रवृत्तिरपीतिचेन्नैवं॥पूर्वं तथाऽवधारणेऽपि तादृशानामेव त-दुक्तसाधनानामतादृशफलकत्वं श्रुत्वोक्तदृष्टान्तन्यायेन बाधितार्थ-त्वं जानन्नेकतरबाधोपराशक्यः श्रुतित्वाविशेषादित्यपि जानंस्तद-र्थेसंदिहानस्तन्निर्णयार्थं प्रवृत्तो निःश्वसितमिति योब्रह्माणमिति नामरूपेव्याकरवाणीति ऐतदात्म्यमिदंसर्वमिति आत्मानंस्वयम-कुरुत तत्सत्यमित्याचक्षते कथमसतःसज्जायेतेति वेदोनारायणः वेदैश्चसर्वैः अहंसर्वस्यप्रभवः तेनेब्रह्महृदा आनंदमात्रकरपादमु-खोदरादि जन्माद्यस्ययतः आनंदमयोऽभ्यासादित्यादिश्रुतिस्मृति-न्यायसहस्रैर्बाधितत्वाऽवधारणात्त्वदुक्तरीत्या न विचारकस्य प्रवृ-त्तिः संभवति ॥ संप्रतितु विचारकाणामप्यासुरसर्गोत्पन्नत्वेन भ-गवन्मायामोहितानां न बाधज्ञानं पूर्वोक्तमिति तथैव प्रवृत्तिः ॥ अतएव ज्ञानिनामपिचेतांसिदेवीभगवतीहिसा बलादाकृष्यमो-हायमहामायाप्रयच्छतीति मार्कण्डेयेनोक्तं॥ यतस्तथैवहरीच्छा॥ तदुक्तंपाद्मादौ ॥ द्वापरादौयुगेभूत्वाकलयामानुषादिषु स्वागमैः-कल्पितैस्त्वंचजनान्मद्विमुखान्कुरु मांचगोपाययेनस्यात्सृष्टिरे-षोत्तरोत्तरा इत्यादि ॥ फलंतु तेषामन्धंतमएव ॥ मामप्राप्यैवेति-वचनादित्यलमतिप्रसंगेन ॥ ५ ॥ ॥ अथाऽपरश्चेत्यादिरलम-तिप्रसङ्गेनेत्यन्तः पञ्चमः खण्डः खण्ड्यते ॥ ॥ यथाच जीवस्वरू-

पनाशोनमोक्षो यथाच जीवस्यनालीकत्वं तथाऽष्टमश्लोकव्या-
ख्यायामुक्तम् ॥ प्रत्युत त्वन्मते मुक्तौ जीवस्वरूपनाशइत्युक्तं स-
प्तमश्लोकव्याख्यायाम् ॥ ब्रह्माऽतिरिक्तं सर्वं मिथ्येति निश्चयस्तु
श्रवणादेः परम् ॥ तदानींतु न कापि प्रवृत्तिरिष्यते ॥ अतएव ज-
नकादयः संन्यासेऽपि न प्रावर्त्तन्त ॥ याज्ञवल्क्यादीनां तु श्रौता-
दिकर्मस्वप्रवृत्तिरूपएव संन्यासोजीवन्मुक्तिसुखानुभवाय विक्षे-
पजिहासयेत्यवेहि ॥ तस्मात्संन्यासे कर्मान्तरेवा ज्ञानात्प्रागेवप्रवृ-
त्तिः ॥ तदानीं हि वेदास्स्वर्गादयश्च कल्पिताइति ज्ञानं नाऽस्तीति
तत्र प्रवर्त्तते ॥ शास्त्रीयं कल्पितत्वज्ञानंतु असम्भावनादिदोषात्सं-
दिग्धमिवेति नानादिकालिकां कर्मादिश्रद्धां परोक्षामपि बाधि-
तुमीष्टे श्रवणादिभिरसम्भावनादिनिवृत्त्या संदेहनिवृत्तौ तु तदपि
तां बाधितुमीष्टएव ॥ तथाचश्रुतिः ॥ यत्रत्वस्यद्वैतमिवभवतित-
दितरइतरम्पश्यतिइत्याद्या यत्रत्वस्यसर्वमात्मैवाभूत्तत्केनकम्पश्ये-
दित्याद्याच ॥ अधिकन्तु अस्मत्कृतदण्डधारणव्यवस्थायां द्रष्ट-
व्यम् ॥ किञ्च लिपौ सत्यपि कल्पितवर्णत्वज्ञाने ऽकल्पितार्थ-
ज्ञानाय यथा तत्र प्रवृत्तिः सत्यपिकल्पितत्वज्ञाने दर्पणादिस्थ-
मुखादिषु तद्दर्शनेच यथा प्रवृत्तिस्तथा संन्यासऐहिकामुष्मिक-
साधनेष्वपीति न शास्त्रीयमार्गोच्छेदोबाधितानुवृत्त्याव्यवहारस्या-
चार्यैः साधितत्वात् ॥ नहि प्रतिबिम्बितेत्यत्रदृष्टान्तदार्ष्टान्तिक-
योर्वैषम्यं ॥ दृष्टान्ते कल्पिते प्रवृत्त्यदर्शनेन दार्ष्टान्तिके कल्पितेन
प्रवृत्त्यभावस्य कथनात् ॥ प्रतिबिम्बिताम्रतरुफलादानेतु न प्रवृ-
त्तिरध्यासाऽनुवृत्तावपि अभिमतसाधकत्वाऽज्ञानात्पुरोवर्त्तिनि त-
त्साधकत्वज्ञानस्यैव प्रवृत्तिं प्रति हेतुत्वात् कस्य बाधितहेतोः सा-

धकताज्ञानं किम्प्रतिच तदितितु प्रमाणबलाद्यवस्थाप्यं नतु दृष्टान्तमात्रेणातिप्रसङ्गात् ॥ प्रत्युत त्वन्मते एव सर्वमार्गोच्छेदइत्युक्तं सर्वात्मेत्यस्य व्याख्यायाम् ॥ मुक्तेरपारलौकिकताया नतस्यप्राणाइत्यादिश्रुतिसिद्धत्वेनाऽस्मन्मतोपपादनाऽवसरे तद्यत्नस्य पारलौकिकत्वोक्तिश्चिन्त्या ॥ वेदस्तु न व्यवहारमात्रबोधकः किन्तु साक्षात्परम्परया वा ब्रह्मबोधकएवेत्युक्तं सर्ववेदायत्पदमित्यादिश्रुतिस्मृतितात्पर्यवर्णनावसरे चतुर्थश्लोकव्याख्यायाम् ॥ प्रत्युत पुष्टिमार्गवर्त्तिनस्तेमते एव प्रमाणमार्गपरत्वे नाऽभिमतस्य वेदादेर्व्यवहारमात्रपरत्वम् ॥ वेदस्याऽज्ञानकल्पितत्वे महिमापगमकथनं तु तन्महिमस्वरूपाज्ञानमूलकमेव ॥ तन्महिमाऽबाधिततात्पर्यविषयार्थकत्वम् ॥ इदंचाऽज्ञानकल्पितत्वे नापैति मानाभावात् तथेश्वरनिःश्वसितत्वं तथाब्रह्मणेदत्तत्वञ्च॥अतएव नलौकिकवाक्यावैशिष्ट्यम् ॥ असत्त्वंतु कल्पितस्य नाऽऽश्रीयते अनिर्वचनीयस्य तु हेतुत्वमस्त्येवेत्युक्तं प्राक् ॥ अतः श्रुतीनां कल्पितत्वेऽपि न हेतुत्वाभावः ॥ ततोऽनिर्वचनीयत्वाऽवधारणेऽपि तत्र गुरुवाक्यादौच प्रवृत्तिः स्वप्नसूचितसमृद्धाविव तत्र विश्वासात्फलस्याविसंवादित्वात् ॥ अत्र संदेहोद्विविधश्रुतिभिरेव तासामेकतरविधया निर्धारणकथनं तु निर्धारणरीत्यज्ञानाच्छ्रुतित्वाविशेषादित्यस्य विस्मरणाच्च॥तद्रीतिस्तु उपक्रमादिभिस्स्वार्थे तात्पर्यवत्त्वज्ञानाऽज्ञानाभ्यां बलवत्त्वाबलवत्त्वज्ञानम्॥निःश्वसितं योब्रह्माणमित्यादेस्तु गतिरुक्ता एवञ्चाऽशास्त्ररीत्या प्रवर्त्तमानस्त्वद्गुरुरेवाऽऽसुरइति प्रथमश्लोकोदाहृतकौर्मवाक्यैर्निश्चिनु ॥ अतोमार्कण्डेयपुराणवाक्यं तद्विषयमेव ॥ इदमपि यक्षानुरोधोबलीतिन्यायेनोक्तम् ॥ व-

स्तुतस्तु ज्ञानिनामितिश्लोके ज्ञानिपदमोहपदयोः प्रकरणाऽनुरोधादर्थान्तरपरत्वमेवेति तत्प्रकरणं दृष्ट्वाऽवधारय॥किञ्चेदानींतनत्वेन त्वदभिमतेभ्यो भगवत्पादादिभ्यः प्राचीनैः कृतेषु भागवतादिष्वपि त्वयाऽऽसुरमोहनाद्यर्थतया वर्णितस्य जगन्मिथ्यात्वादिकथनस्य दर्शनात्तत्कर्तॄणां व्यासादीनामप्यासुरत्वं स्यात् ॥ किञ्च पाद्मे वङ्गदेशजकायस्थविशेषकृतः प्रक्षेपोऽस्तीति विद्वद्गोष्ठीगम्यमित्युक्तम् ॥ अतोन तद्विद्वदादरणीयम् ॥ किञ्च वक्ष्यमाणत्वद्रीत्याऽऽसृष्टेराचसंहारं कर्त्तव्यस्येशेन प्राक्संकल्पितत्वेन किमिदं नियोजनं तद्विस्मृतिमूलकम् ॥ नियोगंकरिष्यामीत्यपि तदैव संकल्पितमासीदिति चेद्व्यर्थः ससंकल्पइदानींतनेनोपपत्तेः ॥ सर्वान्संसारेमज्जयिष्यामीति पूर्वसामान्यसंकल्पेनोपपत्तावयंच संकल्पोव्यर्थः ॥ सुव्याख्याताचवङ्गजकायस्थेन हरेर्दयालुता ॥ त्वयाच तच्चरणसेवया लब्धोऽयं श्लोकोविप्रशापादेव ॥ किञ्च शिवस्य नामानुषेषु भावइतीदमसंगतम् ॥ किञ्च भगवत्पादमुनेर्द्वापरे नाऽवतारः किन्तु द्वैपायनस्यैवेति तत्परोऽयं श्लोकः स्यात्॥ तथाच सुव्याख्याता व्यासभक्तिः ॥ किञ्च श्रीकृष्णोद्वापरेऽभूदिति बहुसंमतम् ॥ सचशिवस्यांशइति पुराणे बलदेवकृष्णयोस्तदीयसितकृष्णकेशावतारत्वकथनादवगम्यते ॥ सितश्चकृष्णश्चकश्चतेषामीशौ इतितु कदर्थकल्पना॥बहुषु पुराणेषु तादृशशब्दोल्लेखस्य निस्स्वारस्यकत्वापत्तेः॥विष्णोरीशद्वयसत्त्वे मानाभावाच्चअधिकंतु विस्तरभयान्नोल्लिख्यते ॥ शिवाऽवतारत्वं कृष्णस्य कृष्णजन्मखण्डेऽपि स्थितम् ॥ श्रीकृष्णएवच गोवत्सादिरूपोऽभूदिति मानुषादिष्वित्यादिपदं संगतम् ॥ एवञ्च त्वदभिमतातिरिक्तायास्तल्ली-

लायास्त्वयाऽऽसुरमोहफलकत्वस्य वक्ष्यमाणत्वेनोद्धवसंवादगतश्लो-
कादिषु भागवतस्थेषु त्वया मोहार्थतायाउक्तत्वेन श्लोकस्यानाग-
मत्वे मानाभावेनच श्रीकृष्णपरमेवेदं वाक्यं स्यादिति सुव्याख्याता-
हरिभक्तिः ॥ततोन्धंतमश्च तवैवेत्युक्तम्॥इति पञ्चमखण्डखण्डनम्॥
॥ ५ ॥ ॥ अपरंच लोकेहि द्रष्टुरेव दर्पणादिदोषसम्बधात्प्रति-
बिम्बदर्शनं दृश्यते॥तथाच परमात्मन्यविद्यासम्बधाऽनङ्गीकाराज्जी
ववद्द्रष्टृत्वं तस्य न स्यात्॥तथासति श्रुतिर्द्रष्टृत्वनियामकत्वबोधिका
बाधितविषया स्यात्॥एतदनुरोधेन द्रष्टृत्वाऽङ्गीकारे पूर्वोक्तन्यायेना
ऽविद्यासम्बधित्वे जीवतुल्यताऽऽपत्तिरिति महद्व्याख्यानकौशलं प्र-
च्छन्ननास्तिकस्य ॥ किञ्चैवं गुहांप्रविष्टाविंतिश्रुत्यर्थबाधः ॥ जी-
वाऽज्ञानकल्पितत्वाद्गुहायाः परमात्मनस्तददर्शित्वेन सहप्रवेशाऽनु-
पपत्तेः ॥ जीवन्मुक्त्यनुपपत्तिश्च ॥ तथाहि ॥ अन्तःकरणे अवि-
द्यायां वा त्वया प्रतिबिम्बोवाच्यः ॥ अन्तःकरणपक्षे जीवन्मुक्त-
स्य तत्सत्वे संसारित्वमेवस्यात् ॥ तदसत्त्वे परममुक्तिरेवेति क्वजी-
वन्मुक्तिः ॥ अविद्यापक्षस्तु सुतरामसंगतः ॥ तस्याऽपरोक्षब्रह्मज्ञा-
नवत्त्वेनाऽज्ञानस्य निवृत्त्या तत्प्रतिबिम्बरूपजीवस्वरूपस्याऽपि
निवृत्तत्वाज्जीवन्मुक्तस्य देहः स्पंदितुमप्यसमर्थः स्यात् ॥ नच प्रा-
रब्धमात्रशेषा सा तदाऽस्तीति सर्वमुपपद्यतइति वाच्यम्॥ब्रह्मसा-
क्षात्कारैकनाश्यायास्तस्यास्तस्मिन् सति वक्तुमशक्यत्वात्॥प्रतिब-
न्धकाभावात् ॥ तेनाऽनिवृत्तौ कदाऽप्यनिवृत्तिप्रसंगश्च॥भोगैकना-
श्यंतदितिचेत् तर्ह्यविद्यातत्कार्यातिरिक्तं तदिति किं वक्तुमुद्यतो-
ऽसि॥नहि रज्जुज्ञानानंतरं केनाप्यंशेन तस्मिन् सर्पज्ञानं तत्कृतभ-

यादिकं वा ऽनुवर्तते॥अनुवर्त्तते कंपादिरितिचेत्॥अनुवर्त्ततां नाम पूर्वकारणरज्जुस्वरूपसत्कंपोनतु तेनाऽन्यत्किंचित्कर्त्तुं शक्यं॥ एवं प्रारब्धेनाऽपि देहविद्यमानतैव संपादयितुं शक्या नतु भोगादिरपि॥ अध्यासाभावात्॥ सुषुप्तौ तथोपलम्भात्॥ अपरंच सर्पज्ञानजनितकम्पोवेगाख्यसंस्कारवशादनुवर्त्तते प्रकृतेचाऽज्ञानकार्यप्रारब्धे संस्काराऽभावात् ज्ञाननाश्यत्वाऽवश्यंभावाच्च॥ ज्ञानेसति कथं तदनुवृत्तिर्भवेत्॥ प्रवचनानुपपत्तिश्च॥ जीवन्मुक्तिनिरूपकश्रुतिस्मृतिपुराणविरोधात्सा नाऽस्तीति न वक्तुं शक्यं॥ तस्मात्प्रतिबिम्बोजीवइतिपक्षोऽसंगतः॥ ६॥ ॥ अथापरश्चलोकेहीत्यारभ्येतिपक्षोऽसङ्गतइत्यन्तः षष्ठः खण्डः खण्ड्यते॥ ॥ तत्र द्रष्टृत्वनियामकत्वे न शुद्धस्य किन्तु शबलस्येति कर्तृत्ववत्तदुपपत्तिर्मायासम्बन्धस्याऽवच्छेदरीत्या प्रतिबिम्बरीत्या वा सत्त्वात्॥ अतएव मायायां प्रतिबिम्बते इत्येतद्व्याख्यानाऽवसरे निर्णीतार्था जीवेशावाभासेनकरोतिमायाचाविद्याचस्वयमेवभवतीति श्रुतिः कार्योपाधिरयंजीवःकारणोपाधिरीश्वरइतिस्मृतिश्च संगता॥आवरणस्य तत्राऽभावादीश्वरस्य नाऽज्ञत्वम्॥ एतावन्तमेव मायाविद्ययोर्भेदं वदन्ति यन्मायायानाऽऽवरकत्वादि अविद्यायास्तु तदपीतीश्वरे जीवाद्वैलक्षण्यस्योपपत्तिः॥प्रकारान्तरं तूक्तं प्राक् एवञ्च गुहाद्रष्टृत्वेन तत्प्रवेशोव्याख्यातः॥ जीवकल्पितद्रष्टृत्वादेः प्रवेशस्य च स्वमस्येव श्रुतावनुवादे दोषाभावाच्च॥ यत्तु टीकाकृता चितोरूपाऽभावेन प्रतिबिम्बाऽसम्भवान्न मायायां प्रतिबिम्बईश्वरइत्युक्तं॥ तन्न॥ अरूपवस्तुप्रतिबिम्बस्योक्तत्वादुक्तश्रुतिविरोधाच्च॥ विभुत्वादितु जीववत्पराभेदेन बोध्यम्॥ ईशशरीरादिकं तु पर-

कल्पितं स्वोपाधिविक्षेपशक्तिकल्पितं वेति न काऽपि हानिः॥ जीवन्मुक्तेर्व्यवस्था तु तृतीयश्लोकव्याख्यायामुक्ता ॥ ननु ते-नाऽन्यत्किञ्चिदितितु नयुक्तम् ॥ भयाज्वरादेर्दर्शनात् ॥ भोगार्थं शरीरसम्पादनाय स्वीकृतप्रारब्धस्य भोगाऽदातृता तु वक्तुमेव न युज्यते ॥ अज्ञानकार्यस्य देहस्य स्वीकारे तादृशस्य भोगस्याङ्गी-कारे कः प्रतिबन्धकः ॥ सुषुप्तौ भोगाऽभावस्तु देहाद्यभावात् ॥ तात्कालिकभोगार्हकर्माभावाच्च ॥ सुषुप्तिकालेसकलेविलीनइ-तिश्रुतेः ॥ पुनश्चजन्मान्तरकर्मयोगात्सएवजीवःस्वपितिप्रबुद्धइति तच्छ्रुतिशेषेण स्वापादावेव कर्मजन्यताया बोधनाच्च ॥ प्रकारा-न्तरं तूक्तम्प्रागित्युपरम्यते ॥ एवञ्च प्रवचनमपि संगतम् ॥ इति ष-ष्ठखण्डखण्डनम् ॥ ६ ॥ ॥ स्यादेतत् ॥ नवयं प्रतिबिम्बं जीवं ब्रूमः किन्त्वंङ्गुल्यादिसंपर्काच्चंद्रादिद्वैताभासवदविद्यातोब्रह्माऽप्यने-कवदाभासमानद्वित्वादिसंख्यायोगि जीवपदवाच्यमिति ॥ नैत-द्विद्वदादरणीयं ॥ तथाहि ॥अविद्यासम्बन्धाद्ब्रह्मणोऽनेकवदवभा-सः कस्येति विचारणीयं ॥ नतावद्ब्रह्मणः॥तत्र भ्रमायोगात्॥नाऽपि जीवस्य ॥ तादृशाऽवभासविषयत्वात् ॥ नहि दोषवशाद्गृहीतचं-द्राणामेव स्वाऽनेकत्वाऽवभासः सम्भवति ॥ तेषामलीकत्वात् ॥ द्रष्टरि सत्येव तेषांभानाच्च ॥ दोषाऽसम्बन्धादेव न तस्य ॥ किञ्चै-वं जीवात्मनियामकत्वस्य परमात्मन्यसम्भवः॥ तथाच यआत्मा-नमंतरोयमयतीत्यादिश्रुतिर्बाधितविषया स्यात् ॥ अपरंच अवि-द्याब्रह्मणोः कः सम्बन्धः ॥ न तावत्संयोगः ॥ तयोर्विभुत्वेन तद-नङ्गीकारात् ॥ नाऽप्यध्यासः ॥ तस्याऽप्यभावात् ॥ नाऽपि स्वरू-

१ उभयप्राप्तौकर्मणीति नियमात्षष्ठ्यनुपपत्तिः

पलक्षणः ॥ मुक्ताऽऽत्मन्यपि तत्संभवेन संसारित्वाऽऽपादकत्वप्रस-ङ्गात् ॥ आस्तां वा यः कश्चित्सम्बन्धः सोऽप्यनादिर्वाच्यः ॥ तथा-च ब्रह्माऽविद्यातत्संबन्धानामनादित्वेन जीवविभागस्याऽप्यनादि-त्वादविद्यासंबन्धजीवविभागयोः कार्यकारणभावाऽसंगतिः ॥ ए-ककालीनत्वात् ॥ ७ ॥ ॥ अथ स्यादेतन्नवयमित्यादि एकका-लीनत्वादित्यन्तः सप्तमः खण्डः खण्ड्यते ॥ ॥ यद्यपि प्रतिबि-म्बवादेनोपपत्तौ द्विचन्द्रदृष्टान्तेन जीवे भेदादिसाधनाय प्रका-रान्तरं नापेक्षितं तथापि जीवस्य प्रतिबिम्बत्वावच्छिन्नत्वे अन-ङ्गीकुर्वद्भिरस्मदीयैस्तत्पक्षस्य लिखितत्वात्तद्दूषणोद्धारः क्रियते ॥ तत्र तावदनेन दृष्टान्तेनैकस्मिन्भेदप्रतीत्यसम्भवोनास्तीत्येवोपपा-द्यते नतु तादृशत्वमेवेशजीवयोः ॥ एवञ्च नियामकत्वद्रष्टृत्वादि स्वाप्नदृष्टान्तेनोपपाद्यते ॥ स्वप्ने देवदत्तस्यैकस्यैव नियन्तृत्वद्रष्टृत्वा-देर्दर्शनात् ॥ सार्वज्ञ्यादितु शवलस्य नतु शुद्धस्य ॥ ब्रह्मणि मा-याकृतस्याऽऽवरणस्याऽभावेऽपि तत्कृतस्य विक्षेपस्योपपादितत्वा-दनेकाऽवभासोपपत्तिः ॥ तादृशाऽवभासविषयस्याऽपि जीवस्य तादृशाऽवभासे किम्प्रतिबन्धकम् ॥ किमध्यासात्प्रागसत्वम् उत जडत्वम् विषयाविषयिभावविरोधोवा ॥ नाद्यः ॥ अनादित्वाज्जी-वभ्रमस्य ॥ न द्वितीयोऽनङ्गीकारात् ॥ न तृतीयः ॥ मानाभावा-दहमस्मीतिप्रतीतिविरोधाच्च ॥ उदाहरणेन तत्साधनन्तु उक्तबहु-विधश्रुतिबाधितम् ॥ उपाधिमच्च ॥ तथाहि ॥ जीवोन जीवाऽव-भासवान् तदवभासविषयत्वात् ॥ योयदवभासविषयः सन तदव-भासवान् ॥ यथा द्वितीयश्चन्द्रइत्यत्र जडत्वमुपाधिश्चन्द्रादौ तत्स-त्त्वाज्जीवे तदसत्त्वाच्च ॥ जीवेतरईशेऽपि तदसत्त्वेन न पक्षेतरत्व-

समत्वम् ॥ दृष्टान्ते द्वित्वेन दर्शनं तु न चन्द्रात्मनः किन्तु तन्मण्ड-
लस्येति तत्राऽस्ति जडत्वम् ॥ इदञ्चेशजीवयोर्द्वित्ववच्चन्द्रादेरिव
पदार्थान्तरत्वमाश्रित्योक्तम्॥एकस्मिन्भेदप्रतीतिमात्रे सदृष्टान्तइत्यु-
क्तं ॥ तत्रतु तथाहीत्यादिविकल्पपूर्वकदोषाऽनवसरएव जीवस्य
तदवभासे सर्वोपपत्तेः ॥ विभुद्वयस्य संयोगोनास्तीतिनिर्मूलम् ॥
एकदेशावच्छेदेन विद्यमानयोः कालाकाशयोरसम्बन्धे माना-
भावात्सम्बन्धान्तरस्याऽसम्भवाच्च ॥ कर्मजत्वनियमस्तु जन्यसं-
योगविषयकस्तत्रैवसम्भवात् ॥ विभागोऽपि नित्यस्तयोः स्यादि-
तितु न शङ्क्यम् ॥ तस्य संयोगनाशकैकस्वरूपत्वेन विरोधेन सं-
योगवत्यङ्गीकर्त्तुमशक्यत्वात् ॥ अध्यासोऽपि जीवस्याऽनादिर्भव-
त्येव सएवेशाविद्ययोः संबन्धः सएवच बन्धोऽस्येत्यनेनोच्यते ॥
स्वरूपंत्वविद्यायाएव ब्रह्मण्यविद्यासम्बन्धइत्यविद्यानाशे मुक्ता-
त्मनोन संसारिता ॥ तन्नाशेऽपि नाऽन्येषां मुक्तिर्मायायाबहुत्वा-
त् ॥ पराऽस्यशक्तिर्विविधैवश्रूयते इन्द्रोमायाभिरित्यादिश्रुतेः॥मा-
यायाएकत्वपक्षे मुक्तात्मनस्तद्विनाशेऽपीतरेषां दृष्ट्या विद्यमान-
त्वाच्च ॥ यथाहि शुक्तौ रजतं पश्यतां दशानां पुरुषाणां मध्ये ए-
कस्य शुक्तिसाक्षात्कारेण तद्रजतनाशेऽपि इतरेषां दृष्ट्या तद-
स्त्येव एवं ज्ञानीतरदृष्ट्या मायासत्त्वे न बाधकम् ॥ वस्तुतोनाशेऽ-
पि कल्पितसत्त्वस्यानपायात् ॥ एतेन मायानाशे सर्वमुक्तिस्स्या-
दिति तट्टीकाकारोक्तिः प्रत्युक्ता ॥ एवञ्च पराऽस्यशक्तिरितिश्रुत्यु-
क्तस्येश्वरशक्तित्वस्याऽपि मायायां न विरोधएकमुक्त्या ज्ञानेन
विनाशेऽपि स्थायित्वात् ॥ ईशशक्तेरनाशे मानाभावाच्च ॥ इति-
सप्तमखण्डखण्डनम् ॥ ७ ॥ ॥ ननु श्रुतिबोधितः कार्यकाकार-

णभावः तर्हि तन्निर्वाहाय जीवविभागस्याऽर्वाचीनतामुरीकुरु ॥ बंधोऽस्याऽविद्ययानाऽदिरिति वाक्यात्सोप्यनादिरेव मंतव्यइतिचेत् ॥ मैवं ॥ नहि सर्वात्मना तत्र सादित्वनिषेधः किंतु घटपटादिसाधारणतन्निषेधः ॥ यथा देवेषु मरणनिषेधोऽमरनाम्ना ॥ अन्यथाऽविद्ययेति करणत्वबोधकतृतीयांतंनवदेत् ॥ तच्च बंधलक्षणकार्यात्पूर्वकालीनत्वं विना ऽस्यान निर्वहति ॥ ननु बन्धनैकस्वभावायास्तस्याजीवस्य चाऽनादित्वे कंचित्कालं न बंधइत्यत्र कोहेतुः ॥ तदा जीवस्वरूपं कीदृशमित्यपि विचारणीयं ॥ मुक्तमिति तु न वक्तुं शक्यं ॥ साधनाभावात् ॥ अग्रेबंधाच्च ॥ नवा बद्धं ॥ तस्य भावित्वात् ॥ एतदुभयाऽतिरिक्तावस्था चाऽप्रसिद्धेति नैवं युक्तमितिचेत् ॥ नैतत्साधु ॥ श्रियापुष्ट्येतिवाक्ये मुख्यासु द्वादशशक्तिषु गणनादविद्यायाभगवच्छक्तित्वेन तदिच्छाधीनत्वात् ॥ तथाच यद्बंधे तदिच्छा तमेव सा बध्नाति नान्यं ॥ अतएव शुकसनकादीनां सर्वदा मुक्तैव ॥ तेषु तथेच्छाऽभावात् ॥ अतएव श्रुतिरपि एषह्येवसाधुकर्मकारयतितंयमेभ्योलोकेभ्यउन्निनीषति एषएवाऽसाधुकर्मकारयतितंयमधोनिनीषतीति तदिच्छाधीनत्वमेवाह॥जीवस्वरूपं चाऽग्रे वक्ष्यामः॥८॥ ॥ अथ ननुश्रुतिबोधितइत्यारभ्याऽग्रेवक्ष्यामइत्यन्तोऽष्टमः खण्डः खण्ड्यते॥तत्र बन्धोऽस्याविद्ययेतिवाक्यस्य तृतीयश्लोकव्याख्यायामर्थउक्तः ॥ श्रियापुष्ट्येत्यादिश्लोके पाठमात्रेण नाऽविद्यायाजीवशक्तित्वमपलपितुं युक्तं ॥ जीवेशावाभासेनकरोतिमायाचाविद्याचस्वयमेवभवतीति श्रुतिविरोधात् ॥ भगवदाराधकत्वेऽप्यविद्यायान जीवशक्तित्वविरोधः ॥ एवमीश्वराधीनप्रवृत्तिनिवृत्तिकत्वेऽपि तदज-

न्यत्वान्नानादित्वविरोधो भृत्यस्य राजाधीनप्रवृत्त्यादिमत्वेऽपि राजाऽजन्यत्वस्य दृष्टत्वात् ॥ तच्छक्तित्वेऽपि तदधीनोत्पत्तिकत्वं मायाया न युज्यते वक्तुं ॥ मानाभावात् ॥ ग्राहकतर्काभावाद्वन्हिशक्तेस्तदधीनोत्पत्तिकत्वाभावाच्चव्याप्तिग्रहाऽभावेऽनुमानाप्रवृत्तेः ॥ तृतीयश्लोकोक्तमनादित्वमपि स्मरणीयम् ॥ पूर्वमबद्धस्य भगवदिच्छया बन्धोक्तावपि तत्रत्यमेव स्मरणीयम् ॥ किञ्च शुकादीनां नित्यमुक्तत्वे न मानम् ॥ किञ्चैवं मुक्तिज्ञानयोः कार्यकारणभावोजन्यमुक्तिविषयकत्वेन संकोच्यइति गौरवम् ॥ किञ्च संसारस्य सादित्वे तुरुष्कादिवत्त्वयाऽपि वचनं किञ्चिन्मानं वाच्यं तच्च न वेदादिस्थं ॥ तत्रानुपलम्भात् ॥ तुरुष्कग्रन्थस्थं तु तवैव श्रद्धाविषयतार्हम् ॥ विप्रशापजन्यस्य चेतसि तमःप्रवेशस्य दुरुच्छेदत्वात्॥प्रकृतियान्तिभूतानिनिग्रहःकिंकरिष्यतीतिवचनात्॥ एषह्येवसाध्वितिश्रुतेर्बन्धस्येश्वरेच्छाधीनतायां प्रमाणतयोपन्यासस्तु कौशलं ते ख्यापयति॥श्रुत्यर्थस्तूक्तोजीवस्वरूपं त्वदभिमतमग्ये खण्डयिष्यामइत्यलम् ॥ इत्यष्टमखण्डखण्डनम् ॥ ८ ॥ ॥ अन्यच्च ॥

अविद्यासंबन्धमात्रेण जीवभावं वदतः शुद्धब्रह्मण्येवच तत्सम्बन्धं वदतस्तव मते जीवभावानापत्तौ हेत्वभावान्निरवयवत्वाच्चांशभेदेन तथात्वस्य वक्तुमशक्यत्वाच्च ॥ सर्वज्ञत्वादिविशिष्टपरमात्माऽसिध्या सर्वश्रुत्युपप्लवः॥किञ्च जीवपरमात्मनोरनादिसिद्धं भेदं वदन् पारमार्थिकं कुतोन ब्रूषे यतः श्रुतिरनयोरभेदं बोधयति ॥ सच परमार्थतोभिन्नयोर्न संभवतीत्यवास्तवोभेदोऽत्र वाच्यः ॥ तादृशश्च भेदोबिम्बप्रतिबिम्बयोराभासतदाश्रययोश्च दृष्टचरोलोकइति तथाऽत्रापि ब्रवीमि ॥ अतएव महावाक्ये भागत्यागलक्षणा-

ऽपि ॥ बाढं ब्रवीषि परं पूर्वापरालोचनरहितः ॥ तथाहि स्यादेत-
देवं यदि तत्त्वमसीत्येतन्मात्रं महावाक्यं स्यात् ॥ नत्वेवं किंतु सं-
पूर्णः प्रपाठकः ॥ तत्रोपक्रमे ॥ अपिवा तमादेशमप्राक्ष्योयेनाऽश्रुतं
श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमित्येकज्ञानेन सर्वविज्ञानं
प्रतिज्ञातं ॥ तदेकमेवचेत्सर्वं भवेत्तदोपपद्यते ॥ यथा सुवर्णखण्डाः
सुवर्णकार्यं च सर्वं सुवर्णमिति सुवर्णज्ञाने तज्ज्ञानं भवति अतो-
ब्रह्मविज्ञानेन सर्वविज्ञानं वक्तुं सर्वस्य ब्रह्मरूपत्वं सदेवसौम्येत्या-
रभ्य निरूपितं ॥ तत्रैतदात्म्यमिदं सर्वमिति जडस्य सर्वस्याऽपि
तदात्मकत्वमुक्तं ॥ ततोजडस्य नाशित्वदर्शनेनाऽब्रह्मत्वशंकानि-
रासायाह ॥ तत्सत्यमिति ॥ तेनाऽऽविर्भावतिरोभावावेव श्रुत्यभि-
मतौ॥नाशोत्पत्तिप्रतीतिर्भ्रांतिः ॥ ९ ॥ ॥ अथाऽन्यच्चाऽविद्येत्या-
दिर्नाशोत्पत्तिप्रतीतिर्भ्रान्तेरित्यन्तोनवमः खण्डःखण्ड्यते॥ ॥तत्र
मायायाम्प्रतिबिम्बतइत्यत्र मायायाः परिच्छिन्नत्वादि तत्र ब्रह्म-
प्रतिबिम्बश्च प्रत्यपादि ॥ तथाच कथं सर्वस्य ब्रह्मणोजीवभावउ-
पाध्यतिरिक्तस्य तत्सम्बन्धाभावेन जीवभावे प्रयोजकाभावात् ॥
ततः सुस्थितं सार्वज्ञ्यमित्युक्तम्प्राक्॥पादोऽस्यविश्वेत्याद्याः श्रुतयः
स्मृतिसूत्रे चोक्ते॥तदेकमेवचेदित्यादितु निरनुयोज्यानुयोगः॥सर्व-
स्यैकतायाअस्माभिः स्वीकृतत्वात्॥छान्दोग्यस्थं प्राथमिकं मृद्दृष्टा-
न्तम्परित्यज्य द्वितीयं सुवर्णदृष्टान्तं वदतस्तव याऽऽशा सुवर्णाविका-
रित्वविषया सातु तत्रत्यविकारशब्देन निरस्तेति चतुर्थश्लोकव्या-
ख्यायामुक्तमस्माभिः ऐतदात्म्यमित्यत्रैतदात्मा यस्य सर्वस्य सएत-
दात्मेति बहुव्रीहिः ॥ यथा पीतमम्बरं यस्य विष्णोःसपीताम्बरो-
विष्णुरित्यत्र समभिव्याहृतविष्णुपदार्थस्यान्यपदार्थत्वबोधनाय

विग्रहे विष्णुपदं यस्येतिषष्ठ्यन्तसमानविभक्तिकं केचित् प्रयुञ्जते नतु विष्णुपदार्थत्वेन तदन्तर्भावेण समासः॥ एवमत्रापि समभिव्याहृतसर्वपदार्थस्यान्यपदार्थत्वबोधनायैव यस्येति षष्ठ्यन्तसमान विभक्तिकं सर्वस्येति पदं विग्रहे बोध्यम्॥तेन न सर्वमित्यस्य वैयर्थ्यम्॥सर्वनाम्नोविशिष्य बोधकतायाः सन्निकृष्टपदेन पर्यवसानात्॥यथा वैश्वदेव्यामिक्षेत्यत्र साऽस्यदेवतेति सर्वनामार्थे विहितस्य तद्धितस्याऽऽमिक्षापदेन विषयविशेषोबोध्यते ॥ तदाहुर्भाट्टाः ॥ आमिक्षांदेवतायुक्तांवदत्येषहितद्धितः आमिक्षापदसान्निध्यात्तस्यैवविषयार्पणम् ॥ एतदात्मशब्दाद्भावे ष्यञ् ॥ तेन एषआत्मा इदंसर्वमित्यर्थोयुक्तः नतु मयूरव्यंसकादित्वात्समासे भावे ष्यञि एषआत्मा तन्मयमित्यर्थउचितः॥आत्मशब्दस्य मयडर्थकत्वे एतदात्मशब्दस्य मयूरव्यंसकादिषुपाठे च मानाभावात् ॥ भावार्थकष्यञर्थस्याऽन्वयाऽनुपपत्तेश्च ॥ एतेन तट्टीकाकारस्य बहुव्रीहौ सर्वशब्दवैयर्थ्यभ्रमः मयूरव्यंसकादिसमासादिभ्रमश्च प्रत्युक्तः॥ अत्रच सर्वशब्देन जडस्यैव ग्रहणमित्यत्र न मानं तेन सर्वशब्देन चिदचिच्च गृह्यते ॥ तत्सत्यमित्यत्र तत्त्वमसीत्यत्रेव तच्छब्देन कारणं गृह्यते प्रकरणात् नतु कार्यम् मानाभावात् ॥ अन्यथा सआत्मेत्यत्रापि कार्यस्यैव तच्छब्देन ग्रहणे तत्त्वमसीत्यत्रापि तस्यैवग्रहणं स्यात्कारणप्रकरणस्य विच्छेदात्॥एवंच तन्निष्ठस्य मोक्षोपदेशात् हेयत्वावचनाच्चेति सूत्रविरोधः ॥ ब्रह्मणः सर्वकार्यात्मकत्वेन तद्वदसत्त्वशङ्काप्रसक्ता सा तत् सत्यमित्यनेन निवारिता ॥ सर्पादिनानाभावभानेन तत्तदात्मिकाया रज्ज्वायथा न स्वीयरज्जु-

रूपपरित्यागएवं तत्तदात्मकत्वेऽपि सतोन सद्रूपपरित्यागइतिभा-
वः ॥ एवंच जगतोमिथ्यात्वं सूपपन्नम् ॥ सर्वपदार्थस्य सत्त्यतायां
तात्पर्ये तु तस्य सन्निकृष्टतया सन्निकृष्टपरामर्शकमिदंपदं प्रयु-
ञ्जीत नतु तत्पदम् ॥ सआत्मेति वाक्यन्तु तत्त्वमसीत्यत्रासम्भाव-
नानिवृत्त्यै ॥ यतः सआत्माऽतस्तत्त्वमसीति फलितार्थः ॥ आत्म-
शब्दश्च निरुपपदः प्रत्यगात्मनि रूढः ॥ तस्मादेतद्वचनविश्वासेन
जगतोनित्यतयाऽऽविर्भावतिरोभावावेवेति कल्पना भ्रान्तिरेव ॥
तस्यभावस्तत्त्वमिति व्याचक्षाणस्तट्टीकाकारोऽतिभ्रान्तोभावप्रत्य-
यार्थानन्वयात् ॥ मध्यमपुरुषार्थान्वयार्थं त्वंपदाध्याहारे गौरवाच्च
इतिनवमखण्डखण्डनम् ॥ ९ ॥ ॥ नन्वाविर्भावतिरोभावौ नित्या-
वनित्यौ वा ॥ नाद्यः ॥ सततं घटोपलंभाऽनुपलंभप्रसंगाभ्यामनि-
र्वाच्यतापत्तेः ॥ तयोर्धमत्वेन विरोधात्तादृग्धर्मासिद्धौ तयोरपि
वक्तुमशक्यत्वेन शून्यवादश्चापद्येत ॥ साधने प्रवृत्तिश्चाऽनुपप-
न्ना स्यात् ॥ किंच वर्त्तमानस्य वस्तुनोदर्शनयोग्यतातदयोग्य-
तात्मकौ हि तौ तथासति क्व भगवच्छक्तित्वं ॥ एवंसति घटोपलं-
भानुपलंभयोः कादाचित्कत्वे हेतावुच्यमानेतत्कारणस्तोमपरंपर-
योस्तथात्वं तथेति वाच्यं ॥ एवमीश्वरेच्छापर्यंतं धावने तस्याअ-
पि अनित्यत्वे न पूर्वोक्तदूषणोद्धारोऽपसिद्धांतश्च ॥ नचेतरसह-
कार्यभावान्नोक्तदूषणमिति वाच्यं ॥ उक्तरीत्या तस्यैव निरूप-
यितुमशक्यत्वात् ॥ नाप्युक्तयोग्यतात्मकं तत्त्वमिति वक्तुं शक्यं ॥
वाय्वाद्यव्यापकत्वात् ॥ नच दर्शनपदमनुभवपरमिति वाच्यं ॥ अ-
तीताऽनागतयोरपि चाक्षुषत्वप्रसंगात् ॥ एवंसति तिरोभावोच्छे-
दश्च ॥ किञ्च तौ प्रतिव्यक्ति भिन्नावभिन्नौ वा ॥ नांत्यः ॥ यु-

गपत्सकलोपलंभप्रसंगात् ॥ नचाऽवच्छेदभेदान्न तत्प्रसंगइति वाच्यं ॥ विचाराऽक्षमत्वात् ॥ तथाहि ॥ अवच्छेदकोहि घटादिस्तथाच तत्तदवच्छिन्नआविर्भावइत्यागतं तथाचाऽवच्छेदकस्य नित्यत्वात्सदोपलंभः स्यादनुपलंभोवा ॥ नच तत्तत्कालोपाध्यवच्छेदभेदान्न तत्प्रसंगइति वाच्यं ॥ तस्याऽपि त्वन्मते घटतुल्यत्वात्॥नह्येकदोपलभ्यमानानां तथात्वमुपपन्नं आविर्भावस्तत्तदवच्छेदेनेति वक्तुं शक्यं ॥ तत्राऽप्युक्तविकल्पैरनवस्थाऽऽपातात् ॥ तिरोभावोऽप्येतेन व्याख्यातः ॥ नाद्यः ॥ आविर्भावतिरोभावौ शक्ती वै मुरवैरिणइति वाक्यविरोधात् ॥ नचाऽनंतशक्तिमत्त्वेन तदुपपत्तिरेकजातीयकार्यकरणस्यैकयैव संभवति सत्यनेकतत्कल्पने मानाभावाद्गौरवाच्च ॥ उक्तरीत्या कादाचित्कत्त्वहेतुरपि न निरूपयितुं शक्यः ॥ नद्वितीयः ॥ उक्तविरोधात् ॥ भगवद्धर्माणां नित्यत्वात्॥तथासत्युत्पत्तिस्तयोर्वाच्या॥तर्हिघटादीनामेव तामङ्गीकुरु किमंतर्गडुभ्यामेताभ्यामपसिद्धांतश्च॥तदुत्पादकं दंडमुद्गरादिकमेव त्वयावाच्यं तच्च घटतत्ध्वंसोत्पादकमेव ॥ तिरोभावश्च घटादेर्न वक्तुं शक्यः ॥ तथासति वस्तुसत्तया लौकिकप्रत्यक्षाऽविषयत्वेऽपि ध्वस्तोघटोयोगिनोपलभ्येत ॥ रूपवतः सतोयोगिप्रत्यक्षविविषयत्वनियमात् ॥ नचैवं प्रमाणाभावात् ॥ प्रजाश्चतुल्यकालीनानाऽधुनासंतिकालिताइति श्रीभागवतवाक्याच्चेति प्राप्ते॥अत्रोच्यते तत्स्वरूपं तच्छ्रुत्वाऽपास्य संशयान्॥ब्रह्मवादे कृतात्मानःप्राप्नुवंतु हरिं बुधाः ॥ १॥ अनुभवविषयत्वयोग्यताऽऽविर्भावस्तदविषयत्वयोग्यता तु तिरोभावः ॥ ते च वस्तुसत्त्वेनैवाऽवच्छिद्येते॥नह्यलीके ते संभवतः॥तयोर्धर्मत्वेन निराश्रयत्वाऽसंभवात्॥किञ्च भा-

वित्वेन भूतत्वेन च व्यवह्रियमाणयोर्वस्तुनोः सत्ता त्वयाऽप्युररीकार्या॥तयोर्घटादिधर्मत्वेन तदभावे निराश्रयत्वप्रसंगात्॥एतेनवर्तमानप्रागभावप्रतियोगित्वं भावित्वं वर्त्तमानध्वंसप्रतियोगित्वं ध्वस्तत्वमितिनिरस्तं॥नच कालोपाधिरेव तदाश्रयइति वाच्यं॥तत्र तद्वैशिष्ट्यप्रतीतिप्रसंगस्य दुर्निवारत्वात् ॥ ननु यथा तन्त्वधिकरणकपटनिरूपितसमवायस्य काले सत्त्वेऽपि तत्समवेतत्वेन नपटे प्रतीतिस्तेन सम्बन्धेन तत्राऽसत्त्वात्तथाऽत्र तत्प्रतियोगित्वाभावान्न तथा प्रतीतिरिति चेत् ॥ न ॥ प्रतियोगित्वस्य स्वरूपसम्बन्धविशेषत्वेनांऽगीकारात्तस्य च स्वरूपद्वयात्मकत्वात्तस्य चाऽत्राऽपि सत्त्वात् ॥ ननु तत्सत्वेऽपि सविशेषोनात्रेति चेत् हंत सकोवा यत्रेदृशीं तव श्रद्धा ॥ नदृष्टः प्रमाणाभावात्॥ननु तद्द्वयसत्त्वेऽपि वैशिष्ट्याऽप्रतीत्यन्यथानुपपत्त्या सम्बन्धान्तरमन्तरेण विशिष्टप्रत्ययजननयोग्यत्वलक्षणः सकल्प्यतइतिचेत् ॥ मैवं ॥ उक्तरूपस्याऽपि कालएव सत्वं त्वया वाच्यं ॥ तथाचोक्तदूषणभिया तत्समवायस्य प्रयोजकत्वं वाच्यं ॥ तथाच तदा समवाय्यभावेनोक्तयोग्यत्वसमवायस्य कुत्राऽपि वक्तुमशक्यत्वात्कालाश्रयत्वस्याऽप्यसिद्धेः ॥ जन्यभावस्याऽन्यत्र समवेतस्यैव कालाधारत्वनियमात्॥ अन्यथाऽसतोप्याश्रयः कालइत्यंगीकारआपद्येत ॥ नह्यन्यधर्मस्य कालाश्रितत्वेनैव सिद्धिः क्वचिद्दृष्टचरा ॥ तथासत्यन्यधर्मत्वव्याहतेः॥ अतोभावित्वभूतत्वव्यवहारकालेऽपि घटादिसत्तोरीकार्या॥ किञ्च त्वदुक्तयोग्यता केनाऽवच्छिद्यतइति पृच्छामः ॥ तत्रचेद्यदाकदाचिद्वस्तुसत्तयैवाऽवच्छिद्यतइति ब्रवीषि तदा यदाकदाचिदिति त्यज ॥ अप्रयोजकत्वाद्गौरवाच्च ॥ तथा सम्बन्धान्तरमन्तरे-

णेतिच ॥ स्वरूपस्य सम्बन्धत्वे सिद्धे सम्बन्धान्तरपदं सार्थकं भवेत् ॥ तथाचाऽऽत्माश्रयः ॥ नच षोढा संनिकर्षाऽभावेऽपि तथात्वं तदर्थइतिवाच्यं ॥ योगजधर्मेऽतिव्याप्तेः ॥ नच लौकिकतज्जननयोग्यत्वं विवक्षितमितिवाच्यं ॥ व्याप्तिवैशिष्ट्यज्ञानजनकसामान्यप्रत्यासत्तावतिव्याप्तेः ॥ नच जन्यलौकिकप्रत्यासत्तिं विनाऽपि तथात्वं तदर्थइति वाच्यं ॥ योगजधर्मेऽतिव्याप्तेः ॥ नच सामान्ययोगजधर्मज्ञानलक्षणषोढाप्रत्यासत्त्यभावेऽपि तथात्वं तदर्थइतिवाच्यम् ॥ अप्रसिद्धेः ॥ नह्युक्ततदभावे तथात्वं क्वचित्सिद्धं ॥ विवादास्पदीभूतभावित्वादेस्तु पूर्वोक्तयुक्त्या निराश्रयत्वप्रसंगस्य दुर्निवारत्वेन तदाऽपि धर्मसिद्धावनुमानादिना तज्ज्ञाने तत्समवेतोक्तप्रतियोगित्वमपि विषयीभवतीति नोक्तप्रत्यासत्त्यभावइति सर्वमनवद्यं ॥ १० ॥ ॥ अथ नन्वाविर्भावतिरोभावावित्यादिः सर्वमनवद्यमित्यन्तोदशमः खण्डः खण्ड्यते ॥ ॥ तत्र तावदनुभवपदं साक्षात्कारमात्रवाचकं ॥ ज्ञानान्तराडुत्तरमनुभवामीत्यनुव्यवसायाऽनुदयात् ॥ योग्यतापदं तु तदुक्तार्थनिष्कर्षार्थमनुवादमात्रं ॥ तथाच साक्षात्कारविषयत्वमाविर्भावस्तदभावस्तिरोभावइति तट्टीकासंक्षेपः ॥ तौचेद्वस्तुसत्त्वावच्छिन्नौ तर्हि कुतोनातीतादेश्चाक्षुषत्वं युगपत्सकलोपलम्भशक्त्यानन्त्ययोरन्यतरच्च ॥ वस्तुनोघटादेः सत्त्वस्य सर्वदाऽङ्गीकारात् कुतोवा शून्यवादाऽनिर्वचनीयतावादौन कुतस्तरां साधने ऽप्रवृत्तिर्नैत्याद्यूह्यम् ॥ योधर्मः सधर्मिस्थइति व्याप्तिस्तु धर्मलक्षणसम्बन्धाश्रयाणामनिरुक्त्या शक्यग्रहा ॥ धर्म्यसिद्धौ धर्मत्वासिद्ध्या हेतोः स्वरूपासिद्धिश्च ॥ धर्मपदार्थस्य वक्तुमशक्यत्वादिति न तद्बलाद्भावित्वाद्याश्रयतयाघ-

टादिनित्यतासिद्धिः॥ यत्तु तट्टीकाकृता कपाले घटस्य भावित्वं नास्ति ॥ अप्रतीतेः ॥ नापि तन्नित्यं ॥ घटाद्यभावप्रसंगेन शून्यवादस्य प्रत्यक्षविरोधस्य चापत्तेः ॥ तस्माद्भावित्वमनित्यं जन्यं च तेन भावित्वं पूर्वकाले न तिष्ठतीत्यर्थात्तदा घटसत्तासिद्धेत्युक्तं ॥ तत्र वाच्यं घटादेरपि भावित्वात्प्राक्सत्त्वे तदाऽपि प्रत्यक्षं स्यादिति ॥ तदसत्त्वे भावित्वस्य चाऽसत्त्वे शून्यवादोऽभ्युपगम्यतां ॥ लाघवात् ॥ श्रुत्यनुसाराद्वाऽनिर्वचनीयवादः ॥ किञ्च भावित्वाऽभावमात्रेण कथं घटादेः सत्त्वं॥ सिकतासु तैलस्य भावित्वाऽभावेऽपि सत्त्वाऽभावात् ॥ किञ्च भावित्वस्य जन्माङ्गीकारेण यदा तज्जन्म तदा घटाऽभावात्कथं सत्त्वमुच्यते ॥ किञ्च सर्वस्य ब्रह्मात्मकत्वेनाऽऽविर्भावादेः सर्वान्तर्गतत्वेन ब्रह्माऽऽत्मकतया नित्यत्वं वदता भावित्वं किं सर्वानन्तर्गतं बुध्यते येनैवं प्रलप्यते॥ एवं भूतत्वेऽपि विचार्यम् ॥ किञ्च भेदभूतत्वभावित्वानामनित्यत्ववादिनस्ते तेषां भूतत्वभावित्वे क्वेति स्वमादिपदार्थभूतत्वादि क्वेतिच वद ॥ तस्मादनिर्वाच्यमेवेदं सर्वं ब्रह्मात्मकं च ॥ यद्भूतंयच्चभव्यमितिश्रुतेः॥ एवं त्वन्मते सर्वस्य ब्रह्मरूपतया ब्रह्मणः सर्वाधारतया सर्वान्तर्गतकालोपाधौ सर्ववैशिष्ट्यधीर्दुर्वारा॥ एवमाकाशादावपि सादुर्वारा ॥ नच कालोपाधिरित्यादितु नैयायिकोवदेन्नानिर्वचनीयतावादीति जितमन्निर्वचनीयतावादिना ॥ नैयायिकं प्रति यत्त्वयोक्तं तन्न दूष्यते ग्रन्थविस्तरभयादित्यलम् ॥ इतिदशमखण्डखण्डनम् ॥ १० ॥ ॥ ननु ममतु यथाकथंचिद्गतिः काचन भविन्नी तवतु नकाऽपि ॥ तथाहि ॥ त्वन्मते घटादेः सदा सत्त्वेन भावित्वं न वक्तुं शक्यं ॥ श्रुतिस्मृतिलौकिकव्यवहा-

रसिद्धत्वेन नेष्टापत्तिः कर्त्तुं शक्या ॥ नच लौकिकप्रत्यक्षविषयत्वगतं भावित्वं घटादावुपचर्यतइति वाच्यं ॥ तस्याऽपि घटसमानयोगक्षेमत्वात् ॥ नहि प्रपञ्चातिरिक्तं तत्॥स्वोक्तदूषणभियाऽपि नैवं वक्तुं शक्यं ॥ तथासति घटस्याऽपराधः कोवेति नविद्मः ॥ तथाच जीर्णपर्णाऽऽकीर्णविविधमतभवनमये पुरे स्वयमपि वसन् दूषणदहनमुद्भावयन्निजभवनदाहं किं नानुसन्धत्सइतिचेत्॥वत्स नवेत्सि किं युक्तिकनकपंकसंघट्टितविविधनिगममहामणिविरचितब्रह्मवादभवनंमम ॥तथाहि॥ सहैतावानास ऐतदात्म्यमिदंसर्वं तत्सत्यं पुरुषएवेदंᳫसर्वंयद्भूतंयच्चभाव्यमित्यादिश्रुतिभ्यः प्रपञ्चस्य ब्रह्मात्मत्वमवगम्यते ॥ अत्र सर्वपदेनाऽसंकुचितवृत्तिना भूतभव्ययोरपि प्राप्तावपि तदुक्तिर्या सा पुरुषस्य नित्यत्वेन तदात्मकस्य वर्त्तमानदशैव सम्भवतीति भावित्वभूतत्वव्यवहारोऽप्रामाणिकइति शङ्कानिरासायेति ज्ञायते ॥ तथाच धर्माणामपि ब्रह्मरूपत्वात् घटादिषु तदात्मकतत्सत्त्वं नविरुद्धं ॥ स्वतःसिद्धप्रामाण्यश्रुतिवाक्यबलात् ॥ नन्वेवं दर्शनसमयेऽपि तद्व्यवहारापत्तिर्वैपरीत्यापत्तिश्च विरोधोच्छेदश्चेतिचेत् ॥ यथा पृथिव्यात्मकएव तस्मिन् गंधात्मकतत्सत्ता नाऽपरस्मिंस्तथा यदा यस्मिन्यथा व्यवहाराभावनियमस्तदा तस्मिन्नेव तथाविधविरोधात्मकतत्सत्त्वमिति तथेति नोक्तदूषणगन्धोऽपीति बुध्यस्व ॥ यत्रोक्तनियमाभावस्तत्र तु न तथा ॥ तथाचोक्तमाश्रमवासिके पर्वणि गांधारीं प्रति बादरायणेन ॥ देवाश्चदानवाश्चैवतथाब्रह्मर्षयोमलाः तएवनिधनंप्राप्ताःकुरुक्षेत्रेरणाजिरइत्युपक्रम्य धृतराष्ट्रादिभीष्मांतानां स्वरूपमुक्त्वा गांधार्यादुःखनिवारणायाह ॥ सर्वेभवन्तोगच्छन्तुनदींभागीरथींप्रति

ततोद्रक्ष्यथसर्वास्तान्येहतास्मिन्रणाजिरेइति॥ ततोधृतराष्ट्रपाण्ड-
वादयः सस्त्रीकास्तत्र गत्वा स्नात्वा निशायां जातायां व्यासस-
मीपं गताः॥ ततोव्यासोमहातेजाःपुण्यंभागीरथीजलं अवगाह्या-
जुहावाथसर्वान्लोकान्महामुनिः पांडवानांचयेयोधाःकौरवा-
णांचसर्वशः राजानश्चमहाभागानानादेशनिवासिनः ततःसुतुमु-
लःशब्दोजलांतर्जनमेजय प्रादुरासीद्यथापूर्वंकुरुपांडवसेनयोः त-
तस्तेपार्थिवाःसर्वेभीष्मद्रोणपुरोगमाः ससैन्याःसलिलात्तस्मात्समु-
त्तस्थुःसहस्रशः इत्यादिना सर्वान्नामपूर्वकं निरूप्याह॥ एकांरा-
त्रिविहृत्यैवतेवीरास्ताश्चयोषितः आमंत्र्यान्योन्यमाश्लिष्यततो-
जग्मुर्यथागतमित्यादि॥ एतच्छ्रुत्वा जनमेजयः पप्रच्छ कथंचत्य-
क्तदेहानांपुनस्तद्रूपदर्शनमिति तदा वैशंपायनआह॥ अविप्र-
णाशःसर्वेषांकर्मणामितिनिश्चयः धर्मजानिशरीराणितथैवाकृत-
योनृप महाभूतानिनित्यानिभूताधिपतिसंश्रयादिति॥ एतदग्रे
अविनाशीतथानित्यःक्षेत्रज्ञइतिनिश्चयः भूतानामात्मभावोयो-
ध्रुवोसौसंप्रजानतामित्याद्यनेकमुक्त्वाह अदर्शनादापतितःपुनश्चा-
दर्शनंगतः नाहंतंवेद्मिनासौमांनचमेऽस्तिविरागतेति॥ नचेदं मा-
यया प्रदर्शितं व्यासेनेति वाच्यं॥ तथावचनाभावात्॥ प्रसादा-
त्तस्यवैमुनेरितिवाक्याच्च॥ पतिव्रतानां तासां स्वस्वभर्त्तृभिः सह
विहारकथनाच्च॥ गंगास्नानादिसाधनोपदेशानुपपत्तेश्च॥ अदर्श-
नादापतितइत्यत्र ल्यब्लोपे पंचमीति॥पुनःशब्दाच्च दर्शनात्पूर्वं व-
स्तुसत्ता प्राप्यते॥ एवंसति यद्यद्देशकालावच्छेदेन यथा प्रती-
तिर्भगवतेच्छाविषयः कृताऽस्ति तत्तद्देशकालावच्छेदेन तथा प्र-
तीतिर्भवतीति सिद्धं॥ इदंच यथा तथा परात्तुतच्छ्रुतेरित्यधिकर-

णेनिरूपयिष्यामः ॥ ११ ॥ ॥ अथ ननुममयथाइत्यादिर्निरू-
पयिष्यामइत्यन्तएकादशः खण्डः खण्ड्यते ॥ ॥ तत्र प्रमाणा-
न्तरबाधेऽपि घटादिषु भूतादिव्यवहारः स्वतःसिद्धप्रामाण्यश्रुतिब-
लाच्चेदङ्गीक्रियते तर्हि युगपद्भूतभाविव्यवहारावापद्येताम्॥ विनि-
गमकान्तराभावात् ॥ भवद्व्यवहारश्च लुप्येत ॥ तादृक्छुत्यभावा-
दीदृक्छुतिविरोधाच्च ॥ किञ्चाऽनया श्रुत्या घाटादौ भूतादितादा-
त्म्यं न विधीयते किन्तु ब्रह्मण्येव ॥ तथाच स्वप्नादिषुभूतत्वादेरु-
भयसिद्धत्वात्तत्तादात्म्यपरेयंश्रुतिरस्तु॥ घटादिषु तदाश्रयत्वकल्प-
नेमानाभावात्॥यदिच भूताद्यभिन्नब्रह्माऽभिन्नतया घटादौ भूता-
दिव्यवहारस्तदभिन्नाभिन्नइतिन्यायात्तर्हि तेनैव न्यायेन तस्मिन्प-
टादिव्यवहारोप्यस्तु॥ पुरुषएवेदंसर्वं सर्वंखल्विदंब्रह्मेत्यादिश्रुतेः प-
टादेर्ब्रह्मण्यभेदबोधिकायाः सत्त्वात् ॥ किञ्च यदा यस्मिन्यथेत्या-
दिपङ्क्तौ सप्तम्यन्तयत्तच्छब्दाभ्यां घटादेर्घटत्वादिना वर्तमानघट-
त्वादिना तत्तद्व्यक्तित्वादिना वा ग्रहे घटादेस्तत्तद्रूपाणां च सर्वेषु
समयेषु सत्त्वाद्व्यवहाराणां च नित्यत्वात्कालिकनियमाभावोक्ति-
रयुक्ता ॥ किञ्च यदा भूतत्वादिविरोधात्मकतत्सत्त्वं नाङ्गीकृतं
तदा स्वप्नादिसत्त्ववद् घटादिसत्त्वंनिर्म्मानम् ॥ पृथिव्यादिषु तु
पृथिवीत्वादिनैव गन्धादि स्वीक्रियते द्रव्यस्याऽऽद्यक्षणे निर्गु-
णत्वे मानाभावात् ॥ किञ्चाऽस्तु पृथिव्यादौमायया जागरे
गन्धः स्वप्ने तथा दृष्टत्वात् ॥ नच मायिके माययाऽस्तुगन्धो-
जागरे तत्त्वाऽभावात्कथं तथा गन्धः स्यादिति वाच्यम् ॥ मायि-
कत्वस्य जागरेऽप्युपपादितत्वात् ॥ तस्माद्यद्भूतंयच्चभव्यमित्यत्र

पुरुषएवेदंसर्वमिति इदंशब्दसमानाधिकरणसर्वशब्दार्थएव यच्छ-ब्दसमानाधिकरणाभ्यां भूतशब्दभव्यशब्दाभ्यां निर्दिश्यते ॥ सर्व-शब्दस्याऽसंकुचितवृत्तिता तत्रैव भवति यत्र समानाधिकरणेदमा-दिशब्दनिर्देश्योयदादिप्रतिपाद्योन भवति ॥ अतएव तवैवेदं सर्वं यन्मम गृहे यच्च मद्भ्रातुर्गृहइत्यादौसंकुचितवृत्तिता ॥ सर्वनाम्नां बुद्धिविषयधर्मोपलक्षितबोधकताया एव सत्वात् ईदृशविषये संकुचितार्थस्यैव बुद्धिविषयत्वाच्च ॥ श्रुतौतु चकारेण भवतोग्रहण मित्यसंकुचितार्थवृत्तितैव सर्वशब्दस्य फलति ॥ यत्तु केचिद्विल-ग्नादशनान्तरेषुसंदृश्यन्तेचूर्णितैरुत्तमाङ्गैरित्यर्जुनज्ञानाऽनुवादात्तस्य ध्वस्तविषयकंज्ञानमिति तट्टीकाकारस्तन्न ॥ चूर्णितशब्दस्य ध्व-स्तार्थकत्वाभावात् ॥ उत्तमाङ्गानां चूर्णितत्वेन ज्ञाने स्वप्नादिष्विव मायया भाविनोऽपि चूर्णितत्वस्य वर्त्तमानतया च ज्ञाने बाध-काभावात् तथोक्तमित्यत्र वचेः किं कर्मेति विचार्यं ॥ देवाश्चेत्या-दिवाक्यानामुपक्रमादिकर्मत्वात् देवाश्चेत्यस्यैव तत्कर्मतया तदे-वोक्तमुपक्रम्येत्युक्तिस्तु न श्लिष्टा उक्तपदवैयर्थ्याऽऽपादिकाच ॥ दुःखवारणायाहेति वाक्ये आहातिरिक्तमसङ्गतम् ॥ उक्तिमात्र-स्यैव तत्त्वेऽपि प्रथमप्रतिज्ञायाएव तत्त्वौचित्यात् ॥ आश्रमवासि-केतिहासाद्युद्धमृतानां तेषां तत्पत्न्यादीनां चाऽवशिष्टकर्मकत्वेन व्यासप्रसादगङ्गास्नानाद्युद्बुद्धैस्तादृशकर्मभिः पूर्वोदाहृतकाशीमृत-सतीपतिन्यायेन मायिकशरीरोत्पत्तिः स्वप्नवत् ॥अतएवाऽविप्रणा-शइतिश्लोकः अदर्शनादापतितइतिच सङ्गतम् ॥ तत्र तेषां सर्व-कर्मनाशोनाऽभूत्किन्तु किञ्चित्कर्मैव नष्टमित्यवशिष्टकर्मजन्यं शरी-रादिकमभूदिति अविप्रणाशइत्यस्य तात्पर्यार्थः ॥ ननु सर्वाणि

कर्माणि नित्यानीति टीकोक्तेऽर्थेतात्पर्यं ॥ प्रमाणाभावात् ॥ सर्वकर्मसत्त्वेऽतिप्रसङ्गाच्च ॥ नित्यानीत्यस्याऽविच्छिन्नप्रवाहकाणीत्यर्थः ॥ नित्यंस्यात्संततेपिच शाश्वतेत्रिष्वितिमेदिनीकोशात् ॥ भूतानां जीवानाम् ॥ भूतंक्ष्मादौपिशाचादौजन्तौक्लीबंत्रिषूचिते इति मेदिनीकोशात् ॥ भूतानां शरीराणामात्मभावआत्मत्वेनज्ञानमसौ ज्ञानिनां ध्रुवः वामदेवस्येव सर्वात्मभावत्वात्सएवाऽर्थादज्ञानिनामध्रुवोऽभिमानरूपत्वादिति तट्टीकोक्तोऽर्थस्तु हेयः ॥ भूतशब्दे आत्मभावशब्देच लक्षणायां गौरवात् ॥ ध्रुवशब्दस्याऽपि कस्मिंश्चिदर्थे ऐच्छिकवृत्तिकल्पनापत्तेश्च ॥ अदर्शनाद् अज्ञानात्॥ दृशेर्ज्ञानसामान्यार्थतायादृष्टत्वात् ॥ अतएवाऽदर्शनंलोपः पश्यार्थैश्चानालोचने इति पाणिनिसूत्रे संगते ॥ एतेन तथा वचनाऽभावान्न माययादर्शनमिति प्रत्युक्तं ॥ मायायाएव तादृशशक्तिकत्वाच्च॥ल्यब्लोपे पञ्चमीतु अध्याहारे गौरवान्नोचिता ॥ अध्याहारः कस्य ल्यबन्तस्येत्यत्र विनिगमकाऽभावाच्च ॥ ग्रामादागतः पुनर्ग्रामंगतइतिवदुपपत्तिरत्र ज्ञेया ॥ एतेन नाऽस्तिदर्शनमस्येत्यदर्शनं मूलकारणमक्षरं तम्प्राप्येह संघात आगतः यथा सुदीप्तात्पावकादित्यादि टीकोक्तं प्रत्युक्तम् ॥ नाहं तं वेद्मि इत्यादितु तेषामदर्शनादुत्तरं स्थितानामनुभवाभिलापयोरनुवादः ॥ यत्तु तं संघातं शरीररूपत्वेन न वेद्मि ब्रह्मवित्त्वादसौ संघातोमामात्मानं नवेत्ति चिदंशस्य तिरोहितत्वाच्च पुनर्मे विरागताऽपि नाऽस्ति दोषज्ञाने हि दुष्टासु पुरुषोविरज्यते ब्रह्मैव सर्वमिति ज्ञानान्नास्तीत्यर्थ इति ॥ तन्न ॥ वैशंपायनादेस्तज्ज्ञानादिप्रसक्तेरभावेनाऽप्रसक्तप्रतिषेधस्य तादृशक्लिष्टार्थकत्वस्य चाऽयुक्तत्वाच्चिदंशतिरोभाव-

विषये तूक्तम्प्राक् ॥ पतिव्रतानां तु सति प्रत्यभिज्ञाने काशीमृत-सतीभार्यावर्त्तविहारे न दोषः ॥ व्यावहारिकात्मैक्यसद्भावाच्च ॥ नोचेत्पत्त्या कौमारे ऊढानां वयोन्तरे तेन विहारे पातिव्रत्यं हीयेत ॥ शरीरस्य परिमाणादिभेदेन भेदात् ॥ अतएव कायव्यूहं धृतवता योगिना स्वप्नदृष्टेन च पत्या विहारे नदोषइत्यलम् ॥ इच्छामात्रस्य नियामकत्वं त्वसकृत्प्राग्दूषितम् ॥ परात्तुतच्छ्रुतेरित्यत्र वक्ष्यमाणं तु तत्रैव निराकरिष्यामः ॥ इत्येकादशखण्डखण्डनम् ॥ ॥११॥ ॥एतेन घटोपलम्भाऽनुपलम्भयोः कादाचित्कत्वमनुपपन्नं तादृक्तद्धेतोर्वक्तुमशक्यत्वादिति निरस्तं॥लौकिकप्रत्यक्षाऽविषयत्वेऽपि वस्तुसत्तायायोगिप्रत्यक्षविषयत्वं स्याद्भूतभाविनां वस्तूनामित्यपि ॥ यतस्तथा तदिच्छा न तत्र चकास्ति॥फलबलकल्प्याहिसा ॥ अस्तु वा तद्विषयत्वं ॥ बाधकाभावात् ॥ उक्तप्रमाणैर्वस्तुसत्त्वे सिद्धे तस्य न्यायप्राप्तत्वाच्च ॥ अनागतमतीतंचवर्त्तमानमतीन्द्रियं विप्रकृष्टंव्यवहितंसम्यक्पश्यन्तियोगिनइतिवाक्याच्च ॥ एवंसत्यस्मिन्कालेऽस्मिन्देशे इदं कार्यमेवं भवत्वितीच्छाविषयत्वमाविर्भावः तदातत्रतथातन्माभवत्वितीच्छाविषयत्वं तिरोभावइत्यपि सुवचं॥ एतयोरेवोक्तयोग्यतारूपत्वात्॥नच तत्तद्देशकालयोरपि नित्यत्वाद्युगपत्सकलोपलम्भप्रसङ्गोऽनुपलम्भप्रसङ्गोवा स्यादिति वाच्यं॥अस्मिन् सृष्टिकालात्मके स्थूले कालोपाधौ तदवयवात्मकतत्तत्कालोपाधौ क्रमिके तस्यतस्य पुरुषस्य तत्तदुपलंम्भोभवत्वितीच्छाविषयत्वस्य तत्त्वात् ॥ अत्रैतदिच्छाप्रकारत्वापन्नानां तत्तद्देशकालादीनामाविर्भावात्मकैतदिच्छाविषयत्वादेतदेवाऽऽविर्भावरूपं तेषामपीति बुध्यस्व ॥ भगवदाविर्भावस्य भगव-

च्छक्तित्वमिति नानुपपत्तिः काचित् ॥ एवंसति यत्कालावच्छेदेन सर्वेषां मिथोनाऽनुभवविषयत्वं भगवदभिमतं सप्रलयकालइति निगद्यते ॥ यदवच्छेदेन मिथोनुभवविषयत्वं तथा ससृष्टिकालइत्युच्यते ॥ सर्वत्र विशिष्टेच्छैव नियामिकेति सर्वमनवद्यं ॥ आविर्भूयाऽरविन्दाक्षभक्तिमाविष्करोति यः ॥ सोऽव्यान्नः पितृपद्रेणुस्तिरोधानं च दुर्ल्ददां ॥ १२ ॥ ॥ अथैतेन घटोपलम्भानुपलम्भयोरित्यादिस्तिरोधानंचदुर्ल्ददामित्यन्तोद्वादशः खण्डः खण्ड्यते ॥ ॥ तत्र लोकविरुद्धविविधेच्छानां फलबलेन कल्पनातोमायिकत्वकल्पना लघ्व्युचिता च बाधकाभावान्न्यायप्राप्तत्वाच्च॥ योगिप्रत्यक्षविषयत्वे तु उक्तयुक्त्या लौकिकप्रत्यक्षविषयत्वमपि स्यात् ॥ पश्यन्तीति दृशिरार्षं ज्ञानमाह तच्च लौकिकप्रमातिरिक्तमिति योगशास्त्रज्ञेभ्यः शिक्षय ॥ तदेव सम्यग्दर्शनम् तच्च योगप्रसादजम् ॥ अन्यथाऽतीन्द्रियादिज्ञानस्य दुष्करत्वात् ॥ किञ्चाऽऽविर्भावलक्षणे प्रकारार्थकेवंपदं व्यर्थमिदं कार्यमितीच्छायां सप्रकारस्यैव गृहीतत्वात् ॥ एवं तत्रत्यभवतुपदार्थघटकभावस्योत्पत्तिरूपत्वेऽपसिद्धान्तव्याघातौ ॥ आविर्भावरूपत्वे आत्माश्रयः॥ किञ्चेदन्त्वंदुर्निरूपम् ॥ किञ्च तादृशेच्छाविषयत्वस्याऽऽविर्भावत्वे तादृशेच्छाक्षणआविर्भावः स्यात् ॥ इच्छाविषयत्वस्य सत्त्वात्॥ एवञ्च कार्यात्पूर्वत्वाभावेनेच्छायाहेतुत्वमपि न स्यात्॥एवं तत्क्षणे तिरोभावोऽपि स्यात् ॥ एवं विषयत्वमात्रस्य तिरोभावत्वे कार्येण सह देशोऽपि तिरोभवेत् ॥ अत्रेदंमाभवत्वितीच्छाविषयत्वस्य तत्र सत्त्वात्॥एतयोःस्नेहोनश्यत्वितीच्छायां पुरुषद्वयस्याऽपि नाशः स्यात्॥किञ्च कालादेर्निर्विशेषस्य ग्रहणे युगपत्सर्वोपलम्भ-

इदंशब्दानर्थकत्वंचेति॥ अस्मिन्सृष्टिकालात्मके इत्यादित्वत्प्रलपि-
तरीत्या सविशेषग्रहणे विशेषायदि नित्यास्तर्हि सएवदोषः॥यद्यनि-
त्यास्तर्ह्यपसिद्धान्तस्तद्विषयकेच्छान्तरापेक्षायामनवस्थाच ॥ एव-
मिच्छायास्तद्विषयत्वाभावात्तदाविर्भावार्थमिच्छान्तरापेक्षायाम-
नवस्था ॥ एवं प्रलयलक्षणे सर्वशब्दोपादानादसम्भवो योगिनां
त्वन्मते नित्यमुक्तानां च मिथोऽनुभवविषयत्वात् ॥ तदा तेऽपि
तिरोभवन्त्यतिरोभूतावा न किञ्चिज्जानन्तीति कल्पनेतु गौरवम्॥
किञ्च तदानीं ज्ञानाऽभावेऽप्यधुनाऽनागतमतीतंचेत्युक्तरीत्या प्रल-
यकालिकपदार्थविषयकानुभवसत्त्वात्तस्य तद्विषयत्वस्यच नि-
त्यत्वात्प्रलयकालेऽपि सत्त्वेनासम्भवः॥ सर्वशब्दस्याऽनुपादाने-
त्वतिव्याप्तिः॥ एतेन सृष्टिलक्षणमपिप्रत्युक्तम् ॥ अतिव्याप्तेः ॥
तस्मादिच्छायाअनियामकत्वान्मायैव नियामिका ॥ भगवदावि-
र्भावेऽपि सैव ॥ आविर्भावतिरोभावौशक्तीविमुरवैरिणइत्यत्राऽनु-
पस्थितपदार्थान्तरस्य सम्बन्धापेक्षयोपस्थितमुरवैरिपदार्थस्यैव सं-
बन्धउचितइति मुरवैरिणआविर्भावतिरोभावौ तच्छक्तिरूपौ इ-
त्यर्थः ॥ तच्छक्तिश्च मायैव॥मायिनंतुमहेश्वरमितिश्रुतेः ॥ तस्या-
अनेकात्मकत्वं तु इन्द्रोमायाभिरिति श्रुतिसिद्धम् ॥ तथाचाऽऽवि-
र्भावादेर्भगवद्धर्मत्वस्वीकारे न किञ्चिन्मानं नेहनानास्तीत्यादिश्रु-
तिविरोधश्च ॥ जगतोब्रह्माऽभेदेन जगद्धर्माणां ब्रह्मधर्मत्वकथने-
त्वतिप्रसङ्गः॥ एतेन बहुस्यांप्रजायेयेतीच्छाद्वयम् ॥ प्रथमा प्रका-
राऽविषयादेशकालपुरुषादिविषयाच ॥ द्वितीयातु प्रकारविषया
प्रशब्दोपादानात् इति टीकोक्तं प्रत्युक्तम्॥ कालादीच्छायाः का-
लिकादिविषयत्वेऽनवस्थाप्रसङ्गः कालाद्यानन्त्यंच ॥ तस्यैव का-

लस्य तदाधारत्वेत्वात्माश्रयः तदविषयकत्वेतुलक्षणाव्याप्तिः ॥ तस्माद्बहुभावप्रकारएव प्रजायेयेत्यनेनोक्तइतीयमेकैवेच्छा ॥ इच्छायाएकत्वं टीकोक्तन्तु तृतीयश्लोकव्याख्यायां प्रत्युक्तम् ॥ इति द्वादशखण्डखण्डनम् ॥ १२ ॥ ॥ ननु तत्तद्देशकालयोरपि नित्यत्वात्सकलोपलम्भप्रसङ्गोनुपलम्भप्रसङ्गश्च स्यादितिचेत् ॥ ननु तत्तद्देशकालावच्छिन्नतत्तत्पुरुषतत्तद्व्यवहाराव्यवहारावपि स्तएवेति किमनुपपन्नं तर्हि तावधुनाऽप्युलभ्येतामितिचेत् ॥ मैवं॥अनुपलम्भावच्छेदककालावच्छिन्नत्वात्पुंसां तदनुपलम्भात्॥ तत्तत्कालस्यभिन्नत्वात्तत्तदवच्छिन्नपुरुषस्याऽपि भिन्नत्वाद्युगपत्सत्वाच्च तदुपलम्भाऽनुपलम्भयोर्युगपत्सत्त्वं न विरुद्धं॥ नच योऽहं पूर्वं घटमन्वभूवं सएवाऽहमधुनानाऽनुभवामीति प्रत्यभिज्ञाऽनुपपत्तिः ॥ सर्वस्य ब्रह्मात्मकत्वेन तस्य चैकत्वेन तदुपपत्तेः ॥ नचैवमतिप्रसङ्गः॥उपलम्भाऽनुपलम्भयोरपि ब्रह्मात्मकत्वात्स्वेच्छया यत्र यदुपलम्भरूपेणाऽऽविर्भवति तत्र तथा यत्रचयदनुपलम्भरूपेणाऽऽविर्भवति तत्र तथेतिनियमात् ॥ यथा पृथिव्यामेव गन्धरूपेणाऽऽविर्भावोन जलादिषु ॥ अतएवाचार्यैः श्रीभागवततत्त्वदीपे अथवासर्वरूपत्वान्नामलीलाविभेदतः विरोधांशपरित्यागात्प्रमाणंसर्वमेवहीतिनिरूपितं ॥ ब्रह्मणः सर्वरूपत्वेनाऽनुष्णत्वरूपत्वेनाऽपि वन्हिरनुष्णइत्यादिवाक्यान्यपि प्रमाणानि कुतः यतः सर्वत्राऽखण्डब्रह्मज्ञानेन विरोधांशास्फूर्त्त्या विरोधांशस्त्यक्तएवेति वाक्यार्थः॥ अतएव पूर्वमेव वाचारम्भणंविकारइतिनिरूपितं॥ ततः पूर्वोत्तरयोर्जडजीवयोः सदात्मकत्वेमध्येहेतुमाह ॥ सआत्मेति ॥ एवं जडस्य तदात्मकत्वमुक्त्वा जीवस्याप्याह ॥ तत्त्वम-

सीति ॥ अस्योपदेशान्मुहुरुक्तवान् ॥ आवृत्तिरसकृदुपदेशादिति ब्रह्मसूत्रात् ॥ अतः संपूर्णमहावाक्यमुपदेशः ॥ तत्र यथैतदात्म्यमित्यत्र न भागत्यागलक्षणा सदंशे तथा तत्त्वमसीत्यत्रचिदंशेऽपि न सेत्यवगन्तव्यं ॥ तथाच सर्वस्यैव ब्रह्मवाक्यत्वात्तदेकदेशएव तत्त्वमसीतिवाक्यं जीवब्रह्मणोरभेदं बोधयतीति न वक्तुं शक्यं ॥ वाक्यभेदप्रसंगात् उपक्रमविरोधाच्च ॥ अपरंच त्वन्मतेजीवस्याऽऽभासत्वेनाऽलीकत्वात् सआत्मेत्यनेन तत्पदार्थं निरूप्य न त्वमसीत्येव वदेन्नतु तत्त्वमसीति ॥ सत्तावाचकधातुमध्यमपुरुषप्रयोगानुपपत्तिश्च ॥ १२ ॥ ॥ अथ ननुतत्तद्देशकालयोरपीत्यादिः प्रयोगानुपपत्तिरित्त्यन्तस्त्रयोदशः खण्ड्यः खण्ड्यते॥ ॥तत्र तत्तत्कालभेदम्पुरुषआरोप्योपलम्भाद्यभावसमर्पणतोवरं घटादेरनित्यत्वकल्पनमेव ॥ कार्यसामग्र्यनुपयुक्तेनोपाधिना कार्यवैलक्षण्ये कुण्डलिनोदेवदत्तस्योपलम्भे दण्डिनस्तस्यानुपलम्भप्रसङ्गात् उपलम्भादेर्नित्यत्वेन दोषतादवस्थ्याच्च॥ किञ्च परस्परमीशेन च सर्वाऽभेदवादिनस्ते कथं कालभेदः कथंचोपलम्भानुपलम्भादेर्युगपत्सत्त्वं प्रमाणविरुद्धं त्वंमनुषे ॥ स्वगुरूक्त्या विरोधमात्रापलापे तु वैनाशिकाद्युक्तमपि किन्नाङ्गीकरोषि श्रुत्यादेः प्रामाण्येऽप्यप्रामाण्यकथने तव भीतेरभावात् कथंच व्याससूत्राणि तत्तन्मतदूषणपराणि सङ्गतानि ॥ प्रमाणविरोधेऽपि सर्वेषां मतानां सुस्थत्वात् ॥ एतेन त्वद्गुर्वादिग्रन्थास्त्वत्कथाश्च व्याख्याताः ॥ वन्हिरनुष्णइत्येतादृशवाक्यस्य सुस्थत्वे इतरत्र तदभावस्य वक्तुमशक्यत्वात् ॥ किञ्चेश्वरः सर्वमितिवा नाऽस्ति किञ्चिदितिवा उक्काविरमस्व ॥ प्रमाणविरोधस्याऽकिञ्चित्करत्वात् ॥ तथा-

पि परेण दूषणाऽभिधाने ईश्वरेच्छेत्युक्तैव सर्वत्र विरमस्व ॥ किञ्चेश्वरेच्छयाऽतिप्रसङ्गवारणे सर्वं सर्वस्य कारणमित्यङ्गीक्रियतां ॥ कुलालादितः पटादिरूपेणाऽऽविर्भावरूपातिप्रसङ्गस्य भगवदिच्छाभावेन वारयितुं शक्यत्वात् ॥ यत्तुईश्वरेच्छायाएव नित्यकार्यव्यवहारनियामकत्वं तट्टीकाकारेणोक्तं ॥ तन्न ॥ तथापि सर्वस्य सर्वात्मकत्वेनातिव्याप्तेरनिवृत्तेः ॥ इदं जडत्वेन व्यवहार्यमिदं नेतीच्छयैवाऽतिप्रसङ्गवारणात्तत्तल्लक्षणप्रणयनवैयर्थ्यापत्तेश्च ॥ अथापि ग्रन्थविस्तरादिव्यसनाक्रान्ततया तत्प्रणयनं तर्ह्यतिव्याप्तिरुक्तैव ॥ सर्वेषां धर्माणां सर्वाऽभेदस्य च ब्रह्मणि सत्त्वात् ॥ तस्या अदोषत्वे तु परेणाऽपि यत्किञ्चिद्वस्तुत्वादिलक्षणमुक्त्वा जीयेत ॥ सर्वेषां नाम्नां प्रमाणानां चातिप्रसङ्गे स्वगुरुवाक्येनेष्टापत्तिं स्वीकुर्वंस्तट्टीकाकारोप्येवम्परास्तः ॥ वाचारम्भणमिति श्रुत्यर्थः प्रागुक्तः ॥ ऐतदात्म्यमित्यस्य जडमात्रपरत्वं च दूषितम् ॥ ऐतदात्म्यमित्यत्रापि लक्षणाऽस्त्येव ॥ सविशेषनिर्विशेषयोर्विरोधेनैक्यासम्भवात् ॥ नहि वयं त्वद्गुरुवत्क्वापि विरोधोनेति ब्रुवन्तो न जिन्हीमोयजमानः प्रस्तरइत्यस्य श्रूयमाणेऽर्थे प्रामाण्यप्रसङ्गात् ॥ यजमानस्य वन्हौ प्रक्षेपप्रसङ्गाच्च ॥ ब्रह्महत्यादिकरणेऽस्मिन्नपीच्छया प्रवृत्तिरस्त्येवेत्युक्तौ तूत्तरं प्रागुक्तम् ॥ नचैतदात्म्यमित्यत्र तथा लक्षणायां सर्वपदैतदात्म्यपदयोरन्यतरवैयर्थ्यमेकलक्षणयैव निर्वाहादिति टीकोक्तदोषप्रसङ्ग इतिवाच्यं ॥ सत्सर्वयोः परिचयार्थमुपयोगात् ॥ नचैकस्मिन्महाप्रकरणे एकत्र वाक्ये लक्षणाऽभावे वाक्यान्तरेऽपिसानास्तीतिनियमः ॥ फलप्रमाणयो

रभावात् ॥ वायव्यमित्यत्र तदभावेन वायुर्वैइत्यादावपि तदभाव-
प्रसङ्गाच्च ॥ किञ्च त्रयोविंशखण्डे वक्ष्यमाणेन तत्त्वमसीत्यस्यौप-
चारिकाभेदबोधकत्वपरेण स्वग्रन्थेन विरोधः ॥ नन्वस्मिन्प्रकरणे
औपचारिकार्थानि वाक्यानि त्वदभिमतानि ॥ किञ्चाऽत्राऽस्माकं
नलक्षणा किन्तु विशेषणरूपस्य भागस्य त्यागेन लक्षणासादृश्ये-
न च भागत्यागलक्षणया व्यवहारइत्यन्यत्रविस्तरः ॥ तत्त्वमसी-
त्यस्य सर्वेण प्रकरणेन पदैकवाक्यताप्यमूला ऽसङ्गताच ॥ वा-
क्यैकवाक्यतातु सङ्गतैव ॥ एवञ्च तत्त्वमसीत्यस्य प्रकरणेन
वाक्यैकवाक्यत्वेऽपि पृथग्वाक्यार्थसत्त्वेन प्रकृतस्याऽभेदस्य बो-
धने न कोऽपि विरोधइति जडांशे विवर्त्तवादोयुक्तएव ॥ चिदंशे
तु न तदुपयोगइति जीवस्य नालीकत्वमित्युक्तं मायायामित्यस्य
श्लोकस्य व्याख्याने ॥ ततोनत्वमसीतिकथनोपालम्भोन युक्त-
स्तथाच हेयत्वावचनाच्चेत्यस्य नाऽसङ्गतिरिति तट्टीकोक्ततदस-
ङ्गतिदोषोऽकिञ्चित्करः ॥ तुष्यतुदुर्जनइतिन्यायेनाऽप्युच्यते ॥
कस्तस्यार्थः सत्ताऽभावस्य तिङर्थेऽन्वयबोधनं न सम्भवति ॥
तयोः सम्बन्धस्य वृत्त्यनियामकत्वात्तदनियामकस्य च प्र-
तियोगिताऽनवच्छेदकत्वात् ॥ तिङर्थस्याऽलीके त्वमर्थेऽयोगा-
च्च ॥ नापि तिङर्थाभावस्त्वमर्थे बोधयितुंशक्यः ॥ तुच्छत्वेना-
ऽनुयोग्यप्रसिद्धेः ॥ नाऽपि त्वमर्थाभावोऽन्यत्र॥प्रतियोग्यप्रसिद्धेः॥
तस्मान्नत्वमसीत्यस्याऽर्थासंगतिः ॥ आभासस्याऽलीकत्वे माना-
भावाच्च ॥ मध्यमपुरुषानुपपत्तिकथनं तु युष्मद्युपपदेइतिपाणि-
नीयसूत्रार्थाज्ञानात् ॥ तेनहि युष्मत्पदसामानाधिकरण्ये मध्य-
मपुरुषोविधीयते नतु युष्मत्पदार्थस्यसत्यत्वे ॥ तन्मिथ्यात्वे त्वदा-

रोपिते तदीयसत्यत्वाऽप्रसिद्धेश्च ॥ त्वन्मते यथाऽनुपपत्तिस्तथाऽ-
ग्रे वक्ष्यते ॥ इतित्रयोदशखण्डखण्डनम् ॥ १३ ॥ ॥ किञ्च अ-
विद्यया कृत्वा ब्रह्मण्यारोपितं जगत्प्रतीयते रजतमिवशुक्तिकाया-
मिति हि तव मतं तदसंभवि॥आरोपे ह्यधिष्ठानज्ञानं कारणं॥अत्रच
परांचिखानीतिश्रुतेस्तस्याऽविषयत्वान्नारोपः॥नच ज्ञाननाश्यत्वो-
क्त्याऽस्य ज्ञानस्य चाऽज्ञानमात्रनिवर्त्तकत्वेनाऽस्याप्यज्ञानकार्य-
त्वमुच्यतइति वक्तुं युक्तं ॥ विष्णुस्मरणादिना तद्रूपाणां पापानां
नाशात्॥अस्तुवा ब्रह्मज्ञानस्याऽज्ञानमात्रनिवर्त्तकत्वं तच्च संसाररू-
पमेव नतु प्रपंचोभगवत्कार्यत्वात्॥तथाच स्वरूपाऽज्ञानदेहेन्द्रिया-
न्तःकरणप्राणाध्यासरूपपञ्चपर्वात्मकाऽविद्यानाशे तत्कार्यरूपाऽह-
न्तामततारूपसंसारनाशएव ज्ञानकार्यः नतु प्रपञ्चनाशोऽपि॥ब्रह्म-
विदःस्वपुत्रादिदर्शनाऽभावप्रसङ्गात् ॥ नचैवमित्येतत्सर्वं भागवतत-
त्त्वनिबन्धे प्रपञ्चितं पितृचरणैरिति नाऽत्रलिख्यते ॥ वस्तुतस्तु ब्र-
ह्मज्ञानस्य नाऽज्ञानमात्रनिवर्त्तकत्वं क्षीयंतेचास्यकर्माणीतिवच-
नात् पुण्यपापयोरपि निवृत्तेः ॥ एतयोरप्यज्ञानकार्यत्वं पुरस्तादेव
निरस्तं ॥ किंच अविद्यायाअसत्त्वेनाऽङ्गीकारात्तन्नाशोप्यशक्य-
निरूपणः ॥ इतोपि ब्रह्मणि तत्संबन्धोप्यशक्यवचनः ॥ संबन्धस्य
द्विनिष्ठत्वात्प्रकृतेचासंभवात् ॥ तथाच कस्य केन कस्य प्रतीतिः
स्यात् ॥ विभाजिकायाएवाऽभावेन विभागस्याऽप्यभावात्॥अत-
एवासन्नेव प्रतीयतइत्युच्यतइतिचेत्॥अहो मूढता यत्स्वप्नप्रतीततर-
णिकिरणतापतप्तस्य ततउत्थितस्य जागरितदशादृष्टमरीचिजलधि
वीचिविभ्रमैस्तदुपशमाभिमानेन सुखिताभिमानोमिथ्यावादिनः॥
असतोपि प्रत्यायिकाह्यविद्या साचासतीति काप्रत्याययेदिति पू-

र्वोक्तं श्रुत्वाऽप्येवं वदन्मूर्खतां नातिवर्त्तसे ॥ एतेनैव कार्याऽनुरूपेणकारणेन भाव्यमिति कार्यस्य तुच्छत्वेन तत्कारणं तादृश्यविद्योच्यतइत्यपि निरस्तं॥कार्यस्य तु तुच्छत्वाऽतुच्छत्वे पश्चाद्विचारयिष्यामः ॥ संप्रति त्वद्रीत्यैव विचार्यते॥कल्पना हि लोकाऽनुसारिणी तथाच यत्र मायाविनोनटामणिमन्त्रादिनाऽऽम्रकदम्बतरुकदम्बं दर्शयन्ति तत्र दर्शिताऽऽम्रादिकमेवाऽसद्दृष्टमिति ज्ञायते तत्क्षणमेव तददर्शनान्नतु तन्मन्त्रादिसामर्थ्यमपि॥तथासतितद्दर्शनमपि न स्यात्॥सर्वोऽपि तथा प्रदर्शयेदविशेषात्॥तस्मात्त्वदभिमताऽविद्यया जगत्प्रतीतिर्जीवविभागोवा नयुक्तिसहइति न कर्त्तृत्वनिषेधोब्रह्मणि शक्यनिरूपणः ॥ १४ ॥ ॥ अथ किञ्चाविद्ययाकृत्वेत्यादिः शक्यनिरूपणइत्यन्तश्चतुर्दशः खण्डः खण्ड्यते ॥ ॥ तत्र श्रुतौ संसारिणां प्रत्यक्त्वेन शुद्धात्मनोज्ञानाभावएवोक्तः नतु सर्वथाऽऽत्मज्ञानाभावः ॥ तथात्वे खानिव्यतृणत्स्वयंभूस्तस्मान्नात्मानम्पश्यन्तीत्येववदेत् ॥ किंच मुद्गराभिघातादिजन्यघटनाशं त्यक्त्वा पापनाशे दोषोक्तिस्ते मुधा॥त्वन्मते पापस्याऽनित्यतायावक्तुमशक्यत्वाच्चेदमसङ्गतम्॥किञ्च प्रतिपदविधानेत्यनेन निषेधाद्विष्णुस्मरणेत्यत्र न समासोयुक्तः॥किञ्च विष्णोः स्मरणादिना पापनाशएव भवति नतु निवृत्तिः ॥ विद्वान्नामरूपाद्विमुक्तइतिश्रुतिविरोधात् ॥ अतएव ज्ञानेन प्रपञ्चनिवृत्तिः ॥ नामरूपत्वावच्छिन्ननिवृत्तेरेव श्रुतितोबोधात् ॥ ब्रह्मकार्यत्वस्याऽप्रतिबन्धकत्वात् ॥ देहाद्यविवेकस्य ब्रह्मकार्यत्वाभावे ब्रह्मणः सर्वकर्त्तृत्वहानिः ॥ तत्कार्यत्वेतु तत्रैव व्यभिचारात् ॥ ब्रह्मविद्विषये तूक्तम्प्राक् ॥ यत्तु टीकाकृता नैवात्मनोनदेहस्यसंसृतिःसुविविक्तयोः अविवेकस्त-

योर्योसाविहतस्यैवसंसृतिरिति भगवता देहात्मानौ पृथगुक्त्वा तद-
विवेकस्यैव पृथक्कथनादविवेकएव संसारो नतु प्रपञ्चोब्रह्मकृतइ-
त्युक्तम् ॥ तदयुक्तं॥संसारपदावाच्यत्वेऽपि निवृत्तेः स्थापितत्वात् ॥
किञ्च तत्राऽविवेकोयोऽसौससंसृतिरिति समानाधिकरणाऽभिला-
पे तथाऽर्थः स्या न्नच तत्रतादृशोऽभिलापोऽस्ति॥तस्मात्तत्र यस्ये-
त्यध्याहृत्य तयोर्योऽविवेकोऽसौयस्य तस्य संसृतिरितिवा अवि-
वेकशब्दे बहुव्रीह्याश्रयणेन तयोर्योऽविवेकोविवेकाभाववांस्तस्ये-
तिवाऽर्थः ॥ तथाचात्मनोऽसंगत्वाद्देहस्य जडत्वान्नाध्यासरूपा सं-
सृतिः किन्त्वविवेकतोऽनिर्वाच्यस्येति तात्पर्यम्॥एवञ्चैतच्छ्लोकार्थ-
विप्लवमूलकं प्रपञ्चमायिकत्वपराणां भागवतस्थानेकश्लोकानाम-
र्थविप्लावनं टीकाकारस्यानर्थायैवेति संक्षेपः ॥ सर्वस्याऽपि प्रप-
ञ्चस्याज्ञानकार्यत्वे कर्मणस्तथात्वमर्थसिद्धमिति क्षीयन्तेचाऽस्य-
कर्माणीतिश्रुतिरनुकूलैव ॥ परमार्थदृष्ट्याऽविद्यायानाशाऽभावाद-
यस्त्विष्टाएव ॥ अतएव ननिरोधोनचोत्पत्तिर्नबद्धोनचसाधकः
नमुमुक्षुर्नवैमुक्तिरित्येषापरमार्थता यत्रहिद्वैतमिवभवतितदितरइ-
तरंपश्यति यत्रत्त्वस्यसर्वमात्मैवाभूत्तत्केनकम्पश्येदित्याद्याः श्रुतयः
बद्धोमुक्तइतिव्याख्यागुणतोमेनवस्तुतइत्याद्याः स्मृतयश्च संगताः॥
किञ्च स्वप्नस्य यथा नाशो यथावा तद्द्रष्टरि तत्संबन्धो यथावा
तत्प्रतीतिस्तथाऽत्राप्यस्तु ॥ यद्यपि जागरदृष्टमरुमरीचिभिर्नस्वाप्न-
तापोपशमस्तथापि जागरमात्रेण तदुपशमोऽस्त्येव ॥ दार्ष्टान्तिकेच
जागरस्थानापन्नमेव ब्रह्मदर्शनमिति गालिमताऽस्मन्मतानभिज्ञाने-
नैव गालयोदीयन्ते ॥ असतोपीन्द्रियादेः स्वप्ने सत्प्रत्यायकत्वं
दृष्टमेव कूटकार्षापणादेः सत्यकार्यहेतुत्वं च दृष्टमसत्यस्याऽस-

त्यहेतुत्वे तु कोदोषः तस्मादिन्द्रजालस्थले यद्यपिकारणस्य मणि-
मन्त्रादेर्नमिथ्यात्वं तथापि मिथ्याकार्यस्थले कारणस्यसत्त्यत्व-
नियमोन प्रमाणाभावात् ॥ कल्पनायां दृष्टाऽनुसारित्वनियमोन-
श्रौतेर्थे इत्युक्तम्प्राक् अतोमायाजन्यत्वस्य दृष्टानुसारित्वाभावेऽपि
नदोषः श्रौतत्वात् ॥ दृष्टाऽनुसारित्वन्तूपपादितमेव ॥ यत्तु तत्क्षण-
मेव तददर्शनादसत्त्वं साधयति ॥ तद्याहतम् ॥ उपलब्धिक्षणेऽनुप-
लब्धेरभावात् ॥ तत्क्षणशब्देन कुस्तत्या स्वल्पकालग्रहणे स्वल्प-
कालनष्टघटादौ व्यभिचारः मन्त्रादिसामर्थ्ये सत्त्वाभावे तददर्श-
नापत्तिरित्युक्तिरप्ययुक्ता बहुकालं दृश्यमाने स्वमादौ सत्त्वाऽभा-
वात्॥तद्दर्शनमित्यत्र तच्छब्देन कार्यग्रहणेतु असतोपीन्द्रियादेरि-
त्यादिनाऽनुपदमुक्तेन प्रकारेण व्यभिचारोबोध्यः॥कदाचित्तददर्श-
नमस्तीतिचेदिहापि समानम्॥सर्वस्य त्वनिर्वचनीयं सामर्थ्यं ना-
स्तीति न तथा दर्शयितुं प्रभवति॥इदं तन्मौर्ख्यप्रकाशार्थ मुक्तम्॥
वस्तुतस्तु तन्मन्त्रादिषु व्यावहारिकं सत्त्वमस्त्येव ॥ तस्मादविद्यया
जीवविभागोजगत्प्रतीतिश्च तत्कृतमेव तत्र कर्त्तृत्वं तस्यैवच नि-
षेधइति सिद्धम्॥इतिचतुर्दशखण्डखण्डनम्॥१४॥ ॥ नन्वास्तां
शुद्धमेव ब्रह्म जगत्कारणं तेन सहाऽभेदोजीवस्य कथं श्रुत्या बो-
ध्यते परस्परविरुद्धधर्मत्वादुभयोः ॥ परमार्थतोभिन्नयोरभेदा-
ऽसंभवश्च ॥ नचोपाधिकृतत्वेन भेदस्य तदपगमे तत्संभवइतिवा-
च्यं ॥ पूर्वोक्तन्यायेनोपाधेरेव निर्वक्तुमशक्यत्वात्॥नच तात्त्विक-
भेदवतोरपि पाथसोर्मेलनेसत्यभेदप्रतीतिवत्प्रकृते नद्यःप्रविष्टाइव-
नामरूपेइतिवचनात् ब्रह्मसंबन्धे सति जीवस्तस्माद्भिन्नतया न प्र-
तीयतइत्याशयेनाऽभेदः श्रुत्या बोध्यतइतिवाच्यं ॥ तयोरनंत्याव-

यविसावयवैकजातीयद्रव्यत्वेनोभाभ्यामेकं स्वसजातीयकं कार्यमुत्पाद्यतइति युक्तं तदभेददर्शनं ॥ प्रकृतेतूभयोरपि महत्त्वे सति निरवयवत्वेनाऽऽरंभकत्वासंभवाच्च न तथा वक्तुं शक्यं ॥ अविनाशीवाअरेअयमात्मानुच्छित्तिधर्मेतिश्रुतेर्नाशाऽसंभवाच्च ॥ किंच जीवब्रह्मणोः कः सम्बन्धः ॥ नतावत्संयोगसम्बन्धः ॥ तयोरजत्वेन तदनङ्गीकारात् ॥ नसमवायः ॥ अनाश्रितत्वादुभयोः॥ नापि स्वरूपसम्बन्धः॥तस्य सार्वदिकत्वेन जीवाऽनुपलब्धिप्रसङ्गात् ॥ किञ्चाऽणुजीवपक्षेऽपि ब्रह्मणोव्यापकत्वात्सकलजीवसम्बन्धस्य सार्वदिकत्वात्कदाऽपि न ते प्रतीताः स्युः ॥ नाऽपि ब्रह्मसाक्षात्काराऽनन्तरमेव जीवस्य ब्रह्मभावोब्रह्मवेदब्रह्मैवभवतीत्यादिश्रुत्या प्रतिपाद्यतइति ज्ञातृज्ञेयभावएव सम्बन्धोवाच्यः॥पारमार्थिकभेदस्यैतदनपनोद्यत्वात् ॥ अन्यथा देवदत्तविष्णुमित्रयोरप्यभेदापत्तिः ॥ किञ्च सम्बन्धस्य द्विनिष्ठत्वात्संसारिणमपि जीवं ब्रह्म जानातीति ज्ञातृत्वसम्बन्धस्य तादृशे जीवेऽपि सत्त्वात्तस्याऽप्यभेदापत्तिः ॥ ब्रह्मनिरूपितमेव तत्तदभेदसाधकमितिचेन्न ॥ यतोवाचोनिवर्त्तंतेअप्राप्यमनसासह अदृश्यमदृष्टमित्यादिश्रुतिभिस्तस्य ज्ञेयत्वनिषेधात् ॥ अभेदोऽपि जीवब्रह्मणोर्न तादात्म्यरूपः॥ सहि धर्मधर्मिभावे भवति॥तस्याऽत्राऽसंभवात्॥पारमार्थिकभेदवतः पारमार्थिकोऽभेदोऽसंभावितइत्युक्तं॥एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाऽनुपपत्तिश्च ॥ एतेनैव चेतनत्वादिधर्मसारूप्येणौपचारिकएवाऽभेदउच्यतइत्यपि निरस्तं॥नच तद्विकारत्वेन प्रतिज्ञोपपत्तिः॥तस्याऽविकारित्वश्रुतेः॥जीवोऽपि नजायतेम्रियतेवाकदाचिदित्यादिवाक्यैर्न विकार्यः॥ नाऽपि जीवोब्रह्मणोंऽशस्तस्य निरवयवत्वात्॥

अंशोनानाव्यपदेशादिति तत्त्वसूत्रादिकं त्वौपचारिकमंशत्वमाह॥ मुख्येबाधकमुक्तमेव ॥ तस्माद्ब्रह्मोपाधिरेवजीवइति मन्तव्यं ॥ अभेदबोधकश्रुत्यनुरोधात् ॥ नचोक्तन्यायेनाऽविद्यायाउपाधित्वासम्भवान्नैवं वक्तुं शक्यमिति वाच्यं ॥ श्रौताऽनुपपत्तेर्बलिष्ठत्वात्॥ तथाचोपहितस्यैवाभेदसम्भवादभेदसित्ध्यर्थमुपाधेरपि प्रातीतिकमेव सत्त्वमुरीकार्यं ॥ पारमार्थिकसत्त्वे ज्ञाननाश्यत्वाऽसम्भवात् ॥ तथाच यत्रहिद्वैतमिवभवतितदितरइतरंपश्यतीत्यादिनाऽविद्याऽवस्थायामेव द्वैतदर्शनमुक्त्वा तदभावदशायां यत्रत्वस्यसर्वमात्मैवाभूत्तत्केनकंपश्येदित्यादिना तन्निवारयति श्रुतिरित्याविद्यकत्वं प्रपञ्चस्याऽपि सित्ध्यतीति यतोवाइमानीत्यादिनाच ब्रह्मकर्तृकत्वंच प्रपञ्चस्य वदतीत्युभयसामञ्जस्यनिमित्तमविद्योपहितमेव ब्रह्म जगत्कारणमुच्यतां ॥ अतएव नाऽन्योऽतोऽस्तिद्रष्टेत्यादिश्रुतिरप्युपपद्यतइत्येवंप्राप्ते ब्रूमः ॥ श्रुतितस्तत्त्वसूत्रैश्चस्मृतिभ्यश्चांशएवसः स्वार्थप्रामाण्यतस्तेषांतेभ्यएवाणुरेवच ॥ भवेदेतदेवं यद्याविद्यकं जीवत्वं स्यात् नत्वेवं किन्तु पारमार्थिकं ॥ नचाभेदबोधकश्रुत्यनुपपत्तिः ॥ अंशांऽशिभावेनैव तदुपपत्तेः ॥ ननु निरवयवत्वं बाधकमुक्तमितिचेत् ॥ सत्यमुक्तं ॥ तत्रेदं विचार्यते ॥ ब्रह्मरूपं जीवस्वरूपं च श्रुतिगम्यं लौकिकप्रमाणगम्यं वेति ॥ तत्र नद्वितीयः ॥ तथाहि ॥ नतावच्चाक्षुषं ॥ अरूपिद्रव्यत्वात् ॥ नाऽपि स्पार्शनं ॥ तद्रहितत्वात् ॥ नाऽपि गन्धादिवद्घ्राणेन्द्रियादिप्रत्यक्षं ॥ अगुणत्वात् ॥ नाऽप्यनुमानगम्यं ॥ परिशेषेण ज्ञानप्रयत्नाधारत्वेनात्मसाधनआवश्यकत्वाल्लाघवाच्च ॥ तादृक्प्रमाणसित्ध्यैवाऽर्थान्तरत्वेन तदसिद्धेः ॥ यथाकथंचित्सिद्धावपि नोपनिष-

द्विचारितरूपस्य सिद्धिः ॥ तथाच स्वतःप्रमाणैतद्विरोधेन बाधितत्वादनुमानस्य न तत्साधकत्वं ॥ नाऽपिशब्दगम्यं ॥ तस्याऽऽप्तोक्तिरूपत्वेन तत्त्वस्यच यथादृष्टार्थवादित्वेनाऽऽत्मनश्चाऽदृश्यत्वेन तदनुपपत्तेः ॥ अतएव नोपमानगम्यमपि ॥ किन्तु श्रुत्येकसमधिगम्यं ॥ तंत्वौपनिषदंपुरुषंपृच्छामीतिश्रुतेः ॥ सर्वेवेदायत्पदमामनन्तीतिच ॥ वेदैश्चसर्वैरहमेववेद्यइति स्मृतेश्च ॥ तदर्थश्च न लोकरीत्या निर्णेतुं योग्यः ॥ अलौकिकत्वात् ॥ तस्य लोकविलक्षणत्वात् ॥ किन्तु स्वयमेव वेदव्यासं कृत्वा तन्मीमांसांच प्रतिज्ञापूर्वकं कुर्वतोवेदव्यासस्य सूत्रैः ॥ तस्यैव तदर्थाऽभिज्ञत्वात् ॥ १५ ॥

॥ ॥अथ नन्वास्तांशुद्धमेवेत्यादिस्तदर्थाऽभिज्ञत्वादित्यन्तः पञ्चदशः खण्डः खण्ड्यते॥ ॥तत्र पूर्वपक्षे आरम्भवादे पूर्वद्रव्यनाशे मानाभावः॥अविनाशीवाअरेइति श्रुतौ अविनाशित्वे हेतुरनुच्छित्तिधर्मेति॥उच्छित्तिर्धर्मोयस्य सतथा नोच्छित्तिधर्माऽनुच्छित्तिधर्मेत्यर्थो नतु तट्टीकाकारोक्तोबहुव्रीहिपूर्वपदकव्यधिकरणबहुव्रीहि गौरवात् ॥ वृत्तिमत्त्वं धर्मत्वं तदाधारत्वं धर्मित्वमित्यप्ययुक्तं॥सर्पत्वप्रतिबिम्बादेरज्जुदर्पणाद्यवृत्तित्वेऽपि धर्मत्वव्यवहारान्नयनगतपीतत्वस्य शङ्खादिवृत्तित्वेऽपि तदधर्मत्वाच्च ॥ श्रीहर्षोक्तखण्डनचतुर्थपरिच्छेदस्थदूषणैराधेयत्वादेर्निरूपयितुमशक्यत्वाच्च ॥ तयोरजत्वेन संयोगाऽभावसाधनंत्वयुक्तम् ॥ अजयोस्संयोगे बाधकाऽभावात् ॥ अणुत्ववादे जीवस्याऽऽश्रितत्वे बाधकाभावेनोभयोरनाश्रितत्वोक्तिरसङ्गतैव ॥ स्वरूपस्य सम्बन्धत्वेऽन्यतराऽनुपलब्धौ स्वरूपस्य काऽपि सम्बन्धत्वं न स्यात् ॥ तथाच त्वन्मतेऽनि-

त्यत्वेन स्वीकृतानां ध्वंसः स्वाधिकरणे केन तिष्ठेत् ॥ प्रभाकररीत्योक्तौ कैवल्यं दुर्निरूपम् ॥ अस्मद्रीत्योक्तौ तु अपसिद्धान्तः ॥ सिद्धान्ते अंशांशिभावेनेत्याद्यसङ्गतम् ॥ औपचारिकत्वप्रसङ्गात् ॥ नहि हस्तादिर्देवदत्तादिर्भवति ॥ हस्तच्छेदादौ देवदत्तादिहननप्रायश्चित्तादिप्रसङ्गात् ॥ अरूपिद्रव्यत्वादित्यप्यसङ्गतम् ॥ आरोपे ह्यधिष्ठानज्ञानं कारणमिति वदता मलिनत्वाद्यध्यासोपपत्तये आकाशादिचाक्षुषस्य त्वया पूर्वत्र सूचितत्वेन त्वट्टीकाकारेण अवकाशरूपेण वस्तुसामर्थ्यादेव तस्य प्रत्यक्षत्वादिति त्वद्धार्द्दस्योद्घाटितत्वेनच तद्विरोधापत्तेः ॥ नापि स्पार्शनं तद्रहितत्वादित्यत्र तच्छब्देन स्पर्शपरामर्शोऽयुक्तोऽप्रकृतत्वात् ॥ स्पर्शनशब्दस्येन्द्रियपरत्वात् ॥ तद्धितार्थोपसर्जनत्वाच्च ॥ नहि भवति चाक्षुषं रूपं तत्तैजसमिति अगुणत्वादित्यप्यसङ्गतम् ॥ आत्मगुणस्य चैतन्यस्य त्वयाऽऽत्मातिरिक्तत्वाऽनङ्गीकारेणाऽऽत्मनोऽगुणत्वाऽनपायात् ॥ परिशेषेणेत्येतद्व्याख्यानावसरे चार्वाकमतमुपन्यस्य तत्राऽन्ये वदन्तीत्युपक्रम्य बाह्यः पुञ्जः शरीरंवा आत्मा ज्ञानप्रयत्नाधारत्वाद्यन्नैवंतन्नैवं घटादिवदिति अनुमानेन शरीरत्वावच्छिन्नस्य बाह्यपुञ्जत्वावच्छिन्नस्य वा ऽऽत्मत्वं साधनीयमिति टीकाकृतश्चार्वाकमतानुवादोऽसङ्गतश्चार्वाकस्य प्रत्यक्षैकप्रमाणवादित्वात् ॥ विस्तरभयात्तु तदीयप्रलापान्तरं न दूष्यते ॥ स्वतःप्रमाणेत्यसङ्गतम् ॥ अनवस्थादिभयादनुमानेऽपि प्रामाण्यस्य स्वतस्त्वात् ॥ मन्वादेरप्यात्मदर्शनाभावे कीदृशस्य तद्दर्शनं स्यात् तथाच द्रष्टव्यइति न संगच्छेत ॥ किञ्च यथादृष्टार्थवादित्वं नाप्तत्वं ॥ धर्मस्याऽदृश्यत्वेन तद्वक्तॄणामनाप्तत्वप्रसङ्गात् ॥ किन्तु यथार्थवादित्वं॥

तच्चाऽऽत्मनोऽदृश्यत्वेऽपि मन्वादेर्युज्यतएव ॥ मन्वादिस्मृतिरूपाऽऽप्तवाक्यानां गीतादिवच्छ्रुतिमूलकत्वेन तन्त्वौपनिषदमित्यादिश्रुतिस्मृतिविरोधोन ॥ न लोकरीत्येत्यप्यसङ्गतम् ॥ लोकवेदाधिकरणविरोधात् पूर्वमीमांसाद्युच्छेदप्रसङ्गाच्च ॥ व्यासेनाऽपि लोकरीत्यैव विचारितत्वाच्च ॥ तस्यैवेत्यप्यसङ्गतम् ॥ यद्वैमनुरिति श्रुतिविरोधात्पूर्वमीमांसायाउच्छेदप्रसङ्गाच्च ॥ तस्मान्मुनीनामविगीतांऽशोक्तावाप्तत्वमेव ॥ व्याससूत्रतद्ग्रथितश्रुत्याद्यर्थनिर्णये तु श्रीभगवत्पादमुनेरेवाऽऽप्तत्वमित्युक्तं प्रथमश्लोकव्याख्यायाम् ॥ तस्माद्विचाराऽशक्तौ श्रद्धामात्रेणार्थग्रहणेच्छायां शाङ्करपादावेव सेवस्व ॥ इतिपञ्चदशखण्डखण्डनम् ॥ १५ ॥ ॥ तत्रच जीवब्रह्मसम्बन्धविचारे ब्रह्मणोंऽशएव जीवइति निर्णीतमंशोनानाव्यपदेशादिति ॥ अस्यार्थः ॥ जीवोब्रह्मणोंऽशएव कुतोनानाव्यपदेशान्नानाविधोयोव्यपदेशः क्वचित्ब्रह्मत्वेन क्वचिदुत्पन्नत्वेन क्वचिदज्ञत्वेन क्वचित्चिद्रूपत्वेन क्वचिदीशितव्यत्वेनाऽणुत्वेनच व्यापकत्वेनच निरूपणादेकस्यैव विरुद्धधर्माश्रयत्वं ब्रह्माऽतिरिक्तस्य न सम्भवतीति ब्रह्मांऽशएव जीवइत्यर्थः ॥ अथवा नानाव्यपदेशाद्भेदेन व्यपदेशात्तथेत्यर्थः ॥ श्रुतिश्च यथाग्नेःक्षुद्राविस्फुलिङ्गाव्युच्चरंत्येवमेवास्मादात्मनःसर्वेप्राणाइत्युपक्रम्य सर्वएवात्मानोव्युच्चरन्तीति कपूयचरणारमणीयचरणाइतिच ॥ यत्तु जीवस्य ब्रह्मोपाधित्वमङ्गीकृत्य विस्फुलिङ्गस्यौष्ण्यमिव चेतनत्वं साधारणोधर्मोजीवेश्वरयोरित्यौपचारिकमंशत्वं व्याख्याय नानाव्यपदेशदर्शनं श्रुतौ यथाग्नेःक्षुद्राविस्फुलिङ्गाः यआत्मनितिष्ठन्नात्मानमंतरोयमयतीत्यादेः ॥ तत्तूपेक्ष्यं विद्वद्भिः ॥ पूर्वाऽपरविरोधा-

त् ॥ तथाहि ॥ नहि तन्मतीयजीवस्याऽभासत्वेन प्रतिबिम्बत्वेन-वा ऽलीकस्य नियमनं तस्मिन् स्थितिर्वा ज्ञानैकघनस्य परमात्मनः सम्भवति॥नवा विस्फुलिङ्गौष्ण्यदृष्टान्तेन चेतनत्वं साधारणं धर्ममादायौपचारिकमंशत्वमपि व्याख्यातुं शक्यं॥ततएवअंशत्वाव-गमप्रकारस्तुश्रुत्यैव यथाग्नेःक्षुद्राइत्यादिनोक्तः ॥ इदमत्रज्ञेयं ॥ ब्रह्मणोनिरंशत्वं सांशत्वं वा न लोकसिद्धं येन तदनुरोधेन किञ्चि-द्वक्तुं शक्यं किन्तु वैदैकसमधिगम्यं ॥ एवंसति यथैवसनिरूपयति तथैव तदिति मन्तव्यं॥अतएव नैषा तर्केण मतिरापनेया अलौकि-कास्तुयेभावानतांस्तर्केणयोजयेदित्यादिका श्रुतिर्लौकिकयुक्त्यै-तत्बाधनं निषेधाति॥अन्यथा सर्वत्र लौकिकयुक्त्यनुसारिण्येवार्थे श्रुतेस्तात्पर्यवत्त्वेन नैषातर्केणेत्यादिश्रुतिर्व्यर्था विरुद्धार्थाच स्यात्॥ लोकेऽपि यत्र वस्तुस्वभावएव कार्यहेतुर्न तत्र युक्तिसंभावना ॥ यथाऽयस्कान्तसंनिधौ लोहपरिभ्रमणे ॥ नच तत्र मणिनिष्ठा देवताऽऽकर्षिकेतिवाच्यं ॥ अस्याअपि लोहस्यैवाकर्षणे हेत्वपेक्षायां देवतास्वभावस्यैव तथात्वेन वक्तव्यत्वआवश्यकत्वाल्लाघवाच्च मणिस्वभावस्यैव तत्त्वेन वक्तुमुचितत्वात् ॥ तथाऽत्राऽपि श्रुतिबलाद्वस्त्वेव तादृशमिति मन्तव्यं न युक्तिरपेक्षणीया ॥ तथाच सैव निष्कलंनिष्क्रियमित्यादिना सांशत्वं निराकृत्य यथाग्नेरित्यादिना जीवस्य ब्रह्मांशत्वमप्याह ॥ व्यासोप्यतएवेममेवार्थं दृढीकर्त्तुं हेत्वंतराण्याह मंत्रवर्णादिति अपिस्मर्यतइतिच ॥ मंत्रवर्णश्च पादोस्यविश्वाभूतानीति भूतानां जीवानां पादत्वेनांशत्वमेवाह ॥ स्मृतिश्च ममैवांशोजीवलोकेजीवभूतःसनातनइति जीवस्य ब्रह्मांशत्वमेवाह ॥ अतएवाभेदश्रुतिरुपपद्यते ॥ नहि विस्फुलिङ्गो-

नाऽग्निः एवं जीवोऽपि ब्रह्मांशत्वात् ब्रह्मैव ॥ तर्ह्यसार्वज्ञ्यानुपपत्तिः नहि विस्फुलिङ्गेन दाहकः प्रकाशोवा ॥ अल्पप्रकाशवदल्पज्ञत्वोपपत्तावपि भ्रमस्तु नोपपद्यतेजातु ॥ नच देहसंबन्धकृतमनीशत्वादीतिवाच्यं ॥ तस्याऽपि जीवभावोत्तरकालीनत्वात् ॥ तस्मादीश्वराद्भिन्नएवाऽनीशत्वादिविशिष्टोनित्यबद्धएवेश्वरप्रसादजज्ञानतोमुक्तोभवतीति नांऽशोभवितुमर्हति ॥ श्रुतिश्च प्रलयसमये भगवदुदरान्तःस्थानां जीवानां पुनः सर्गसमये ततोनिर्गमनप्रकारमेवाह विस्फुलिङ्गदृष्टान्तेन ॥ नान्योऽतोऽस्तिद्रष्टेत्यादिश्रुतिरपि जीवादिसर्वपदार्थविषयकदर्शनादिमत्त्वं सर्वदाऽन्यस्मिन्निषेधति नतु परिच्छिन्नदर्शनादिकमपि॥यथा पार्थएव धनुर्द्धरइत्यत्र नहि पार्थादन्योन धनुर्धरः किन्तु यथा स तथा नान्यइति तथेहापीतिचेत् ॥ बाढमेवमङ्गीकुर्मोयदि वेदार्थतामरसतरणेर्भगवतोबादरायणस्य सूत्रैः सप्रमाणनिदर्शनैः अंशोनानाव्यपदेशादित्यादिभिस्त्वदुक्तं न विरुध्येत नचैवं॥किञ्च विस्फुलिङ्गदृष्टान्तेन यद्यात्मनामेवोत्पत्तिं वदेत्तदा त्वदुक्तः प्रकारउपपद्येतापि नचैवं किन्तु सर्वेषां प्राणानां लोकानां देवानां भूतानामपि तथैव सृष्टिमुक्त्वा सर्वएवाऽऽत्मानोव्युच्चरन्तीत्यवदत् ॥ नच त्वं प्राणानां नित्यत्वं तथा सृष्टिं वा मनुषे येन तत्प्रक्रमपठितानामात्मनां तथात्वमवादीः ॥ नचात्मनां निर्गमनप्रकारमेवाह प्राणादीनामेवोत्पत्तिमाहेत्यपि वक्तुं शक्यं ॥ वाक्यभेदप्रसङ्गात् विनिगमकाऽभावाच्च ॥ यद्यपि यथाग्नेरितिश्रुत्यैव जीवस्यांऽशत्वं तदभावोवा न निश्चेतुं शक्यः ॥ चिन्तामणिकामधेनुकल्पतर्वादिभ्यइवाऽपि ब्रह्मणः सकाशात्प्राणाद्युत्पत्तेः संभवात्तथापि सुत्रैस्तदुपदर्शितश्रुतिस्मृतिभ्यश्चांऽशत्वमे-

वाऽवगम्यते ॥ १६ ॥ ॥ अथ तत्रचजीवब्रह्मसंबन्धविचारेइत्यादिरंशत्वमेवावगम्यतइत्यन्तः षोडशः खण्डःखण्ड्यते॥ ॥तत्र तावन्नानाशब्दस्य नानाविधार्थकत्वं कुतः नञ्शब्दाद्धिविनञ्भ्यां नानाञाविति स्वार्थे नाञ् सच भेदं वक्तुमर्हति ॥ विरुद्धधर्माब्रह्मण्यपि न सम्भवन्तीत्युक्तम्प्राक् ॥ किञ्च विरुद्धधर्माऽऽश्रयत्वेन ब्रह्माऽतिरिक्तत्वाऽभावसिद्धावपि तदंशत्वं केन सित्ध्येत॥अभेदमात्रेणांशत्वोक्तौ तु ब्रह्मणोऽप्यं शत्वं स्याद्विभुत्वेऽपि विरोधस्याऽभावेनांऽशत्वाऽव्याघातात् ॥ जीवस्याऽप्यनणुत्वमुक्तम्प्राक् ॥ भेदव्यपदेशमात्रस्यांशत्वसाधकत्वन्तु वदन्व्याख्यादिरीतिमजानन्नुपेक्ष्यएव ॥ किञ्चाऽन्यथाचापीत्यादिसूत्रांशं विसस्मारेति भाति ॥ अधिकंतु नात्माऽणुरितिश्लोकव्याख्यानावसरे उक्तम् ॥ कपूयचरणारमणीयचरणाइत्यत्र चरणशब्दआचरणवाचीति तदुपन्यासोऽत्र भ्रमादेव ॥ आभासस्य नालीकत्वमित्युक्तमसकृत् ॥ किञ्च स्वाप्नप्रपञ्चंयदीश्वरोनयमयति तर्हि सर्वनियामकत्वविरोधः ॥ यदि यमयति तर्हि तत्र व्यभिचारः॥एवं स्थितावप्यूह्यम् ॥ अस्माकं यादृशमंशत्वं संमतं तादृशं प्रागुक्तम् ॥ अमृतत्वफलकमात्मज्ञानमुपक्रम्य श्रोतव्यइत्युक्त्वा मन्तव्यइत्युक्त्या मननरूपस्तर्कआत्मज्ञानउपयुज्यतएव ॥ तर्कनिषेधस्तु श्रुतिप्रतिकूलतर्कविषयः ॥ अतएव श्रुतौ न तर्केणापनेयेत्युक्तम् ॥ त्वयापिच श्रुतिर्लौकिकयुक्त्यैतद्बाधनं निषेधतीत्युक्तम्॥अत्रत्याऽनंशत्वसाधकतर्कस्तु निष्कलंमहानजइत्यादिश्रुत्यनुगृहीतएव ॥ अतएवाऽपामसोममम्रृताअभूम अक्षय्यंहवैचातुर्मास्ययाजिनःसुकृतमित्यादिभ्योनकर्मणानप्रजयाइत्यादेः प्राबल्यम् ॥ न्यायोपबृंहितत्वात् ॥ श्रु-

तिप्रतिकूलइत्यत्र श्रुतिरपि स्वार्थे तात्पर्यवत्येव ज्ञेया ॥ अतएव यजमानः प्रस्तरइत्यादौ तर्केणश्रुत्यर्थबाधः ॥ अतएव स्मृत्योर्विरोधेन्यायस्तुबलवान्व्यवहारतइत्याह याज्ञवल्क्यः॥अन्यथा स्मृतीनां श्रुतिमूलकत्वाऽभावे श्रुतितोदौर्बल्याऽनुपपत्त्या स्मृतिविरोधस्थले स्मृतितुल्यार्थश्रुतिद्वयकल्पनायाआवश्यकत्वेन तयोरपि विरोधे तर्केणाऽन्यतरश्रुतिसंकोचस्याऽशक्यतया याज्ञवल्क्योक्तिर्न सङ्गच्छेत ॥ नच ब्रह्मप्रमाणेष्वेव तर्कविरोधोऽकिञ्चित्करइतिवाच्यम् ॥ श्रुतित्वाविशेषे श्रौत्याअन्यथानुपपत्त्यास्त्वदुक्तरीत्या बलवत्त्वेच जीवस्येवेतरस्याऽपि ब्रह्मणोभिन्नतायास्ततउत्पन्नतया त्वत्संमत्या च संभवेनांशोनानेतिसूत्रव्याख्यावसरोक्तश्रौतविरुद्धधर्माऽन्यथाऽनुपपत्त्या जीवस्येवेतरस्याऽपि ब्रह्माऽभेदेन सर्वोपपत्तावन्यत्र पक्षपातस्याऽनुचितत्वात् ॥ अत्रचाथवासर्वरूपत्वादिति त्वज्जनकवाक्यमप्यनुकूलं स्यात् ॥ किञ्च तर्कस्य ब्रह्मण्यप्रवृत्त्या श्रुत्युक्तस्य विरुद्धस्यापि ब्रह्मण्यङ्गीकारे श्रुत्यादिविरोधपरिहारपरद्वितीयाऽध्यायसूत्राणां तद्व्याख्यानपरत्वज्जनकग्रन्थविरोधपरिहारपरत्वप्रलापस्याप्यसंगतिः स्यात् ॥ लाघवेन परिभ्रमणस्य मणिस्वभावत्वमीश्वरकृतत्वेन श्रुतेर्बलीयस्त्वमितिवदता न्यायस्य लोके श्रुतौचोपकारकत्वं स्वीकृतं ॥ न्यायमनादृत्य श्रुतिबलादेव विचारयता तु मोक्षस्य कर्मतत्त्यागोभयसाध्यत्वं जीवस्य ब्रह्मांशत्वं तदनंशत्वंच स्वीकार्यमुभयविधश्रुतिदर्शनान्न्यायानपेक्षणाच्च ॥ सूत्रयोस्तु सप्तमश्लोकेंऽशोनानेतिसूत्रव्याख्यावसरे ममैवांशइतिस्मृतेर्याव्यवस्थोक्ता तादृश्येव बोध्या॥ मन्त्रवर्णस्याऽप्युपाधिपरिच्छेदेन परिच्छेदं वदतस्सैव गतिः ॥ यत्तु

टीकाकारेणाऽतएवाभेदश्रुतिरित्यत्राऽतएवेत्यस्य तादात्म्यादेवेत्यु-क्त्वा भेदसहिष्णुरभेदस्तादात्म्यमिति तादात्म्यलक्षणोऽभेदइत्याद्यु-क्तं तदयुक्तं ॥ निम्बार्कादिमतप्रवेशापत्तेः ॥ भेदाभेदयोर्विरोधे-नैकत्रावस्थानाऽयोगाच्च ॥ शब्दार्थयोस्तादात्म्यं तच्च भेदसहिष्णु-रभेदइतिवदतां केषांचिच्छाब्दिकानांत्वयं भावः ॥ शब्दार्थयो-र्भेदोवास्तवोवैकल्पिकोऽभेदश्च ॥ विकल्पस्तु शब्दज्ञानानुपातीव-स्तुशून्योविकल्पइति पतञ्जलिलक्षितइतिदिक् ॥ विस्फुलिङ्गाना-मग्न्यभेदं वदन्नेवं प्रष्टव्यः ॥ किमिमे विस्फुलिङ्गात्मकवन्हेरभिन्ना उतापादानवन्हेः ॥ नाद्यः॥जीवस्य तादृशदृष्टान्तेन स्वस्मादेवाऽभे-दसिध्या ब्रह्मणस्तदसिद्धेः॥अन्त्ये व्युच्चरणात्प्रागूर्ध्वं वा॥नान्त्योऽ-नुभवविरोधात्॥नाद्यो वन्हेस्सावयवत्वेन स्वघटकतादृशावयवा-द्विस्फुलिङ्गस्याऽभिन्नत्वेऽपि तादृशसर्ववन्ह्यभेदे मानाऽभावात् ॥ नहि पटावयवएकस्तन्तुस्सर्वपटाऽभिन्नोव्यपदिश्यतेऽतिप्रसङ्गात्॥ कथञ्चानेन दृष्टान्तेन सर्वदा ब्रह्माभेदवादिनस्ते इष्टसिद्धिः ॥ कि-ञ्चैवं प्राणादेरपि तदंशत्वं स्यात् तस्मादुपाधिनिर्गमेनैव जीवनिर्गम-इति युक्तमित्युक्तम्प्राक्॥यद्यपि यथाऽग्नेरित्यादित्वदुक्तं संगच्छते परन्तुतत्राऽपि चिन्तामणीत्याद्युक्तिर्न युक्ता॥घटाकाशवज्जीवाऽदि-र्भावसम्भवादितिहि वक्तुं युक्तम्॥यत्तु टीकाकारोघटसंवृतमाका-शमित्यस्यां श्रुतौ लयाभावेन सादृश्यमभिप्रेतमित्याह॥तन्न ॥ उ-पात्तधर्मं परित्यज्याऽनुपात्तधर्मेण सादृश्यस्वीकारे ऽतिप्रसङ्गात्॥त-स्माद्विभुत्त्वेन नयनाभावप्रयुक्तमेव सादृश्यं तच्च नाऽणुत्वे घटते ॥ इतिषोडशखण्डखण्डनम् ॥ १६ ॥ ॥ नचैवमसार्वज्ञ्याऽनुपप-त्त्यादिदूषणग्रासः॥सर्वज्ञत्वादिधर्माणां भगवदिच्छयैव तिरोभूत-

त्वात् ॥ यतः सूत्रकारोऽपीमामेवाऽऽशङ्कामपाकर्तुमेवमेव जगाद पराभिध्यानात्तुतिरोहितंततोह्यस्यबन्धविपर्ययाविति॥अस्य जीवस्यैश्वर्यादि तिरोहितं तत्रहेतुः पराभिध्यानात् परस्य भगवतोऽभिध्यानं स्वस्य जीवस्य च सर्वतोभोगेच्छा तस्माद्धेतोः ऐश्वर्य्यादिसद्भावे वैचित्र्याभावाद्भोगोन भविष्यतीति जीवे तिरोभावं कृतवान् स्वधर्माणां ततएव तिरोभावात् बन्धोभगवद्धर्मविपरीतधर्मवत्त्वं चेत्यर्थः॥ ऐश्वर्य्यादितिरोभावाद्दीनत्वं पराधीनत्वंच वीर्यतिरोभावात्सर्वदुःखसहनं यशस्तिरोभावात्सर्वहीनत्वं श्रीतिरोभावाज्जन्मादिसर्वापद्विषयत्वं ज्ञानतिरोभावाद्देहाद्यहंबुद्धिः सर्वविपरीतज्ञानमपस्मारसहितस्येव वैराग्यतिरोभावाद्विषयासक्तिः आनन्दांशस्तुपूर्वमेवतिरोहितोयेनजीवभावः॥अतएव नेतरोऽनुपपत्तेः भेदव्यपदेशाच्चेत्यादिना जीवस्याऽऽनन्दमयत्वं न्यषेधत्सूत्रकारः॥ननु कारणसाम्ये कथमेकेषां जडत्व मेकेषांचेतनत्वं जीवे ज्ञानस्यापि तिरोहितत्वेनाऽल्पज्ञत्वमपि कथमितिचेत् ॥ अत्राहुराचार्याः ॥ सच्चिदानन्दरूपे ब्रह्मणि अस्त्यंशत्रयं स्वरूपभूतं॥सत्यंज्ञानमानंदंब्रह्मेतिश्रुतेः॥यःसर्वज्ञइति श्रुते धर्मरूपमपि ज्ञानमस्तीति मंतव्यं भगवानितिनामव्युत्पत्त्याच ॥ तत्रच स्वरूपात्मकेन सदंशेन जडोद्गमः पूर्वमुक्तः ॥ पश्चाच्चिदंशादेव जीवानां तद्रूपाणामेवोद्गमउक्तः ॥ अतोजडेषु सन्मात्रकार्यत्वाच्चित्तिरोभावः ॥ जीवेच चित्कार्यत्वेन चिद्रूपत्वात्सत्त्वेनचोपलभ्यमानत्वादानन्दांशतिरोभावएव॥एतयोः सच्चितोरपि तिरोभावे स्वरूपहानिरेव स्यात् तिरोहितंतु धर्मरूपं भगशब्दवाच्यं ज्ञानमतः सर्वमनवद्यं ॥ अत्र नियामिका भगवदि-

च्छैवेति ज्ञेयं॥एतयोर्भेदाऽभेदविचारमग्रे वक्ष्यामः॥१७॥ ॥अथ नचैवमसार्वज्ञ्येत्यादिर्विचारमग्रेवक्ष्यामइत्यन्तः सप्तदशः खण्डः खण्ड्यते ॥ ॥ भगवदिच्छया जीवस्यैश्वर्यादितिरोभावे वैषम्यादिदोषोभगवतोभोगेच्छाभावश्चोक्तः॥त्वदुक्तेऽर्थे सूत्रस्य विषयवाक्याऽलाभोऽतस्तत्रस्थपदमात्रार्थपर्यालोचने अभिध्यानशब्दस्येच्छायां रूढौ प्रमाणाऽभावेन योगेन तथाऽर्थाऽलाभेनच परस्याऽज्ञानस्याऽभिध्यानादभिचिन्तनादभिनिवेशात्स्वस्वरूपं तिरोहितं ततः पराभिध्यानात्तज्जन्य तिरोधानाद्वा बन्धो विपरीतधर्मवत्त्वंचेति सूत्रार्थः॥ इदञ्च श्रुत्यर्थमपर्यालोचनम्प्रत्युक्तम्॥वस्तुतस्त्वयमर्थः॥तिरोहितमपि ईश्वरस्याऽभिध्यानाच्चिन्तनात् आविर्भवतीत्यध्याहारः हि यस्मात्तत एवेशादेवास्य जीवस्य बन्धविपर्ययौ बन्धतदभावौ ईश्वराऽज्ञानेन बन्धस्तज्ज्ञानेन तदभावइतीश्वरस्य बन्धतदभावहेतुत्वम्॥ तथाच श्रुतिः ॥ ज्ञात्वादेवंसर्वपाशापहानिःक्षीणैःक्लेशैर्जन्ममृत्युप्रहाणिः तस्याऽभिध्यानात्तृतीयंदेहभेदेविश्वैश्वर्यंकेवलआप्तकामः ॥ ज्ञात्वाइत्यस्योपपत्त्यर्थं पूर्वार्द्धं लभ्यते इतिशेषः॥तृतीयं बन्धमोक्षापेक्षया सर्वपाशापहानिजन्मादिप्रहाण्यपेक्षयावा तृतीयमणिमादि॥ देहभेदे देहनाशे॥ क्रममुक्तिरुत्तरार्द्धेनोक्ता॥ तथाच बन्धतदभावयोरज्ञातज्ञातेश्वरप्रयुक्तत्वम्॥ एवंच बन्धस्याऽज्ञानप्रयुक्तत्वाद्दीनत्वादिकं तत्प्रयुक्तमेव॥अनन्दांशस्तु पूर्वमेवतिरोहितइत्यसंगतम्॥ जीवभावस्याऽनादित्वात् सादित्वेपि पूर्वमानन्दांशतिरोभावस्ततोजीवभावस्ततोबन्धविपर्ययावितिक्रमे मानाभावः॥ नेतरोऽनुपपत्तेः भेदव्यपदेशाच्चेतिसूत्राभ्यां यथा जीवस्याऽऽनन्दमयत्वं न निषिध्यते यथाच तस्याऽधिकरणस्याऽर्थस्तथा शारी-

रकभाष्यभामतीनिबन्धादितोज्ञेयम् ॥ अस्माभिस्तु विस्तरभिया नप्रतन्यते ॥ जडानां सदंशादेवोद्भवइति सत्त्वेनोपलम्भोजीवानां चित्त्वेनचोपलम्भइतितु निष्प्रमाणम् ॥ चिन्मात्रकार्यस्य जीवस्य सत्त्वेन प्रतीतौ सन्मात्रकार्यस्याऽऽकाशादेरपि चित्त्वेन प्रतीत्यापत्तिः ॥ सत्कार्यत्वाऽभावेऽपि जीववदेवसत्त्वेन प्रतीत्युपपत्त्या सत्कार्यत्वस्याऽप्यनापत्तिश्चाऽधिकंतूक्तं सप्तमश्लोकव्याख्यायाम् ॥ नेहनानास्तीत्यादिश्रुतिविरोधान्ननिरुपाधौ धर्मरूपं ज्ञानं किन्तु सोपाधावेव त्वन्मते यथाऽऽकाशादेश्चितस्तिरोभावेऽपि नस्वरूपहानिर्यथावा स्वमस्य सतोऽपि तिरोभावेऽपिन सा तथा जीवजडयोस्तदहान्युपपत्त्या स्वरूपहान्यापत्त्युक्तिरयुक्तैव ॥ इति सप्तदशखण्डखण्डनम् ॥ १७ ॥ ॥ ननु ब्रह्मरूपाणामेव जीवानां सहजगुणांस्तिरोहितान्विधाय मिथ्याज्ञानादिदोषयुक्तत्वकरणे तूपस्थितहानिरकृताभ्यागमश्च प्रसज्येतेतिचेत् ॥ न ॥ एतयोर्जीवकृतावेव जीवएव च दूषणत्वात् ॥ तत्राऽपि लोकेऽप्यस्वतन्त्रजीवकृतावेव ॥ दृश्यते हि लोकेऽपि राज्ञां स्वतन्त्रणां स्वविहारार्थं प्राचीनविचित्रभवनप्राकारगोपुरादिभङ्गकरणेन तत्रैव तिरोधानादिकरणं निजसेवकेष्वपि कदाचित्स्थितस्याप्यैश्वर्यादेर्हरणं पुनर्दानं च सेवयासंतोषे किंपुनः सकललोकनियामकस्य सकलजगत्कारणकारणस्य भगवतः स्वदासजीवस्याऽन्यथाकरणे शङ्का नाम ॥ किञ्चैवंसर्गस्थितिसंहारेष्वपि भगवतएव कर्त्तृत्वात्स्थितं संहृत्य पुनस्तथाकरणेऽपीमौदोषौ प्रसज्येयातां ॥ तथासति जगतोऽनित्यत्वप्रसंगोऽसंभवएव वा स्यात् ॥ यतोभगवान् स्वयमेव येचैवसात्त्विकाभावाराजसास्तामसाश्चये मत्तएवेतितान्विद्धिनत्वहं-

तेषुतेमयि त्रिभिर्गुणमयैर्भावैरेभिःसर्वमिदंजगत् मोहितंनाऽभि-
जानातिमामेभ्यःपरमव्ययमिति मायामोहेन स्वाऽज्ञानमुक्का स्वे-
च्छयैव च माया मोहयतीति निरूपणार्थं स्वाधीनत्वं मायायाः
दैवीह्येषागुणमयीममायादुरत्ययेति निरूपितवात् ॥ अतोपि भ-
गवदिच्छाधीनतैव बन्धस्याऽपि ॥ एवंसति यस्मिन् जीवे यादृशी-
च्छा तदनुरूपाएवाविद्यादिशक्तयः सत्त्वादिभेदेन तं व्याप्नुवन्तीति
महदैश्वर्यं भगवतः ॥ अतएव महात्मानस्तुमांपार्थदैवींप्रकृतिमा-
स्थिताः भजंत्यनन्यमनसोज्ञात्वाभूतादिमव्ययमिति भगवतोक्तं ॥
भवंतिभावाभूतानांमत्तएवपृथग्विधाः मत्तःस्मृतिर्ज्ञानमपोहनंचे-
त्यपि ॥ अपरंच स्वयौक्तिकेऽर्थेत्विदं दूषणमुद्भाव्यं स्याद्येन तथैव
कल्प्येत नतु श्रुतिसिद्धे॥राजाऽऽज्ञायाः पर्यनुयोगाऽनर्हत्वात्॥ एष-
ह्येवसाधुकर्मकारयतितंयमेभ्योलोकेभ्यउन्निनीषति एष एवासा-
धुकारयतितंयमधोनिनीषतीतिश्रुतिरपीममेवार्थमाह ॥यआत्मनि-
तिष्ठन्नात्मानमन्तरोयमयतीतिच ॥ अतएव नान्योऽतोऽस्तिइत्या-
दिरपि संगच्छते॥अन्यस्य स्वतन्त्रकर्त्तृत्वाऽभावात् ॥ अतएव सू-
त्रकारोऽपि जीवस्य कर्त्तृत्वं निरूप्य तत्स्वतएवेश्वराद्वेत्याशंक्य प-
रात्तुतच्छ्रुतेरिति सिद्धान्तमुक्तवान् ॥ अतोऽकृताऽभ्यागमोजीवे न
दोषाय॥सर्वथा परतन्त्रत्वात् ॥१८॥ ॥ अथ ननुब्रह्मरूपाणामे-
वेत्यादिः सर्वथापरतन्त्रत्वादित्यन्तोऽष्टादशःखण्डःखण्ड्यते ॥ ॥
तत्रोपस्थितहान्यादिकरणदूषणस्य न वाचनिकत्वं येन तस्य स्व-
तन्त्रविषयेसंकोचः क्रियेत किन्तु परदुःखकरणं लोकतोजुगुप्सित-
मितीदृशजुगुप्सितधर्मोऽपि परस्मिंश्चेत्त्वया स्वीक्रियते तर्हि सुव्या-
ख्याता विष्णुभक्तिः सुयत्येत च त्वदीयैः श्रेयसे ॥ जडेषु नोपस्थि-

तद्धानिकृतोदोषोदुःखाभावेनाऽजुगुप्सितत्वात्॥अकृताभ्यागमनन्तु नास्त्येवेति दृश्यतेहीत्यादिना तदुदाहरणमसङ्गतम् ॥ एतेनैव किञ्चैवं सर्गेत्यादिनिरस्तम् ॥ सेवकेषु यथैश्वर्यादेः पुनर्दानं सेवया संतोषे तथा हरणमप्याज्ञोल्लङ्घनादिभीरोषएव ॥ अन्यथाऽपयशोनरकौ स्यातामेव ॥ तथाचस्मृतिः ॥ अदण्ड्यान्दण्डयन्राजादण्ड्यांश्चैवाप्यदण्डयन् अयशोमहदाप्नोतिनरकंप्रतिपद्यते ॥ अतएव सूत्रकारः फलमतउपपत्तेरित्याह ॥ अस्मन्मतेतु वैषम्यादिपरिहारस्तृतीयश्लोकव्याख्यायामुक्तः ॥ मायामोहेनेत्याद्युक्त्या ईश्वरेच्छाया मायाकृतमोहद्वारा कार्यविशेषं प्रतिहेतुत्वं स्वीकृतं तच्च स्वतन्त्रेच्छाहेतुत्ववादस्य सङ्कोचकमर्द्धजरतीयन्यायाऽऽपादकञ्च ॥ तन्न्यायपरिहाराय कार्यान्तरेष्वपि मायादिद्वारकहेतुताऽऽपादकञ्च स्वेच्छयैवचेत्यत्र स्वशब्दोपादानं शब्दशक्त्यज्ञानमूलकं मदिच्छयैवेति प्रयोक्तुमुचितम्॥अन्यथा राजाऽऽज्ञया सेवकैश्चौरादिदण्डने राज्ञा स्वाज्ञाधीनत्वे तस्य ख्यापिते सेवकाः स्वेच्छया चोरान्दण्डयन्तीति ख्यापनार्थं राजेदं प्रोक्तवानिति तटस्थः प्रयुञ्जीत प्रयुङ्क्ते तु सेवकामदिच्छयेत्यादि ॥ ईश्वरेच्छावशाद्विद्यादिशक्तयोजीवं व्याप्नुवन्ति परन्तु बीजवदीश्वरेच्छायाजलवद्धेतुत्वमिति तद्व्याप्तिरनादिरित्यादिच प्रागुक्तम्॥भवन्तिइत्याद्यप्येवं व्याख्येयम् ॥ श्रौतेऽर्थे नेदंदूषणमुद्भाव्यमित्यत्र यद्वक्तव्यं तदुक्तं प्राक् ॥ राजाऽऽज्ञायाः पर्यनुयोगानर्हत्वादित्यपि स्मृतिविरुद्धम्॥ अधर्मतःप्रवृत्तन्तंनोपेक्षेरन्सभासदः उपेक्षमाणाःसनृपानरकंयान्त्यधोमुखा इति कात्यायनस्मृतेः ॥ एषह्येवेतिश्रुतेश्च व्यवस्थोक्तेव ॥ अन्तर्यमनन्त्वपक्षपातेनैव बोध्यम् ॥ नान्योऽतोऽस्तीत्यादेः

स्वन्त्रकर्त्तृत्वाऽभावमात्रपरत्वे तु मुख्यार्थत्यागः स्यात्सच बाधकं विनाऽयुक्तोऽन्यथाऽतिप्रसङ्गात्॥ तस्मादीश्वराद्द्रष्ट्रादेर्भेदनिषेधिकै-वेयं श्रुतिः॥ परात्तुतच्छ्रुतेरित्यस्य तु व्यवस्थोक्तैव॥ तस्मा त्त्वदु-क्तरीत्याऽकृताभ्यागमादिः स्थितएव सच दोषायैवेति स्थितम्॥ इत्यष्टादशखण्डखण्डनम् ॥ १८ ॥ ॥ येत्विमां शङ्कां परिहर्त्तुं पूर्वजीवकृतधर्माधर्मसापेक्षएवेश्वरः कारयति॥ अन्यथा स्वर्ग-कामोयजेत ब्राह्मणोनहंतव्यइत्यादिविधिप्रतिषेधानर्थक्यं स्यात्॥ ईश्वरस्यैव प्रवर्त्तकस्य निवर्त्तकस्य च सत्त्वात्॥ अतोविधिनिषे-धाभ्यामेव प्रवर्त्तमानं निवर्त्तमानं चेश्वरः प्रवर्त्तयति निवर्तयति-च॥कस्यचिद्विहिते प्रवृत्तिः कस्यचिन्न कस्यचिन्निषिद्धान्निवृत्तिः कस्यचिन्नेत्यत्राऽपि पूर्वपूर्वतादृक्कर्मैव निमित्तं॥ प्रवाहस्याऽना-दित्वात्॥ अतोनाऽकृताऽभ्यागमोजीवइतिवदन्ति॥ तेषामनीश्वर-वादएवाऽऽपद्यते॥ नच कर्मणोजडत्वेन फलसमर्पकत्वाऽसम्भवा-त्तत्समर्पकत्वेनेश्वरसिद्धिः॥ अन्यथाऽनुपपत्त्या कल्प्यमानस्य तादृशस्यैव कर्मणः कल्पयितुं शक्यत्वात्॥ ननु कृतप्रयत्नापेक्षस्तु-विहितप्रतिषिद्धाऽवैयर्थ्यादिभ्यइति तत्त्वसूत्रात्तथोच्यतइतिचेत्॥ न ॥ तदर्थानवबोधात्॥ तथाहि पूर्वोक्तन्यायेन परात्तुतच्छ्रुतेरि-तिपूर्वसूत्रेणेश्वरादेव कर्त्तृत्वे निरूपिते प्रवर्त्तकत्वेन निवर्त्तकत्वेन चाऽभिमतविधिनिषेधवैयर्थ्यमापतितं ॥ तत्र नहीश्वरः साक्षा-त्कञ्चन प्रवर्त्तयति निवर्त्तयति वा॥ तत्तद्वारैव तथाकरोतीतितु स-माधानं न सङ्गच्छते॥सर्वस्यैव सन्मार्गमात्रवर्त्तित्वाऽऽपातात्॥तथाच विधिनिषेधसत्त्वेऽप्यप्रवृत्तिनिवृत्त्योः सत्त्वेन तदुपपत्त्यर्थं पूर्वकर्म-कल्पनं त्वनुपपन्नं॥प्रवाहस्याऽनादित्वेन पूर्वपूर्वकर्मणैव प्रवृत्तिनि-

वृत्त्युपपत्तौ विधिनिषेधवैयर्थ्यापातात्॥एवंच सति प्रामाणिकत्वाऽभावेनांऽधपरम्परापत्तिर्यागादिकरणस्य धर्मत्वहानिश्च॥फलोद्देशाभावेन तज्जनकत्वानिर्वाहकापूर्वकल्पने प्रयोजनाऽभावेनैतस्य कर्मणोनष्टत्वेनाऽयमकर्मप्रवृत्तिनिमित्तमपि निरूपयितुमशक्यं॥ एतत्समाधानाय प्रवर्त्तकत्वं निवर्त्तकत्त्वंच विध्यादेरेव॥ तौ जानतामप्यप्रवृत्त्यनिवृत्तीतु विचित्रेश्वरेच्छयेति वाच्यं॥ एवमपि सत्यावश्यकत्वाल्लाघवाच्चेश्वरेच्छैव तथाऽस्तु कृतं ताभ्यां॥ एवश्चाऽन्धपरम्पराऽपि न सम्भवति ॥ ईश्वरेच्छाजन्यत्वात्॥दृश्यतेऽपि हि विधिमजानतोऽपि बालस्य नैसर्गिकी धर्मप्रवृत्तिः॥ एवमपि सति न निस्तारः॥ तथाहि॥ नहीश्वरः स्वतन्त्रपुरुषार्थत्वेन कर्म कारयिष्यति किन्तु स्वर्गादि साधयितुं॥ तथासति स्वस्यैतद्दाने समर्थत्वाद्विहितनिषिद्धफलोपपत्तौ विहितनिषिद्धयोर्यागब्राह्मणहननयोर्वैयर्थ्यापत्तिः॥ नचाऽकृताऽभ्यागमदोषपरिहाराय तथा करोतीति वाच्यं॥ स्वतोजीवस्य कर्तृत्वे हि तत्फलनिरूपणे सदोषोन स्यान्नतु तादृशं फलं दातुं तादृक् कर्मकारणे॥स्वतः सर्वथैवाऽसमर्थत्वाज्जीवस्य कृतमप्यकृतप्रायमिति न तत्परिहारइतीश्वराधीनं जीवकर्तृत्वं नोपपद्यतइतिचेत्तत्राह॥ कृतप्रयत्नापेक्षस्त्वित्यादि॥ अयमर्थः॥ एकोऽहंबहुस्यामिति प्रपञ्चेन रमणेच्छया हि भगवान् क्रीडार्थं कृतप्रयत्नः तदा क्रीडैव मुख्याऽन्यत्सर्वमुपसर्जनीभूतं॥तथाच तदपेक्षोभगवान् विचित्ररसानुभवार्थमेवं यः करिष्यति तमेवं करिष्यामीति स्वयमेव मर्यादां चकार॥ स्वकृतसेतुपरीप्सयेति धर्मसेतूनांवक्ताकर्त्ताभिरक्षितेत्यादिवाक्यश्रवणादेवमवसीयते॥ ततश्च स्वकृततद्रक्षणाय ज्ञापनाय च वेदं

स्वकार ॥ तथाच जीवोत्पादनसमयएवैनं जीवमस्मिन् देशेऽस्मिन् कालएतत्प्रयुक्तप्रवृत्तिनिवृत्तिमन्तं विधायैतदेतत्फलं दास्यामीत्यामोक्षं प्रतिजीवं विचारितवानिति तदनुसारेणैव ते तथा भवन्तीति ॥ एवंप्रकारेण कृतोयः क्रीडार्थं प्रयत्नउद्यमोजीवादिवैचित्र्यादिकरणेन तदपेक्षस्तदधीनएव कारयति भगवान् ॥ कुतएत् ॥ यतोयागादेर्विहितस्य प्रतिषिद्धस्य विप्रहननादेः स्वर्गनरकसाधनत्वेनाऽवैयर्थ्यमेवमेव भवेत्॥अन्यथेश्वरस्यैव कारयितृत्वे चोक्तन्यायेन तद्वैयर्थ्यं स्यात्॥आदिपदाद्विनाऽपि कर्मतत्फलदानमपिनातएव॥अतएव श्रुतिरपि कर्मकारणे फलदानेच्छामेव हेतुत्वेनानुवदति यमुन्निनीषत्यधोनिनीषतीति॥आचार्यास्तु यथा पुत्रं यतमानं बालं वा पदार्थगुणदोषौ वर्णयन्नपि तत्प्रयत्नाभिनिवेशं पश्यति तथैव कारयति फलदानार्थं श्रुतौ कर्मापेक्षाकथनात्फलदाने कर्मापेक्षः कर्मकारणे जीवकृतप्रयत्नापेक्षः प्रयत्ने तत्कामापेक्षः स्वर्गादिकामेच लोकप्रवाहापेक्षः कारयतीति न ब्रह्मणि दोषगन्धोऽपि ॥ नचैवमनीश्वरत्वं ॥ मर्यादामार्गस्य तथैव निर्माणत्वात् ॥ यत्र त्वन्यथा तत्र पुष्टिमार्गाङ्गीकारइत्याहुः ॥ अयमपि पक्षः स्वकृतमर्यादायाएव हेतुत्वेन कथनान्मर्यादाकरणे च क्रीडेच्छामृते हेत्वन्तरस्याऽसम्भवादस्मदुक्तान्नातिरिच्यते ॥ तस्मादस्मदुक्तएव मार्गोन त्वदुक्तः ॥ किञ्च क्रियापूर्वकालीनात्मधर्मस्यैव प्रयत्नशब्दार्थत्वेन वक्तुमुचितत्वान्नाधर्मधर्मौ तद्वाच्यौ ॥ किञ्च त्वदुक्तप्रकारे विधिनिषेधाऽवैयर्थ्यादिभ्यइत्येव स्यान्नतु विहितेत्यादीति दिक् ॥ १९ ॥ ॥ अथ येत्विमांशङ्कांपरि हर्तुमित्यादिर्विहितेत्यादीतिदिगित्यन्तएकोनविंशः खण्डः खण्ड्यते॥ ॥अ-

श्च यत्तट्टीकाकारेण कर्मापेक्षेश्वरस्य कारयितृत्वमतं पूर्वमीमांस-कानामित्युक्तं तत्तु भ्रमाज्जैमिनिनेश्वरस्याऽनङ्गीकृतत्वात् ॥ धर्म-न्तुजैमिनिरतएवेति सूत्रव्याख्यायां तद्गुरुणापि तथैव प्रलपितत्वा-त् ॥ तदीयग्रन्थमात्रे यतमानावस्तुतोप्यासोक्तिश्रद्धालवः परं मङ्गलाचरणमस्मद्रीत्या चरन्तीति बोध्यम् ॥ एवञ्च तेषाम-नीश्वरवादएवेत्येतद्व्याख्यायाम् कर्मसापेक्षेश्वरकल्पनापेक्षये-श्वराऽनपेक्षकर्मकल्पनस्य लघुत्वादिति हेतुकथनमपि टीका-कारस्य परास्तम् ॥ इष्टापत्तेर्मीमांसकैर्वक्तुंशक्यत्वात् ॥ मूल-स्यापि मीमांसकाभिप्रायेण प्रवृत्तौतु सएव दोषः ॥ कर्मापे-क्षफलदत्वमते यथा नानीश्वरवादप्रसक्तिस्तथोक्तं तृतीयश्लोक-व्याख्यायाम्॥तादृशस्यैव कर्मणइत्यत्र तादृशशब्देन यदि यथो-चितफलसमर्पणसमर्थमित्युच्यते तर्हिलोकविरोधो जडस्य तादृ-शतायालोकेऽभावात् ॥ कल्पनायादृष्टानुसारित्वनियमाच्च॥यदी-श्वराद्यतिरिक्तश्चेतनस्तर्हि नान्योऽतोऽस्तिद्रष्टेत्यादिश्रुतिविरोधः ॥ तस्मात्कर्मणईशप्रसादादिकं प्रति हेतुत्वमिति कल्प्यतेऽन्यथानुपप-त्त्येति न काप्यनुपपत्तिः॥फलमतउपपत्तेरिति सूत्रकारउपपत्तिपदं प्रयुञ्जानउपपत्तेरीदृशविषयत्वमूचे ॥ तादृशेशप्रसादादिना च प्रवृत्तिनिवृत्ती इति न विधिनिषेधवैयर्थ्यं॥प्रवर्तकपूर्वकर्मार्थं तदपे-क्षणात्॥तथाच पूर्वकर्मापेक्षामेवोत्तरकर्मप्रवृत्तिं भगवानाह स्वभा-वजेनकौन्तेयनिबद्धःस्वेनकर्मणा कर्तुंनेच्छसियन्मोहात्करिष्यस्य-वशोऽपितत् इति स्वभावस्तुप्रवर्त्तते इतिच ॥ स्वभावः पूर्वकर्म प्र-वर्तते प्रवर्त्तयति अन्तर्भावितणिजर्थः॥केषांचित्कर्मणां फलप्रयो-

जककर्मप्रत्येवहेतुत्वात् ॥ स्वविषयकविधिनिषेधशास्त्राभावे कर्मणोधर्माधर्मत्वयोरसिध्या फलप्रयोजकत्वाऽभावेनाऽप्रवर्त्तकत्वे निवर्त्तकत्वे च शास्त्रयोर्विधित्वनिषेधत्वयोरनुपपत्त्या स्वरूपमात्रस्याऽकिञ्चित्करत्वेन स्वज्ञानद्वारा विधेर्निषेधस्य च प्रवर्त्तकतायां निवर्त्तकतायां च तद्वैयर्थ्यमापादयितुमशक्यं ॥ बालानां केषांचित्पित्रादिवाक्यं तद्वाक्यप्रयोजकज्ञानहेतुशास्त्रं वा प्रवृत्तिनिवृत्तिकरं केषाञ्चित्तु संस्कारद्वारा पूर्वजन्मसञ्चितशास्त्रज्ञानं तथेति नदोषः ॥ मन्दानां कर्मणां सहायकमन्तरेण फलदातृत्वाभावाच्च विध्यादिज्ञानापेक्षा॥तथाहि ॥ त्रिविधानि खलु कर्माणि भवन्ति अत्युग्राण्युग्राणिमन्दानिच अत्युग्राणान्त्विहैव फलम् ॥ अत्युग्रपुण्यपापानामिहैवफलमश्नुते इति वाक्यात्॥उग्राणां त्वसति प्रतिबन्धके सहायमन्तरेण जन्मान्तरे तान्येव प्रारब्धपदवाच्यानि ॥ मन्दानां त्वितरसाहाय्येन फलदातृत्वम्॥अवश्यमेवभोक्तव्यं कृतंकर्मेतिवाक्ये कर्मपदेन प्रारब्धं गृह्यते ॥ अवश्यमित्यस्य सहायकाऽभावेऽपीत्यर्थः ॥ तथाच प्रारब्धानां कण्ठतोमन्दानामवश्यंपदोपादानेन सिद्धिरित्यन्यत्र स्पष्टम् ॥ तानिच पुनस्त्रिविधानि पुण्यपापयोः प्रवर्त्तकानि तत्र प्रवृत्तिप्रतिबन्धकानि भोगदानिच ॥ एवञ्च विधिनिषेधौ जानतामपि प्रवृत्तिनिवृत्त्यभावौ तु तत्तत्प्रतिबन्धककर्मप्रयुक्तेश्वरेच्छावशाद्वा पूर्वकर्माभावप्रयुक्तेश्वरेच्छाभावाद्वेति बोध्यम् ॥ लाघवन्त्विदमप्रयोजकं॥वैषम्यादिदोषयस्तत्वात् ॥ फलमुखस्य कल्पनागौरवस्यादोषत्वाच्च ॥ अन्यथा शून्यवादापत्तिरित्युक्तम् ॥ ईश्वरेच्छायाः प्रयोजकत्वेत्वन्धपरम्परैव ॥ विध्याद्यनपेक्षत्वात् ॥ बालेषु नैसर्गिकप्रवृत्तिदर्शनस्य त्व-

थैवोक्तत्वात् ॥ यत्तु जीवसृष्टिकाले कृतोयोमर्यादारूपोयत्नस्त-स्य सत्यत्वार्थं यागादिसाफल्यमित्युच्यते ॥ तन्न ॥ त्वदुक्तरीत्या फलस्याऽपि प्रतिजीवं तदैव विचारिततया कर्मणोऽकरणेऽपि त-त्सम्भवेन कर्मकरणविषयकेच्छायानिष्फलत्वात् ॥ इच्छामात्रेण कर्मणः फलं जायतइति त्वदुक्त्या सिध्यति ॥ तत्रच व्यतिरेका-भावे कर्मणोऽन्यथासिद्धिरेव दुग्धंप्रतिगोकर्णमूलस्येव ॥ ईश्वरे-च्छाभावेनैवफलाभावस्यसिद्धत्वात्॥वास्तवसूत्रार्थस्तु पूर्वमुक्तोऽ-वास्तवार्थोदूषितश्च॥तदधीनएव कारयतीत्युक्तव्यापारान्तरं निष्फ-लं पूर्वसंङ्केतेनैव सर्वसामञ्जस्यादीदृशव्यापारविषयापि तदानी-मिच्छाऽभूदित्यपि कल्पना व्यर्था गुर्वीच ॥ अस्मादपि त्वदुक्तसू-त्रार्थोन युक्तः ॥ अन्यथेश्वरस्येत्याद्यप्यसङ्गतम् ॥ अन्यथाऽपि सार्थकत्वस्योक्तत्वात् ॥ यमुन्निनीषतीत्यादिश्रुत्यर्थोप्युक्तःप्राक् ॥ एतेन साधनञ्चस्वरूपञ्चसर्वस्याहश्रुतिःफलम् नप्रवर्त्तयितुंशक्ता-तथाचेन्नरकंनहि इति निबन्धाद्युक्तं प्रत्युक्तम् ॥ आचार्यास्तु इ-त्युक्त्वा लिखिते ग्रन्थे पुत्रादिशब्दत्रयात्कथं द्वितीया ॥ वर्णयते-र्ब्रुवतिसमानार्थत्वाभावाद्दुह्याजित्यस्मिन्परिगणने भाष्ये याचेः पृथग्भिक्षेर्ग्रहणेनाऽर्थग्रहणस्याऽमूलत्वाच्च ॥ कथञ्च तथेवनिर्मा-णत्वादितिभावप्रत्ययसङ्गतिः ॥ अस्मिन्मते पुत्रादेः प्रयत्नाभिनिवे-शः किंकृतइति वक्तव्यम् ॥ यदीशकृतस्तर्हि अभिनिवेशकारणो-त्तरं कारणमितिसिध्यति ॥ नचेदृशंतन्मतस्वारस्यम् ॥ यद्यन्यकृ-तस्तर्हीश्वरस्य सर्वकर्त्तृत्वहानिः ॥ कामेच लोकप्रवाहाऽपेक्षइत्य-नेन किं लोकप्रवाहेण जीवस्य यः कामस्तं सउत्पादयतीत्युच्यते किंवा परमेश्वरोलोकप्रवाहं वीक्ष्य काममुत्पादयतीति॥नाद्यः॥लो-

कप्रवाहसत्त्वेऽपि विरक्तानां कामानुत्पत्तेस्तस्य तत्राहेतुत्वात्प्रमा-
णाभावाच्च ॥ नद्वितीयः॥तत्र लोकप्रवाहस्य हेतुत्वं प्रकल्प्य कर्म-
णोहेतुत्वबोधकानां दुर्दशाकरणापेक्षया कर्मणएव हेतुत्वकल्पना-
या उचितत्वात्सापेक्षताया अङ्गीकृतत्वात् ॥ किञ्चाऽस्मिन्मर्यादा-
मार्गे हेरेरनीश्वरत्वम् अमर्यादामार्गरूपपुष्टिमार्गईश्वरत्वम् इति
स्थितम् ॥ एवंचाऽन्यतरस्याप्रामाणिकत्वं वाच्यं ॥ वस्तुनिविक-
ल्पस्यायुक्तत्वात् ॥ एतत्पक्षस्य स्वोक्तादनतिरिक्तत्वप्रदर्शनप्रया-
सोऽप्यनुपपन्नः ॥ स्वकृतमर्यादायास्तत्पक्षे हेतुत्वाकथनात् ॥ लो-
कप्रवाहपर्यन्तमेवतद्भ्रमणदर्शनात् ॥ लोकप्रवाहशब्देन मर्यादाग्र-
हणेतु श्लाघ्यं व्याख्याकौशलम् ॥ क्रीडेच्छायाअहेतुत्वम् अति-
रिक्तस्यच हेतुत्वमुक्तंप्राक् ॥ अदृष्टं नास्माभिरिष्यते इत्युक्तम् ॥
प्रयत्नशब्देन व्यापारविशेषोगृह्यते सोऽपि नात्मधर्मइत्यास्तां तावत्॥
अस्मन्मतेच कर्मणां हेतुत्वमिति विहितप्रतिषिद्धावैयर्थ्यादिभ्यइ-
ति सङ्गतम् ॥ विहितत्वादेस्तेषुसत्वात् ॥ इत्येकोनविंशखण्डखण्ड
नम् ॥ १९ ॥ ॥ ननु जीवानां नित्यभिन्नानामेव चेतनत्वाद-
णुत्वेनैकदेशस्थायित्वेन चांशत्वमौपचारिकमेवेतिचेत्॥मुख्येसम्भ-
वति गौणस्यान्याय्यत्वात्॥सूत्रकृतांऽशत्वप्रसक्तदूषणपरिहारानुप-
पत्तिश्च॥जीवानां स्वतन्त्रभिन्नत्वेचैकविज्ञानेन सर्वविज्ञानप्रतिज्ञा-
ऽनुपपत्तिः॥नच योगजधर्मप्रत्यासत्तिवत्तत्त्वज्ञानजनितालौकिक-
धर्मेणैव सर्वज्ञत्वोपपत्तिरिति वाच्यं॥यथासौम्यैकेनमृत्पिंडेनसर्वंमृ-
ण्मयंविज्ञातंस्यादित्यादिश्रौतदृष्टान्तानुपपत्तेः ॥ सदेवसौम्येदमग्र-
आसीदितिश्रुतिविरोधश्च ॥ ननु नात्माश्रुतेर्न्नित्यत्वाच्चताभ्यइ-
तितत्त्वसूत्रविरोधः ॥ एतदर्थस्तु आत्मा जीवोनोत्पद्यते कुतः अ-

श्रुतेः देवदत्तोजातइति देहोत्पत्तिरेवश्रूयते नात्मनः ॥ किञ्च नित्यत्वादपि नोत्पत्तिर्जीवस्य संभवति ॥ कुतोऽस्यनित्यत्वं तत्राह ॥ ताभ्यः श्रुतिभ्यः इतीतिचेत् ॥ अत्रेदं प्रतिभाति ॥ यथाग्नेःक्षुद्रा इत्यादिश्रुतीर्विचारयन्स्वयमेव जीवस्यांशत्वमुक्त्वा यत्पश्चादुत्पत्तिं निषेधति सूत्रकारः तेन विस्फुलिङ्गन्यायेन जीवस्य व्युच्चरणं नोत्पत्तित्वेन सूत्रकारस्याऽभिमतं॥तदा परिच्छिन्नस्य शरीरस्याऽभावेन तस्मिन् जीवाऽऽगमनस्याऽप्यभावोनोत्पत्तिस्वरूपाभावात्॥तदुक्तमनित्येजननंनित्येपरिच्छिन्नेसमागमः नित्यापरिच्छिन्नतनौप्राकट्यंचेतिसात्रिधेति॥तथाचानित्यानां प्राणादीनां प्रादुर्भावएवोत्पत्तिरिति तेषामेवोत्पत्तिरुक्ता ॥ जीवानां ब्रह्मणः सकाशाद्विभागे तदंशत्वेच वाच्ये तद्बोधत्वं जानन्ती श्रुतिरंशत्वमंशिनः सकाशाद्विभागवत्त्वमंशिनोंऽशान्महत्त्वं पुनरंशस्यांऽशिनि प्रवेशयोग्यत्वं प्रवेशे सत्यभेदप्रतीतिविषयत्वं पुनर्निर्गमनयोग्यत्वं चाऽग्निविस्फुलिङ्गे प्रसिद्धमिति सर्वधर्मबोधसौकर्यार्थमग्निविस्फुलिङ्गदृष्टान्तेनोक्तवती॥प्रकृतेऽप्येवं दृश्यते जीवाद्ब्रह्मणोमहत्त्वं॥तदुक्तमधिकन्तुभेदनिर्देशादिति॥पुनःप्रवेशश्चोच्यते ब्रह्मैवसन्ब्रह्माप्येति॥ब्रह्मभावश्च भगवदुक्तसाधनकरणेन संतुष्टाद्भगवतः आनन्दप्राकट्यात्स्वगुणरूपैश्वर्यादिप्राकट्याच्चेति ज्ञेयं ॥ इदमेवोक्तमस्मिन्नस्यचतद्योगंशास्तीतिसूत्रेण ॥ अर्थस्तु अस्मिन्नानन्दमये ब्रह्मण्यस्य जीवस्य तद्योगं तद्रूपस्य योगं ब्रह्मभावापन्नस्य प्राप्तिं वदति फलत्वेनेति ॥ इदमेव ब्रह्मभूतःप्रसन्नात्मानशोचतिनकांक्षति समःसर्वेषुभूतेषु इत्याद्युक्त्वा भक्तिलाभाऽनन्तरं विशतेतदनन्तरमित्युक्तं विजयरथकुटुम्बेन श्रीदेवकीपुत्रेण ॥ प्रवेशाऽनन्तरमभेदप्रतीतिम-

पि श्रुतिराह ॥ तथाहि ॥ सर्वेषां भगवत्येव लयः साक्षात्परम्पराभेदेनाऽतोमोक्षस्थानं भगवानेवेतिनिरूपणार्थं यथासर्वासामपां समुद्रएकायनमित्युपक्रम्य वागेकायनमित्यन्तदृष्टान्तार्थं निरूप्य यथासैंधवखिल्यउदकेप्रास्तउदकमेवानुलीयेतेत्यादिना च लये दृष्टान्तं निरूप्य विज्ञानघनएवैतेभ्योभूतेभ्यःसमुत्थायतान्येवानुविनश्यतिनप्रेत्यसंज्ञास्तीति लयं निरूप्य तन्निरूपणार्थं यत्रहिद्वैतमिवभवतितदितरइतरंपश्यतीत्युपक्रम्य विज्ञातारमरेकेनविजानीयादित्यन्तेन लयाऽवस्थायां लीनस्य स्वस्मिन्नस्य भगवतोभिन्नत्वेन प्रतीतिराहित्यं न्यरूपयत् ॥ इममेवार्थं सूत्रकारोप्याह गतिसामान्यादिति ॥ गतिर्मोक्षः ॥ समानस्य भावः सामान्यं तस्मात् ॥ मोक्षे जीवब्रह्मणोरभिन्नत्वेनैव निरूपणादित्यर्थः ॥ तेनाऽऽदिमध्याऽवसानेषु शुद्धब्रह्मणएवोपादानत्वात्सर्वेषां वेदान्तानां ब्रह्मणि समन्वयइति तत्र फलितं॥स्वाऽवतारसमये क्रीडार्थं साक्षाद्योग्यास्तएव भवन्तीति तानप्यवतारयतीति पुनर्निर्गमनयोग्यत्वं ॥ इदमेव मुक्तोपसृप्यव्यपदेशादितिसूत्रेणोक्तं ॥ नच नसपुनरावर्त्तते अनावृत्तिःशब्दादिति श्रुतिन्यायविरोधः ॥ एतस्य प्रमाणमार्गपरत्वात् ॥ इदंच पुष्टिमार्गाऽङ्गीकारे भगवान् करोति ॥ नोचेन्मर्यादायां प्रवेशपर्यन्तत्वमेव ॥ तस्याऽतिशयिताऽनुग्रहविशेषमात्रसाध्यत्वेनाऽतिदुर्लभत्वात् ॥ तदुक्तं ॥ भगवान्भजतांमुकुंदोमुक्तिददातिकर्हिचित्स्मनभक्तियोगमिति ॥ किञ्च संसारे ऽपुनरावृत्तिमाह श्रुतिः ॥ नहि तेषां ततः संसारः ॥ मुक्ताअपि लीलाविग्रहं कृत्वाभजन्तइति वाक्याच्च॥सच चिरकालाप्तसमुदितप्राचीननिरतिशयितकृपाफलसारनिरुपधिजचरणकमलानुरागविलासाभिलाषबीजासु त-

तोनिजपरिजननिरोधतःप्रियाऽवलोकननिमित्तंकृतप्रतिक्षणविविधव्याजजनितगतागतकर्षितासु ततोदिवाप्रियवनगमनजनितविरहतरणितापतातप्यमानांतःकरणकेदारासु ततोनिशामुखेप्रियागमनसंपन्नेष्टावलोकनसिंचनजनितहसितचलितविशदतरलरुचिरविलोचनयुगलविदितविविधनिरवधिरसभावाङ्कुरासु ततोऽतिविपुलकलिंदजापुलिननभोवलयाऽऽगतनिजमुरलिकाकलनिनदगर्जिताऽऽनन्दितास्वेव कासुचिद्भूमिषु श्रीमन्नन्दराजकुमारनवजलदोनिजानन्दसुधां ववर्षेति तथैव सर्वत्र वर्षिष्यतीति न ज्ञातुंशक्यमतोमर्यादया तद्भजनमेव सर्वेषां कर्त्तव्यत्वेन स्थितं तेनैव सर्वमिति दिक् ॥ एतच्च दशमस्कन्धविवरणे मृत्साभक्षणवरदानार्थागमनादिस्थलेषु पितृचरणैरेव स्फुटं निरूपितमित्यलं विस्तरेण ॥ यद्वा जीवत्वादिवदंशत्वमपि पृथग्धर्मोजीवे निरूप्यतइति श्रुत्यादौ नाऽनुपपत्तिः काचित् ॥ २० ॥ ॥ अथ ननुजीवानामित्यादिर्नानुपपत्तिःकाचिदित्यन्तोविंशः खण्डः खण्ड्यते ॥ ॥ तत्र सूत्रकारेण तु प्रकाशादिवन्नैवंपरः स्मरन्तिच अनुज्ञापरिहारौदेहसम्बन्धाज्ज्योतिरादिवदितिसूत्रैर्योदूषणस्य परिहारः कृतः स नांशत्वेन प्राप्तस्य किन्त्वभिन्नतया प्रसक्तस्य ॥ अभेदश्च नांऽशत्वेन संभवतीति विस्फुलिङ्गानां वन्ह्यभेदोविभागात्पूर्वंपरंवेति विकल्प्य दूषितम्प्राक् ॥ सूत्रत्रयार्थस्तु यथाजीवोऽविद्यावेशवशाद्देहाद्यात्मभावमिव गत्वा तद्दुःखेन दुःख्यहमिति मन्यते नैवं परोऽविद्यावेशाद्यभावात् ॥ यथावियद्यापिसूर्यादिप्रकाशोङ्गुल्याद्युपाधिसम्बन्धादृजुत्वादिभावमापन्नोऽपि वस्तुतस्तद्भावं नाऽऽपद्यते ॥ स्मरन्तिच व्यासादयः परमात्मनोदुःखायमानत्वाऽभावं ॥

तत्रय:परमात्माहिसनित्योनिर्गुण:स्मृत: नलिप्यतेफलैश्चापिपद्मप-
त्रमिवाम्भसेति ऋतौभार्यामुपेयात् गुर्वङ्गनांनोपगच्छेदित्यादयो-
ऽनुज्ञापरिहारशब्दवाच्या: देहादिसम्बन्धोऽविद्याकृतदेहादितादा-
त्म्याध्यासस्तस्मात् यथाऽग्निसूर्यादेरेकत्वेऽपि श्मशानाद्यमेध्यादि-
सम्बन्धिनः परिहारोनेतरस्यैवमिति ॥ यथाऽग्नेरित्यादिश्रुत्या नां-
ऽशत्वं बोत्ध्यते किन्तूपाधिनिर्गमादाविर्भावइत्युक्तम् पूर्वम् ॥ जी-
वस्य व्युच्चरणं नोत्पत्तिरितितु न सङ्गतम् ॥ व्युच्चरन्तीत्येकस्यैव-
पदस्य सर्वत्र सम्बन्धेनप्राणादिषुवैलक्षण्याङ्गीकारस्याऽनुपपत्तेः ॥
तस्यपदस्याऽऽवृत्तौ लक्षणायां वाक्यभेदे च गौरवात् ॥ प्राणादि-
ष्वपि तथाऽङ्गीकारे वैलक्षण्योपपादनं व्यर्थं स्यादित्युक्तं प्राक् ॥
तदुक्तमित्यादिस्वोक्तिविरोधश्च॥अस्माकन्तु श्रुत्यर्थस्सर्वत्र समान-
एव॥पाश्चात्त्योबोध आत्मांशे औपाधिकोत्पत्तिविषयः॥शाखान्त-
रे तत्पाठाभावादिनेत्युक्तम् ॥ यत्तु टीकाकारः सदंशानांजडानां
स्वरूपान्यथाभावादनित्यत्वव्यवहारः चिदंशानां जीवानां तु ध-
र्ममात्रान्यथाभावान्नित्यत्वमित्याह॥तन्न॥मूलोक्तरीत्या पृथगंशत्व-
कथनस्य निर्मूलत्वात्॥जडस्वरूपान्यथाभावे तदभिन्नस्य सतस्त-
दभिन्नाभिन्नस्य जीवस्य च तथात्वापत्तेः॥धर्मधर्मिणोर्भेदे माना-
भावेन जीवानामपि स्वरूपान्यथाभावस्य दुष्परिहरत्वात् ॥ कि-
ञ्च सुवर्णस्य निर्विकारत्वपरस्वस्वजनस्वगुरुवचनविरोधः ॥ जीव-
विभागस्तु ब्रह्मणः परिच्छिन्नत्वं गमयेत् ॥ विभागोहि अपादान-
रहिते देशे गमनं तच्च विभुत्वे न सम्भवति ॥ खात्खगोविभक्त-
इत्यप्रतीतेः ॥ प्रदेशभेदेन तत्कल्पने तु श्रुतिः क्वापि प्रदेशवाचकं
पदमुपादद्यात् ॥ किञ्चैवं विभागस्यौपचारिकत्वं दुर्वारम् ॥ द्रवि-

इप्राणायामस्य सुबोधत्वं स्पष्टोक्तेर्दुर्बोधत्वं वदंस्तूपहास्यएव ॥ अधिकन्तुभेदनिर्देशादित्यस्य त्वयमर्थः ॥ सोऽन्वेष्टव्यःसविजिज्ञासितव्यइत्यादिरूपात्कर्त्तृकर्मादिव्यपदेशरूपाद्भेदव्यपदेशाद्यदधिकमल्पज्ञत्वादिधर्मकाज्जीवादुत्कृष्टं मायोपाधिसम्पादितसर्वज्ञत्वादिविशिष्टं तज्जगत्कर्त्रीति ॥ इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिरिति पूर्वसूत्रेणेतरस्य जीवस्य ब्रह्मात्मत्वव्यपदेशाद्ब्रह्मणश्च जीवात्मत्वव्यपदेशात्तयोरभेदे ब्रह्मणः कर्त्तृत्वेऽपि जीवस्य कर्त्तृत्वपर्यवसानात्तस्य स्वहिताकरणमहितकरणं च दोषः प्रसज्यतइत्यर्थकेन पूर्वपक्षपरेण पूर्वसूत्रेणाऽभेदव्यपदेशादेव दोषप्रसक्तेरुक्तत्वात् ॥ तथाचाऽभेदेऽपि मायिकभेदसत्त्वात्तत्त्वेनचोत्कर्षरूपाधिक्यसत्त्वात्तत्कर्तृ नतु जीवउत्कर्षाऽभावात् इति भावः॥ तथाचाऽधिकशब्दस्य परिमाणाधिक्यपरत्वाभिप्रायेण महत्त्वपरत्ववर्णनमसङ्गतम् ॥ अस्मदर्थसमानार्थपरकतद्रूक्तिविरुद्धञ्च॥अधिकशब्दवन्महच्छब्दस्याऽप्युत्कृष्टार्थकत्वेतु दृष्टान्तेऽनुत्कृष्टाग्नेरप्युत्कृष्टविस्फुलिङ्गदर्शनेनाऽभिमताऽसिद्धिः ॥ अपीतिर्गमनार्थकोनतु लयत्वेनाऽभिमतोयः प्रवेशस्तदर्थकोऽकर्मकतापत्तेः ॥ दृष्टान्ते तथोक्तिस्त्वसङ्गतैव ॥ पुनरपादानेनावयवावयविभावानुत्पत्तेः ॥ दार्ष्टान्तिकेतु त्वद्रूक्त्या स्यात् ॥ भगवदुक्तसाधनं यदि ज्ञानं तर्हि न विरोधस्तमेवविदित्वाऽतिमृत्युमेतीति श्रुतेः ॥ यद्यन्यत्तर्हि नान्यःपन्थाविद्यतेयनायेतिश्रुतिविरोधः ॥ सन्तुष्टाद्भगवतइत्यादितु क्रममुक्तौ स्यान्नतु कैवल्ये मानाभावात् ॥ नप्रियाप्रियेस्पृशतइत्यादिश्रुतिविरोधाच्च ॥ अस्मिन्नस्यचेतिसूत्रे तद्रूपस्य योगं ब्रह्मभा-

वापन्नस्य प्राप्तिमित्यत्र यदि तवाऽपि नइव ब्रह्मप्राप्तिरित्येवार्थः कथंचित्सम्मतस्तर्हि न दोषः ॥ यदि पूर्वं ब्रह्मभावोभवति पश्चात्प्राप्नोतीत्यर्थस्तर्हि निर्मूलं गौरवम् ॥ विशतेइत्यस्याभेदं गच्छतीत्यर्थो ब्रह्माप्येति पुरुषमुपैतिदिव्यमित्यादिश्रुतेः ॥ दृष्टान्ते प्रवेशानन्तरमपादानेनाभेदप्रतीतिर्नास्त्येव ॥ समानाभिहाराद्भेदाऽप्रतीत्या कस्यचिदभेदभ्रमः स्यात् ॥ दार्ष्टान्तिकेत्वभेदइष्टोनतु तथा प्रतीतिर्नवा प्रवेशेन पौर्वापर्यं ॥ मानाऽभावात् ॥ भिन्नत्वेन प्रतीतिराहित्यंत्विष्यतएव ॥ विज्ञातारमरेकेनेतिश्रुत्याऽपि प्रतीत्यभावएवोक्तोनतु अभेदप्रतीतिरपि ॥ उक्तश्च त्वयापि भिन्नत्वेन प्रतीतिराहित्यं न्यरूपयदिति ॥ तथाच पूर्वापरविरोधः ॥ पूर्वप्रतिज्ञातार्थोपपादनाय तथाहीत्युपपादनस्यासङ्गतिश्च॥इममेवार्थमित्यायुक्त्वा सूत्रोपन्यासोऽपि प्रतिज्ञाविरोधापादकः ॥ सामान्यपदस्य तत्र तुल्यतार्थत्वात्तुल्यत्वस्य भेदघटितत्वात् ॥ नच समानाधिकरणादिष्विवाऽत्राऽपिसमानशब्दस्यैकार्थकतया सामान्यशब्दस्य न तुल्यतार्थतेति वाच्यम् ॥ मोक्षे सर्वस्याऽपि भगवताऽपि तुल्यत्वादिति तत्सूत्रस्थस्वगुरूक्तिविरोधात् ॥ एवं त्वन्मते त्वद्गुरूक्तसप्तमीसमासोऽपि दुर्लभः ॥ सप्तमीतियोगविभागस्याऽनाकरत्वात् ॥ भगवतेत्यनेन साकाङ्क्षतयाऽसामर्थ्याच्च ॥ तस्माद्गतेर्ज्ञानस्य सामान्यं तुल्यता तस्मादित्यक्षरार्थः सूत्रस्य ॥ समानैवहि सर्वेषु वेदान्तेषु चेतनकारणावगतिः ॥ यदि तार्किकसमयइव वेदान्तेष्वपि भिन्ना कारणावगतिरभविष्यत्तदा प्रधानकारणवादाऽनुरोधेनाऽपि सृष्टिश्रवणमभविष्यदितिभावः ॥ ब्रह्मणोजीवोपादानत्वोक्तिस्त्वसङ्गतैवोभयोरनित्यत्वापत्तेः ॥ नजायतेम्रियतेवा इत्यादिश्रुतिस्मृतिवि-

रोधाच्च ॥ क्रीडार्थं तानवतारयतीति न युक्तं ॥ क्रीडायाअसम्भवस्योक्तत्वात् ॥ अवतारसमयइव सर्वदा ईश्वरस्य त्वन्मते क्रीडायाः सत्त्वेन संसाराऽविनिवृत्तिप्रसङ्गाच्च ॥ अवतारसमये निर्गतानां न संसारइत्यत्र मानाभावेन नसपुनरावर्त्तते अनावृत्तिःशब्दादित्यादिश्रुतिसूत्रादिविरोधाच्च ॥ मर्यादामार्गपराणि तादृशश्रुत्यादीनि नतु पुष्टिमार्गपराणीति त्वसङ्गतं ॥ तादृशमार्गभेदस्य तादृशव्यवस्थायाश्च निर्मूलत्वात् ॥ एवञ्च चतुर्थाऽध्यायस्थतादृशव्यवस्थापरत्वद्रुरूक्तिरपि निर्मूला ॥ किञ्च मुक्तोपसृप्यव्यपदेशादित्यत्र निस्सरणं कस्य शब्दस्याऽर्थोयतस्तत्सूत्रं निर्गमने प्रमाणतयोपन्यस्यते ॥ तदर्थस्तु मुक्तैर्नामरूपविमुक्तैरुपसृप्यं यत्तस्य व्यपदेशादिति ॥ यस्मिन्द्यौःपृथिवीत्यादिद्युभ्वाद्यायतनत्वोक्तिप्रकरणे तथा विद्वान्नामरूपाद्विमुक्तःपरात्परम्पुरुषमुपैतिदिव्यमित्युक्तं ॥ नच मुक्तोपसृप्यत्वं प्रधानादीनां प्रसिद्धमिति मुक्तोपसृप्यव्यपदेशान्न द्युभ्वाद्यायतनं प्रधानं किन्तु ब्रह्मेत्युक्तं ॥ एवञ्चात्र कथं निर्गमप्रतिपादनम् ॥ मुक्त्यपेक्षया भक्तेराधिक्यं तु प्राङ्निराकृतम् ॥ यदिच मुक्ताअपि लीलाविग्रहं कृत्वा हरिं भजन्तइत्येतादृशार्थे तात्पर्यवक्ताऽपि वाक्यं लभ्येत प्रक्षिप्तत्वं च तत्र न निश्चीयेत तर्हि तन्क्रममुक्तिपरं ज्ञेयम् ॥ कैवल्यमुक्तौ अशरीरंवावेत्यादौ शरीरत्वावच्छिन्नाऽभावबोधनात् ॥ एतेन सचेत्यादि दिगन्तं प्रत्युक्तम् ॥ प्रमाणाभावाच्च ॥ किञ्च यथाऽग्नेरितिश्रुतौ स्वकपोलकल्पितैरंशत्वविभागवत्त्वादिभिर्धर्मैः साधर्म्यं विस्फुलिङ्गजीवयोरिष्टमिति यत्त्वयोच्यते तन्नयुक्तं ॥ व्युच्चरणरूपसमानधर्मस्योपात्तत्वादित्युक्तम्प्राक् ॥ अन्यथा प्राणादेरपि तदापत्तेस्त-

स्माज्जीवानां ब्रह्मणः सकाशादित्यादिर्विस्तरेणेत्यन्तोग्रन्थः प्रला-
पएव ॥ जीवस्यांशत्वं श्रुतौ क्वापि नपठ्यते ॥ किञ्च यदि धर्मवि-
शेषः स तर्हि जीवस्य ब्रह्मणा कः सम्बन्धइति प्रश्नोनोद्धृतइति
व्यर्थः श्रमः ॥ किञ्च तादृशधर्मोविभुत्वादिसत्त्वेऽपि स्यादिति
सर्वंविप्लुतम् ॥ इति विंशखण्डखण्डनम् ॥ २० ॥ ॥ ननु पूर्णे
पुरुषोत्तमे जीवस्य प्रवेशोऽशक्यनिरूपणः ॥ सहि बहिःस्थस्या-
ऽन्तर्गमनरूपः तस्यच परिच्छिन्नएव पदार्थे सम्भवः ॥ तथाच ब्र-
ह्मणोऽपरिच्छिन्नत्वात्तदसम्भवइतिचेत्॥हन्तैवं विभागांशत्वादिक-
मप्यशक्यनिरूपणं जीवस्य ॥ तत्तु श्रुतिन्यायाभ्यां निर्णीयतइ-
तिचेत् तुल्यं ॥ वस्तुतस्तु यथा सर्वतः पाणयः पादाः अन्ताश्च श्रु-
त्या ब्रह्मणि निरूप्यन्ते तथा प्रवेशनिर्गमोक्त्यान्तस्त्वबहिष्ट्वे अपि
तत्र स्तइति मन्तव्यं एवंसति यथेमे तथा प्रवेशनिर्गमौ अपि इति
नोक्ताऽनुपपत्तिः ॥ किञ्च उपाधिपक्षे प्रवेशः सुतरामसङ्गतः ॥ त-
दोपाधेर्नाशाङ्गीकारात्कस्य प्रवेशः स्यात् ॥ ननु प्रवेशं निरूपय-
ति श्रुतिरिति सत्यं परमेतद्वाक्यार्थबोधएव न सम्भवति अयो-
ग्यताज्ञानादिति चेत् ॥ अत्रेदंविचार्यते ॥ दोषोहि शब्दगतः श्रो-
तृगतोवा भवेत् ॥ अत्रच शब्दस्याऽदुष्टत्वाच्छ्रोतृगतएव स वाच्यः
तथाचापगताविद्यानां ब्रह्मविदामेवाऽनुभूतिविषयमुपदेशैकसम-
धिगम्यं ब्रह्म निरूपयन्तीश्रुतिरविद्यावलिप्ताऽल्पबुद्धीनां ग्रहणा-
ऽसामर्थ्येनाऽयोग्यताज्ञानेन नान्यथयितुं शक्या ॥ नह्युपदेशैकग-
म्यं हीरकमन्त्रादेर्माहात्म्यं साधारणजनाऽनुभवाविषयइत्युपासि-
ततद्गुरूणामप्यविषयः॥नवा पित्तदूनरसनेन्द्रियस्येदंप्रथमतया सि-
तां भक्षयतः सितामिष्टेति वाक्ये अयोग्यताज्ञानं वाक्यार्थमन्य-

थयितुमीष्टे॥ नवा तस्यैव दोषापगमे सति अयोग्यताज्ञानसम्भवस्तत्र ॥ अतएव आचार्यवान्पुरुषोवेदेतिश्रुतिः॥ अतोयथाश्रुतमेवमन्तव्यं॥ अतएव सूत्रकारोऽपि जगति ब्रह्मणउपादानत्वे कृत्स्नप्रसक्त्यादिशङ्कापरिहाराय श्रुतेस्तु शब्दमूलत्वादित्याह ॥ ॥ २१ ॥ ॥ अथ ननु पूर्णइत्यादिः शब्दमूलत्वादित्यन्त एकविंशः खण्डः खण्ड्यते ॥ ॥ विभागादिकं सर्वं जीवस्याऽनुपपन्नमित्युक्तम्॥ सर्वतःपाण्यादयउपाधिना ज्ञेयाः प्रवेशस्त्वभेदापत्तिर्निर्गमस्तु नास्त्येवेत्यप्युक्तम्॥ अतोऽन्तस्त्ववहिष्ट्वेच निर्मूले॥ किञ्च पूर्णत्वेऽपि अन्तर्बहिर्भावोगुरुवाक्येन प्रमाणानां विरोधानङ्गीकारेण यथाऽङ्गीक्रियते तथाऽन्तस्त्वाद्यभावेऽपि प्रवेशनिर्गमावपि स्वीकुरु त्यज वान्तस्त्वादिकल्पनावृथाप्रयासम्॥ किञ्चाप्रवाहविशेषादिरूपेदूदन्तादिशब्देषु नदीव्यवहारवदपरिच्छिन्नरूपे ब्रह्मणि अन्तस्त्वादिव्यवहारस्ते परिभाषाप्रयुक्तः स्यात्॥ आचार्योपदेशात्प्राक्कविद्यायाः सत्त्वाच्छाब्दानुपपत्तिस्तदवस्थैव॥ वाधज्ञानस्य शाब्दप्रतिबन्धकत्वात्॥ हीरकादिषु तु अज्ञानमेव नतु वाधज्ञानम्॥ स्थलान्तरदृष्टसहचारज्ञानस्य व्यभिचारशङ्कयाऽननुमापकत्वात्॥ सितामाधुर्यमपि त्वदुक्तविधेन शब्देन ज्ञातुं न शक्यम्॥ पश्चात्तु तस्य तत्र प्रत्यक्षं न शाब्दमिति नाऽनुपपत्तिः॥ दोषोहिशब्दगतइत्यादिः सम्भवस्तत्रेत्यन्तोग्रन्थो यजमानः प्रस्तरइत्यादौ लक्षणादर्शनाद्दुष्टइत्यसकृदवोचाम॥ आचार्यवान्पुरुषोवेदेति तु श्रवणाद्यङ्गतया गुरूपसत्तिं विधत्ते नतु ब्रह्मज्ञानाऽसाधारणकारणतया॥ स्वीकृताऽऽचार्याणामपि तज्ज्ञानाऽदर्शनात्॥ आत्मावाअरेद्रष्टव्यःश्रोतव्यइत्यनेन आत्मज्ञानमुद्दिश्य श्रवणादे-

रुपदेशाच्च न गुरूपसत्तिमात्राज्ज्ञानं॥ तन्त्वौपनिषदम्पुरुषमित्या-
दिश्रुतिविरोधाच्च ॥ श्रुतेस्त्वित्यस्यायमर्थः॥ उपाधितोजगत्कार-
णमपि ब्रह्म वस्तुतोनिरवयवं श्रुतेर्निरवयवत्वबोधकश्रुतेः॥ ब्रह्म-
णःशब्दमूलत्वात् शब्दमूलकत्वादित्यर्थः ॥ एतदेव भगवत्पादै-
र्विस्तरेणोपपादितं शारीरकमीमांसायां॥ यत्तु एतत्पित्रा तत्रत्यग्र-
न्थस्य स्वमत्युद्भावितत्वं प्रोक्तं तत्तु श्रौतमर्यादानभिज्ञानात् श्रौत-
सिद्धान्तानभिज्ञानाच्च॥अतएव गालिमात्रदानं कृत्वा विरराम न-
तु किञ्चिद्दूषणमुक्तवान्बुद्धिदौर्बल्यात्॥दृश्यन्तेहि दुर्बलबुद्धयोबालाः
पराजितागालिप्रदानमेव कुर्वन्तइत्यलम् ॥ इत्येकविंशखण्डखण्ड-
नम्॥२१॥ ॥ननु प्रवेशकथने जीवस्य व्यापकत्वव्याहतिरितिचेत्॥
हन्तैवं शशस्याऽपि निजशृङ्गभङ्गभिया तनूदरकन्दराऽप्रवेशः॥यतो-
ऽणुरेव जीवः॥कुतएतत् श्रुतितएव॥तथाहि॥आराग्रमात्रोह्यवरोपि-
दृष्टः बालाग्रशतभागस्यशतधाकल्पितस्यतु भागोजीवःसविज्ञेयः-
सचानन्त्यायकल्पते एषोऽणुरात्माचेतसावेदितव्योयस्मिन्प्राणःप-
ञ्चधासंविवेशेत्यादिभ्यः॥स्यादेतत्॥नाणुर्जीवोवक्तुं युक्तः श्रुतिस्मृ-
तिविरोधात्॥ तथाहि ॥ सवाएषमहानजआत्मायोयंविज्ञानमयः
प्राणेषु आकाशवत्सर्वगतश्चनित्यः नित्यःसर्वगतःस्थाणुरित्यादिषु
व्यापकत्वश्रवणात् तत्त्वमसीत्यादिभिर्ब्रह्माभेदनिरूपणाच्च ॥ न-
हि तत्त्वतोऽणोर्व्यापकाऽभेदः सम्भवति॥किञ्च जीवस्याऽणुत्वे स-
र्वशरीरगतचैतन्यानुपलम्भप्रसङ्गः॥नच यथैकदेशस्थचन्दनबिन्दु-
शैत्योपलम्भः सकलशरीरव्यापकतया भवत्येवमेकदेशस्थजीव-
चैतन्योपलम्भोऽपीतिवाच्यं॥ दृष्टान्तएकदेशस्थायित्वस्य प्रत्यक्ष-
तोनिश्चितत्वेन दार्ष्टान्तिकेच सन्दिग्धत्वेनोभयोर्वैषम्यात् ॥ नच

सर्वशरीरव्यापिचैतन्यं स्वधर्म्यधिकदेशवृत्ति विसर्पिगुणत्वात् शरीरैकदेशस्थचन्दनजन्यसर्वशरीरव्यापिशैत्यवदित्यनुमानेनाऽणुत्वं साधयितुं शक्यं ॥ हेत्वसिद्धेः साध्याऽविशिष्टत्वाच्च ॥ एकदेशवृत्तित्वे सिद्धे जीवस्य चैतन्यस्य विसर्प्पिगुणत्वसिद्धिः तस्मिन् सिद्धे च तत्सिद्धिरित्यन्योन्याश्रयाच्च ॥ चन्दनसूक्ष्मावयवानां सर्वदेहप्रसर्पणेनापि शैत्योपलम्भसम्भवेन दृष्टान्तासिद्धेश्च ॥ एतेनैव चम्पकगन्धोऽपि प्रत्युक्तः ॥ नहि गुणिनं विना गुणसंभवः ॥ अतिप्रसङ्गात् ॥ चम्पकदेशाधिकदेशे गन्धग्रहस्तु तदवयवानामपि वायूपनीतानां तत्रसत्त्वेन ॥ नचैवं तन्नाशापत्तिः ॥ भोग्यादृष्टेनैव तदवयवपूरणसंभवात् ॥ अन्यथाऽनुपपत्तेर्बलिष्ठत्वात् ॥ दृष्टाऽसंभवे सत्यदृष्टकल्पनायान्याय्यत्वात् ॥ नच मणिप्रभावत्तदुपपत्तिः ॥ तस्यास्तज्जातविरलसजातीयद्रव्यान्तरत्वात् ॥ एतेनैव प्रदीपसूर्यादयः प्रत्युक्ताः ॥ श्रुतावणुत्वनिरूपणं तु दुर्विज्ञेयत्वाऽभिप्रायं ॥ तस्मान्नाणुर्जीवः ॥ अत्रवदन्ति ॥ तत्त्वसूत्रानुसारेण वेदार्थस्यनिरूपणे ॥ जीवोऽणुरेवसंसिध्यत्यन्यथात्वन्यथैवहि ॥ भवेदेतदेवं यदि सवाएषमहानित्यादिभिर्जीवोनिरूप्यते ॥ तदेवतु न संभवति ॥ ब्रह्मप्रकरणे पठितत्वात् ॥ अतोबादरायणोप्याह ॥ नाणुरतच्छ्रुतेरितिचेन्नेतराधिकारादिति ॥ नचैवं सकलशरीरगतचैतन्योपलम्भानुपपत्तिः ॥ चम्पकगन्धवदेवोपपत्तेः॥नच गुणिनं विना गुणाऽसंभवान्नैवमिति वाच्यं ॥ सम्बन्धिनं विनाऽपि सम्बन्धस्यसमवायस्याङ्गीकारोयथाऽक्षपादीयानां तथाऽत्रापि तदुपपत्तेः ॥ ननु रसादीनामप्येवमन्यत्रोपलम्भः स्यादितिचेत् ॥ स्यादेवोपलम्भोयदि स्वाश्रयाण्यपहायान्यत्रतिष्ठेयुः ॥ अथ द्रव्यं वि-

हाय गन्धस्याऽन्यत्र सत्त्वे द्रव्यसत्त्वस्य नियामकत्वाभावाद्रसादी-नामप्यन्यत्र गमनं स्यादतोऽस्यावश्यं नियामकत्वेनाङ्गीकाराद्ग-न्धोपलब्धिस्थले चम्पकावयवानामपि सत्त्वमङ्गीकर्त्तव्यमितिचे-त्॥ननु समवायस्याऽपि तथात्वाङ्गीकारे सम्बन्धसत्त्वेसम्बन्धिसत्त्व-स्य नियामकत्वाऽभावात्संयोगादीनामप्यतिरेकापत्तौ तत्समाधा-नाय तस्य नियामकत्वेनाङ्गीकारात्समवायस्य च नित्यत्वेनाङ्गीका-रात्तन्निर्वाहाय घटे नष्टेऽपि सूक्ष्मघटसत्वमङ्गीकुरु॥ननु जन्यसम्ब-न्धसत्त्वएव सम्बन्धिसत्त्वस्य नियामकत्वमितिचेत् ॥ अत्राऽपि ग-न्धातिरिक्तगुणे द्रव्यसत्त्वस्य नियामकत्त्वमिति तुल्यं॥ननु तत्र स-म्बन्धिनामनित्यत्वात् सम्बन्धस्य नित्यत्वादन्यथानुपपत्त्या जन्य-पदोपादानं॥अत्रान्यत्रोपलम्भानुपपत्तौ सत्यामपि तदवयवसत्त्वेनै-वोपपत्तौ गन्धातिरिक्तमिति व्यर्थं विशेषणं गौरवादितिचेत्॥न॥प्रा-माणिकत्वात्॥दृश्यते हि विविधचर्मपुटवेष्टितस्याऽपि मृगमदस्य ग-न्धोपलम्भोवणिक्सार्थेषु ॥ नहि तत्र तदवयवनिर्गमाऽपूर्वतत्प्रवेशौ सम्भवतः॥किञ्चैवं गन्धोपलम्भसमये प्रसारितमुखस्य तद्रसोपल-ब्धिप्रसङ्गः॥तेषामवयवानां योग्यत्वात्॥अन्यथा गन्धोऽपि नोपल-भ्येत॥गन्धस्यैवोपलम्भे नियामकाभावाच्च॥नन्वदृष्टमेव तथेतिचेत्॥ अहोगौरवभीतिर्वावदूकस्य ॥ यदवयवनिर्गमं पुनस्तदवयवपूरणं तद्धेतोरदृष्टस्य च कल्पनं रसाद्यनुभवप्रतिबन्धकादृष्टान्तरस्य च कल्पनं तदतोप्यसङ्कोचस्तुण्डस्य गन्धातिरिक्तेतिमात्रकथनेच स-ङ्कोचः ॥ किञ्च उग्रगन्धस्य कस्यचित् कुसुमस्य लशुनादेर्वा स्प-र्शमात्रेऽपि ततोमुहुर्म्मृत्स्नया क्षालनेऽपि करस्य न तद्गन्धापगमो-ऽनुभूयते ॥ स्पर्शमात्रलग्नतदवयवानां सकृत्क्षालनेऽप्यसहिष्णूनां

सकृत्क्षालनेन स्थितिसम्भवः कुतस्तरां मुहुस्तथाकरणे॥अतोद्र-
व्याऽधिकदेशवत्त्वं गन्धस्य मन्तव्यं॥विनश्यदवस्थगुणानामनाश्रि-
तत्वेनाङ्गीकारोयथा तव तथा द्रव्याधिकदेशवृत्तित्वेनाऽनुभवेऽपि
कुरुष्व॥अतएव सूत्रकारोऽपि सिद्धं दृष्टान्तमाहेमामेवाशङ्कांपरिह-
र्त्तुमणुत्वसाधने व्यतिरेकोगन्धवदिति॥श्रुतिरपि यथावृक्षस्यसंपुष्पि
तस्यदूराद्गन्धोवात्येवंपुण्यस्यकर्मणोदूराद्गन्धोवातीति॥अत्रतदवय-
वासत्त्वनिरूपणार्थमेव दूरपदं॥दार्ष्टान्तिकेतु कीर्त्तेरेव गन्धत्वं तद-
साधारणधर्मादिसाधर्म्येण॥किञ्च हृदिह्येषआत्मासवाएषआत्माहृ
दियोयंविज्ञानमयःप्राणेषुहृद्यंतर्ज्योतिःपुरुषः गुहांप्रविष्टावित्यादि
श्रुतिभिर्हृदयदेशे जीवस्य स्थितिरुक्ता॥सात्वणुत्वएवोपपद्यते॥तद-
नन्तरञ्च स्वचैतन्येन सकलशरीरव्यापित्वं दर्शयति आलोमभ्यआ-
नखाग्रेभ्यइति ॥ एतेन सर्वमनवद्यं ॥ २२ ॥ ॥ अथ ननुप्रवेश-
कथनेइत्यादिरेतेनसर्वमनवद्यमित्यन्तोद्वाविंशः खण्डः खण्ड्यते ॥
॥ ॥ तत्र समवायस्याङ्गीकारएवाक्षपादादीनामसङ्गतइति स-
मवायाऽभ्युपगमाच्चेत्यादिना व्यासादिभिर्निरूपितं ॥ तादृशश्चेत्त-
वाऽप्यङ्गीकारस्तर्हि कानोहानिः ॥ विनश्यद्द्रव्याणां क्षणं गुणा-
स्तिष्ठंतीति निर्मूलम् ॥ प्रलयक्रमस्य विपरीतत्वात् ॥ वस्तुतस्तु इ-
दमपि पृथिव्यादिष्वेव ॥ गुणस्य तु गुणिना सहैव नाशोगुणगु-
णिनोरभेदात् ॥ अन्यत्सर्वं विस्तरेण प्राग्दूषितम् ॥ हृदयं तु बुद्धेः
स्थानमिति जीवे तद्देशत्वमौपचारिकम् ॥ इतिद्वाविंशखण्डखण्ड-
नम् ॥ २२ ॥ ॥ यत्तु चैतन्यस्य सर्वशरीरव्यापित्वे जीवोना-
णुः स्यात् ॥ चैतन्यमात्रस्वरूपत्वादेव तस्य ॥ औष्ण्यप्रकाशात्म-

कस्याग्नेरिवेत्यग्निदृष्टान्तेनचैतन्यात्मकत्वं जीवस्य साधयन्तोव्यापकत्वं वदन्ति केचित्॥न तद्विद्वदादरणीयं॥प्रज्ञया शरीरं समारुह्येति करणत्वेन प्रज्ञायाः श्रुतौ निरूपणात्तस्यच भेदएव युक्तत्वात्॥ तदेषां प्राणानां विज्ञानेन विज्ञानमादायेतिच श्रुतौ विज्ञानस्य कर्मत्वेन निरूपणाच्च विज्ञानं गुणएव ॥ अतएव सूत्रकारेणाप्युक्तं पृथगुपदेशादिति ॥ अपिच ॥ औष्ण्यमात्रस्यैव वन्हिस्वरूपत्वं न वक्तुं शक्यं मणिमन्त्रादिनौष्ण्याऽनुपलम्भेऽपि वन्ह्युपलम्भात् ॥ औष्ण्यशैत्यादेः स्पर्शधर्मत्वेन वह्नेर्द्रव्यत्वहानिश्च ॥ नापि प्रकाशात्मत्वं ॥ तप्तवारिस्थतदनुपलम्भप्रसङ्गादिति ॥ किंच सयदास्मात्शरीरादुत्क्रामतिसहैवैतैःसर्वैरुत्क्रामति येकेचास्माल्लोकात्प्रयान्तिचन्द्रमसमेवतेसर्वेगच्छन्तीतितस्माल्लोकात्पुनरेत्यस्मैलोकायकर्मण इतिश्रुत्युक्ता जीवस्य देहादुत्क्रान्तिः परलोकगतिश्च पुनरागतिश्चाऽणुत्वएव घटते नतु व्यापकत्वे॥ सयथामहाराजोजानपदान्गृहीत्वास्वेजनपदेयथाकामंपरिवर्त्ततैवमेवैषएतत्प्राणान्गृहीत्वास्वेशरीरेयथाकामंपरिवर्त्ततइति स्वयंविहृत्येत्यादिश्रुत्युक्तपरिवर्त्तनविहारावप्यणुत्वमृतेनोपपद्येते ॥ ननु तत्त्वमसीत्याद्यभेदबोधकश्रुत्या जीवोब्रह्मत्वेन निरूप्यते ॥ अणुत्वेतु तदनुपपत्तिरितिचेत् ॥ न ॥ औपचारिकत्वात् ॥ अमात्ये राजपदप्रयोगवत्॥नहि जीवे कश्चन स्वाभाविकोगुणोऽस्ति ॥ प्रज्ञाद्रष्टृत्वादयश्च भगवद्गुणाएव ॥ तथाच तद्गुणैरेवास्योत्तमत्वादंशत्वाच्च तद्व्यपदेशः ॥ जडवैलक्ष्यण्यं च ततएव ॥ ननु कथमेवमवगम्यते औपचारिकमेव तदिति चेत्॥ अतएव सूत्रकारोऽपि न्यरूपयत्तद्गुणसारत्वात्तुतद्व्यपदेशइति ॥ तथाचाऽणुपरिमाणस्यैव जीवस्य पूर्वोक्तन्यायेन ब्रह्मणः सकाशा-

न्निर्गतस्य ब्रह्मणा स्वसेवार्थमेव निजैश्वर्यस्य निर्विषयत्वपरिहा-
राय तथा प्रकटीकृतस्यातएव सहजहरिदासस्य तदंशत्वेन ब्रह्म-
रूपस्य च निजनिसर्गप्रभुश्रीगोकुलनाथचरणकमलदास्यमेव स्व-
धर्मः तेनचाऽतिसंतुष्टः स्वयं प्रकटीभूय निजगुणांस्तस्मै दत्त्वा
स्वस्मिन्प्रवेशयति स्वरूपाऽऽनन्दाऽनुभवार्थमथवात्यनुग्रहे निकटे
स्थापयति ततोऽधिकरसदास्यकरणार्थमितिनिगर्वः ॥ केचित्तु जी-
वाऽणुत्वभगवत्प्रवेशतत्साधनभगवद्भजनाद्यसहिष्णवोऽणुत्वसाध-
कोत्क्रान्त्यादिसूत्रदशकं पूर्वपक्षत्वेनोक्त्वा तद्गुणसारत्वात्तदितिसूत्रं
सिद्धान्तीयत्वेन वदन्तस्तदर्थंचोपाधिगुणरूपाणुत्वादिप्रयुक्तोजी-
वेऽणुत्वादिव्यपदेशइति निरूपयन्तोजीवस्य व्यापकत्वं साधयन्ति॥
तत्रेदमुच्यते ॥ भवेदेतदेवं यद्यौपाधिकं जीवत्वं स्यात् तदेवतु न
संभवति श्रुतिस्मृतिन्याययुक्तिविरोधादिति पूर्वमेव निरस्तत्वात्॥
किञ्च बुद्ध्युत्क्रान्त्यादिभिरेव जीवस्योत्क्रान्त्यादिव्यपदेशोऽनुपप-
न्नः ॥ नह्युपाधेः पूर्वमेवोपहितस्योत्क्रान्त्यादिः संभवति ॥ श्रुति-
श्च तमुत्क्रामन्तंप्राणोऽनूत्क्रामतीत्यादिना जीवोत्क्रान्त्या सर्वोत्क्रान्-
तिं वदति ॥ तथाच विरोधः ॥ नचोपाधिगुणानां सारत्वं युज्यते
अनर्थरूपत्वात् किंतु भगवद्गुणानामेव॥किंबहुना प्रस्वापादिषु वि-
हारादिचेतनबोधकस्वयंविहृत्येत्यादिश्रुतिन्यायसहस्रबाधितत्वा-
त्केवलं भगवदाज्ञयोमापरिदृढप्रवर्त्तितमार्गानुसारित्वात्तत्पक्षस्य
लिखनेनालं ॥ आभासएवचेतिसूत्रं यथाऽनाचारिब्राह्मणे ब्रा-
ह्मणाभासप्रयोगोऽखिलब्राह्मणधर्माणामभावतस्तथाऽऽनन्दांशस्य
तिरोधानाद्ब्रह्मधर्माणांसर्वेषामभावादंशत्वेन तत्तद्रूपत्वाच्च तदाभा-
सोजीवइतिपरं नत्वलीकइति पूर्वमेवावोचाम ॥ २३ ॥ ॥ अ-

थ यत्तुचैतन्यस्येत्यादिः पूर्वमेवावोचामइत्यन्तस्त्रयोविंशः खण्डः खण्ड्यते ॥ ॥ तत्र प्रज्ञाशब्देन बुद्धिर्गृह्यते तेनौपाधिकोदेहसम्बन्धइतिसिद्धम् ॥ विज्ञानेनविज्ञानमादायेतिश्रुतेरयमर्थः ॥ विज्ञानेन बुध्या विज्ञानमिन्द्रियाणां ज्ञानसामर्थ्यमादाय शेते इति। विज्ञानशब्दस्य बुद्धौ विज्ञानमयादिशब्देषु रूढिर्दृष्टैव ॥ इन्द्रियसम्बन्धिज्ञानसामर्थ्येतु योगः ॥ विज्ञायतेऽनेनेत्यर्थे करणे ल्युटः सुलभत्वात् ॥ प्राणानामित्यनेन तस्य तत्र प्राणसम्बन्धित्वप्रतीतेः॥ प्राणशब्दस्य तु इन्द्रियेषु श्रौती रूढिः सुप्रसिद्धा ॥ पृथगुपदेशादितिसूत्रं तूत्क्रान्तिगत्यागतीनामित्यादिपूर्वपक्षसूत्रसमूहस्थमिति न दोषावहम् ॥ तप्तवारिस्थतेजसि तव मते गुणभूतस्येव परमते स्वरूपभूतस्याऽपि प्रकाशस्याऽभिभवोऽस्तु॥किञ्च गुणस्य गुणितोभिन्नत्वे प्रमाणाभावात्कुतोगुणाभिभवे गुण्यभिभवोन ॥ किञ्च प्रकाशवत्सूत्रविरोधादिभिः प्रकाशस्य गुणत्वं प्रत्युक्तमिति समोयं दोषः॥ तद्गुणसारत्वात्त्विति सूत्रन्तु नात्माऽणुरित्यत्रव्याख्यतम् ॥ तेनैव च विभोरप्युत्क्रान्त्यादेरुपपत्तिरुक्ता॥परोक्तेर्थेतु न मानं विषयवाक्यालाभश्च ॥ तत्त्वमसीत्यस्य गौणत्वं तु स्वोक्त्युपक्रमविरोधगौरवाभ्यां हेयम् ॥ प्रज्ञादीनामीश्वरगुणत्वे जीवसम्बन्धश्चिन्त्यः॥प्रवेशादिकं तु प्रागुपहसितम्॥दशसूत्र्याः पूर्वपक्षत्वनिरासाय योऽनेनयत्नः कृतः सोऽपि नात्माणुरितिश्लोकव्याख्यायां विफलः कृतः ॥ नह्युपाधेः पूर्वमेवेत्यसङ्गतं॥तमुत्क्रामन्तमितिश्रुतेः प्रागुक्तरीत्या लब्धव्यवस्थत्वात्॥अतएव जीवोत्क्रान्त्येति तृतीयानसङ्गता॥ उत्क्रान्त्योर्हेतुहेतुमद्भावाभावात् ॥ सारपदार्थोप्युक्तः प्राक् ॥ बुद्धिबलहीनस्य गालीदानं युक्तमेवेत्युक्तम्प्राक् ॥ आभासएवचेत्य-

स्यार्थः पूर्वमेवोक्तः ॥ तत्र लक्षणां वदंस्तु गौरवप्रमाणाभावाभ्या-
मुपेक्षणीयः ॥ किञ्च श्रुत्यादीनां तर्कवशेनाऽन्यथाव्याख्याकरण-
मासुराणामिति पूर्वमुक्तमिदानीं किं तत्त्वमेव स्वस्याऽऽविष्कर्त्तुं त-
र्कवशेन श्रुत्यादिकमन्यथा व्याचष्टे इति प्रष्टव्यः ॥ अन्यः प्रला-
पस्तु दूषितएव ॥ इतित्रयोविंशखण्डखण्डनम् ॥ २३ ॥ ॥ स्या-
देतत् ॥ शुद्धस्यैव कर्त्तृत्वेऽपि निमित्तत्वमात्रमस्तु कुलालन्या-
येन नतु समवायित्वमपि॥तथासति ब्रह्मणोविकृतत्वापातोमृत्पि-
ण्डवत् सावयवत्वापातश्च कार्यस्याऽनर्थरूपत्वेन तद्रूपत्वस्य वक्तु-
मयुक्तत्वाच्चेतिचेत् ॥ मैवं ॥ यदि स्वबुद्धिकल्पितं ब्रह्मणः कर्त्तृत्वं
स्यान्न स्यात्समवायित्वं किन्तु श्रुतिसिद्धं ॥ साच स्वतःसिद्धप्रमा-
णभावा ॥ प्रमाणस्य ह्ययं स्वभावोयद्यथास्थितं वस्तु प्रमापयति
नतु स्वनिरूपितप्रकारकं निर्मिमीते ॥ तथाच श्रुतिरपि यथास्थितं
ब्रह्म प्रतिपादयतीति न पर्यनुयोगार्हा ॥ विकृतत्वादिधर्माश्च लोके
समवायिषु दृश्यन्ते ॥ तथाचोभयरक्षायै ब्रह्माविकृतमेव समवा-
यि ॥ लोके तादृशमेव समवायित्वमिति व्यवस्था मन्तव्या ॥ अ-
तएव सूत्रकारोऽपि ब्रह्मणः समवायित्वं न युक्तिगम्यं किन्तु श्रु-
त्येकगम्यमित्याह श्रुतेस्तुशब्दमूलत्वादिति ॥ ब्रह्मसमवाय्यविकृतं
चेत्यपि गुडजिह्विका ॥ वस्तुवस्तु विरुद्धधर्माश्रयमपि ॥ तथाहि ॥
आत्मावारेश्रोतव्योमन्तव्यः यतोवाचोनिवर्त्तन्ते तदेजतितन्नैजति
अपाणिपादोजवनोग्रहीता पश्यत्यचक्षुःसशृणोत्यकर्णः सर्वतःपा-
णिपादान्तं अणोरणीयान्महतोमहीयान् अस्थूलमनण्वित्यादिश्रु-
तिर्हि परस्परविरुद्धाऽनेकधर्मवत्त्वं ब्रह्मणि प्रतिपादयति॥श्रौतत्वा-
न्नैकतरबाधोवक्तुं शक्यः ॥ तस्मात्तादृशमेव तदिति मन्तव्यं॥२४॥

॥ ॥ अथ स्यादेतत्शुद्धस्यैवेत्यादिरितिमन्तव्यमित्यन्तश्चतुर्विंशः खण्डः खण्ड्यते ॥ ॥ बुद्धिहीनस्य युक्तिभीरोर्न्यायाऽनभिज्ञस्य कान्गुणान्वर्णयिष्यामः श्रुतीरपि न्याय्यार्थाच्च्यावयन्क्षेपयति॥तस्माच्छ्रुत्याद्यविरोधाय विवर्त्तवादः स्वीकार्यः ॥ अन्यथा विकारित्वादिसत्त्वेऽपि अविकारित्वसम्भवाद्विकारित्वाऽनित्यत्वाद्यपि त्वया ब्रह्मणि स्वीक्रियेतेत्युक्तं प्राक् ॥ श्रुतेस्तुशब्दमूलत्वादिति तु व्याख्यातम् ॥ श्रोतव्यइति श्रुतिर्लक्षणादिना शाब्दबोधविषयत्वमाह ॥ यतोवाचइति तु शक्त्या वाचां निवृत्तिम् ॥ अन्यास्तु श्रुतयस्सविशेषनिर्विशेषपरत्वेन व्यवस्थिताइत्युक्तम्प्राक् ॥ इति चतुर्विंशखण्डखण्डनम् ॥ २४ ॥ ॥स्यादेतत् ॥ अत्र नैवं निर्णयः संभवति॥नह्येकं वस्तु स्वतएव सविशेषं निर्विशेषं चेत्यवधारयितुं शक्यं ॥ विरोधात्॥ननु सर्वगतत्वेन पृथिव्याद्युपाधिसम्बन्धोऽस्तीति तन्निबन्धनमस्थूलत्वादिकं ॥ तथाहि ॥ अस्थूलेस्थूलः अनणावनणु तच्चोच्चावचकर्त्तर्युच्चावचकर्त्तोच्चावचकामेचोच्चावचकामः पृथिव्यांसर्वगन्धो जलादावगन्धइत्युभयरूपत्वमुपपद्यतइति न विरोधइति चेन्नैवं ॥ नह्यौपाधिकत्वे वस्तुस्वभावता सम्भवति॥ नहि जपाकुसुमाऽरुणिमानं गृह्णन्स्फटिकोऽरुणोभवति ॥ नवा पटोऽरुणश्चित्रोवा भवन् द्विरूपोभवति॥तत्रावयवावच्छेदकल्पनया तथा वचनेऽपि ब्रह्मणि न तथा वक्तुं शक्यं ॥ निरवयवत्वात्॥तस्मादविद्यकत्वादुपाधीनामस्तसमस्तविशेषं तदिति प्रतिपत्तव्यं ॥ नच सविशेषस्याऽपि श्रौतत्वान्निर्विशेषस्यैव बाधोवक्तुं शक्यः परिच्छेदापातात् ॥ सविशेषस्य परिच्छिन्नत्वात् तेषां प्रत्येकं भिन्नत्वे ब्रह्मानेकत्वप्रसक्त्यैकमेवाऽद्वितीयमितिश्रुतेर्विरोधश्च॥समोमश-

केनसमोनागेनेत्यादिषु चैकस्यैवाऽनेकोपाधिसम्बन्धपरिमाणं श्रूयते॥तच्च स्वतोनिर्विशेषत्वएवोपपद्यते॥अन्यथोपाधीनामव्यापकत्वेनान्योन्यमाश्रयाऽऽश्रयिभावाभावाच्च सर्वपरिमाणवत्त्वं भज्येतैकस्य ब्रह्मणः॥ किञ्च करचरणादिविशेषाणां लौकिकत्वात्स्वरूपस्याऽलौकिकत्वात्तद्वत्त्वमपि न ब्रह्मणि वक्तुं शक्यं॥ तदलौकिकत्वकल्पनेन ब्रह्मणि च सर्वभवनसमर्थस्वविरुद्धसर्वाधारत्वादिरूपाऽलौकिकशक्तिकल्पनेन च गौरवात्॥ अस्थूलादिश्रुतिविरोधेन तत्कल्पनमशक्यं च॥ सर्वतइत्यादि तद्बलेन शक्यत्वे प्येतद्दौर्बल्यमप्युक्तं॥अन्यच्च नहि सविशेषनिरूपिका श्रुतिर्ब्रह्मस्वरूपं निरूपयितुं प्रवृत्ता येन तन्निरूपितमित्यलौकिकत्वादिकं न कल्प्यं किन्तु कॢप्तमेवेति न गौरवादिदूषणप्रासङ्गइत्युच्यते॥ किन्तु तस्य दुर्ज्ञेयत्वेन यथाकथञ्चित्प्रवणत्त्वे चित्तस्य शुद्धिर्भविष्यति ततः स्वयमेव प्रत्यग्ब्रह्मस्वरूपं ज्ञास्यतीत्यधिकारसित्ध्यर्थमुपासनां वक्तुं भावनासुगमत्वाय च लोकप्रसिद्धविशेषवत्तदनुवदति॥ ततोऽधिकारे सिद्धे कीदृक्तदनुभुयतइत्याकाङ्क्षायां श्रुतिरस्थूलमनण्वित्यादिना तत्स्वरूपं निरूपयति॥ अतएवारूपवदेवहितत्प्रधानत्वादिति सूत्रकारोप्याह॥ नह्येवंसति सविशेषनिरूपकश्रुतिवन्निर्विशेषनिरूपिकाणां स्वरूपमात्रनिरूपणं विहायान्यत्प्रयोजनं घटते॥तस्य वृत्त्यविषयत्वात्॥तत्केन कम्पश्येदित्यादिश्रुतेः॥ अतएव निषेधमुखेनैव निरूपयति अथाऽतआदेशोनेतिनेतीति अन्यदेवतद्विदितादथोअविदितादित्यादिना॥ एवञ्च सति निर्विषयज्ञानस्वरूपत्ववन्निष्प्रतियोगिकाऽभावरूपत्वमेव भवेदिति तद्व्यावृत्त्यर्थं चित्स्वरूपत्वमाह॥ सयथासैन्धवघनोऽनन्तरो-

वाह्यः कृत्स्नो रसघनएवैवंवारेऽयमात्मानन्तरोबाह्यः कृत्स्नः प्रज्ञानघन-एवेति॥अन्यच्च द्वेवावब्रह्मणोरूपेमूर्त्तंचैवामूर्त्तंचेत्युपक्रम्य रूपद्वयं प्रतिपाद्य पुनः पठ्यते अथातआदेशोनेतिनेतीति ॥ तत्रेतिशब्दस्य संनिहितावलम्बनत्वमितिहस्मोपाध्यायाऊचुरित्यादिषु दृश्यते ॥ प्रकृतेऽपि पूर्वनिरूपितरूपद्वयस्य संनिहितत्वेन तन्निषेधएव ब्रह्मणि नेतिनेतीत्यनेन प्रतिपाद्यते ॥ एवंसति विशेषनिरूपिकाः श्रुतयोनिषेध्यकोटिनिरूपिकाइति सिद्धं ॥ निषेधश्च तेषामविद्याकल्पितत्वएव सङ्गच्छते ॥ नहि वस्तुसन्निषेधार्हं भवति ॥ तदेव ब्रह्मत्वंविद्धिनेदंयदिदमुपासतइतिश्रुत्योपासनाविषयाणामब्रह्मत्वोक्तेश्च ॥ तस्मान्निर्विशेषमेव ब्रह्मेति प्रतिपत्तव्यं ॥ नचैतादृशस्याऽविषयत्वात्कश्चिद्धीरइत्यादिश्रुत्या च विषयत्वनिरूपणान्नैवमिति सांप्रतं ॥ पूर्वोक्तन्यायेन सर्वश्रुत्यविरोधचिन्तने प्रापञ्चिकधर्माणामविद्याकल्पितत्वाऽवधारणेनाऽत्राऽपि तत्समानयोगक्षेमत्वस्योचितत्वात्॥तदा द्रष्टृदृश्यभावोक्तेर्निर्विशेषत्वाऽवगतौ च तत्केनकंपश्येदित्यादिना तन्निषेधादप्येवमवगम्यते ॥ अविद्याकार्यस्य तद्दर्शनस्य सत्त्वात्तदा न सर्वात्मना ऽविद्यानाशोऽपि येनाऽविद्यातदानष्टेति तद्दर्शित्वस्य नाविद्यकत्वमिति कथनं स्यात्॥किञ्च सविशेषस्य सूर्यदीपादिप्रकाश्यत्वकथनेन व्यवहार्यत्वेन चाक्षुषत्वेन क्रियादिमत्त्वेन च कथं ब्रह्मत्वमवधारयितुंशक्यं॥यतोनतत्रसूर्योभातिन चंद्रतारकंनेमाविद्युतोभांतिकुतोयमग्निः तमेवभांतमनुभातिसर्वंतस्यभासासर्वमिदंविभातीति नचक्षुषागृह्यतेनापिवाचानान्यैर्देवैस्तपसाकर्मणावेति यत्तदद्रेश्यमग्राह्यमिति निष्कलंनिष्क्रियंशांतमित्यादिभिः श्रुतिभिस्तद्विरुद्धं तन्निरूप्यते ॥ अतएव सूत्रकारोऽ-

प्याह प्रकृतेतावत्त्वंहिप्रतिषेधतिततोब्रवीतिच भूयइति ॥ अस्यार्थस्तु नेतिनेतीति श्रुतिः प्रकृतं यदेतावत्पूर्वोक्तं मूर्त्तामूर्त्तलक्षणं रूपद्वयं तद्भावं निषेधति ब्रह्मणि॥तर्हि तत्सद्भावे किं प्रमाणमतआह ततोब्रवीतिचभूयः ततोनिषेधानन्तरं नह्येतस्माद्ब्रह्मणः परमन्यदस्तीति धर्मिसद्भावं श्रुतिः स्वयमेव ब्रवीति ॥ एवंसति धर्मिणोऽन्यस्याऽविद्यकत्वं सिद्धमिति निर्विशेषमेव तदिति प्राप्ते वयं वदामः ॥ विशेषाणामविद्याकल्पितत्वं वदन् वादी प्रष्टव्यः ॥ कासाऽविद्या जीवगता ब्रह्मगतावा यत्कल्पिताविशेषाः ॥ नतावदाद्या ॥ तस्याब्रह्मगतधर्मकल्पने सामर्थ्याभावात् ॥ तथाहि कल्पना हि शुद्धे एव ब्रह्मणि वाच्या तादृशस्य मनोवचसोरप्यविषयत्वेनाऽधिष्ठानज्ञानाभावाज्जीवस्य तस्याः सम्बन्धस्तु दूरतः ॥ अपिच पराञ्चिखानिइत्यनेनाऽविद्यावत्सम्बन्धीन्द्रियाणां अविषयइत्युक्त्वा तद्रहितेन्द्रियविषयत्वं कश्चिद्धीरःप्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्नित्यनेन निरूप्यते ॥ ज्ञानप्रसादेनविशुद्धसत्त्वस्ततस्तुतंपश्यतेनिष्कलंध्यायमानइतिश्रुतौ ज्ञानवतएव दर्शनमुच्यते ॥ नहि तदा साऽस्तीति तव वक्तुं शक्यं ॥ ज्ञाननाश्यत्वेनाऽभ्युपगमात् ॥ तद्धिपश्यंतिमुनयोगुणापायेसमाहिताइत्यादिस्मृतिविरोधश्च ॥ ननु तदा द्रष्टृदृश्यभावस्य सत्त्वान्निर्विशेषतदवगतौ तत्केनकंपश्येदित्यादिना तन्निषेधसत्त्वान्न सर्वात्मना ऽविद्यानाशइति तत्कल्पनैव तत्राऽपीति चेत् तर्हि ब्रह्मणोदृश्यत्वमप्याविद्यकमिति तव मनीषितं तथासत्यविद्यया ब्रह्मणि विशेषकल्पनायां दृश्यत्वं दृश्यत्वेच सत्यधिष्ठानज्ञाने सति तत्कल्पनमित्यन्यो-

न्याश्रयः ॥ निष्कलमिति प्रत्यगात्मानमिति पदेन चाऽविद्यार-हितस्यैव दर्शनविषयत्वेनोक्तेस्तद्विरोधश्च ॥ नच तत्र विषयस्तु आविद्यकएव भेदनिरूपणात् निष्कलादिपदं तु वास्तवरूपाऽभि-प्रायमिति वाच्यं ॥ प्रकृते कर्मताऽनुपपत्तेः ॥ कश्चिद्धीरइत्यत्रे-क्षणक्रियाफलवाचकप्रत्यगात्मपदातिरिक्तस्याऽभावादस्य चात्रा-वाचकादीक्षणक्रियोक्त्यनुपपत्तिश्च ॥ किंचैवं निर्विशेषब्रह्मदर्श-नोच्छेदात्तन्निरूपकश्रुतीनां ब्रह्मवेदब्रह्मैवभवति तमेवविदित्वा-तिमृत्युमेति तस्मिन्दृष्टेपरावरे कश्चिद्धीरःप्रत्यगात्मानमैक्षदित्या-दीनां वेदैश्चसर्वैरहमेववेद्यः भक्त्यामामभिजानातीत्यादिस्मृतीनां चोपप्लवः ॥ २५ ॥ ॥ अथ स्यादेतत्अत्रनैवंनिर्णयःसम्भव-तिइत्यादिःस्मृतीनांचोपप्लवइत्यन्तः पञ्चविंशः खण्डः खण्ड्यते ॥ ॥ ॥ तत्र पूर्वपक्षे दूषणानि तु गौरवभयान्नोद्भाव्यन्ते सोऽपि हि नास्मन्मतयथावज्ज्ञानपूर्वकः ॥ सविशेषस्य श्रौतत्वं तु तात्प-र्याविषयत्वान्नञ्सामान्यनिषेधेतिश्लोकोक्तन्यायाच्च स्वामश्रौत-त्वतुल्यमित्युक्तम्प्राक् ॥ अधिष्ठानज्ञानाभावात्कथं कल्पनेत्यपि प्रत्युक्तम् ॥ अज्ञानस्य च द्वे शक्ती स्तआवरणशक्तिर्विक्षेपश-क्तिश्च तत्र यन्निष्ठावरणशक्त्या शुक्तिकाविशेषांशआव्रियते तन्निष्ठविक्षेपशक्त्यैव रजतं सृज्यते स्वप्नवदसाधारणत्वात् ॥ अ-तोनेतरस्य रजतदर्शनं नवैकस्य रजतबाधज्ञानेऽन्यस्य तद्बाधज्ञा-नम्॥एतेन रजततद्बाधज्ञानयोः सर्वसाधारण्यापत्तिवारणाय जी-वावरकमेवाऽज्ञानं शुक्तौरजतकल्पकं तच्चेन्द्रियद्वारा बहिर्निस्सृत-मधिष्ठानसम्बद्धमेवेति कल्प्यम् ॥ अन्यथा ऽदृष्टशुक्तिकस्याऽपि भ्रमः स्यात् ॥ एवञ्च ब्रह्मणि जगत्कल्पकमज्ञानमपि ब्रह्मणा स-

म्बद्धमेव कल्पकमिति कल्प्यं तस्य च साक्षात्सम्बन्धाभावान्म-
नइन्द्रियद्वारकः सम्बन्धोवाच्यः सच न भवति यतोवाचोनिवर्त-
न्ते पराञ्चिखानीति श्रुतिविरोधात् इति परास्तम्॥यतोवाचइत्यादेः
पूर्वमेव व्याख्यातत्वाच्च ॥ ज्ञानकालेऽविद्यांशास्थित्युपपादनमप्यु-
क्तम्प्राक् ॥ अन्योन्याश्रयस्तु बीजाङ्कुरन्यायेन परिहरणीयः ॥
विद्यादशायां दृश्यत्वं तु निष्कलस्यैव दर्शनोपहितस्य नतु दर्शन-
विशिष्टस्य नवा दर्शनरूपोपाधिरहितस्येति न निर्विशेषब्रह्मदर्श-
नोच्छेदइति ॥ पञ्चविंशखण्डखण्डनम् ॥ २५ ॥ ॥ अपरञ्च
अवास्तवमितिकोऽर्थः ॥ वस्तुनोनैसर्गिकोधर्मोवास्तवस्तद्भिन्नआ-
गन्तुकोधर्मस्त्ववास्तवइति यदि तदा मृदः पृथुबुध्नोदराद्याका-
राणामप्यविद्याकल्पितत्वमेव शुक्तिकारजतवन्नतु कुलालेन द-
ण्डादिसहकारेण जनितत्वमित्यागतं ॥ तथाच प्रत्यक्षविरोधः ॥
क्वचिद्विनाऽपि कुलालादिकं तदुत्पत्त्यनुभवप्रसंगस्तेन च जला-
हरणमपि क्रियेत जायतैव ॥ जलाहरणार्थिनोनियमतोघटे
प्रवृत्त्यनुपपत्तिश्च ॥ नह्यज्ञानकल्पितमरुमरीचिकापाथसः पा-
नार्थं पिपासोर्नियमेन प्रवृत्तिः सम्भवति ॥ नच दोषदशायां
प्रतीयमानः सइति वाच्यं ॥ इदमंशस्याऽपि तथात्वापत्तेः ॥ नच
तस्ययुक्तत्वे सतीति वाच्यं ॥ तिमिरोपहतनयनस्य नेत्रदर्पणाधा-
नेन सूक्ष्मेष्वपि वर्णेषु स्थूलत्वभ्रमोवर्णप्रमा चैकेनैव जन्यतइति
वर्णांऽशेऽपि भ्रमत्वापत्तेः ॥ नच तस्मिन्नंशे तस्य गुणत्वमेव ॥ अ-
विद्यायामपि ब्रह्मांशे गुणत्वमेवाङ्गीकुरु सर्वश्रुत्येकतार्थं॥इदमपि
त्वद्रीत्योच्यते॥वस्तुतस्तु ब्रह्मधर्माः सर्वएवाऽनागन्तुकाएव यतोनि-
त्याः॥श्रुत्या तथैव निरूपणात्॥तथाहि नतस्यकार्यंकरणंचविद्यतेन-

तत्समश्चाभ्यधिकश्चदृश्यते पराऽस्यशक्तिर्विविधैवश्रूयतेस्वाभाविकीज्ञानबलक्रियाचेति ॥ तत्सम्बन्धियत्तत्कार्यं जन्यं नास्ति किंत्वजन्यमेव ॥ किञ्च तस्येतिषष्ठ्या भेदोनिरूप्यते ॥ तथाच जीववत्स्वरूपातिरिक्तं ज्ञानक्रियादिषु करणमिन्द्रियादिकमपि तस्य नास्ति॥अनन्दमात्रकरपादमुखोदरादित्वात् ॥ अथवा नित्यत्वात्तद्धेतुभूतं करणं च नाऽस्ति ॥ अतएव नतत्समइत्यादि ॥ जीवानामतादृशात्वात्॥अतएव सर्वस्येशानइति श्रुतिः अतएव तद्दासाएव जीवाइतिफलितं ॥ परा मनोवचसामपीदमित्थतया ज्ञातुमशक्या ॥ विविधा अनेकरूपाः शक्तयः ॥ शक्तिस्वरूपविचारे ब्रह्मस्वरूपान्नातिरिच्यतइति ज्ञापनायैकवचनं॥तेनाऽचिन्त्यानन्तशक्तिमत्वमुक्तं भवति ॥ साऽपि शक्तिः स्वाभाविकी नत्वागन्तुकी॥ तथैव ज्ञानशक्तिः क्रियाशक्तिश्च स्वाभाविक्येव नतु देहेन्द्रियव्यतिरेकेण तद्व्यतिरेकेण ज्ञानक्रिये न भवतइत्यर्थः ॥ एवंसति नित्यं वस्तु सदविद्यया कल्प्यतइति वक्तुं न शक्यं ॥ विरोधात् ॥ तस्य किंचित्कार्यं कर्त्तव्यं नाऽस्ति ॥ करणमिन्द्रियादिकमपि नाऽस्ति॥ अतएव नतत्समइत्यादि ॥ यतः कर्त्तव्यं बिनाऽपि विविधाः शक्तयः करणं विनाऽपि ज्ञानादिमत्त्वं च श्रूयते ॥ अतः सर्वाअपि शक्तयः स्वाभाविक्यइति व्याख्यानमपि नाऽतिदुष्टं ॥ यद्यपि नित्यत्वेन सृष्टेः पूर्वमनन्तरं च तासां वर्त्तमानत्वान्नहि तदा किंचित्कर्त्तव्यमस्ति तथापि सामान्यनिषेधपरत्वेन दुष्टमेव॥ ईक्षत्यधिकरणविरोधात् ॥ तथाहि सदेवसौम्येदमग्रआसीदेकमेवाद्वितीयमित्युपक्रम्य तदैक्षतबहुस्यांप्रजायेयेति तत्तेजोऽसृजतेति ॥ तथान्यत्र ॥ आत्मावाइदमेकएवाग्रआसीन्नान्यत्किंचनमिषत्सऐक्ष-

तल्लोकानुसृजाइतिसइमांल्लोकानसृजतेत्यादिभ्यः सृष्टेः प्राग्ब्रह्मणः शरीरित्वं तेजःप्रभृतिलोककर्तृत्वं च मिथ्यावादिनाऽप्यङ्गीकार्यं॥ अतः कर्त्तव्यांशसामान्यनिषेधस्तु नोपपद्यते ॥ नहि तदा कश्चिज्ज्ञातोऽस्ति येन स्वाऽविद्यया तत्कर्तृत्वलक्षणं विशेषं कल्प्येत ॥ अस्तीतिचेत् सदेवेतिश्रुतिविरोधः ॥ एवंसति यथा स्वाभाविक्योज्ञानादिशक्तयः श्रुतिबलेनाङ्गीकृताः॥ अस्येतिषष्ठ्या भेदेन निर्देशाद्धर्मरूपास्तथा सर्वतः पाणिपादान्तंसर्वतोऽक्षिशिरोमुखमित्यादि श्रुतिस्मृतिबलेन स्वरूपभूतानन्दमात्रकरपादादीनामपि संभवान्नकरणानामपि सामन्यनिषेधउपपद्यते ॥ तस्मादस्मदुक्तएवाऽर्थः ॥ २६ ॥ ॥ अथ अपरंचावास्तवमित्यादिरस्मदुक्तएवार्थइत्यन्तः षड्विंशः खण्डः खण्ड्यते ॥ ॥ तत्राऽवास्तवमिति नपुंसकनिर्देशोऽसङ्गतउत्तरत्र पुँल्लिङ्गनिर्देशात् नेहनानास्तिकिञ्चन विकारोनामधेयमित्यादिश्रुतिभिरेकविज्ञानेन सर्वविज्ञानप्रतिज्ञया क्षित्यादीनामिहार्थानांछायानकतमापिहि नसंघातोविकारोऽपिनपृथङ्गान्वितोमृषा इत्यादिभागवतोक्तयुक्त्याच सिद्धे घटाद्यवास्तवत्वे श्रौतेऽर्थे तर्काऽनवकाशं मन्यमानस्य ते कोविद्वेषः ॥ घटादिषु कुलालादिजनितत्वमपि वर्णस्थौल्यादिष्वपनेत्रादिजनितत्ववदुपाधिनियतमेवेति न प्रत्यक्षविरोधः॥ जाग्रतोमरुमरीचिकादौ प्रवृत्त्यभावेऽपि सुप्तस्य स्वाप्ने पदार्थे प्रवृत्तिर्दृश्यतएवमिहाऽप्यविद्यास्थित्यन्तमेव प्रवृत्तिर्यत्रत्वस्यद्वैतमिवेति यत्रत्वस्यसर्वमात्मैवेतिच श्रुतेः ॥ अविद्यायां प्रतीयमानत्वेनैव नाऽवास्तवत्वं घटादेः किन्तूक्तविधप्रमाणबलेनाऽपि ॥ एवञ्चेदमंशस्य तत्त्वाभावेऽपि न क्षतिः ॥ प्रमाणेनाऽवास्तवत्वनिश्चयाऽभा-

वात् ॥ वर्णांशे त्वदुदाहृतज्ञानस्य भ्रमत्वापादनंतु अविद्याप्रयुक्तत्वे सत्यविद्यादशायाम्प्रतीयमानत्वमिति स्वोक्तिफलितलक्षणाऽर्थाज्ञानात् ॥ नहि नेत्रदर्पणमविद्या नवा लक्षणे उपाधिपदोपादानम्॥किञ्च दूरत्वादिदोषापहारेण चक्षुषैव तत्र वर्णज्ञानं नतु तस्याऽपि ज्ञानसामग्रीप्रवेशः॥प्रतिबध्यप्रतिबन्धकभावे कार्यकारणभावेच गौरवादिति न तस्य तत्र गुणत्वम् ॥ ततस्तद्दृष्टान्तेन ब्रह्माऽवयवज्ञानेऽस्याऽगुणत्वकथनं निर्बीजमेव ॥ ब्रह्मावयवादेरपि कल्पितत्वन्तूक्तमेव प्राक् ॥ यत्त्वेतद्दार्ढ्याय तट्टीकाकारेण अविद्याप्युपकारायविषवज्जायतेनृणाम् ॥ अनुष्ठिताऽभ्युपायेनबन्धायान्यायतोहिसा इति मार्कण्डेयपुराणान्तर्गतरौच्यमन्वन्तरोपाख्यानवाक्यमुपन्यस्तं ॥ तदसङ्गतं ॥ तत्राऽविद्याशब्देन कर्मणोग्रहणात् ॥ अतएवाऽनुष्ठितेत्युक्तम्॥अन्यथा तन्न सङ्गच्छेत ॥ अज्ञानस्याऽनुष्ठानायोगात् ॥ अविद्यापठ्यतेवेदेकर्ममार्गःपितामहाः तत्कथंकर्मणोमार्गेभवन्तोयोजयन्तिमाम् इति रुचिप्रश्नेन अविद्यासत्यमेवैतत्कर्मनैतन्मृषावचः किन्तुविद्यापरिप्राप्तौहेतुःकर्मनसंशयइति पितृवाक्येनच कर्मणएवाऽविद्यात्वेनोपक्रमात् तस्माद्वत्सकुरुष्वत्वंविधिवद्दारसंग्रहमित्यनन्तरोत्तरवाक्याच्चाऽत्राऽविद्याशब्देन कर्मैव॥वस्तुतस्तु नेदृशमेवाऽवास्तवत्वं ब्रूमः किन्तु उक्तलक्षणमिथ्यात्वरूपमिति न कोऽपि दोषः ॥ तत्सम्बन्धि यत्तत्कार्यं जन्यं नाऽस्तीति न तस्यकार्यमिति श्रुत्यंशस्य व्याख्यानं ते संमतं ॥ तत्र तत्संबन्धि उद्दिश्य जन्यान्योन्याभावोबोध्यतइतिफलति ॥ एवञ्चोत्तरत्राऽपि तदेवोद्दिश्य करणाऽन्योन्याभावोबोध्येत॥तथाहि सति किञ्चतस्येत्यादिः स्वग्रन्थोविरुध्येत ॥ तस्येत्येतत्पदस्याऽवृत्त्या करणां-

शे प्रकारान्तरेण व्याख्यानेतु गौरवम् ॥ पूर्वत्र षष्ठ्यन्तार्थमुद्दिश्य कार्याऽभेदबोधनउत्तरत्र करणे षष्ठ्यर्थभेदस्याऽभावबोधने वैरूप्यं वाक्यभेदश्च ॥ किञ्च नञाऽन्योन्याभावस्य बोधस्तत्रैव भवति यत्र नञसमभिव्याहारे वाक्यस्य तादात्म्यबोधनयोग्यता ॥ प्रतियोग्यभावान्वयौ हि तुल्ययोगक्षेमाविति न्यायात् ॥ तथाचाऽत्र नञसमभिव्याहारे तस्य कार्यं विद्यते इत्यस्य तादात्म्यबोधनायोग्यत्वात्कथं नञाऽन्योन्याऽभावबोधनम् ॥ प्रतियोग्यभावान्वयाविति न्यायार्थोऽन्यत्र स्पष्टः ॥ किञ्च षष्ठ्याः सम्बन्धार्थकत्वेन कथं सम्बन्ध्यर्थलाभोयत्रान्योन्याभावोबोध्यते ॥ कथंवाभेदार्थलाभो यस्याभावः करणञ्चविद्यतइत्यंशेन बोध्यते ॥ करणस्य तत्सम्बन्धित्वाभावबोधनेनाऽन्यसम्बन्धएव हि ततोबोध्येत॥ तस्मात्तस्य कार्यकरणयोरत्यन्ताभावएव श्रुत्या बोध्यते॥एवञ्च नेहनानास्तीत्यादिश्रुतिभिरप्येकवाक्यता फलति॥द्वितीये पादे तु एकश्चकारोऽनुक्तसमुच्चयार्थस्तेन न्यूनोऽपि न दृश्यतइत्यर्थः॥द्वितीयउक्तसमुच्चयार्थस्तथाच जीवास्तदभिन्नाएव नतु तद्दासाः मानाभावात्॥एवञ्च तत्त्वमसि सर्वंखल्विदंब्रह्मेत्यादिश्रुतिभिरेकवाक्यता ॥ कथंतर्हि जीवजडभानमित्यतउक्तं परास्येति॥शक्तिर्माया साचाऽघटितघटनापटीयसीत्वात् परा उत्कृष्टा सत्त्वादिगुणवत्त्वादावरणशक्त्यादिमत्त्वाद्वा विविधा ऽनेकप्रकारा स्वाभाविकी अजन्या॥पराशब्दविविधाशब्दयोस्तदुक्तार्थकत्वेतु न मानम्॥विविधाशब्दस्य तथाऽर्थकत्वे एकवचनोपपत्तिक्लेशश्च निर्मूलः ॥ ज्ञानबलक्रिया-चेति शक्तेर्विशेषणं ॥ सम्भवति सामानाधिकरण्ये इति न्यायात् ॥ पार्थक्ये स्वाभाविकीत्यस्य तत्राऽप्यन्वये गौरवाच्च ॥ तत्रच

ज्ञानबलयोः क्रिया करणं ययेति व्यधिकरणबहुव्रीहिः ॥ तथा-
चाऽनयैव करपादादेर्मायिकत्वमसत्त्वं चसिद्धम् ॥ ईक्षत्यधिकर-
णविरोधादित्युक्त्वा तथाहीत्याद्युक्तिरसङ्गता ॥ ईक्षत्यधिकरणेन
शरीरित्वाद्यसाधनात् ॥ आनन्दमात्रेत्यादिवाक्यानि तु चतुर्थश्लो-
कव्याख्यायां कृतव्यवस्थानि ॥ शरीरित्वं तु नोक्तश्रुतिलभ्यम् ॥
मिषतोनिषेधेन तच्छ्रुतिविरुद्धञ्च॥नचाऽन्यस्य मिषतोनिषेधोऽनया
श्रुत्या क्रियते नत्वनन्यस्येति वाच्यं॥त्वन्मते सर्वस्याप्यनन्यत्वात्॥
अशरीरंशरीरेष्वनवस्थेष्ववस्थितमिति श्रुतिविरुद्धञ्च ॥ सृष्टेः प्रा-
क् तृतीयश्लोकव्याख्योक्तरीत्या जीवाऽविद्यावासनादिसहकृत-
संहारकालिकेश्वरसंकल्पेन जीवानामविद्योज्जृम्भते ततईश्वरस्ये-
क्षणादि ॥ सदेवेत्येवकारविरोधस्तु तृतीयश्लोकव्याख्यावसरे प-
रिहृतः ॥ तस्मात्तस्येति षष्ठ्या तत्सम्बन्धिकार्यादेः सामान्यतोनि-
षेधात्सर्वतःपाणिपादान्तमित्यादेरुक्तगतिकत्वान्निर्विशेषमेव ब्रह्मे-
ति सिद्धम् ॥ इतिषड्विंशखण्डखण्डनम् ॥ २६ ॥ ॥ किञ्च अ-
विद्यया कल्पनपक्षे तत्प्रसादेन तत्साक्षात्यतद्दर्शनाद्यनुपपत्तिः॥तद-
र्थं तपस्यादितत्साधनप्रवृत्त्यनुपपत्तिश्च ॥ नहि तपस्यादिसाधना-
नां दोषोद्भवएव फलं येन तेषु क्रियमाणेष्वेव तादृशोभ्रमोऽविद्य-
याजन्यतइत्युच्येत ॥ तथासति चित्तकषायशोषकत्वं साधनानां
सर्वत्र श्रूयमाणं व्याहन्येत ॥ दोषाऽऽधिक्यजनकत्वेन निन्दितत्वं
च स्यात् ॥ किञ्च पराञ्चिखानीति श्रुत्याऽविद्यावदिन्द्रियाऽविष-
यत्वं तद्रहिततद्विषयत्वं च प्रतिपाद्यते ॥ श्रीमद्देवकीगर्भरत्नेनापि
नाहंवेदैर्नतपसानदानेननचेज्यया शक्यएवंविधोद्रष्टुंदृष्टवानसि-
मांयथेतीतरसाधनाऽसाध्यतोक्तिपूर्वकं भक्त्यात्वनन्ययाशक्यअ-

ह्मेवंविधोऽर्जुनेति भक्त्येकसाध्यत्वं दर्शनादीनां निरणायि ॥ तथाचैवंविधश्रुतिस्मृतिविप्लवं कुर्वन्पारलौकिकसन्मार्गमात्रोच्छेदनाय प्रवृत्तआसुरएवेति सद्भिरुपेक्ष्यः ॥ कल्पान्तकाले शरीरेन्द्रियाऽभावेन जीवानां भगवति प्रवेशाच्च कल्पनासामर्थ्याभावे सत्यपि नारायणशयनकथनाच्च ॥ इतएव प्रलयाऽनुपपत्तिरपि ज्ञेया ॥ २७ ॥ ॥ अथ किञ्चाविद्ययाकल्पनेत्यादिरनुपपत्तिरपिज्ञेयेत्यन्तः सप्तविंशः खण्डः खण्ड्यते ॥ ॥ तत्र चित्तशुद्धेस्तु शास्त्रबोधिततद्धेतुकत्वं तन्त्रमित्युक्तं प्राक् ॥ तपस्याभक्त्यादिरूपं कर्मत्वविद्यैव ॥ उपदर्शितमार्कण्डेयपुराणादिवाक्येभ्यइति निश्चिनु ॥ तच्च नकर्मणानप्रजयाधनेनेत्यादिना निन्दितमेव ॥ अतएव नेदंयदिदमुपासते इति सङ्गतम् ॥ उपासनायाः सगुणज्ञानहेतुतया काचित्की तत्स्तुतिस्त्वक्षय्यंहवैचातुर्मास्ययाजिनःसुकृतंभवतीतिवज्ज्ञेया ॥ किञ्च तपस्यादिसाधनजन्यतत्प्रसादेन तत्प्राकट्यादीत्युपक्रम्य तत्र प्रमाणतया तपस्यादेरसाधनत्वं भक्तिमात्रस्य साधनत्वं च बोधयद्भगवद्वाक्यमुपन्यस्य भक्त्येकसाध्यत्वमित्यादि वदंश्चोपहास्यएवोपक्रमविरोधात् ॥ श्रुतिस्मृत्यादिविप्लवः प्रयत्नाऽनुपपत्तिश्च कस्य मार्गे भवति कस्य मार्गे न भवतीति प्राग्विस्तरेणो पपादितम् ॥ प्रलयकाले सत्यलोकवासिनां नारायणशयनादिभ्रमः ॥ नहि यदा नारायणः शेते तदा सत्यलोकस्यनाशे किञ्चिन्मानमस्ति ॥ प्राकृते प्रलयेतु उक्तविधसामर्थ्यभावा न्नकल्पना ॥ नारायणीयशक्तेरावरकत्वाऽभावेऽपि विक्षेपकतायाः सत्त्वेन तत्कल्पनया शयनप्रलयादिसंभ-

वाच्च ॥ आवरणाऽभावाच्च न भ्रान्तत्वव्यवहारऐन्द्रजालिकवत् ॥ किञ्च प्रलयकाले कल्पनाऽभावेऽपि भूताऽर्थवेदिनामिदानीं तात्कालिकार्थाऽभावज्ञानरूपतत्कल्पनोपपद्यते॥इति सप्तविंशखण्डखण्डनम् ॥ २७ ॥ ॥ किञ्च योब्रह्माणंविदधातिपूर्वमिति श्रुत्याद्युक्तप्राथमिकब्रह्मसृष्ट्यनुपपत्तिः॥ तदानीमीश्वरातिरिक्तस्याऽभावेन तत्कल्पकाभावात्॥ईश्वरस्य च न कल्पकत्वं वक्तुं शक्यमपीश्वरत्वव्याहतेः॥ योविदधातीति श्रुत्युक्तमीश्वरकर्त्तृत्वं चापेयात् ॥ किञ्च सूत्रकारः सर्वेषां वेदान्तानां ब्रह्मणि समन्वयं प्रतिज्ञाय तन्निरूपणार्थं प्रवृत्तः सन्निःसंदिग्धतत्पराणां निश्चितत्वादेव निरूपणमकृत्वा संदिग्धतत्पराणामेव यएषोऽन्तरादित्येहिरण्मयःपुरुषोदृश्यतेहिरण्यश्मश्रुरिति अस्यलोकस्यकागतिराकाशइतिहोवाचेत्यादि कतमासादेवताप्राणइतिहोवाचेत्यादि अथयदन्तःपरोदिवोज्योतिर्दीप्यतइत्यादीनामंतस्तद्धर्मोपदेशात् आकाशस्तल्लिङ्गात् अतएवप्राणः ज्योतिश्चरणाभिधानादित्यादिभिरधिकरणैर्महता प्रबन्धेन यन्निरूपयत्यतोयत्प्रकारकंश्रुतिर्निरूपयति तादृशमेव तद्ब्रह्मैवेति सूत्रकाराऽनुशयइति ज्ञायते ॥ अन्यथा यएषोन्तरादित्यइत्यादिश्रुतिनिरूपितस्वरूपाणां तादृक्जीवादिस्वरूपत्वे ब्रह्मस्वरूपत्वे वा तव मतेऽविद्याकल्पितत्वस्याऽविशिष्टत्वात् ब्रह्मपरत्वमेवैतेषामिति न निर्णयं कुर्यात्॥ ननु ब्रह्मत्वेनैवोपासनानि तत्तत्फलसाधकानीश्वरपुरुषाकाशप्राणादिरूपेष्वब्रह्मत्वेनोपासनेकृते तत्तत्फलं न भविष्यतीति तेषु ब्रह्मत्वबोधनार्थं सूत्रकारेण निर्णयःकृतइतिचेत् ॥ मैवं ॥ वस्तुतस्तेषामब्रह्मत्वे तन्निरूपिकाणां श्रुतीनामब्रह्मपरत्वापत्त्या तन्नियमव्याहतेः॥प्रता-

रकत्वापत्तेश्च ॥ किञ्च अविद्याकल्पितत्वाऽविशेषात्प्रसिद्धार्थाने-
वाऽनूद्य नैतदिति निषेधमेव कुर्यात् ॥ समन्वयप्रतिज्ञामेव च न
कुर्यात् ॥ तेषामब्रह्मत्वेन तन्निरूपिकाणां तासामतन्निरूपकत्वात्॥
तथाच सर्वेवेदायत्पदमामनन्तीति श्रुतिविरोधः ॥ एतेन सविशेष-
निरूपिका श्रुतिर्न ब्रह्मस्वरूपं निरूपयितुं प्रवृत्तेत्यादि निरस्तं ॥
किञ्च कृतेशुक्लश्चतुर्बाहुरित्यादिना इलावृत्तादिदेशविषयेषु तुरी-
यांतामसींमूर्त्तिमित्यादिना च नियतकाले नियतदेशे नियताने-
करूपकथनमनुपपन्नं स्यात् ॥ एकस्याएवाऽविद्यायानियतसाम-
यिकनियतवस्तुकल्पने समयान्तरे चाऽन्यादृशकल्पने हेतोरश-
क्यनिरूपणत्वात् ॥ नच कालादेरेव हेतुत्वं ॥ तस्याप्येतत्तुल्यत्वा-
त् ॥ नच तादृक्स्वभावैव सेति वाच्यं ॥ अद्वैतश्रुत्यनुरोधेनाऽसद्रू-
पत्वेनैव सा त्वदभिमतेति तत्स्वभावस्याऽपि तादृशत्वेन कस्य का-
रणत्वं॥ननु कार्यमपि तथैवेति यक्षबलिन्यायइतिचेत्॥कार्यमास्तां
वा तथा कारणेन तु सतैव भाव्यं मणिमन्त्रादिन्यायेनेति पूर्वमे-
वावोचाम ॥ २८ ॥ ॥ अथ किञ्चयोब्रह्माणमित्यादिः पूर्वमे-
वावोचामेत्यन्तोऽष्टाविंशः खण्डः खण्ड्यते ॥ ॥ तत्र प्राथमिकब्र-
ह्मसृष्टीति वदता कालयवनीयादिवत्सर्वथैव संसारस्यसादित्वमङ्गी-
कर्त्तुं न शक्यमित्युक्तम्॥यदिच प्रवाहस्यानादित्वेन पूर्वयजमान-
उपासनाविशेषपरिपाकेनब्रह्मा जायते तत्सृष्टिरेव प्राथमिकब्रह्म-
सृष्टिरिच्युते तदा तस्यैव कर्मफलभोगाय शरीरकल्पकत्वम् ॥ क-
ल्पकस्य यजमानात्मनस्तस्य सत्त्वात्॥ईश्वरस्य कल्पकत्वमनुपदमे-
वोक्तं ॥ तच्चेश्वरत्वस्य न बाधकं मानाभावात् किन्तु साध-
कमेव ॥ वेदप्रदानं त्ववतारकर्मान्तरवदुपपन्नम् ॥ सगुणब्रह्मविष-

यकवाक्यविचारोऽपि कर्मपरवाक्यज्ञानसाधनपरवाक्यविचारवदुपयोगमात्रेणोपपन्नः ॥ तत्फलन्तु शारीरकभाष्यं व्याकुर्वद्भिः प्रत्यधिकरणं पूर्वपक्षसिद्धान्तयोः फलं निरूपयद्भिर्निरूपितमेवेति तद्ग्रन्थानधीत्य निश्चिनु ॥ सूत्रकाराशयस्य तत्तद्धर्मोपलक्षितस्य ब्रह्मत्वेप्युपपत्तेस्तादृशमेवेत्यस्यासिद्धिः ॥ जीवस्वरूपस्य ब्रह्मस्वरूपस्य वाऽविद्याकल्पितत्वं नास्माभिर्मन्यते ॥ जीवसगुणब्रह्मणोरुपाधेरेव तु तत्वमुच्यते ॥ अतोऽन्यथायएषइत्याद्यसङ्गतम् ॥ तस्माद्वस्तुतस्तेषामब्रह्मत्वे इत्यादिर्निरनुयोज्यानुयोगएव ॥ ईश्वरोपाधेरब्रह्मत्वेऽपि ईश्वरस्वरूपस्य ब्रह्मत्वात् ॥ निषेधमेव कुर्यादितिचेन्नेदमित्यादिना सोपाधिकाभिप्रायेण कृतएवेत्यवेहि॥सविशेषनिरूपिका श्रुतिः सविशेषं निरूपयन्त्यपि न ताद्रूप्येण सत्यत्वे तात्पर्यवती किन्तु यथाकथंचित्प्रतिपत्त्यर्थेत्युक्तम्॥अविद्यायां तु विविधदेशकालादिनियमिततत्तत्कार्यसम्पादनं घटतएव ॥ लोकदर्शनात्॥विविधशक्तित्वेन श्रुतौ वर्णितत्वाच्च विस्तरेणचायमर्थोयोगवासिष्ठे स्थितः ॥ असतोऽपि कारणेन कार्योत्पत्तिरिति मणिमन्त्रादिकारणव्यवस्था च प्रागवोचि ॥ इत्यष्टाविंशखण्डखण्डनम् ॥ २८ ॥ ॥ किञ्च ब्रह्मजिज्ञासां प्रतिज्ञाय ब्रह्मत्वेन निरूपितसविशेषाणां कल्पितत्वं वदन् व्यासप्रतिज्ञाहानिमपश्यन्नुन्मत्तोऽसि ॥ ननु ब्रह्मणएकरसत्वेन सविशेषाणां चानेकरसत्वेन ब्रह्मत्वानुपपत्तिरितिचेत् ॥ मैवं ॥ धर्मिग्राहकप्रमाणसिद्धत्वात् ॥ तथाहि ॥ ब्रह्म वेदैकसमधिगम्यं तत्रच सर्वकामः-सर्वगन्धःसर्वरसइति निरूप्यते ॥ सर्वतःपाणिपादान्तंसर्वतोऽक्षिशिरोमुखं सर्वतःश्रुतिमल्लोकेसर्वमावृत्यतिष्ठति सर्वेन्द्रियगुणाभा-

संसर्वेन्द्रियविवर्जितं असक्तंसर्वभृच्चैवनिर्गुणंगुणभोक्तृचेत्यादिना भगवतैव स्वस्वरूपं प्रतिपादितं ॥ अत्रान्तपदेन करणाद्यवच्छेदउच्यते ॥ अतएव पौगण्डलीलासामयिकं स्वरूपं यावत्परिमाणकं तावत्परिमाणकं तदेव स्वरूपं पूतनामुक्तिदानदशायामपि वर्त्ततइति सङ्गच्छते ॥ सर्वेषामपि रूपाणां नित्यत्वात् ॥ अग्रेच क्रमेण प्रादुर्भावः परं॥यतोबाल्येऽल्पदेशाऽवच्छेदः करादीनां पौगण्डादिषु चाऽधिकदेशावच्छेदोभक्तैरनुभूयते ॥ तत्र शुद्धब्रह्मत्वं ब्रह्मणैव विचारितं तोकेनजीवहरणंयदुलूकिकायास्त्रैमासिकस्यचपदाशकटोपवृत्तः यद्रिङ्गतान्तरगतेनदिविस्पृशोर्वाउन्मूलनंत्वितरथार्जुनयोर्नभाव्यमित्यादिनाद्वितीयस्कन्धे दशमस्कन्धे दामोदरलीलाप्रस्तावे नचान्तर्नबहिर्यस्यनपूर्वंचापिनापरं पूर्वापरंबहिश्चान्तर्जगतोयोजगच्चयः तंमत्वाऽऽत्मजमव्यक्तंमर्त्त्यलिङ्गमधोक्षजं गोपिकोलूखलेदाम्नाबबन्धप्राकृतंयथेत्युक्त्वा रज्जुन्यूनतानिरूपणेनाऽपि पूर्णत्वं तस्यैव प्रतिपादितं ॥ त्रय्याचोपनिषद्भिश्चसाङ्ख्ययोगैश्चसात्वतैः उपगीयमानमाहात्म्यंहरिंसामन्यताऽऽत्मजमिति वाक्ये ॥ मृत्साभक्षणानन्तरीययशोदाप्रार्थितनिजवदनव्यादाने प्रदर्शितसात्मव्रजसहितसकललोकाऽवलोकनजनितवस्तुजिज्ञासायायशोदायाः पक्षान्तरनिराकरणपूर्वकतत्त्वनिर्द्धारकाऽथोअमुष्यैवममार्भकस्ययः कश्चनौत्पत्तिकआत्मयोगइतिवाक्येन ॥ एतेनैव यःपृथिव्यांतिष्ठन्यंपृथिवीनवेदयस्यपृथिवीशरीरंयःपृथिवीमन्तरोयमतिसतआत्मांतर्याम्यमृतइति श्रुत्युक्तधर्मवत्त्वेनाऽपि ब्रह्मत्वं सिद्धं ॥ अतएकोऽप्यसाधारणोधर्मोविद्यमानः शिष्टान्सन्दिग्धानपि ब्रह्मधर्मानेव गमयति॥इममेव हि श्रुत्यभिप्रायमङ्गीकृत्य सर्वत्र ब्रह्मवाक्यानिर्णयमाह

सूत्रकारः॥एतत्सर्वं भागवतविवरणे तत्त्वसूत्रभाष्येच विस्तृतं पितृच-
रणैरित्यत्र दिङ्मात्रं प्रदर्श्यते॥किञ्च सर्वाणियानीन्द्रियाणि चक्षुर्वा-
गादीनि तद्ब्राह्मगुणाश्च लौकिकास्तथैव स्वयमेव ब्रह्माभासते॥
ब्रह्मैव कर्मेन्द्रियज्ञानेन्द्रियादिरूपेण भासतइत्यर्थः॥ननु लौकिका-
नीन्द्रियाणि तत्रसन्ति तदाह॥सर्वेन्द्रियविवर्जितमिति असक्तमित्या-
दि स्पष्टम्॥२९॥ ॥अथ किञ्चब्रह्मजिज्ञासाम्प्रतिज्ञायेत्यादिरस-
क्तमित्यादिस्पष्टमित्यन्तएकोनत्रिंशः खण्डः खण्ड्यते। ॥तत्र वि-
शेषस्य कल्पितस्य भेदप्रयोजकत्वाभावेन निर्विशेषसविशेषयोरभे-
दान्न व्यासस्य प्रतिज्ञाहानिः॥ तथाहीत्यादि उच्यतेपर्यन्तन्त्वस-
कृत्समाहितम्॥ तावत्परिमाणवत्त्वं तु सत्यंज्ञानमनन्तमितिश्रुति-
विरोधान्माययैव॥ पूतनाघातादितु ईश्वरत्वेन नतुकरचरणादेस्त-
त्परिमाणस्य च नित्यत्वेन॥ तस्य तत्राप्रयोजकत्वात्॥ नचान्त-
रितिश्लोके पूर्वार्द्धेन निर्विशेषकथनमुत्तरार्द्धेनोक्तरीत्या सविशे-
षकथनं॥मायया तु रज्जुन्यूनता सकललोकदर्शनादिसामर्थ्यादि॥
अवशीकृतमायेष्वपि योगिविशेषेषु तादृशसामर्थ्यसत्त्वे वशीकृ-
तमाये तत्सत्त्वस्याऽनाश्चर्यत्वात्॥ सत्त्वस्य समूहः सात्त्वं तद्वन्तः
सात्त्वताइति व्याचक्षाणस्तु टीकाकारोमहद्व्याकरणकौशलं ख्या-
पयामास॥ युक्तएवेदृशस्येदृशग्रन्थव्याख्याश्रमः॥ औत्पत्तिकः
स्वाभाविकः असादिरित्यर्थः॥ आत्मयोगोमायात्मकः॥ योगो-
ऽपूर्वार्थसम्प्राप्तौ सङ्गतिध्यानयुक्तिषु इत्यादिमेदिनीकोशात्तस्यैव
तद्युक्तित्वात्॥ सर्वेषामपि धर्माणां चतुर्थश्लोकव्याख्यायां मा-
यिकत्वस्योक्तत्वेन परस्मिन्संदिग्धोऽपि कोऽपि धर्मोनास्ति कि-
मुत निश्चितोयेन धर्मान्तरस्य सत्त्वं सम्भाव्येत॥ साराऽसारवि-

चारचतुरैस्तु व्याससूत्राऽर्थोभगवत्पादकृतभाष्याज्ज्ञेयः ॥ नतु लौकिकानीन्द्रियाणीत्यत्र लौकिकेतिनिर्मूलम् ॥ इत्येकोनत्रिंशखण्डखण्डनम् ॥ २९ ॥ ॥ अतएव वैश्वानरःसाधारणशब्दविशेषादित्यधिकरणे यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानंवैश्वानरमुपास्तइतिश्रुत्युक्तं प्रादेशपरिमाणवत्त्वमभितोविगतमानत्वलक्षणं व्यापकत्वं वाजसनेयिशाखोक्तञ्च सएषोऽग्निर्वैश्वानरोयःपुरुषंसंयोहैतमेवमग्निंवैश्वानरंपुरुषविधंपुरुषेंतःप्रतिष्ठितंवेदेत्यनेन पुरुषत्वं तस्यैव तद्विधत्वं तस्मिन् प्रतिष्ठितत्वं च परस्परविरुद्धं ब्रह्मण्येव संभवति तस्यैव विरुद्धसर्वधर्माश्रयत्वान्नाग्न्यादिष्विति निरूपयन् जैमिन्यादिमतोपन्यासकरणेन पक्षान्तरेष्वरुचिमुद्भाव्य स्वसिद्धान्तमवददामनन्तिचैनमस्मिन्निति ॥ अस्यार्थस्तु एनं परमेश्वरं व्यापकमेवास्मिन्मूर्द्धचिबुकान्तराले प्रादेशमात्रे जाबालाः समामनन्ति यएषोनन्तोव्यक्तआत्मायोविमुक्तेप्रतिष्ठितइतिसोविमुक्तःकस्मिन्प्रतिष्ठितइतिवरणायांनास्यांचमध्येप्रतिष्ठितइत्यादिना ॥ तथाचाऽनन्तपदाद्देशकालापरिच्छिन्नस्यैव सङ्कुचितस्थाने श्रुतिः स्थितिं कथयतीति प्रादेशमात्रस्याऽप्यभिविमानत्वं सङ्गच्छते ॥ एतेन विरुद्धधर्माश्रयत्वं ब्रह्मणः श्रुत्यभिमतं वेदितव्यं ॥ अन्यथा ऽनन्तइति नवदेत् ॥ प्रयोजनाभावात् ॥ ननु मया पूर्वमेवाऽवादि सविशेषनिरूपणमुपासनार्थमिति ॥ नन्वनुपहतकरणेन मयाऽप्यश्रावि॥तर्हि किमनुपपन्नं॥त्वदभिमतोपासनार्थत्वमेव॥ कथं ॥इत्थं ॥ उपासनायां तत्र तत्प्रकारकभावनामात्रं नतु तद्वस्तु तादृशमिति हि तवाऽभिमतं ॥ उपास्यश्चाऽऽत्मत्वेनैव नत्वनात्मत्वेन ॥ आत्मेत्येवोपासीत अथयोऽन्यांदेवतामुपास्तेऽन्योसावन्योऽ-

हमस्मीतिनसवेदयथापशुरेवंहिसदेवानांपशुरितिश्रुतेः ॥ एवञ्च सति योऽन्यथासन्तमात्मानमन्यथाप्रतिपद्यते किन्तेननकृतंपापञ्चौरेणाऽऽत्मापहारिणेति श्रुत्याऽयथाकल्पनस्य निन्दितत्वात्तादृशमेव तद्रूपमिति मन्तव्यं ॥ एवंसत्यनन्तरूपत्वमेव ब्रह्मणः श्रुत्यभिमतं ॥ तथाचाऽनेन रूपेणैतादृशोपासकस्यैतादृशं फलं दास्यामीतीश्वरेच्छयैव तथैव भवतीति ज्ञापयन्ती श्रुतिरुपासनाभेदेन फलभेदमप्याह ॥ किञ्च ॥ त्वदुक्तरीत्योपासनाविषयस्याऽतत्प्रकारकत्वेनाऽब्रह्मत्वमागतं ॥ तथाच तन्निरूपिकाणां श्रुतीनामब्रह्मपरत्वे प्राप्ते सर्वत्र प्रसिद्धोपदेशादिति तत्त्वसूत्रविरोधः॥असद्भावनया चाऽसदेव फलं स्यात्॥तथाच तन्निष्ठस्यमोक्षोपदेशादिति तत्त्वसूत्रविरोधश्च ॥ असन्नेवसभवति असद्ब्रह्मेतिवेदचेदितिश्रुतेरुपासनाविषयाणामसत्त्वं जानानस्य तवान्धतमःप्रवेशेनाऽसत्त्वमेव फलमिति जानीमः॥ तथाचोक्तं त्वादृशानेकाऽसुरचमूपतीनां श्रुतिस्मृत्याचारपराणामपि निजबंधुसुहृद्रूपाणामपि वधाय सकलप्रमाणनिषिद्धत्वेनाऽधर्मबुध्या तद्वधविमुखं विजयं शिक्षयता तद्वधेन सकलसज्जनान् परिपालयता श्रीदेवकीपुत्रेण ॥ अवजानन्तिमांमूढामानुषींतनुमाश्रितं परंभावमजानन्तोममभूतमहेश्वरमित्यादिनाऽसुराणां स्वभजनमुक्त्वा महात्मानस्तुमांपार्थदैवींप्रकृतिमाश्रिताः भजन्त्यनन्यमनसोज्ञात्वाभूतादिमव्ययमिति तत्रैवाऽसुरभावनिरूपणेच असत्यमप्रतिष्ठंतेजगदाहुरनीश्वरं इत्यादिना निरूप्यासुरींयोनिमापन्नामूढाजन्मनिजन्मनि मामप्राप्यैव कौन्तेय ततोयान्त्यधमांगतिमित्यन्तेन॥अत्र मानुषींतनुमाश्रितमितितु तज्ज्ञानप्रकारकथनं नतु स्वरूपस्य ॥ पूर्वोक्तयुक्तिभिरानन्दरूपत्वस्यैव निर्णीतत्वात् ॥

यथाचैतत्तथा आनन्दमयाधिकरणविचारे निरूपितं भाष्ये पितृचरणैः॥ अतएवाऽग्ने भगवानाह परंभावमजानन्तइति॥ परोभावआनन्दमात्रत्वलक्षणः॥ एतेन विशेषाणां लौकिकत्वात् ब्रह्मणश्चाऽलौकिकत्वान्निषेधस्तत्रयुक्तः॥तेषामप्यलौकिकत्वकथने ब्रह्मणिच विरुद्धसर्वाधारत्वाद्यलौकिकशक्तिकल्पने गौरवमिति निरस्तं॥ सर्वस्यैव प्रमाणसिद्धत्वेनाऽकल्पितत्वात्॥ स्वयुक्त्या कल्पने हि त्वदुक्तं दूषणं॥ अन्यथा ब्रह्माङ्गीकारेऽपि गौरवमिति तदनङ्गीकारोऽप्यापद्येत॥ तथाच शून्यवादआपद्येतेति गङ्गातरङ्गसङ्गिकमलपरागधूसरानिलसुखभिया स्ववैराग्यख्यापनाय जनतासमक्षं पलायमानस्य मायावादिकुहकनिर्विण्णस्य शूकरगर्त्ते निपातः॥ ३०॥ ॥ अथाऽतएववैश्वानरइत्यादिर्गर्त्तेनिपातइत्यन्तस्त्रिंशः खण्डः खण्ड्यते॥ ॥ तत्र व्यापकस्य प्रादेशमात्रत्वमौपाधिकम्॥ब्रह्मणि विरुद्धधर्माऽऽश्रयणं तु स्वास्मिन् गार्हस्थ्ययतित्ववदारूढपतितस्याऽविरुद्धम्॥इतरेषान्तु सर्वलोकव्यवस्थोच्छेदापत्त्या तदाश्रयणं विरुद्धमेव॥ वैश्वानरइति सूत्रे साधारणशब्दविशेषादित्यस्याऽयमर्थः॥ साधारणशब्दयोरात्मवैश्वानरशब्दयोर्विशेषोदृश्यते तस्यहवाएतस्यवैश्वानरस्यमूर्द्धैवसुतेजाइत्यादिः॥ साधारणशब्दाद्योविशेषइति तट्टीकादर्शितविग्रहस्त्वसङ्गतः॥ समासाप्राप्तेः॥ तद्विधत्वं तस्मिन्प्रतिष्ठितत्वञ्चेत्यादितु प्रलापउपेक्ष्यः॥ शब्दतोऽलाभात्॥ आमनन्तिचैनमस्मिन्नितिसूत्रार्थे व्यापकमेवेत्यसङ्गतम्॥विरोधात्॥विषयवाक्ये परिच्छेदाऽपरिच्छेदौ मायातदभावप्रयुक्तावनूदितौ तत्र सर्वेषूपास्यधर्मेषु भावनामात्रार्थमनुवा-

दइति न कल्प्यते किन्तु क्वचिद्वस्त्वपि तादृशं ॥ वास्तवत्वं तु श्रु-
तितात्पर्यविषयस्यैव नेतरस्य स्वप्नादेरित्युक्तमसकृत् ॥ योऽन्य-
थासन्तमिति तु भवतामेव प्रतिकूलम् ॥ निर्विशेषस्य सतः सवि-
शेषत्वाङ्गीकारात् ॥ नन्वस्मन्मते आत्मवस्तु सविशेषमेवेत्यात्मत्वेन
सविशेषवस्तूपासने नाऽयं दोषइत्युक्त्यैव निस्तारः किन्त्वात्मव-
स्तुनोवस्तुतःसविशेषत्वे॥यथाचात्मवस्तु नसविशेषं तथोक्तम्प्राक्॥
किञ्च योन्यथासन्तमिति वाक्येनात्मनोऽन्यथा प्रतिपत्तिर्निषिध्यते
नत्वन्यथाभूतस्यात्मत्वेन प्रतिपत्तिः॥एवंच साध्यविरुद्धोऽयंहेतुः ॥
अवस्तुनआत्मत्वेनोपासनस्योपक्रान्तत्वात् ॥ उपासनानां कल्पित-
विशेषैरुपपत्त्या विशेषेषु सत्यतायाउपासनायामप्रयोजकत्वेन
नोपासनयाऽपि विशेषाणां सत्यत्वकल्पनाऽवतारः॥सर्वत्र प्रसिद्धो-
पदेशात् इतितु वास्तवरूपाऽभिप्रायेण॥ उपासनानां शास्त्रप्रतिपा-
द्यत्वेन नासत्फलम् इत्युक्तम् ॥एवञ्च नरकादिपातरूपफलाऽपत्तिर-
युक्ता॥ब्रह्माऽतिरिक्तस्य प्राप्तिस्तु तत्रतत्र श्रूयमाणेष्यतएव ॥ त्वद्री-
त्या तु सर्वस्य सविशेषब्रह्मज्ञानस्य एकमेव फलं स्यात्॥ब्रह्मज्ञान-
त्वाऽविशेषात्॥ तन्निष्ठस्यमोक्षोपदेशादितितु निर्विशेषज्ञाननिष्ठस्य
मोक्षमाह॥असन्नेवसभवतीतितु शून्यवादस्य निन्दा नत्वनिर्वचनी-
यवादस्य ॥ त्वादृशासुरचमूपतीनामित्यस्य श्रुतिस्मृत्याचारपराणा-
मपीति विशेषणं वदता स्वस्य कौमौक्तशप्तब्राह्मणवंशजत्वमाविष्कृ-
तम्॥अवजानन्ति अवहेलयन्ति॥उपसर्गेण धात्वर्थस्याऽन्यत्र नयना-
त् ॥ तथाचाऽयमर्थः ॥ मम परमुत्कृष्टं भावं सत्तामात्मानं वा ॥
भावःसत्तास्वभावाभिप्रायचेष्टात्मजन्मसु इति मेदिनीकोशात् ॥
अजानन्तोऽतएव मूढाः मानुषीं तनुमाश्रितं भूतमहेश्वरमवजान-

न्ति ॥ तथाचाश्रयितुः सकाशादाश्रितायास्तन्वाअस्मच्छब्दार्थात्स-
विशेषान्निर्विशेषस्य भावशब्दार्थस्य च भिन्नत्वं भगवतैवोक्तम् ॥
मानुषींतनुमाश्रितमिति तज्ज्ञानप्रकारकथनमिति तु न युक्तं ॥ त-
ज्ज्ञानस्याऽनुल्लिखितत्वात् ॥ अतएव महाभारताद्युक्तं बलदेवश्री-
कृष्णयोः सितकृष्णकेशत्वं भागवतोक्तं तत्रांऽशेनाऽवतीर्णस्येत्यं-
शत्वं तट्टीकाकारोदाहृतवामनपुराणसम्मतं दशानामवताराणां
सोपानत्वं च सङ्गतम् ॥ यत्तु कृष्णस्तुभगवान्स्वयमिति तत्तु वास्त-
वाऽभेदेन उपास्यप्रशंसापरम्॥तथाच देहस्य निर्विशेषस्य च सवि-
शेषेण शुद्धमैक्यमिति स्वीकुर्वाणाएवैवं निन्द्याः ॥ तेषामेवासुरी
योनिरुक्ताऽधमगतिश्च ॥ असत्यमित्यस्य तु प्राग्व्यवस्था कृता ॥
परंभावमजानन्तइत्यत्रानन्दमात्रलक्षणइत्यर्थोऽस्तु नाम परन्तु-
करचरणादिरानन्दमात्रत्वलक्षणइत्यर्थे बीजमन्वेष्यम् ॥ प्रमाणसि-
द्धेऽपि लाघवगौरवचिन्ता मीमांसाद्वयसिद्धा ॥ अलौकिकत्वादि-
कथनंतु न गौरवेणैव दूष्यते किन्तु मानाभावश्रुतिविरोधाद्यैः ॥
इति त्रिशरखण्डखण्डनम् ॥ ३० ॥ ॥ किञ्च ॥ अस्थूलादिवा-
क्यविरोधेन हि विशेषाणां कल्पितत्वं ब्रूषे ॥ तत्र विरोधः कयो-
रिति पृच्छामः ॥ परस्पराऽत्यन्ताभावसमानाधिकरणयोरितिचेद्ब्रूषे॥
तत्राऽपि पृच्छामोयत्रकुत्रचित्तथात्वेऽपि सामान्यविरोध उत यत्र
तथात्वेन प्रतीतिस्तत्रैव तयोः प्रतीतौ विरोधोनान्यत्रेति ॥ तत्रना-
द्यः ॥ परस्पराऽत्यन्ताऽभावसमानाधिकरणयोरपि निष्क्रमणत्वप्रवे-
शनत्वयोरेकस्मिन्कर्मण्यनुभवात्॥अथ तत्र प्रमाणप्रतीतिसिद्धत्वा-
न्न विरोध इति ब्रूषे॥तदा ब्रह्मण्यप्रामाण्यशंकाकलंकरहितवेदसिद्ध-
त्वादुभयधर्माणां न विरोधइति तुल्यं॥तेन द्वितीयएव पक्षःसाधुरिति

मन्तव्यं ॥ तथाच लोके एव तथात्वेन लौकिकेष्वेव तथात्वे विरोधोनत्वलौकिकेषु ब्रह्मधर्मेषु ॥ धर्मिग्राहकप्रमाणसिद्धत्वात् ॥ ननु स्यादेवं यदि परस्परविरुद्धाऽनेकधर्मवत्त्वमात्रं बोधयेच्छ्रुतिर्न निषेधेत् नत्वेवं॥तथाचाऽखिलश्रुत्युपपत्त्यर्थं ब्रह्म निर्द्धर्मकमेव॥यतोधर्मान् स्वयमेवोक्त्वा स्वयमेव तत्र निषेधति॥धर्मनिरूपणंतु यथाकथञ्चिद्धर्मिप्रतिपत्त्यर्थं॥अन्यथा तादृशस्य निरूपयितुमशक्यत्वात्तदज्ञानेन सर्वेषां मोक्षोच्छेदएव स्यात् ॥ ततस्तत्सिद्धौ धर्मनिषेधमुखेन शुद्धं तन्निरूपयति इति मन्तव्यमितिचेत् ॥ बाढमेवमेवमन्तव्यं स्याद्यदि स्वोक्तधर्मानेव श्रुतिर्निषेधेत् नत्वेवं किन्तु ब्रह्मधर्मनिरूपणे कृते तेषु प्राकृतत्वादिशङ्कास्यात्तन्निवृत्त्यर्थं प्रापञ्चिकधर्मानेव निषेधति ॥ अन्यथा ऽसत्पदार्थनिरूपकत्वेन प्रतारकत्वेन च श्रुतेरप्रामाण्यं स्यात् ॥ लोकप्रसिद्धदुःखितत्वादिधर्मनिषेधेनाऽपि निर्द्धर्मकतन्निरूपणस्य शक्यत्वात्॥ननु श्रुत्युक्ताअपि लौकिकाएवेतिचेत्॥रे मूढ कुत्र वा लोके त्वया त्वत्पित्रा वा सर्वतःपाणिपादान्तत्वादयएकस्मिन् धर्मिणि सर्वेशितृत्वादिकं श्रुत्युक्तमानन्दमात्रकरादिमत्त्वं च दृष्टं श्रुतं वा ब्रह्मातिरिक्ते येनैतेषु लौकिकधर्मानुवादइति ब्रवीषि॥अप्रसिद्धानपि बोधनार्थं स्वयमेवोक्त्वा निषेधतीति नवक्तुं शक्यं॥दत्तोत्तरत्त्वात्॥तथाच तदुक्तब्रह्मण्यनाश्वासप्रसङ्गेन महानेवानयोभवेत्॥किञ्चैवं जन्माद्यस्ययतइत्यादिलक्षणकं ब्रह्म निरूपयिष्यमाणोबादरायणः पूर्वमथातोब्रह्मजिज्ञासेत्युक्त्वाऽस्थूलादिश्रुतीर्विचारयन्नथब्रह्मजिज्ञासेतिवदेत् ॥ एवंसति सर्वेषां वेदान्तानां ब्रह्मपरत्वं दत्ततिलाञ्जलि स्यात् ॥ निषेध्यानामविरोधे विरोधे वा विशेषाऽभावात् ॥ २१ ॥ ॥ अथ किञ्चास्थूलादि-

रित्यादिर्विशेषाभावादित्यन्तएकत्रिंशः खण्डः खण्ड्यते॥ ॥ तत्र निर्विशेषसविशेषवाक्यानां विरोधाऽभावोनञ्सामान्येतिश्लोकव्याख्यायामुक्तएव॥तथापि यक्षानुरोधोबलीति न्यायेनेहोच्यते॥ तद्देशकालावच्छेदेन तत्सम्बन्धतद्धर्मावच्छिन्नाऽभावस्य तद्देशकालावच्छेदेन तद्धर्म्मवता तेन सम्बन्धेन विरोधः॥किञ्च तदत्यन्ताभावरूपत्वादिकं तद्विरोधप्रयोजकं तत्र स्थूलत्वात्यन्ताभावरूपत्वादस्थूलत्वस्य कथं न विरोधइति दिक्॥यथाच लौकिकधर्मान्श्रुतिर्न निषेधति तथोक्तम् ॥ असत्पदार्थस्य सत्त्वेन निरूपणे हि प्रतारकता प्रसज्जते नतु स्वरूपेण निरूपणे ॥ अथरथान् यदाकर्मसु इत्यादिश्रुतेः प्रतारकत्वापत्तेः ॥ अधिकं तु नञ्सामान्येतिश्लोकव्याख्यायामुक्तम्॥ एवञ्च दत्तोत्तरत्वादित्यन्तं प्रत्युक्तम्॥लौकिकशब्देन मायिकस्य ग्रहणात् ॥ स्वमेन्द्रजालादौ यथाकथंचिद्दृष्टमपि ॥ किञ्चेयमुक्तिरेवाऽसङ्गता ॥ स्वमादेरनुवाददर्शनेनाऽन्यत्र दृष्टस्याऽन्यत्र कथनस्याऽनुवादत्वाऽभावात् ॥ करपादादेरानन्दमयत्वस्याऽसित्ध्या करपादत्वादेरन्यत्राऽस्मादृशैस्त्वत्पितामहैर्दृष्टत्वाच्च ॥ सविशेषेऽनाश्वासेऽपि न निर्विशेषे सइति नाऽनयः ॥ अरूपमित्यस्मादनन्तरमनामयमित्युक्तावपि न दुःखसमानाधिकरणरूपस्य निषेधः ॥ प्रमाणाऽभावात् निषेधस्य विशेषाऽनपेक्षत्वाच्च ॥ अतएव वायुरस्पर्शोऽरूपइति न प्रमाणम् ॥ अन्यथा रूपसमानाधिकरणस्यैव स्पर्शस्य निषेधेन तत्प्रमाणं स्यात् ॥ यत्तु गोपरूपोहरिःसाक्षादित्यादिनोक्तं गोपरूपत्वमपि सर्वेश्वरत्वनिराकारत्वपुरस्सरमेवोच्यते इत्युक्तं टीकाकृता ॥ तन्न ॥ शक्त्याद्याकारत्वस्याऽपि शङ्करसंहितादिनोक्तस्य स्वीकारप्रसङ्गात् ॥ तत्पर-

मेवच कृष्णस्तुभगवान्स्वयमिति स्यादेतदाकारस्य पुंस्त्ववत्त्वेन पुंल्लिङ्गोपपत्तेः ॥ सर्वरूपस्य तमोरूपत्वे तव दोषाऽभावेन जुगुप्सितरूपान्तरत्वापत्त्या त्वदुक्तार्थेऽप्यरूपवदेवेत्यादेरसाङ्गत्यापत्तेश्च ॥ सविशेषस्याऽपि ब्रह्मत्वमस्त्येवेति न तत्परश्रुतिविचारकसूत्राणामसङ्गतिः ॥ द्वितीयाध्यायस्य तु नतरां ॥ तत्र भूतादिविषयकश्रुतीनामपि विरोधस्योद्धृतत्वात् ॥ इत्येकत्रिंशखण्डखण्डनम् ॥ ३१ ॥

॥ ॥ ननु सूत्रेष्वपि निर्विशेषस्यैव मुख्यतया निरूपणं दृश्यते ॥ अरूपवदेवहितत्प्रधानत्वात् प्रकृतैतावत्त्वंहिप्रतिषेधतिततोब्रवीतिचभूयइत्यादिभ्यइतिचेत् ॥ मैवं ॥ तदर्थाऽनवबोधात् तथाहि ॥ तत्र जडजीवधर्माः ब्रह्मणि सन्ति नवेति विचारयंस्तन्निरुपकनिषेधकश्रुतीनामन्योन्यविरोधपरिहारं विचारयन्नुभयोरपि श्रुतिवाक्यत्वेनाऽन्यतरबाधमप्यशक्यं जानन्नौपाधिकं ब्रह्म सविशेषश्रुतिविषयोनिरुपाधिस्वरूपं तन्निर्विशेषश्रुतेरिति मतं नस्थानतोऽपिपरस्योभयलिङ्गंसर्वत्रहीतिसूत्रेणौपाधिकत्वे तत्स्वभावत्वं ब्रह्मणि न सम्भवतीति तच्छ्रुतीनामब्रह्मनिरूपकत्वापत्तिरिति निरस्य पुनरुपहिताऽनुपहितयोर्भेदाऽङ्गीकारेणोभयरूपत्वं भविष्यतीति तन्मतोपपत्तिमाशङ्क्य नभेदादितिचेन्नप्रत्येकमतद्वचनादितिसूत्रेणाऽपिचैवमेकइत्यग्रिमेण चाऽभेदबोधकश्रुतिविरोधनिरूपणेन निरस्य पुनराकाराणां प्रपञ्चमध्यपातित्वात्प्रपञ्चस्य च जन्यत्वात्तेषामपि तथात्वात्तेषु ब्रह्माऽभेदबोधनमौपचारिकमतः साकारवादिन्योन ब्रह्मनिरूपिकाइति प्राप्तआह अरूपवदेवहितत्प्रधानत्वादिति स्यादेतदेवं यद्याकाराणां प्रापञ्चिकत्वं भवेन्नत्वेवं॥नहिप्रपञ्चेस्थितत्वेनैव प्रापञ्चिकत्वं वक्तुं शक्यं ॥ त्वदभिमतस्याऽपि तथात्वाप-

त्तेः॥अतोनिराकारवादिनीष्विव साकारवादिनीष्वपि श्रुतिष्वरूपवदेव तत्प्रतिपाद्यते ॥ रूप्यते निरूप्यते व्यवन्हियतइति रूपं सर्वव्यवहारविषयत्वं तद्युक्तं रूपवद्विश्वं ब्रह्मतु तद्विलक्षणमित्यर्थः ॥ यथाचैतत्तथा मृत्साभक्षणादिप्रसङ्गनिरूपणेन निरूपितं ॥ अथवा रूप्यते व्यवन्हियतेऽनेनेति करचरणाद्युच्यते ॥ तथाच यथा लोके करादिकं भिन्नं तद्वानभिमानी भिन्नस्तथा ब्रह्म न श्रुतौ करादिभिन्नं तदभिमानित्वेन निरूप्यते किन्तु करादेरप्यभिन्नत्वात् भेदाऽभावाद्रूपरूपमेव निरूप्यते नतु रूपवदित्यर्थः ॥ ननु कुतएतदवगम्यते करादीनामपि ब्रह्मत्वमेव न तद्भिन्नत्वमित्यतआह तद्विनिगमकं तत्प्रधानत्वादिति ॥ सर्वेषां वेदान्तानां ब्रह्मैव प्राधान्येन प्रतिपाद्यं यतः अयमर्थः करादीनामब्रह्मत्वेतन्निरूपकाणां वेदान्तानामब्रह्मपरतया ब्रह्मपरत्वनियमव्याहतिरतः करादिनिरूपिकाः साक्षाद्ब्रह्मप्रतिपादिकाएवेति सर्वत्रप्रसिद्धोपदेशात् आमनन्तिचैनमस्मिन्नित्याद्यधिकरणरूपोपपत्तिर्हिशब्देनोच्यते ॥ यथासैन्धवघनोऽनन्तरोबाह्यःकृत्स्नोरसघनएवंवाअरेअयमात्मानन्तरोबाह्यःप्रज्ञानघनएवेति सत्यंविज्ञानमानन्दंब्रह्मेति अनन्दमात्रकरपादमुखोदरादिरिति आनन्दमयोभ्यासादित्यादिश्रुतिस्मृतिन्यायैकवाक्यतया सच्चिदानन्दरूपत्वं करादीनामवधारणीयं ॥ अतएवाऽग्रे सूत्रकारोप्याह ॥ आहचतन्मात्रमिति ॥ एताएव श्रुतयोऽत्रानुसंधेयाः ॥ त्वदभिमतव्याख्यानेत्वरूपमित्येतावतैव चारितार्थ्यं स्यात् ॥ रूपवत्त्वस्योभयवाद्यसंमतत्वेनाऽविवादास्पदत्वात्तन्निषेधाऽनुपपत्तिः ॥ रूपरूपत्वस्य सिद्धान्ताऽभिमतत्वात् ॥ एवंसति तथाकथनादस्मदुक्तएवार्थः सूत्रकाराभिमतइति

ज्ञायते॥अपिच दर्शनाच्चेत्यन्तेन श्रुतिस्मृतिप्रत्यक्षैः सर्वविरुद्धधर्माश्रयत्वेन विरोधं परिहृत्य युक्त्याऽपि प्रतिषेधति प्रकृतेति॥ अस्थूलादिवाक्यैरेतावत्त्वं स्थूलत्वाणुत्वन्हस्वत्वादिकं श्रुतिर्ब्रह्मणि यत्प्रतिषेधति तत्प्रकृते लोके प्रकृतं वा यल्लौकिकमेतावत्त्वं तदेव प्रतिषेधति नतु स्वोक्तान् धर्मान् सर्वेशितृत्वादीनित्यर्थः॥ एवमेव नेतिनेनेतीत्यत्र॥ इतिशब्दः प्रकारवाची तथाच पूर्वं मूर्त्तामूर्त्ते ब्रह्मणोविभूतिरूपं यएवंवेदेत्यन्तेन निरूप्य यस्यैतद्रूपद्वयं पूर्वमेव षष्ठ्यन्तेन पदेन निरूपितभेदस्य तस्मिन्निरूप्यमाणेष्वपि सर्वतःपाणिपादान्तत्वादिष्वेवं लौकिकत्वेन वेदनं माभूदिति भिन्नप्रक्रमेणैतत्प्रकारकं वेदनं ब्रह्मणोनिषेधति अथातइत्यादिना॥ अयमर्थः॥ ब्रह्मण्यपि मूर्त्तामूर्त्तरूपे सर्वतःपाणीत्यादिश्रुत्युक्ते वेदितव्ये परंत्वन्येन प्रकारेण न वेदितव्ये ब्रह्मणएते रूपे इति किन्तु ब्रह्मैवैते वेदितव्ये इत्यर्थः॥ अत्र विनिगमकमाह सूत्रकारः ततोब्रवीतिचभूयइति॥ यस्मिन्नेव वाक्ये प्रकरणे वा निषेधति तस्मिन्नेव निषेधानन्तरं पुनस्तं धर्ममाह श्रुतिः॥ यथा पराञ्चिखानीत्युक्त्वा प्रत्यगात्मानमैक्षदिति॥ यतोवाचोनिवर्त्ततेअप्राप्यमनसासहेत्युक्त्वा आनन्दंब्रह्मणोविद्वानिति अस्थूलाद्युक्त्वा एतस्यैवाक्षरस्यप्रशासनेगार्गिद्यावापृथिवीविधृतेतिष्ठतइत्यादि॥ त्वद्व्याख्यानेतु प्रकृतपदं व्यर्थं स्यात्॥ एतावत्पदेनैव सान्निध्यतोरूपद्वयप्रतीतेः सम्भवात्॥ नचैतावत्पदस्य सामान्यवाचकत्वाद्विशेषगमकत्वं तस्येति वाच्यं॥ तुल्यत्वात्॥ अथवा अत्रहि नेतिनेतीतिवाक्यं विचार्यते निषेधः कस्येति॥ तत्र सूत्रे प्रकृतशब्देन द्वेवावब्रह्मणइत्यादिनोक्तं मूर्त्तामूर्त्तलक्षणं रूपद्वयं परामृश्यतइति तवाऽभिमतं॥तथात्र

प्रकृतं प्रतिषेधतीत्येतावतैव चारितार्थ्ये सत्येतावत्पदं व्यर्थं ॥ तेनाऽस्मदुक्तएवाऽर्थोव्यासाभिमतइति मन्तव्यं॥तथाच सविशेषनिर्विशेषनिरूपिकयोः श्रुत्योर्विरोधाभावात्प्रापञ्चिकधर्मरहितं सहजानन्तधर्मयुक्तं ब्रह्मेति सिद्धं ॥ ३२ ॥ ॥ अथ ननुसूत्रेष्वपीत्यादिर्धर्मयुक्तंब्रह्मेतिसिद्धमित्यन्तोद्वात्रिंशः खण्डः खण्ड्यते ॥ ॥ अरूपवदेव प्रकृतैतावत्त्वंहि नस्थानतोपि आहचतन्मात्रमिति सूत्राणि प्राग्व्याख्यातानि ॥ अत्र यद्वाच्यं तच्चोक्तं प्राक् ॥ तत्स्वभावत्वं ब्रह्मणि न सम्भवतीतितु पूर्वपक्षिणेष्टापत्त्या परिहर्त्तुं शक्यं तत्स्वभावत्वस्याद्यपर्यन्तं ब्रह्मण्यसिद्धत्वात्सूत्राक्षराऽलभ्यश्चायमर्थः ॥ आकाराणां प्रपञ्चमध्यपातित्वकथनं रेमूढेत्याद्यनुपदोक्तेन विरुद्धमिति एतद्रीत्याऽस्य सूत्रस्याऽनुत्थानमेव स्यात् ॥ त्वदभिमतस्येत्यसङ्गतम् ॥ निर्विशेषस्याऽसङ्गत्वेन प्रपञ्चानन्तर्गतत्वात्॥अतएव कस्मिन् प्रतिष्ठितः इति प्रश्ने स्वे महिम्नीत्युक्तं श्रुतौ ॥ तदन्तरस्येत्यादिवाक्यानां तु मायिकाधिष्ठानताबोधनपरत्वम् ॥ असौत्रार्थश्चायं नहि प्रपञ्चे इत्यादिर्गालीवत् ॥ अनधीतशब्दार्थमर्यादाबोधकशास्त्रकतया तथा विगृह्य रूपशब्दार्थं व्यवहारविषयत्वं ब्रूषे तथापि रूपवच्छब्दस्य विश्वमात्रे रूढ्यभावेन तत्र यौगिकत्वमेव स्यादिति ब्रह्मण्यव्यवहारविषयत्वसिद्धौ भक्षितेऽपि लशुने न व्याधिः शान्तः इतिन्यायाऽऽपातः ॥ तट्टीकाकारोऽपि अन्धलग्नोऽन्धइव तदर्थाऽज्ञानान्धकूपेऽपतत् ॥ द्वितीयव्याख्यायां नतु रूपवादिति प्रसज्यप्रतिषेधविवक्षायां समासश्चिन्त्यः ॥ व्याख्याद्वयेऽप्यधिकं प्रागुक्तम् ॥ अरूपमित्युक्ते सविशेषवाक्याचा-

रितार्थ्यशङ्कायां तत्प्रधानत्वादित्युक्तम् इति तच्चरितार्थम् ॥ रूपा-
त्मकत्वं तु गुणमात्रात्मकत्वमङ्गीकुर्वतस्ते घटते ॥ अस्मन्मते तु सू-
त्रे रूपशब्देनाकारोगृह्यते ॥ रूपंस्वभावेसौन्दर्येनालोकपशुवृन्द-
योः ग्रन्थावृत्तौनाटकादावाकारश्लोकयोरपि इति मेदिनीकोशा-
त् ॥ दर्शनाच्चेत्यन्तेन श्रुतिस्मृतिप्रत्यक्षैरिति तु विरुद्धम् ॥ अरूप-
वदेवेत्युपक्रमपठितस्य दर्शयतिचाथो अपिचस्मर्यते इत्यस्य नि-
र्विशेषब्रह्मपरत्वात् ॥ परस्यैव ब्रह्मणोदेहादिषूपाधिषु अनुप्रवेश-
स्य श्रुतौ दर्शनादित्यर्थकस्य दर्शनाच्चेति सूत्रस्य अतएवचोपमा-
सूर्यकादिवदित्युपक्रम्य पठितस्य सविशेषप्रतिपादकत्वेन वस्तुतः
सविशेषनिर्विशेषैक्यस्य तत्र सम्मतत्वेऽपि सर्वविरुद्धधर्माश्रयत्वे-
नेत्याद्यर्थस्य तत्राऽनुक्तत्वात् सूर्यकाद्युपमया विशेषस्योपाधिक-
तायाएव ततः प्रतीतेः ॥ यत्तु अस्य पित्रा भगवति सर्वे विरुद्धध-
र्मा दृश्यन्ते ॥ नहि दृष्टेऽनुपपन्नं नाम॥व्याघातात्॥तादृशमेव तद्व-
स्त्वित्यध्यवसायः प्रामाणिकः ॥ चकारादुलूखलबन्धनादिषु प्रत्य-
क्षमेवोभयसाधकं दृष्टमित्याद्यूचे ॥ तत्राऽयमारूढपतितः प्रष्टव्यः
किन्त्वया दृष्टाविरुद्धधर्माइति॥ यद्योमिति ब्रूयात्तर्हि वाच्यं त्वा-
दृशानामपिचेद्भगवद्दर्शनं तर्हि सर्वेऽप्यारुह्य पतेयुरेव तद्दर्शनार्थं ॥
यदिच ब्रूयाद्यशोदादिभिर्दृष्टाइति तर्हि वाच्यम् एवंहि दर्शनाच्चे-
ति सूत्रकारोन ब्रूयात् किन्तु स्मरणाच्चेति ॥ परदृष्टे तथोक्तेस्तच्छै-
लीसिद्धत्वात् ॥ लोके यदेतावत्त्वमित्यर्थे समासश्चिन्त्यः॥विष्णा-
विति श्लोकोक्तंचात्रानुसन्धेयम् ॥ इतिशब्दस्याऽभिव्यक्तपदार्था-
इतिन्यायेनेदमर्थपरत्वं यत्प्राप्तं तद्विहाय निर्मूलार्थान्तरवर्णनेऽपि
नेतीत्यस्य प्रकाराभावोऽर्थः स्यात् नत्वन्येन प्रकारेण नेति ॥ कि-

श्च प्रतियोग्यनुपस्थित्या नञा भेदबोधनमपि निर्मूलम् ॥ असमासस्थले नञोभेदवति लक्षणया पदान्तरार्थेऽभेदाऽन्वयोऽपि व्युत्पत्तिविरुद्धः॥नञ्शब्दान्तरेणान्येन प्रकारेण न वेदितव्ये इत्यर्थकरणं च न युक्तम् ॥ इतिशब्दान्तरस्य वैयर्थ्यात् ॥ अन्यत्तु प्राङ्गिरस्तम्॥ एतावत्त्वशब्दप्रकृतशब्दयोस्तुल्यार्थत्वकथनन्तु शब्दतत्त्वज्ञानात् ॥ अतएव यथेष्टं तौ शब्दौ व्याचख्यौ ॥ एतयोः पदयोः साफल्यन्तु प्रागुक्तम् ॥ प्रकृतशब्देन ब्रह्मणोग्रहणंतु नाऽस्मत्सम्मतमिति त्वद्गुरोस्तथोक्तिरस्मन्मताज्ञानमूलिकैव ॥ एवञ्च ब्रह्मणोनिर्विशेषत्वे न किञ्चिद्बाधकम् ॥ इति द्वात्रिंशखण्डखण्डनम् ॥ ३२ ॥ ॥ यत्तु दृश्यत्वे प्रकाश्यत्वे चाऽदृश्यमग्राह्यं नतत्रसूर्योभातीत्यादिश्रुतिविरोधान्न विशेषकथनं युक्तमिति ॥ तदसत्॥दृश्यत्वस्याऽपि श्रुतिस्मृतिसिद्धत्वात् ॥ तथाहि ॥ कश्चिद्धीरःप्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन् ज्ञानप्रसादेनविशुद्धसत्त्वस्ततस्तुतंपश्यति।निष्कलंध्यायमानः भक्त्यात्वनन्ययाग्राह्यअहमेवंविधोर्जुन ज्ञातुंद्रष्टुंचतत्त्वेनप्रवेष्टुंचपरंतप शृण्वन्तिगायन्तिगृणन्त्यभीक्ष्णशःस्मरन्तिनन्दन्तितवेहितंजनाः तएवपश्यन्त्यचिरेणतावकंभवप्रवाहोपरमंपदांबुजमित्यादि ॥ एवंच सत्युभयाऽविरोधायाऽदृश्यत्वादिनिरूपिका श्रुतिरिन्द्रियाद्यसामर्थ्येन दृश्यत्वं निषेधति ॥ दृश्यत्वनिरूपिका भगवदनुग्रहेणैव भगवतोदृश्यत्वं वदतीत्यवधारणीयं ॥ यतोभगवतैवोक्तं मयाप्रसन्नेनतवार्जुनेदंरूपंपरंदर्शितमात्मयोगात्इति ॥ अत्राऽऽत्मयोगपदात्प्रसन्नः सन् स्वसामर्थ्यं दत्त्वा दर्शयतीति ज्ञायते ॥ ब्रह्माणं प्रतिभगवद्वाक्यं ॥ मनीषितानुभावोयंममलोकावलोकनमिति ॥ अतएव सूत्रकारोऽप्याह दृश्यत्वपूर्वपक्षे अपि

संराधनेप्रत्यक्षानुमानाभ्यामिति ॥ अपीति पूर्वपक्षगर्हायां ॥ मूर्खः पूर्वपक्षीति ॥ यतःसम्यगाराधने पश्यन्ति ॥ कथमेवं प्रत्यक्षानुमानाभ्यां अनेकबाहूदरवक्त्रनेत्रंपश्यामीतिप्रत्यक्षं ध्रुवादीनामनुमापकत्वं ताभ्यामित्यर्थः ॥ श्रुतिस्मृतिभ्यामितिवा ॥ एवंसति मां सर्वे पश्यन्त्विति साधारणेच्छया प्रादुर्भावेन सर्वेषां दर्शनसामर्थ्यमवतारदशायां ॥ अन्यदातु नाहंवेदैरिति भक्त्यात्वनन्ययेतिवाक्याच्च भक्त्यैवेति निर्णयः ॥ भक्तानां त्ववतारदशायामपि भक्त्यैव न साधारणेच्छया ॥ तद्भक्त्यैव तदर्थमेव प्रादुर्भावात् ॥ साधारणेच्छापि यतस्तदर्थैव ॥ लोकमध्यएव यतस्तेषां सुखजननं ॥ अन्यथा लोके स्वप्राकट्यं निष्प्रयोजनकं स्यात् ॥ सर्वेषां भगवद्दर्शनेऽपि यन्मोहानपगमस्तत्र तदिच्छैव प्रतिबन्धिका ॥ तस्य सत्यसंकल्पत्वात् ॥ एवमेव भगवत्स्वरूपाऽज्ञानमपि अलौकिकतेजोऽप्रदर्शनं॥लौकिकानुकरणंच लीलार्थमेव ॥ अन्यथा लीलैव न संभवति ॥ सर्वेषांच तदैव मोक्षः स्यात्तथासति सृष्टिमर्यादोच्छेदः स्यात् ॥ एवमेव प्रकाश्यत्वमपि ज्ञेयं ॥ यदादित्यगतंतेजोजगद्भासयतेखिलं यच्चंद्रमसियच्चाग्नौतत्तेजोविद्धिमामकमिति वाक्यात्स्वतेजसा स्वस्य प्रकाश्यत्वमपि नाऽतिविरोधि ॥ सर्वव्यवहारविषयत्वं च भगवत्कृतमेव नतु जीवेन स्वतः कर्त्तुं शक्यं॥अतएव सूत्रकारोऽप्याह प्रकाशवच्चाऽवैयर्थ्यादिति॥अर्थस्तु पूर्वेणाऽऽकारे प्रतिपादितेऽपि यतोवाचः तन्त्वौपनिषदमित्यादिनिरूपितव्यवहारविषयत्वाविषयत्वविरोधो न परिहृतः ॥ शास्त्रवैफल्यंचेत्यतआहेदं यथा सौरादिप्रकाशोव्यवहार्योऽव्यवहार्यश्च नहि स्वतः संपादयितुं स्थापयितुं वा शक्यते ॥ आगते तु सूर्ये मेघा-

द्यभावेच सांनिध्यमात्रेण व्यवहारः कर्त्तुं शक्यते ॥ तथाच लौकिकवाङ्मनोभ्निर्नशक्यते व्यवहर्त्तुमीश्वरसांनिध्ये तु शक्यतइति द्वयमाह श्रुतिः कुतएतदवैयर्थ्यात् ॥ अन्यथैकस्याः श्रुतेर्वैयर्थ्यापत्तेरिति दर्शनव्यहारस्य श्रुतिसिद्धत्वमुक्तमेव ॥ तथाच दर्शनव्यवहारन्यायेनाऽपरस्याऽपि व्यवहारस्य निर्णयः॥तथाचोक्तं श्रीभागवते ॥ पश्यन्तितेमे इत्युपक्रम्य साकंवाचंस्पृहणीयांवदन्तीति यमेवैषवृणुतेतेनलभ्यइत्यादिश्रुत्याच ॥ ननु दर्शनं ज्ञानमेव नतु चाक्षुषं श्रुत्या निरूप्यते॥ब्रह्मणोऽरूपित्वादितिचेत् ॥ न॥भक्त्यात्वनन्ययेतिवाक्ये ज्ञातुंद्रष्टुंचतत्त्वेनप्रवेष्टुंचपरंतपेतिज्ञानदर्शनप्रवेशानां भिन्नतयैव निरूपणात्॥ रासादिरूपव्यवहारः प्रमाणसिद्धइति तत्र प्रसिद्धकामतद्भावरिरंसारमणादयोऽपि शुद्धब्रह्मधर्माएवेति ज्ञेयं ॥ सर्वशक्तिरितिश्रुतौ पराऽस्यशक्तिर्विविधैवश्रूयतेस्वाभाविकीज्ञानबलक्रियाचेतिश्रुतौच सहजाऽनन्तशक्तिमत्त्वेन निरूपितत्वेन सर्वार्थोपपत्तेः ॥ तेनकामसमयएवाऽकामोऽपि निजचरणनखरसुषमालेशजिताऽशेषसुरसुन्दरीणामखिलस्त्रीरत्नभूतानां व्रजवरवधूनामनवद्यत्द्यकनकाचलेषु विहरन्नप्यात्मारामएव ॥ अतएव आत्मारामोपीति तत्रोक्तं ॥ प्रियाविप्रयोगेनाऽवसादादिभावं भजमानोऽपि तन्नवेद्मीत्यादिवचनैरजानन्नपि व्यापकएव परमानन्दरूपएव सर्वज्ञएव ॥ २२ ॥ ॥ अथ यत्तुदृश्यत्वेइत्यादिः सर्वज्ञएवेत्यन्तस्त्रयस्त्रिंशः खण्डः खण्ड्यते ॥ ॥ तत्र निर्विशेषस्य ज्ञेयत्वादिबोधकानि वाक्यानि वृत्त्युपहितस्य वृत्तिव्याप्यत्वबोधकानि दृश्यतेत्वग्र्ययाबुद्ध्येत्यादिश्रवणादित्युक्तम् ॥ सविशेषस्य तु ज्ञेयत्वादिकमिष्यतएव ॥ त्वदुदाहृतभगवद्वाक्यइदं रूप-

मिति विशेषोपादानादेतादृशे वाक्यान्तरे एतदेकवाक्यतया ऽवतारूपस्यैव दृश्यत्वबोधनाच्च ॥ तस्यचोपासनादिजन्यतत्कृपयैव दर्शनादि नत्वन्यथा ॥ सामान्यचक्षुषां प्रेतदर्शनेऽप्यसामर्थ्यात्प्रेतेच्छयैव सामर्थ्याच्च किमु वक्तव्यं भगवतः सर्वैश्वर्यवतोदर्शने ॥ आत्मयोगशब्दार्थस्तूक्तः प्राक् ॥ सूत्राऽर्थे रेमूर्खेत्युक्त्योत्पत्त्यनुरूपा गालिमत्त्वैव स्वस्याऽऽविष्कृता ॥ प्रत्यक्षाऽनुमानाभ्यामित्यस्यार्थेऽर्जुनस्य प्रत्यक्षं ध्रुवादेरनुमापकमिति वदंस्तूपेक्ष्यएव ॥ ध्रुवस्याऽपि पुराणेषु ईश्वरसाक्षात्कारस्योक्तत्वात् ॥ प्रत्यक्षाऽनुमानाभ्यामितिशब्दस्य सूत्रकारेणेदृशेऽर्थे क्वाप्यप्रयुक्तत्वाच्च ॥ अपिसंराधने इत्युक्तत्वेन प्रतिज्ञाविरोधाच्च ॥ अर्जुनादिदर्शनादेः संराधनेऽभावात् ॥ संराधनं समाधिः ॥ संसिद्धिरूपत्वाद्धात्वर्थानुगमात् ॥ आङ्पूर्वस्यार्थान्तरपरत्वेऽपि संपूर्वस्य राधेस्तथात्वे मानाभावात् ॥ वेदैरित्यस्य सविचारैस्तैरित्यर्थकरणे द्रष्टव्यःश्रोतव्यः तन्त्वौपनिषदम इतिश्रुतिविरोधः किन्तु सामान्यतोधीतैरित्येवार्थः ॥ सत्यपिदर्शने मोहानपगमस्तु जनानां तदपगमसाधनाऽभावान्नतु तदनपगमविषयकभगवदिच्छया ॥ भगवतोनैर्घृण्यप्रसङ्गात् ॥ अतएव सत्यामपीश्वरेच्छायां न सृष्टिविच्छेदः ॥ अतएवच मयाऽनुकूलेननभस्वतेरितंपुमान्भवाब्धिनतरेत्सआत्महेति भागवतोक्तं सङ्गतम् ॥ एवञ्च त्वदुक्त्याऽप्येवमेव फलितं ॥ भगवद्दर्शनेऽपि न मोहाद्यपगमः॥यद्दर्शने च न मोहाद्यपगमस्तस्य ब्रह्मत्वेसत्यामपि पातनेच्छायां भिद्यतेहृदयग्रन्थिरिति श्रुति विरोधोदुर्वारएव ॥ स्वतेजसा स्वस्य विरोधाभावे केन तेजसा प्रकाशे विरोधइति देवानांप्रियः प्रष्टव्यः ॥ सर्वस्याऽपि तेज-

सत्तदीयत्वात् ॥ किञ्चेदानीं नतत्रेति श्रुतिर्निरवकाशैवेत्युक्तं स्यात् ॥ तथाच युक्तमेव ते श्रुत्यर्थव्याख्याकौशलम् ॥ सविशेषस्य सर्वव्यवहारविषयत्वं न निषेधामः ॥ प्रकाशवच्चेति सूत्रार्थः पूर्वं दर्शितः परोक्तेऽर्थे दोषाश्च दर्शिताः ॥ यमेवैषइति श्रुतिश्च व्याख्याता॥भक्त्यात्वनन्ययाइतितु एवंविधइत्युक्त्या सविशेषपरं न निर्विशेषउपयुज्यते ॥ कामसमयेऽप्यकामस्त्वधिष्ठानरूपेण ॥ अन्यत्सर्वं मायया सुघटम् ॥ इति त्रयस्त्रिंशखण्डखण्डनम् ॥ ३३॥

॥ ॥ ननु प्रतियोग्यभावयोरेकावच्छेदेनस्थितिर्न वक्तुं शक्या ॥ तथैव विरुद्धधर्माणामप्यतोनैवं वक्तुं युक्तमितिचेन्न वयं वदामः किन्त्वनुवदामोऽतोन वयम् पर्यनुयोगार्हाः ॥ यदनुवादस्तां श्रुतिं चेत्पर्यनुयोक्तुमुद्यतोऽसि महत्ते साहसं खद्योतस्येवोदयाचलशिखरैकदेशस्थितिमात्रेण सकलजगत्तमःकपाटविपाटनपटुत्वाशक्यतया तरणिं पर्यनुयोक्तुमुद्यतस्य ॥ अथ लोके तथादर्शनात्तदर्थानुसारेणैव च तदर्थस्य वक्तुमुचितत्वात् ॥ श्रुतित्वेनोभयस्याऽपि तुल्यत्वात् सगुणनिर्गुणपरत्वं कल्प्यतइतिचेत् हन्तैवं लोकाऽनुसारेण तदर्थनिर्णये निर्द्धर्मकपदार्थस्याऽपि लोकेऽदर्शनात्सत्तादीनामपि कालाद्याधारत्वसमवायादिधर्मवत्त्वात्तदभिमतं ब्रह्माऽपि न सिद्ध्येत् ॥ श्रुतिबलेनेति तुल्यं ॥ एवंसति लोकाऽप्रतीतं निर्द्धर्मकं वस्तु चेदङ्गीकुरुषे तदा लोकाऽप्रतीतामपि प्रतियोग्यभावयोरप्येकावच्छेदेन स्थितिमङ्गीकुरु ॥ एवंसति श्रुत्यर्थोनलोकरीत्या निर्णेतुं शक्यतइति सिद्धं ॥ अतएव श्रुतिरप्याह नैषातर्केणमतिरापनेयेति ॥ अलौकिकास्तुयेभावानतांस्तर्केणयोजयेदिति स्मृतिश्चेति पूर्वमेवावोचाम ॥ किञ्च ॥ भगवति श्रीयशोदास्तनंधये सर्वं

विरुद्धाधर्मादृश्यन्ते मृत्सोलूखलादिप्रसङ्गेषु ॥ नहि दृष्टेऽनुपपन्नं नाम ॥ व्याघातात् ॥ मायादिपक्षाणां तत्रैव निरस्तत्वात् ॥ अथो-अमुष्येत्यनेन तद्धर्मत्वेनैव निरूपणात् ॥ अतएव सूत्रकारोऽप्याह दर्शनाच्चेति ॥ अपिच मायया दर्शयतीति वदन् वादी प्रष्टव्यः ॥ किं मायाशब्देन भगवत्सामर्थ्यं ब्रवीष्युत तद्भिन्ना सद्रूपा सत्कार्य-कर्त्रीति ॥ आद्ये त्वोमिति ब्रूमः ॥ नच स्वसामर्थ्येनैवासत्प्रदर्शि-तवानिति वाच्यं ॥ यःपृथिव्यांतिष्ठन्पृथिवीमन्तरइत्यादिश्रुत्या ब्र-ह्मधर्मत्वेनैव निरूपणात् ॥ तादृशं ब्रह्म चेन्नस्यात्तदैवं वक्तुमवसरः स्यान्नत्वेवं ॥ उक्तयुक्तेः ॥ असत्प्रदर्शनं चासुरेष्वेव ॥ यतोमोहनं तेषामेव भगवता क्रियते ॥ अत्रच तादृशानामभावान्न तथा प्र-दर्शनमिति सारं ॥ नद्वितीयः ॥ विकल्पाऽसहत्वात् ॥ तथाहि॥सा किं स्वतंत्रैव कर्त्री उत ब्रह्माऽऽधीना ॥ नाद्यो जडत्वाच्चेतनत्वेन त्वयाऽनङ्गीकाराच्च ॥ द्वितीयपक्षेतु करणं स्याद्वासीवत् ॥ तथाच सहजाऽनन्तशक्तिमतईश्वरस्य स्वरूपदर्शने कावाऽशक्तिर्यतस्ता-मूरीकुर्यात् ॥ स्वाभाविकीज्ञानबलक्रियाचेतिश्रुतेः ॥ किञ्च ॥ उ-क्तयुक्तिश्रुतिभ्यः सद्रूपं स्वरूपमसद्रूपया तया दर्शयतीति वक्तु-मशक्यं ॥ एतेनैव सगुणत्वमपि प्रत्याख्यातं ॥ तद्धि प्राकृतसत्त्वा-दिगुणाङ्गीकाररूपं ॥ तच्च स्वतः शक्तस्याऽनुपपन्नमित्युक्तं ॥ एते-नैव ब्रह्मगताऽविद्या ब्रह्मगतविशेषकल्पिकेत्यपि पूर्वविकल्पगत-द्वितीयपक्षोनिरस्तः ॥ ब्रह्मणि जीवातिरिक्ते त्वया तथाऽनङ्गीका-राच्च ॥ अङ्गीकारे वा तस्याउपाधिभावे प्रयोजिकेश्वरेच्छैव वा-च्या ॥ तथाच सर्वभवनसमर्थस्येश्वरस्य त्वदभिमतरीत्या तथाक-रणे हेत्वभावः ॥ इच्छादीनामपि त्वन्मते तदुपाधिभावोसरका-

लीनत्वादसम्भवश्च ॥ आविद्यकत्वे स्वाभाविकत्वहान्या श्रुतिवि-
रोधश्चेति दिक् ॥ ३४ ॥ ॥ अथ ननुप्रतियोगीत्यादिर्विरोधश्चे-
तिदिगित्यन्तश्चतुस्त्रिंशः खण्डः खण्ड्यते ॥ ॥ तत्र निर्धर्मकपदार्थ-
स्येत्यत्र पदार्थशब्देन यदि वस्तुमात्रं गृह्यते तर्ह्यनवस्था ॥ तत्रतत्र
धर्मान्तरस्वीकारस्याऽऽवश्यकत्वात् ॥ किञ्चिद्दूरं प्रधाव्य तत्त्यागे य-
त्र त्यागस्तत्रैव व्यभिचारः ॥ यदिच पदशक्तिविषयोगृह्यते तर्ह्या-
काशत्वादिर्न जातिरिति मते शब्दसमवायिकारणत्वादिविशिष्टे
आकाशादिपदशक्तौ शब्दसमवायिकारणमाकाशमित्यादिसह-
प्रयोगाऽनुपपत्त्या तादृशधर्मोपलक्षिते तादृशशब्दशक्तिर्वाच्येति
तत्र व्यभिचारः ॥ किञ्च जातिशक्तिपक्षे गोत्वादेर्निर्धर्मकस्यैव प-
दार्थत्वमस्ति ॥ तत्पक्षे ऽतिप्रसङ्गस्त्वन्यत्र दर्शितदिशा वारणीयः ॥
लोकाऽप्रतीतमपि वस्तु स्वर्गादिवत्स्वीकुर्मोऽपूर्वत्वेन श्रुतितात्पर्य-
विषयत्वात् नतु तात्पर्यग्राहकाऽभावे लोकविरुद्धं ॥ तत्स्वीकारे
बहुशोदोषस्योक्तत्वात् ॥ श्रुत्यर्थोलोकरीत्यैव विचार्यइत्युक्तम् ॥
नैषेत्यादेरपि गतिरुक्तैव॥मृत्स्नाभक्षणोलूखलबन्धनादिप्रसङ्गेषु वि-
रुद्धाधर्माश्चेत्त्वया दृष्टा स्तर्हि गन्धर्वनगरादितुल्यास्ते ॥ तात्कालि-
कैश्चेद्दृष्टास्तर्हीदानीन्तनानां दर्शनाऽभावेनैतेषां नहिदृष्टेऽनुपपन्नं-
नामेतिन्यायावतारणं न सङ्गच्छते॥अथोअमुष्येत्यनेन मायिकत्व-
मेवोच्यते॥दर्शनाच्चेत्यस्य त्वर्थउक्तः॥यःपृथिव्यांतिष्ठन्नित्यादिवि-
षयेतूक्तम्॥अनन्तशक्तिमत्त्वं भगवतोमाययैव॥मायैवच पराऽस्यश-
क्तिरितिषष्ठ्या भेदेन निर्दिष्टा ॥ तस्याब्रह्माश्रितत्वानङ्गीकारोक्ति-
स्त्वस्मद्ग्रन्थानवलोकनात् ॥ तथाचसंक्षेपशारीरकम् ॥ आश्रयत्व-

विषयत्वभागिनीनिर्विभागचितिरेवकेवलेति ॥ उपाधिभावप्रयोजकं न किञ्चिदनादित्वात् ॥ भाववोपाधिस्वरूपमेव तथेति बोध्यम् ॥ एतेनैव हेत्वभावइत्यन्तमपि प्रत्युक्तम् ॥ इच्छादीनामसम्भवश्च परिहृतः प्राक् ॥ तेषां स्वाभाविकत्वेतु प्रमाणाभावः ॥ इतिचतुस्त्रिंशखण्डखण्डनम् ॥ ३४ ॥ ॥ ननु कामादिलीलायाअनुकरणमात्ररूपत्वेन प्रियावियोगतत्क्लेशादयः पूर्णे ज्ञानैकघने परमान्दस्वरूपे न वक्तुमुचिताइतिचेत्सत्यं ॥ नोचिताएव स्युर्यदि विप्रयुक्तत्वादिना पूर्णत्वादिकं भज्येत नत्वेवं तत्तूक्तं प्रादेशमात्रस्यैवाऽभिविमानत्वादिनिरूपणेन ॥ अनुकरणमात्रत्वं लीलायाअसङ्गतं ॥ तथाहि ॥ भगवत्स्वरूपंहि श्रुत्येकसमधिगम्यं ॥ तत्रच सर्वकामःसर्वरसइत्यनेन सर्वकामरूपत्वं तद्वत्त्वं च सर्वरसरूपत्वं तद्वत्त्वेन सर्वरसभोक्तृत्वं च प्रतिपाद्यते ॥ तैत्तिरीयकेऽपि रसोवैसः रसंह्येवायंलब्ध्वानन्दीभवतीति पठ्यते ॥ रसेषुच शृङ्गाररसस्य मुख्यत्वात्तस्यच रत्याख्यस्थायिभावस्वरूपत्वात्तद्रूपत्वं तद्वत्त्वं चाऽवश्यं वाच्यं ॥ तत्र व्रजवरसुन्दरीभावत्वेन तद्भावानुसारेणैवच सर्वकरणेनैतद्रसरूपत्वं ॥ एतच्च बर्हापीडेति अक्षण्वतामिति चूतप्रवालेति श्लोकविवरणे प्रपञ्चितं पितृचरणैरित्यत्र दिङ्मात्रं प्रदर्श्यते ॥ भगवानपि तासु तादृशभाववानिति तद्वत्त्वं भगवतस्तद्रूपत्वं च॥भगवति भावानामपि स्वरूषातिरिक्तानामभावात्॥ अन्यथा श्रुत्युक्तं रसभोक्तृत्वं रसरूपत्वं च भज्येत ॥ एतस्य रसस्यैतादृशत्वादेव तथामन्तव्यं॥तथाच यावती तस्य रसस्य मर्यादा तावती सर्वाऽपि भगवत्यस्तीति मन्तव्यं ॥ अन्यथा रसत्वव्याहतिरित्युक्तं॥नह्यनुकरणे स्वस्मिन् सरसआपद्यते॥तासां वा रसोत्पत्तिः॥

अन्योन्यमनाविर्भावे तद्रसत्वं तत्र नास्तीति यत स्तद्रसशास्त्रमर्यादा ॥ अतएव गजदृष्टान्तः सर्वत्र आत्तगजेन्द्रलीलः यथामदच्युद्द्विरदःकरेणुभिः श्रान्तोगजीभिरिभराडिवभिन्नसेतुरित्यादि ॥ अतः शृङ्गाररसरूपत्वेन प्रियावियोगतत्कार्यतत्संगमतत्कार्याः सर्वएव सम्भवन्तीति न ब्रह्मत्वक्षतिः ॥ वस्तुनएव तथात्वात् ॥ प्रत्युत ब्रह्मत्वसाधकाएव ॥ विरुद्धसर्वधर्माधारत्वात् ॥ वस्तुतस्तु ब्रह्मगतधर्मेषु विरोधएव नास्ति ॥ श्रुतिभक्तानुभवसिद्धत्वादित्युक्तं ॥ तदुक्तं श्रीभागवतेऽपि नहिविरोधउभयंभगवत्यपरिगणितगुणईश्वरेऽनवगाह्यमाहात्म्येऽर्वाचीनविकल्पवितर्कविचारप्रमाणाऽऽभासकुतर्कशास्त्रकलितान्तःकरणदुरवग्रहवादिनां विवादाऽनवसरइति सर्वमनवद्यं ॥ अथ कृत्वा चिन्तयोच्यते ॥ यदिग्रहिलतयाऽत्मारामत्वादयएव ब्रह्मणि नान्ये धर्माइति मनुषे तदाऽपि वदामः ॥ अस्तु त्वदुक्तं परन्तु सा ब्रह्मधर्ममर्यादा ॥ अत्रच भक्तेष्वतिशयिनाऽनुग्रहेण तद्भक्त्यतिशयेन च स्वस्वरूपमर्यादामप्यतिक्रम्य तदधीनत्वं प्राप्तः सन्यथैव तदभीष्टं भवति तथैव लीलां कुर्वन्नुक्तसर्वभावान्स्वयमेव भजतइति भगवतः पुष्टिरूपमिदमुच्यते॥तदुक्तं भगवता दुर्वाससं प्रति॥अहंभक्तपराधीनोह्यस्वतन्त्रइवद्विजेत्युपक्रम्य वशेकुर्वन्तिमांभक्त्यासत्स्त्रियःसत्पतियथेत्यन्तेन॥अत्र सत्पदद्वयेन स्वस्य तेषु तथारूपत्वं तेषांच प्रतिपत्तिर्न माययेति ज्ञायते॥तथासति तुल्यत्वं न स्यात्॥नचाऽनीशत्वप्रसङ्गः॥एतस्यैव महदैश्वर्यरूपत्वात्॥नह्यन्यः स्वरूपमर्यादां त्यक्तुं समर्थः॥अतएव भिन्नसेतुरिति विशेषणं॥अतएवाऽचिन्त्यमहिमत्वं श्रुतिरप्याह यतोवाचइत्यादिना॥अतोयथायथा शङ्कसे तथाऽधिकं ब्रह्मत्वमेवायातीति चिरंजी-

वा॥३५॥ ॥ अथ ननुकामादिलीलायाइत्यादिश्चिरंजीवेत्यन्तः पञ्चत्रिंशः खण्डः खण्ड्यते ॥ ॥ तत्र प्रादेशिकत्वादि मायिकमित्युक्तम् ॥ एवमेव वियोगसर्वरसत्वादिकमपि ज्ञेयम् ॥ रसोवैसइत्यत्र रसशब्देन शृङ्गाररूपोरसोन गृह्यते इत्युक्तं प्रथमखण्डखण्डने ॥ एवञ्च रसेषुचेत्यादिर्दिङ्मात्रमिह प्रदर्श्यते इत्यन्तोग्रन्थः स्वस्य स्वपितुश्च विटवादित्वख्यापनायैव ॥ निर्मूलत्वात् ॥ अतएव ग्रन्थारम्भोदाहृताः सर्वानिर्विशेषपराः श्रुतयः स्मृतयश्च सङ्गताः॥ एताभ्यएवोत्तरग्रन्थस्य तत्ख्यापनैकफलत्वं ज्ञेयम्॥किञ्चात्तगजेन्द्रलीलइत्यत्रात्तशब्दोपादानान्मायिकत्वमेव लीलायाभाति॥अन्यथाप्तकामत्त्वव्याहतेरित्युक्तं प्राक् ॥ ईश्वररमणस्य मायिकत्वं श्रीकृष्णस्यांऽशत्वं श्रुतीनां व्यवस्था चावोचि प्राक् ॥ विरुद्धधर्मवत्त्वब्रह्मधर्माविरोधावपि निरस्तौ ॥ अतएव भागवते ऽपरिमितगुणे इत्युक्तम् ॥ एतेन हि मायिकत्वं सगुणत्वं च स्पष्टमुक्तम् ॥ तदाऽपि वदामइति प्रतिज्ञायाऽतिशयिताऽनुग्रहेणेत्यादिकथनमसंगतम् ॥ तत्पक्षेऽनुग्रहादेरसंभवेन त्वदुक्तेस्तदातनत्वासंभवात् ॥ तस्मान्मर्यादामार्गविरुद्धः पुष्टिमार्गोमर्यादामार्गपरश्रुत्यादिविरोधादुपेक्ष्यएव ॥ तदनुपेक्षणे तु अन्यथासन्तमितिवचनोक्तं सर्वपापकर्त्तृत्वमेव ॥ तत्फलन्त्वसुर्यानामतेलोकाइतिश्रुत्युक्तमेव किञ्च अहंभक्तेत्यादिनाऽपि मायिकस्यैव कथनम् ॥ अतएवाऽस्वतन्त्रइवेतीवशब्दः प्रयुक्तः ॥ त्वन्मते वस्तुतस्तथाभावात्सन संगच्छते॥तथाचैतादृशपुराणवाक्येन श्रुतेर्मार्गान्तरपरत्वेन संकोचमाश्रित्य पुष्टिमार्गं स्वीकुर्वाणउपेक्ष्यएव॥आत्मारामत्वादिपरवाक्यानामिव ब्रह्महत्यादिनिन्दापरवाक्यानामपि तेन पुष्टीतरमार्गपरता-

यावत्कुशक्यत्वात् पुष्टिमार्गेमर्यादान्तरस्येवपुण्यपापफलनियमम-
र्यादायाअपि भगवता त्यक्तत्वेन तन्मार्गे विरोधाऽभावस्येष्टत्वात्॥
भगवदिच्छया जायतएवेति चेन्नरकमपि जायतएवेति वाच्यम् ॥
ओमितिचेच्चिरं पुष्टिमार्गं नरकार्थं स्वीकुरु॥विप्रशापस्य दुरुच्छेद-
त्वात्॥मर्यादात्यागस्य महैश्वर्यरूपत्वे तत्स्वीकारोभगवतोमहैश्वर्य-
हानये स्यादिति बुद्धवत्सर्वमर्यादाभङ्गायैव यतेत बुद्धनिन्दा च पु-
राणेषु न संगच्छेत ॥ तस्मान्मोहितौदेवमाययेतिवाक्येन पुत्रत्वेन
स्वीकारणस्य निन्दितत्वेन कामित्वादिना स्वीकारः सुतरां निन्दितः॥
इति प्रश्नत्रिंशखण्डखण्डनम् ॥३५॥ ॥ यत्तु जीवाऽदृष्टसंपादि-
तशरीरं भूताऽवेशन्यायेनाऽऽविश्येश्वरः कार्यं कृत्वा ऽऽवेशं त्यज-
ति नत्वीश्वरे स्वाभाविकंशरीरादिकमस्ति ॥ ज्ञानेच्छाप्रयत्ना-
तिरिक्तविशेषधर्माभावात् इति ॥ तत्तूपेक्ष्यं ॥ ईश्वरस्याऽकर्तृ-
त्वाऽऽपादकत्वात् ॥ तथाहि ॥ तन्मते हि सावयवत्वेनाऽनुमि-
तकार्यत्वकक्षित्यादिपक्षककर्तृपूर्वकत्वसाध्यककार्यत्वलिङ्गकानु-
मानेन जगत्कर्तृत्वेनैवेश्वरसिद्धिः॥कर्ता चोपादानगोचराऽपरोक्ष-
ज्ञानचिकीर्षाकृतिमानेव लोके दृष्टइति द्व्यणुकादिनगसागरान्तस्य
पक्षीकरणेन तत्कर्तृत्वेन सिद्ध्यंस्तदुपादानगोचराऽपरोक्षज्ञाना-
दिमान्नित्यः सर्वज्ञएव भवतीति तादृक्कसिद्धिः ॥ तथाच यथा
लोके ज्ञानादिमतएव कर्तृत्वं दृष्टमितीश्वरेऽपि ज्ञानादिसिद्धिरेवं
शरीरिणएव लोके कर्तृत्वं च दृष्टमितीश्वरेऽपि शरीरित्वसिद्धिर्नि-
ष्प्रत्यूहा ॥ कर्तृत्वस्य शरीरित्वव्याप्यत्वात् ॥ नन्वेवं कार्यत्वेनाऽ-
नित्यत्वानुमाने घटादिषु रूपसाहचर्यं लिङ्गस्य दृष्टमिति तद्वि-
शिष्टस्यैव तस्य व्याप्यत्वे रूपाऽभाववति वायौ तदसिद्धिस्तत्सि-

द्धौ वायौ रूपस्याऽपि सिद्धिः स्यात् ॥ नत्वेवं प्रत्यक्षबाधात् ॥ ननु साहचर्यमात्रमप्रयोजकं व्याप्तिरेव प्रयोजिका साच कार्यत्वाऽनित्यत्वयोरेवेति वायावपि तत्सिद्धिरतत्सिद्धिश्चेतिचेत् ॥ तर्हि प्रकृतेऽपि कर्त्तृत्वप्रयोजकं ज्ञानेच्छाप्रयत्नवत्त्वमेवेति शरीरित्वस्य तत्साहचर्यवत्त्वेऽपि न तत्प्रयोजकत्वमतोनेश्वरे तत्सिद्धिः ॥ अन्यथा दृष्टान्तीयाऽशेषधर्मापत्तिः पक्षे स्यात् ॥ तथाच घटदृष्टान्तेन जलेऽनित्यत्वसाधने पृथ्वीत्वादिकमपि सित्ध्येत् ॥ किञ्च चेष्टां विना प्रयत्नमात्रेण कुलालादेर्घटादेः करणे सामर्थ्याभावाच्चेष्टाश्रयस्य शरीरस्य सहकारित्वमस्तु नाम ॥ ईश्वरस्तु प्रयत्नमात्रेणैव सर्वकरणसमर्थइति न तदपेक्षा ॥ किञ्च ॥ शरीरस्य परिच्छिन्नत्व नियमेन युगपत्सकलदेशगतकार्याऽनुत्पत्तिप्रसङ्गइतिचेत् ॥ नैतत्साधीयः ॥ ज्ञानादिमत्त्वस्येव शरीरित्वस्याऽप्यन्वयव्यतिरेकसिद्धत्वात् ॥ तथाहि ॥ यत्र कुलालादिषु कर्त्तृत्वं तत्र शरीरित्वं यत्रच मुक्तात्मस्वशरीरित्वं न तत्र कर्त्तृत्वमतईश्वरस्याऽपि कर्त्तृत्वे शरीरित्वमवश्यमङ्गीकर्त्तव्यं ॥ लोके तथादर्शनात् अन्यथेच्छादिकमपि न सित्ध्येदविशेषात् ॥ अथचेष्टां विनाऽपि प्रयत्नमात्रेण कार्यकरणे समर्थत्वादीश्वरस्य न तदाश्रयतत्सिद्धिरिति ब्रूषे तदेच्छाप्रयत्नौ विनाऽपि ज्ञानमात्रेणैव तथाकरणसमर्थत्वादीश्वरस्य नेच्छादिमत्त्वमित्यपि सुवचं ॥ नच शरीरस्य परिच्छिन्नत्वेनोक्तदोषापत्तिरिति वाच्यं ॥ अन्यथाऽनुपपत्तिबलात्सित्ध्यच्छरीरं यावताऽनुपपत्तिपरिहारस्तावद्रूपमेव सेत्स्यति ॥ शरीरपरिच्छेदानित्यत्वनियमस्त्वनुपपन्नः ॥ पक्षधर्मताबलादपरिच्छिन्ननित्यस्यैव सिद्धेः॥वस्तुतस्तु परिच्छेदानित्यत्वाद्यनुपपत्त्युद्भावनस्य शरीरसि-

ध्यसिद्धिव्याहतत्वेनाऽसम्भवएव ॥ अन्यथा ज्ञानस्याऽप्यनित्य-
त्वनियमेनेश्वरज्ञानस्याऽप्यनित्यत्वप्रसङ्गः ॥ यत्त्वीश्वरस्य कर्त्तृ-
त्वेन शरीरित्वसाधनईश्वराऽसिद्धावाश्रयाऽसिद्धिस्तत्सिद्धौ च ध-
र्मिग्राहकप्रमाणेनाऽशरीरस्यैव सिद्धत्वेन तद्बाधइति ॥ तत्त्वविचा-
रितरमणीयं ॥ तथाहि ॥ अत्र धर्मिग्राहकं प्रमाणं किमिति भ-
वान् पृच्छ्यते ॥ कार्यलिङ्गकमनुमानमितिचेद्ब्रवीति भवांस्तदा ते-
न कर्त्ता परं सित्ध्यति नाऽन्यत् ॥ ननु सत्यमेतत् परन्तु कर्त्ता स्व-
यं कर्त्तृत्वेन सित्ध्यन् स्वकर्त्तृत्वनिर्वाहकमादायैव सेत्स्यतीति व-
दामि ॥ अहो किं तन्निर्वाहकं ॥ ज्ञानेच्छाप्रयत्नाएव ॥ कुतएत-
त् ॥ यतोलोके कार्यकर्त्तृत्वं तद्वतामेव दृष्टं न तद्रहितानां ॥ तर्हि
शरीरस्याऽपि तत्समानयोगक्षेमत्वात् ज्ञानेच्छाप्रयत्नशरीरवानेव
सेत्स्यति ॥ अन्यथातु ज्ञानादिकमपि न सेत्स्यति ॥ लोके दर्शन-
स्य समानत्वादिति बुत्ध्यस्व ॥ ननु शरीरस्य महत्त्वेनोद्भूतरूपव-
त्वेन च चाक्षुषत्वं कथं न स्यात् ॥ लौकिकप्रत्यक्षाऽविषयत्वा-
दितिब्रूमः ॥ श्रूयतेहि देवानामपीन्द्रादीनामप्रत्यक्षत्वं विग्रहवतां
किंपुनरखिलदेवदेवस्याऽप्रत्यक्षत्वे शङ्कानाम ॥ किञ्च ॥ शङ्कानां
तत्सित्ध्युत्तरकालीनत्वात् ॥तत्सित्ध्यसित्ध्यनवसरपराहतत्वेनैवनो-
दयसम्भवइति संक्षेपः ॥ एतेन कार्यस्य शरीरादिमत्कर्त्तृपूर्वकत्व-
नियमः प्रत्यग्रजायमानांऽकुरादावेव शरीरिणः कर्त्तुरनुपलम्भा-
न्निरस्तइति निरस्तं ॥ उक्तयुक्तिभिस्तत्रापि शरीरिकर्त्तृकत्वस्यैव
सिद्धेः ॥ अतोज्ञानदुर्बलव्यामोहनमात्रं परमेतन्मतं नतु सच्छा-
स्त्रीयमिति विद्वद्भिरुपेक्ष्यं ॥ एतदपि त्वन्मताऽनुसारेणैवोक्तं ॥ अ-
स्माकंतु प्रतिसत्कर्णजिह्वाग्रजागरूकोक्तश्रुतिस्मृतिपुराणवाक्य-

तत्त्वसूत्रभेरीघोषोद्घुष्टतया सर्वतःपाणिपादान्तत्वेनाचिन्त्यानन्तशक्तित्वेन भगवान् सिद्धइति नाऽनुमानमशकशुङ्गाराऽपेक्षापीत्यलं प्रसक्ताऽनुप्रसक्त्या ॥ ३६ ॥ ॥ अथ यत्तुजीवादृष्टेत्यादिः प्रसक्ताऽनुप्रसक्त्येत्यन्तः षट्त्रिंशः खण्डः खण्ड्यते ॥ ॥ तत्र स्वाभाविकशरीराभावसाधनार्थं ज्ञानेच्छेत्यादिर्हेतुरसङ्गतः ॥ शरीरस्य विशेषधर्मत्वे मानाभावादप्रयोजकश्च ॥ वैशेषिकैरीश्वरे सुखानङ्गीकारेऽपि नैयायिकैरानन्दंब्रह्मणोविद्वानितिश्रुतिबलात्तत्र सुखाङ्गीकारेण स्वरूपाऽसिद्धश्च ॥ तस्मादिदं तन्मताऽविज्ञानमूलकमेव कथनम् ॥ जगत्कर्त्तृत्वेनैवेत्येवकारोपन्यासोऽपि तन्मताऽज्ञानमूलकः॥वेदनिष्ठेन तात्पर्यवत्त्वेन कार्यायोजनधृत्यादेःपदात्प्रत्ययतःश्रुतेः वाक्यात्संख्याविशेषाच्चसाध्योविश्वजिदव्ययइति श्लोकोक्तैश्च हेतुभिस्तैस्तैः पृथक्पृथग्रूपेणेश्वरस्य साधितत्वात् ॥ लोके दृष्टत्वेनोक्तोनियमोध्वंसे व्यभिचारी ॥ उपादानशब्देन समवायिनोग्रहणात् ॥ कर्त्तुरभावप्रसङ्गश्च॥एवञ्च क्षित्यादिकर्त्ता उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमान् कर्त्तृत्वादिति तद्दीकोक्तमनुमानं प्रत्युक्तम् ॥ भावत्वं तु खण्डनोक्तरीत्या निर्वक्तुमशक्यत्वेन न विशेषणं भवितुमर्हति॥कर्त्तृत्वस्य शरीरित्वव्याप्यत्वे मानाभावस्तर्काभावात् ॥ ज्ञानादिमत्त्वंतु न कर्तृत्वेन साध्यते किन्तु ज्ञानादिमत्त्वरूपमेव कर्त्तृत्वं॥किञ्च ज्ञानत्वेन कार्यत्वावच्छिन्नं प्रति हेतुत्वं नतु चेष्टात्वेनापि ॥ चेष्टायामेव व्यभिचारात्॥ चेष्टायामपि चेष्टान्तरस्य हेतुत्वकल्पनेऽनवस्थाप्रसङ्गात् ॥ नच तवाऽपि ज्ञाने व्यभिचारइति वाच्यं ॥ ज्ञानभिन्नत्वेन हेतोर्विशेषणात् ॥ चेष्टाभिन्नत्वेनाऽपि विशेषणे तु गौरवम् ॥ ज्ञा-

नभिन्नत्वेन विशेषणन्तूभयसम्मतम्॥अन्यथा तवाऽपि ज्ञाने व्यभि-
चारात्॥एवञ्च ज्ञानादिभिन्नकार्यत्वेन ज्ञानत्वेन कार्यकारणभाव-
एवानुकूलस्तर्कः॥इच्छादिकं तु मानान्तरेण साध्यम् ॥ ईश्वरज्ञा-
नस्य नित्यत्वन्तु लाघवोपनीतत्वेनानुमितावेव भासते ॥ किञ्च
कार्यत्वं कृतिसाध्यत्वमिति कार्यत्वाङ्गीकारे द्व्यणुकादौ कृतिसाध्य-
ता सिद्धैव ॥ कृतिं प्रति समानविषयकेच्छात्वेन सामानाधिकर-
ण्येन हेतुताऽस्यैवेतीच्छासिद्धिः॥शरीरसाधकंतु न सर्वसम्मतं कि-
ञ्चिल्लभ्यते इत्यलं नैयायिकमार्गपरिष्कारेण ॥ इति षड्त्रिंशख-
ण्डखण्डनम् ॥ ३६ ॥ ॥ स्यादेतत् ॥ ब्रह्मधर्माः किं ब्रह्मणः
सकाशाद्भिन्नाअभिन्नावा ॥ नतावदाद्यः ॥ तेषामपि नित्यत्वेना-
ङ्गीकारादेकमेवाद्वितीयं असङ्गोह्ययंपुरुषइत्यादिश्रुतिविरोधात् ॥
नद्वितीयः ॥ धर्मत्वव्याहतेः ॥ तथाचैकविज्ञानेन सर्वविज्ञानोपप-
त्त्यर्थं प्रपञ्चवद्ब्रह्मकार्याएव धर्माइति मन्तव्यं ॥ तथासति ब्रह्म
सर्वकल्पनारहितमेव सेत्स्यतीतिचेत् ॥ अत्रोच्यते ॥ यथा सूर्यस्य
तेजोरूपस्य प्रकाशोऽपि तद्रूपएव तद्धर्मरूपः तेजस्त्वेनैव मूलावि-
च्छेदेन प्रतीयमानत्वान्नातद्रूपः ॥ तस्माद्भिन्नत्वेन तदीयत्वेनाऽपि
प्रतीयमानत्वात्तद्धर्मरूपोऽपि ॥ तस्मात्प्रतीत्यनुरोधेनैतादृशमेव त-
द्वस्तूत्पत्तिविशिष्टमित्यङ्गीक्रियते ॥ तथा ब्रह्मधर्माअप्यभेदबोध-
कश्रुत्यनुरोधेन तद्रूपाएव ॥ पराऽस्यशक्तिरित्यादिषु षष्ठ्या भेदे-
नाऽपि प्रतिपादनात् भिन्नाअपि ॥ तथाचोभयविधश्रुतिबलेनैवै-
तादृशमेवैतद्वस्त्विति मन्तव्यं ॥ लौकिकाऽनुवादपूर्वकनिषेधपक्ष-
स्य पूर्वमेवापास्तत्वात् ॥ नच सूर्यजन्यमेव तेजोऽन्तरं प्रकाशइति

वाच्यं ॥ यदादित्यगतन्तेजइतिवाक्याद्भगवत्तेजस्त्वेनाऽजन्यत्वाद्भेदकल्पनायां प्रमाणाभावाद्गौरवाच्च ॥ प्रलये सूर्यनाशेऽपि तेजसोभगवद्दत्तत्वेन पुनर्भगवत्येव स्थितिः ॥ तेजःसहितस्य तस्यैव वा भगवति लयः ॥ ८८ ७५ सूत्रकारोऽपि धर्मस्वरूपनिरूपणआहैवमेव प्रकाशाश्रयवद्वातेजस्त्वादिति ॥ वाशब्दः पूर्वपक्षनिरासे प्रकाशस्तदाश्रयश्च सूर्यादिस्तयोर्यथा भेदस्तद्वद्धर्मधर्मिणोरपीत्यर्थः ॥ प्रकाशस्य स्वाश्रयतेजोऽभिन्नत्वशङ्काव्युदासाय हेतुः ॥ तथासति स्वाश्रयाभिन्नतेजस्त्वादित्यर्थोभवति ॥ अथवा तेजोऽतिरिक्ते वस्तुनि नैवं दृश्यतइत्यतआह हेतुं॥ब्रह्मण्येव तेजःशब्दवाच्यत्वादिति वा ॥ यदादित्यगतमितिवाक्ये तेजसः स्वधर्मत्वेन निरूपणात् ब्रह्मापि तेजोरूपमिति भावः ॥ तस्मात्तादृशधर्मविशिष्टमेव तद्वस्तु श्रुत्यैकमेवेति प्रतिपाद्यते ॥ तथाचैवकारेण भगवत्तद्धर्मातिरिक्तमेव वस्तु व्यवच्छिद्यते नतु तेऽपि ॥ तेषां स्वरूपाऽन्तःपातित्वात् ॥ नहि मध्यन्दिने नभोमण्डले सूर्यएवाऽस्तीति वाक्ये तत्प्रभासत्ताऽपि निषिध्यते ॥ अतएव द्वितीयस्कन्धे ब्रह्मस्वरूपनिरूपणे राज्ञा पृष्टः श्रीशुकस्तन्निरूपयन्नित्याह नयत्रमायाकिमुतापरेहरेरनुव्रतायत्रसुरासुरार्चिताइत्युपक्रम्य युक्तंभगैःस्वैरितरत्रचाऽध्रुवैःस्वएवधामनूरममाणमीश्वरं॥तथाच भगवद्धर्माभगवत्येव नित्याएव॥येषुच भगवान् स्वैश्वर्यादिधर्मान् ददाति तेषु यावत्कालं भगवदिच्छा तावदेव ते तिष्ठन्तीति फलितं॥दशमस्कन्धे चाऽक्रूरदृष्टस्वरूपनिरूपणे श्रियापुष्ट्यागिराकान्त्याकीर्त्यातुष्ट्येलयोर्जया ॥ विद्ययाऽविद्ययाशक्त्यामाययाचनिषेवितमिति वाक्यैकवाक्यतायां लोकसम्मताध्यायत्रयीयाऽणिमाद्यैर्महिमभि-

रित्युपक्रम्य मूर्त्तिमद्भिरुपासिताः सत्यज्ञानानन्तानन्दमात्रैकरस-
मूर्त्तयइति वाक्यैकवाक्यतायां च सर्वेषां धर्माणां सच्चिदान्दरू-
पत्वं सिध्यति ॥ ३७ ॥ ॥ अथ स्यादेतद्ब्रह्मधर्माइत्यादीरूपत्वं
सिध्यतीत्यन्तः सप्तत्रिंशः खण्डः खण्ड्यते ॥ ॥ तत्र पूर्वपक्षे नि-
त्यत्वेनाङ्गीकारस्य भेदाभावे तादृशश्रुतिविरोधे वा प्रयोजकत्वेना-
ऽसङ्गतिः॥श्रुतिविरोधः सम्बन्धासम्भवस्याप्युपलक्षकः॥तदसम्भ-
वस्त्वनवस्थादिप्रसङ्गादुक्तः प्राक्॥तेजस्त्वेनैव मूलाऽविच्छेदेन प्रती-
यमानत्वं ताद्रूप्ये त्वया हेतुरुच्यते समणिप्रभादौ व्यभिचारी॥म-
णिप्रभादौमणित्वाभावात्॥सूर्यादितेजसोभगवद्धर्मस्य सूर्यस्वरूप-
त्वे मानाभावाच्च ॥ तद्भिन्नत्वेन तदीयत्वेन प्रतीयमानत्वमपि त-
त्पुत्रधनादौ व्यभिचारि ॥ तस्माद्दृष्टान्तासिध्या दार्ष्टान्तिके सा-
ध्याऽसिद्धिरेव॥भेदस्याऽप्यङ्गीकारे भेदाभेदवादिमतप्रवेशः ॥ भे-
दस्य मायिकत्वे तु भेदबोधकश्रुतीनामिव धर्मबोधकश्रुतीनामपि
मायिकधर्मबोधकत्वं स्वीकुरु ॥ यदादित्यगतन्तेजइतितूपासनार्थं
स्वीयत्वेन वर्णनम् ॥ सोमोभूत्वारसात्मकः अहंवैश्वानरोभूत्वेत्या-
दिवत् ॥ सोमवैश्वानरावपि तद्रूपावेवेतिचेन्न ॥ नतद्भासयतेसूर्यो
नतत्रसूर्योभातिनचन्द्रतारकंनेमाविद्युतोभान्तिकुतोयमग्निः भीषा-
ऽस्माद्वातःपवते भीषोदेतिसूर्यः भीषाऽस्मादग्निश्चेन्द्रश्च मृत्युर्धाव-
तिपञ्चमइत्यादिवचनविरोधात् त्वन्मते ब्रह्मणोब्रह्माभासकत्वस्य
स्वतोभीतत्वस्य चाऽयुक्तत्वात् ॥ भगवत्तेजसोजन्यत्वाऽभावासि-
द्धेः ॥ यदादिगत्यतमिति व्यपदेशात्प्रामाणिकगौरवस्य सह्यत्वाच्च
तेजः सूर्यादेर्भिन्नमेव ॥ प्रलयइत्याद्ययुक्तमेव ताद्रूप्याङ्गीकारात्॥
प्रकाशाश्रयवद्वेति सूत्रं तु प्राग्व्याख्यातम् ॥ हेतुकोटौ स्वाश्रया-

भिन्नेति अभेदस्यनिवेशात्त्वन्मते स्वरूपासिद्धिरभेदस्य प्रागसिद्ध-त्वात् ॥ तेजस्त्वादिना सूर्यादिप्रकाशदृष्टान्तेन स्वाश्रयाऽभेदसाधनं त्वयुक्तम् ॥ सूर्ये प्रकाशरूपतेजोऽभेदाऽसिद्धेः॥भगवतस्तेजोरूपत्वेऽपि अभेदसिद्धेः प्राक्तद्धर्माणां तेजस्त्वे मानाभावात्॥तेजसस्तद्धर्मत्वे तद्रूपत्वे च नमानम् ॥ यदादित्येत्यस्यतु व्यवस्थोक्तैव ॥ परंज्योतिरित्यत्र ज्योतिःशब्देन ज्ञानं बोध्यं ॥ एवं तेजोमयमित्यादावपि ॥ तेजोराशिमित्यत्रतु शरीरस्य वर्णनं नतु स्वरूपस्य ॥ मानाभावात् ॥ नहि मध्यन्दिने इति गौणव्यवहारेण शब्दशक्तिलभ्यव्यवच्छेदवारणमयुक्तम् ॥ अन्यथा वास्तवभेदस्वीकारेऽपि राजैव समायातीत्यादौ तच्छाटकाद्यवारणवत्तद्धर्माणामवारणसम्भवेन तेषां स्वरूपान्तःपातित्वकथनश्रमस्ते निष्फलः स्यात् ॥ अद्वितीयपदेनैव तद्धर्मातिरिक्तवारणसम्भवेन श्रुतावेकपदेवपदयोर्वैयर्थ्यप्रसङ्गश्च ॥ नयत्रमायेत्यत्र मायापदेन कुहकम् ॥ यत्शब्देन स्वरूपग्रहणेत्वविद्यैव ॥ युक्तंभगैःस्वैरितितु सगुणवर्णनम् ॥ भगशब्देनैश्वर्यं अणिमादिरूपं इतरत्र सगुणोपासनाप्राप्तसत्यलोकेषु अध्रुवै रनियमैस्तत्र जगद्व्यापारवर्ज्यस्यैवैश्वर्यस्य सत्त्वात् ॥ येषुचेत्याद्यसंगतम् ॥ अन्यधर्माणामन्यत्र स्थितेरदृष्टत्वात्कल्पनायादृष्टानुसारित्वस्योक्तत्वात् ॥ भगवत्येवेत्येवकारविरोधाच्च ॥ श्रियापुष्ट्येत्यत्र निषेवितमित्यस्य निरन्तरंयुक्तमित्यर्थः ॥ निषेवितत्वं च मायया ॥ मूर्त्तिमद्भिरिति त्वभिमान्यभेदव्यपदेशेन ॥ सत्यज्ञानेतितु आरोपितस्याऽधिष्ठानाऽभेदेन व्यपदेशात् ॥ तथाच तादृशोयएकरसस्तद्रूपाइत्यर्थः ॥ लोकसम्मताध्यायत्रयीयेत्यत्र च्छप्रत्ययश्चिन्त्यः ॥ इति सप्तत्रिंशखण्डखण्डनम् ॥ ३७ ॥

॥ ॥ लीलायाअप्येवंरूपत्वादेव नित्यतामन्तव्या॥ननु गिरिकाननयमुनापुलिनपशुपक्षिमनुजादिसम्बन्धिनी हि लीला ॥ साच तेषामनित्यत्वे कथं नित्या भवेत् ॥ ननु साध्वी ते वाणी यत्तन्नित्यताशुश्रूषामपि तवाऽभिव्यनक्ति ॥ तन्नित्यता च प्रमाणादेवाऽवसीयते ॥ तथाहि ॥ जयतिजननिवासोदेवकीजन्मवादोयदुवरपरिषत्स्वैर्दोर्भिरस्यन्नधर्मं स्थिरचरवृजिनघ्नःसुस्मितःश्रीमुखेनव्रजपुरवनितानांवर्द्धयन्कामदेवमिति वाक्ये भिन्नकालानामपि द्वारकागोकुलमथुराधिकरणकलीलानां कर्त्तुर्भगवतउत्कर्षेण स्थितेः स्वकथनसमयेऽपि वर्त्तमानत्वं जयतीति वर्त्तमानप्रयोगेण निरूपयन्नेव श्रीशुकस्तत्र तत्र लीलानामपि तथात्वं बोधयितुमेककालीनत्ववाचकशतृप्रत्ययान्तपदंप्रयुक्तवानस्यन्निति वर्द्धयन्निति च॥ तथाच कथनसमयेऽतीतत्वेन प्रतीतानामपि लीलानां तदा वर्त्तमानत्वं प्रतीयते॥तच्च नित्यतायामेव घटते नाऽन्यथा॥किञ्च॥कर्त्तुरेवेदानीं सत्त्वं चेदभिप्रेतं स्यान्नलीलानामपि तदा ता न निरूपयेदेव ॥ परिचायकत्वेन तन्निरूपणे वा तत्तत्कर्त्ता जयतीत्येवं वदेत् ॥ एवंसति गत्यन्तरसद्भावेऽपि यच्छत्रन्तस्यैव निरूपणं तेन लीलानामेव वर्त्तमानत्वं मुख्यतयाऽभिप्रेतमित्यध्यवसीयते ॥ न च विशेषणत्वेनाऽमुख्यत्वमिति वाच्यं ॥ दण्डीप्रैषानन्वाहेत्यत्र यथा प्रैषाऽनुवादस्य लोहितोष्णीषाऋत्विजः प्रचरन्तीत्यत्र च तत्प्रचारस्य च पूर्वसिद्धत्वेन न विधानं किंतु विशेषणस्यैवदण्डित्वस्य लोहितोष्णीषत्वस्यच॥अपूर्वत्वात्॥तथा भगवतोवर्त्तमानत्वे सन्देहाऽभावात्तत्तल्लीलाकरणस्यैव वर्त्तमानत्वस्याऽत्राऽपि निरूपणात् ॥ यद्यपि वर्त्तमानसामीप्येवर्त्तमानवद्वेत्यनुशासनाद्वर्त्तमानसा-

मीप्यादेवाऽत्राप्येवं प्रयोगइति वक्तुं शक्यं तथापि वक्ष्यमाण-श्रुतिपुराणवाक्यैरसन्दिग्धं नित्यतया निरूपणादत्राऽपि तदेकवाक्यत्वार्थं वर्त्तमानार्थएव प्रयोगइति निश्चीयते ॥ किञ्च ॥ तत्सामीप्येऽपि तथा प्रयोगस्य साधुत्वं तत्र ज्ञाप्यते ॥ प्रयोगश्च सामीप्यगुणयोगात् गौणएव नतु मुख्यः ॥ सच मुख्यार्थबाधएव कल्पयितुं युक्तः ॥ तदबाधप्रकारश्चाऽग्रे बक्ष्यते ॥ ३८ ॥ ॥ अथ लीलायाअपीत्यादिः प्रकारश्चाग्रेवक्ष्यतइत्यन्तोऽष्टत्रिंशः खण्डः खण्ड्यते ॥ ॥ तत्र भगवल्लीला नित्या भगवदेकनिष्ठत्वात्तज्ज्ञानवदिति टीकोक्तमनुमानमसंगतम् ॥ आकाशादेरन्यत्र सत्त्वे नित्यत्वेच मानाभावात्तस्याऽपि नित्यत्वे अनित्येजननमित्यादित्वत्संमतवाक्यविरोधाच्च ॥ एजनादेरपि देशाद्यपेक्षत्वेन तदेकनिष्ठत्वाभावेन स्वरूपासिद्धेः ॥ प्रतियोगिसापेक्षलीलासु हेत्वभावेनांऽशतः स्वरूपासिद्धेश्च ॥ सर्वलीलानां नित्यत्वसाधनार्थं त्वत्प्रवृत्तेः ॥ तदेजतितन्नैजतीत्यादीनि स्पन्दस्य मायिकत्वपराणीति प्रतियोगिनिरपेक्षलीलामनेन साधयंष्टीकाकारोभ्रान्तो देशादेस्तत्राऽपि प्रतियोगित्वाच्च ॥ नहि अवकाशस्थलाभावेस्पन्दः सम्भवति ॥ अभावादीनामिव तु लीलान्तराणामपि सर्वासां प्रतियोगिसापेक्षत्वं न सम्भवति ॥ यथासम्भवं वर्णनेतु न नोविद्वेषः ॥ लौकिकयुक्तिविरोधस्याऽकिञ्चित्करत्वं वदन्नप्युपेक्ष्यः ॥ स्वयमेव लौकिकयुक्तिविरोधस्याऽसकृदुद्भावनात् ॥ जयतीत्यत्र स्मपुरानुइत्याद्यन्यतमाध्याहारेण भूतेऽर्थे लट्प्रयोगस्योपपत्तिः ॥ अस्यन्नित्यादौतु धातुसम्बन्धे प्रत्ययाइत्यनेनाऽपि प्रत्ययः सम्भवति ॥ एवमेव क्रियाप्रबन्धस्याविच्छेदेन वर्त्तमानतया सदा ददातीत्यादि-

बह्णुडित्यपि ध्येयम् ॥ यद्वा भूवादिसूत्रस्थमहाभाष्यपर्यालोचनया वर्त्तमानत्वाविवक्षायामपि लटः प्रयोगस्य साधुत्वसम्भवान्नकाऽप्यनुपपत्तिः॥गत्यन्तरसद्भावेऽपि लटः प्रयोगकरणमशोकवनिकान्यायेनेति ध्येयम्॥तत्तत्कर्त्ता जयतीति प्रयोगे शत्रन्तप्रयोगे च फलतोवैलक्षण्यं मन्वानस्तूपेक्ष्यः॥ लीलायानित्यत्वे श्रुत्यादिबाधात्तस्यावर्त्तमानत्वस्य नित्यत्वमन्तरोपपत्तेश्च न तन्नित्यत्वमवसेयम् ॥ कालस्याऽपि विधाने वाक्यभेदात् ॥ विशिष्टविधावपि गौरवाज्जयस्यैव विधानम् ॥ अपूर्वत्वाच्च ॥ किञ्चोत्कर्षेण स्थितिर्न जयः किन्तूत्कर्षेण भानम्॥उत्कर्षेणास्थितेऽपि जयतीतिप्रयोगस्य दर्शनात् ॥ तद्वाक् जयतीतिवाक्यस्य प्रयोगबोधजनकत्वयोर्दर्शनाच्च ॥ नहि वाक्यप्रयोगकाले वाक् भवति येन विशेषदर्शिनोरपि प्रयोगशाब्दौ स्याताम् ॥ अस्माकं तु भानसत्त्वे स्थित्यभावं निश्चिन्वतोरपि तावुपपन्नौ॥अस्त्यन्नधर्मेति प्रयोगादधर्मस्यापि नित्यत्वमुक्त्वा नाशस्य तिरोभावरूपत्वं वदंस्तु टीकाकृदुपेक्ष्यः॥तिरोभावस्यापि वर्तमानप्रयोगवशान्नित्यत्वेऽधर्मफलेश्वरयत्नादेर्निर्विषयत्वापत्तेः ॥ भगवतोवर्त्तमानत्वे सन्देहाभावादित्यप्यसङ्गतम्॥ अनुमानमात्रसिद्धेऽपि आस्तिकानां विश्वासदार्ढ्यायेतरत्रेव शास्त्रस्याऽपेक्षितत्वे विनिगमकाभावेनाऽस्याऽपि तत्परताया वक्तुं युक्तत्वात्॥वक्ष्यमाणवाक्यानान्तूपपत्तिं वक्ष्यामः॥वर्त्तमानसामीप्यइत्यस्य गौणप्रयोगबोधकत्वमित्ययुक्तं प्रमाणाभावात्॥लक्षणयैवोपपत्तौ सूत्रस्य तत्रस्थवाशब्दस्यच व्यर्थतापाताच्च ॥ यज्ञादौ प्रयोगाभावप्रसङ्गाच्च ॥ वर्त्तमानातिदेशपूर्वकं प्रत्ययविधानाद्गौणत्वं बोध्यते इति तट्टीकोक्तमसङ्गतम्॥अतिदेशान्तरविषयेऽतिप्रसङ्गात्॥

कर्तृकर्मणोःकृतीत्यपि शक्तिग्राहकमेव नतु लक्षणाबोधकम् ॥ अतएव वक्ष्यमाणमन्त्रादिस्थस्य पस्पशे इत्यादिकस्य सदेवसौम्येदमग्रआसीत्सोकामयतेत्यादिस्थस्य च भूतार्थप्रयोगस्योपपत्तिः ॥ एवञ्च जयतीत्यस्यात्ध्याहाराविवक्षोत्कर्षभानार्थत्वकर्त्तृपरिचायकप्रकृत्यर्थकत्वक्रियाप्रबन्धसामीप्यबोधकत्वरूपप्रकारसमूहेनोपपत्तिः ॥ इत्यष्टात्रिंशखण्डखण्डनम् ॥ ३८ ॥ ॥ अपिच दशमस्कन्धएव नामकरणप्रस्तावे सर्वज्ञेन गर्गाचार्येण निरूपितं बहूनिसन्तिनामानिरूपाणिचसुतस्यते गुणकर्मानुरूपाणितान्यहंवेदनोजनाइति॥अत्र नाम्नां रूपाणांच बहूनामेव सन्तीतिप्रयोगेण वर्त्तमानत्वं बोत्ध्यते॥तत्रापि गुणानामौदार्यादीनां कर्मणांकालीयदमनादीनां अनुरूपाणां तेषां तथात्वं बोत्ध्यते ॥ अनुरूपत्वंतु तत्समययोग्याकारक्रियादिमत्त्वं ॥ यथा गोवर्धनोद्धरणकर्मणि उत्थितत्वमुद्बाहुत्वं तद्धारणक्रियावत्त्वं सकलगोकुलजनाप्यायकत्वादिकंच ॥ तथाचैतादृशानां नाम्नां वर्त्तमानत्वं तदैव स्याद्यदि तत्प्रयोजकस्वरूपक्रियादीनां वर्त्तमानत्वं स्यात् ॥ अन्यथा कदाचित् तांक्रियानिवृत्तौ तत्प्रयुक्तं नामाऽपि तदा न स्यात् पाचकपाठकवत्॥ननु यथा लोके पाकानुकूलक्रियाराहित्यदशायामपि पाचकमाकारयेदित्यादिप्रयोगोयदाकदाचित्तद्वत्त्वेन तदानीमपि तथोपचारतस्तथाऽत्राऽपि कदाचिद्गुणकर्मयोगात्प्रवृत्तस्य नाम्नोगुणकर्मराहित्यदशायामप्युपचारात्प्रयोगसम्भवेन सन्तीत्यस्योपपत्तेर्न तन्नित्यत्वमायातीति चेत् ॥ मैवं ॥ औपचारिके प्रयोगे नामत्वाभावात् ॥ तस्यमुख्ययैव वृत्त्या बोधकत्वात् ॥ लोके नरसिंहादिनामानि तु डित्थकपित्थादिनामवद्रूढ्यैव तद्वाचकानि

नतूपचारतः ॥ केवलनरेऽप्यशूरेऽपि च तथा प्रयोगात् ॥ अतएव लौकिकपुरुषे प्रयुक्तानि श्रीकृष्णेत्यादीनि नामानि न भगवन्नामानि ॥ तेषां सदानन्दरूपत्वाद्यर्थवाचकत्वेन लौकिकपुरुषेच तदभावेन तत्तदर्थकोलौकिकएव तत्सरूपः शब्दविशेषः सइति मन्तव्यं ॥ भगवन्नामानित्वखण्डब्रह्मरूपाणि ॥ यथा भगवत्स्वरूपे शरीरत्वभानं ग्राहकदोषात्तथा नामस्वपि लौकिकशब्दत्वेन भानं तद्दोषादेवेत्यादि प्रपञ्चितं पितृचरणैः श्रीभागवतविवरणे ॥ तेन स्वरूपवन्नाम्नामपि सर्वेषां नित्यता मन्तव्या॥ननु गुणकर्मानुरूपाणीतिवचनाद्गुणकर्मकरणाऽनन्तरभाविनां नाम्नां कथं ब्रह्मत्वं॥तस्य त्रैकालिकाऽबाधविषयत्वादितिचेन्न ॥ स्वरूपवत्कर्मणामपि प्रादुर्भावेण तदनुरूपनाम्नामपि प्रादुर्भावएव परं नतूत्पत्तिः ॥ अन्यथा निजमखविहतिकुपितदशशतभगकृताऽशनिसारासारावसन्ननिजव्रजजनाऽवनाय वामकरकमलनखराग्रनिहितशिखरिवरगोवर्धनाऽचले श्रीगोकुलनाथे विहताऽखर्वगर्वशक्रसुरभिप्रभृतिविरचितमहाऽभिषेकसमयसमनुभूतश्रीगोविन्दनामाऽग्रेभाविपूतनासुपयःपानाऽनन्तरं स्वप्राणेभ्योप्यतिवल्लभे बीजन्यासं कुर्वन्त्योव्रजवरवध्वः क्रीडन्तंपातुगोविन्दइति गुणगानेच गोविन्दवेणुमनुमत्तमयूरनृत्यमिति कथं वदेयुः ॥ तेन तत्कर्मविशिष्टस्य यस्य रूपस्य यन्नाम तत्कर्मविशिष्टं तद्रूपं नित्यमेव ॥ लोके परं तेषां तेषां भक्तानां तत्तद्रसाऽनुभवार्थं क्रमेणाऽऽविर्भावः कस्याऽप्यंशस्य कस्यचिदाच्छादनमित्येवमन्तव्यं॥तेन भगवान् गोवर्द्धनमुद्धरन् सर्वदा वर्त्ततइति गोवर्द्धनोद्धरणधीर इति क्रियानामभ्यां सहितोगोवर्द्ध-

नोद्धरणरूपः सदा वर्त्तते ॥ अतएवाऽद्यापि भक्तानां तथाऽनुभवः क्वचित् तथा प्रतिकृतौभजनं तथा स्मरणंच ॥ अन्यथात्वतथाभूतस्य तथाभावनेनापराधः स्यात् नतु प्रसादहेतुर्भजनं ॥ योऽन्यथासन्तमात्मानमितिवाक्यात्॥दृश्यतेच तथा भजने प्रसादः॥एवंसति रूपे नामावश्यकत्वेन तत्कर्मानुरूपनामाऽपि नित्यमेवेति नोपचारशङ्कागन्धलेशोऽपि॥किञ्च ॥ नामवत् रूपस्याऽपि गुणकर्माऽनुरूपत्वेन तत्र यथा नौपचारिकसत्त्वशङ्का तथा नाम्न्यपीति बुध्यस्व ॥ गुणकर्मणामपि नित्यत्वप्रतिपादनायैव गुणकर्माऽनुरूपाणीत्युक्तमपि ज्ञायते ॥ अन्यथा कुरुद्विजातिसंस्कारमिति प्रार्थितत्वेन नामकरणाख्यसंस्कारमात्रस्यैव कर्त्तव्यत्वे सति नाम्नां रूपाणां च तत्राऽपि गुणकर्मानुरूपाणां वर्त्तमानत्वं न निरूपयेत्प्रयोजनाऽभावात् ॥ एवंसत्यपि यन्निरूपणं तेनैवं ज्ञापयति ॥ मदुक्तान्यपि नामधेयानि न मया कृतानि किन्तु पूर्वसिद्धान्येव मयाऽनूद्यन्तेपरं ॥ ते सुतस्य बहूनि नामानि रूपाणि सन्तीति समभिव्याहारवशान्नन्दसुतत्वमप्यनादीति ज्ञाप्यते ॥ तेन नन्दस्याऽपीदानीं मम पुत्रोजातइति ज्ञानमप्यनादीति ज्ञेयं ॥ गर्गस्याऽपि नामकरणलीलामध्यपातित्वेन तदागमनवचनादीनामपि नित्यत्वेनानादित्वमेव ॥ पूर्वसिद्धायाएव लीलायाभगवदिच्छया क्रमेणाऽऽविर्भावइति पूर्वमेवोक्तत्वात्सर्वं सुस्थं ॥ ३९ ॥ ॥ अथापि च दशमेत्यादिः सर्वंसुस्थमित्यन्तएकोनचत्वारिंशः खण्डः खण्ड्यते ॥ ॥ तत्र गर्गोक्तिगतसन्निपदमध्याहारादिप्रकारसमूहेन योज्यम् ॥ शब्दनामनिषेधपरश्रुतेः ॥ रूपस्य योग्यमितिविग्रहकाऽनुरूपशब्दार्थे रूपं वस्तुमात्रपरिचायकं ॥ तेन कर्मानुरूपा-

णीति सङ्गतम्॥तच्च न शक्तिकोटिनिविष्टं गौरवाच्छाब्देऽभानाच्च किन्तु योग्यमित्येव शक्यं तच्च बाधशून्यम्॥एवंच स्वार्थगुणकर्मा-शून्या नीत्यर्थः॥त्वदुक्तमनुरूपत्वं तु गौरवानन्वयाऽप्रमाणदोषग्रस्तं॥ योग्यशब्दस्य तत्पर्यायत्वेनाऽऽत्माश्रयग्रस्तंच॥यत्त्वत्र तथाचैतादृ-शानामित्यत्रत्यैतादृशानामिति प्रतीकमुपादाय तट्टीकाकारेण अय-मर्थऔत्पत्तिकादिसूत्रेण शब्दार्थसम्बन्धनित्यतायाः शब्दार्थयो-र्नित्यतायाश्चोपपादितत्वेऽप्यर्थविषये आकृतौ सम्बन्धस्य लक्षणा-दोषग्रस्तत्वेन तदनङ्गीकृत्य व्यासपादैः शब्दइतिचेदिति सूत्रे वै-दिक्यां नित्यतायां व्यक्तावेव सम्बन्धोऽङ्गीकृतइति प्रकृते तादृ-शधर्मविशिष्टसत्त्वएव तद्वाचकनामसत्त्वं सित्ध्यति इत्याद्युक्त्वा तथाच जैमिनिमते यथाऽऽकृतिसत्त्वं तथा व्यासमते गवादिव्य-क्तिसत्त्वमिति सा यथा तत्तद्रूपादिविशिष्टैव सतीत्यतोविशेषणी-भूताऽऽकारादिसत्ता प्राप्यते तथाऽत्र मुख्यतया सन्तीति प्रयोगे-णोक्तविशेषणविशिष्टस्वरूपसत्तायां विशेषणत्वेन लीलायाअपि वर्त्तमानत्वं प्राप्यतइत्यर्थः ॥ ननूक्तसूत्रे अतः प्रभवात् इत्यनेन वेदशब्देभ्योजगदुत्पत्तिमात्रं कथ्यते ऽतः कथं नित्यसृष्टिसिद्धिस्त-दभावेच कथं व्यक्तौ सम्बन्धसिद्धिरिति चेन्न॥प्रभवशब्दस्य ज्ञान-विषयत्वमात्रपरत्वात्सुखेन तत्सिद्धेः ॥ नचाऽत्र तादृशसृष्टौ माना-ऽभावः शङ्क्यः॥अनुकृत्यधिकरणे सर्वस्य भगवदनुकारितायाः सि-द्धत्वेन पुरुषसूक्ते तद्विवरणभूतद्वितीयस्कन्धाध्यायेच यज्ञसम्भारा-णां पशुवनस्पतिप्रभृतीनां ब्रह्मणा दृष्टत्वेन तेषामेवाऽत्र प्रमाणत्वा-त् ॥ नच समाननामरूपसूत्रात्प्रवाहएव शक्तिरितिव्यासाभिप्रायः शङ्क्यः ॥ तस्य पक्षान्तरत्वात्॥आवृत्तावप्यविरोधइति सूत्रस्था-

ऽपिशब्दबलेन तस्य पक्षस्य गौणत्वनिश्चयात् ॥ अतः सूर्याचन्द्रमसौधातायथापूर्वमकल्पयदिति श्रुत्युक्तसृष्ट्यन्तरविषयत्वात्प्रवाहशक्तिपक्षस्य न पूर्वोक्तबाधकत्वमिति तदनुरूपरूपादिसत्ताप्रयुक्तं लीलानित्यत्वमविवादमित्युक्तं ॥ तन्नसंगतम् ॥ तथाहि ॥ जैमिनिमते तावज्जातिशक्तिस्तज्ज्ञानस्यैव च पदार्थस्मृतिद्वारा विशिष्टशाब्दहेतुत्वमितिनलक्षणादोषइत्यादि स्पष्टं वेदान्तपरिभाषातट्टीकादिषु ॥ व्यक्तौ शक्तावतिगौरवमिति चाऽन्यत्र स्पष्टम् ॥ अतोव्यक्तावेवेत्यप्यसंगतम् ॥ शब्दइतिचेन्नातःप्रभवादिति सूत्रात्तथाप्रतीतेः ॥ पूर्वत्र देवानां नानाविग्रहैर्नानादेशसम्बन्धोऽभिहितस्तथाच वैदिकशब्दवाच्यतत्तद्देहाऽनित्यत्वे सम्बन्धस्य द्विष्ठत्वेनैकतराऽनित्यत्वे तन्नित्यत्वाऽसिद्ध्या शब्दस्य बोधकतायानित्यत्वाऽभावेऽबोधकस्य तस्य सत्त्वाङ्गीकारे संगतेः सोऽप्यनित्यइति वेदानित्यत्वमाशङ्क्य नातः प्रभवादित्युक्तम् ॥ अतःशब्दात् देवादिजगतः प्रभवात् ॥ अनेनहि कारणस्य कार्यपूर्ववृत्तित्वबोधनेन देवादिविग्रहाऽभावेऽपि शब्दसत्त्वमुक्तम् नतु विग्रहनित्यत्वमपि श्रुतिस्मृतिभ्यामित्यर्थकप्रत्यक्षाऽनुमानाभ्यामित्यनेनोपन्यस्तश्रुतिस्मृत्योरपि शब्दपूर्वकत्वमेव विग्रहे प्रतीयते एतेइतिवैप्रजापतिर्देवानसृजते त्यादिः भूरितिव्याहरन्सभूमिमसृजतेत्यादिका च श्रुतिः अनादिनिधनानित्यावागुत्सृष्टास्वयंभुवा आदौवेदमयीदिव्यातत:सर्वाःप्रवृत्तयइति नामरूपंचभूतानांकर्मणांचप्रवर्त्तनम् वेदशब्देभ्यएवादौनिर्ममेसमहेश्वरइति सर्वेषांतुसनामानिकर्माणिचपृथक्पृथक् वेदशब्देभ्यएवादौपृथक्संस्थाश्चनिर्ममेइतिचस्मृतिः ॥ अयमभिप्रायः ॥ सत्यं त्वदुक्तरीत्या विग्रहाभावे

तत्सम्बन्धनित्यत्वासिद्धिर्विग्रहेण तत्सम्बन्धमेव वयंचेन्न स्वीकुर्मः किन्तु आकृत्या तर्हि कथं सम्बन्धनित्यताहानिरिति॥एवञ्च व्यासपादैरप्याकृतिशक्तिपक्षएवोपपादितः ॥ प्रभवशब्दस्य ज्ञानविषयत्वमात्रे लक्षणा तु सति जगन्नित्यत्वे तदेवतु निर्मूलम् इत्युक्तमसकृत् ॥ सूत्रमपि जगतः प्रवाहाऽनादितयाऽनित्यत्वमेव जगतआह ॥ समाननामरूपत्वाच्चावृत्तावप्यविरोधोदर्शनात्स्मृतेश्च ॥ अयमर्थः ॥ महासर्गमहाप्रलयलक्षणायां जगतआवृत्तावभ्युपगम्यमानायां शब्दप्रामाण्यादिषु न कश्चिद्विरोधः समाननामरूपत्वात् समाननामरूपताच दर्शनात् श्रुतेः स्मृतेश्च ॥ अग्निर्वाऽकामयतान्नादोदेवानांस्यामितिसएतमग्नयेकृत्तिकाभ्यःपुरोडाशमष्टाकपालंनिरवपदिति नक्षत्रेष्टिविधौ योनिरवपद्यस्मैचनिरवपत्तयोरग्निरितिसमाननामाह श्रुतिः ॥ धातायथापूर्वमकल्पयद्दिवञ्चपृथिवीमित्याद्याचश्रुतिः ॥ स्मृतिश्च ऋषीणांनामधेयानियाश्चवेदेषुदृष्टयः शर्वर्यन्तेप्रसूतानांतान्येवैभ्योददात्यजः यथर्तुष्वृतुलिङ्गानिनानारूपाणिपर्यये दृश्यन्तेतानितान्येवतथाभावायुगादिषु तथाभिमानिनोऽतीतास्तुल्यास्तेसाम्प्रतैरिह देवादेवैरतीतैर्हिरूपैर्नामभिरेवचेति ॥ तथाच प्रवाहानादितयैव वैदिकशब्दतदर्थयोर्नित्यता अत्रच भवेदेषमनोरथोयादि महाप्रलयमहासर्गौ मीमांसकवन्नाङ्गीक्रियेतां ॥ तदङ्गीकारेतु महाप्रलये सर्वव्यवहर्तृव्यवहारोच्छेदात्कथं शब्दादिनित्यतेत्याशङ्कायामिदं सूत्रं प्रवृत्तम् ॥ तथाच यथा मीमांसकमते प्रलयाभावाददोषः सर्वदा व्यवहर्तॄणां सत्त्वादेवमस्मन्मते सर्वदा तदभावेऽपि समाननामरूपत्वान्नदोषइत्यपिशब्दः सङ्गतः ॥ एतेनाऽपि शब्दस्य गौणत्वार्थकत्व-

परत्वोक्तिः प्रत्युक्ता ॥ मानाभावाच्च ॥ सूत्रस्य मतान्तरोपन्यासपरत्वेच न मानम् ॥ सूर्याचन्द्रमसाविति श्रुतिसिद्धस्याऽपि पक्षान्तरत्वं गौणत्वं च वदन्बाह्यत्वादुपेक्ष्यएव ॥ अनुकृतेस्तस्यचेत्यस्यत्वयमर्थः अनु पश्चा त्कृतेः व्यापारात् नतत्रसूर्योभाति इत्यादौ प्राज्ञआत्माग्राह्योनतु तेजोधातुः तमेवभान्तमनुभातीति तत्प्रकाशाधीनप्रकाशतायाः सर्वस्योक्तत्वात्तस्यचेति तस्यभासेति श्रुतिशेषोदाहरणार्थम्॥स्मृतेरिति सूत्रं तु नतद्भासयतेसूर्यइति भगवद्वाक्यपरिग्रहार्थम् ॥ एतादृशाऽनुकारितया कथं नित्यजगत्सिद्धिरिति प्रष्टव्योदेवानांप्रियः ॥ कथं वा ब्रह्मणा दृष्टत्वमात्रेण यज्ञसम्भाराणां नित्यत्वम् ॥ किञ्च तत्र भागवते नाविदंयज्ञसम्भारान्पुरुषावयवादृते इत्यत्राऽविदमिति विदेः प्रयोगोऽस्ति नतु दृशेस्तथाच ज्ञानस्योपासनारूपत्वेन वस्तुसिद्धिरपि दुर्घटा ॥ यत्तु तद्गुरुणा सूर्यादीनां प्रकाशोनास्त्येव घटवत् भगवत्प्रकाशेनैव प्रकाशवत्त्वमिति चकारार्थइत्युक्तम् ॥ तद्धेयम्॥भगवत्प्रकाशस्य भूतसाधारण्याभावात् ॥ भान्तमनुभातीति व्यपदेशविरोधात् तस्यभासेति तृतीयाविरोधाच्च ॥ यदादित्येत्यस्यार्थस्तूक्तः ॥ एतेन भगवानेव सर्वावभासकइत्यपि प्रत्युक्तम् ॥ तमेवसर्वमनुकरोतीति स्ववाक्यविरोधाच्च ॥ नह्येकस्मिन्ननुकरणं सम्भवति ॥ शब्दइतिचेदित्यादिसूत्रार्थेऽपि तत्प्रलापोनिरस्तोबोध्योविस्तरभयात्तु नानूद्यदूष्यते ॥ कर्मणोभूतस्योपलक्षणत्वेपि नशब्दस्यौपचारिकत्वम् ॥ अस्य च्छत्रिणोयान्तीत्येतत्सादृश्यं वदंष्टीकाकारउपेक्ष्यः ॥ तत्र छत्रिणइतरेषां कदाचिदपि छत्रसम्बन्धाभावेनोपलक्षणत्वस्यासम्भवात् ॥ एतेन च्छत्रिणोयान्तीत्यत्र यथा कादाचित्केन

लिङ्गेनेत्यपि प्रत्युक्तम् ॥ तथात्वेऽपि नानामत्वम् ॥ तत्र भूतकालिकगुणादिविशिष्टं संज्ञिनमादाय संज्ञात्वेन तादृशार्थवत्वमादाय प्रातिपदिकत्वेन वा तत्पर्यायनामशब्देन ग्रहणस्य पाचकादिशब्दग्रहणवददुष्टत्वात्॥नहि सर्वदा पाकविशिष्टबोधकपाचकशब्दस्यैव संज्ञात्वं प्रातिपदिकत्वंवा ॥ किंच सर्वज्ञस्य भूतभविष्यत्कर्मज्ञानात्तदादाय नामकरणे का हानिरित्युच्यतां देवानांप्रियेण ॥ लोके नरसिंहेत्यादितु न सन्नियदृच्छाशब्दाइति पक्षे संगतमेव ॥ डित्थाद्यपि प्रसिद्धलोष्टाद्यर्थमादायैव तत्तत्पुरुषे प्रयुज्यते ॥ किञ्च कृष्णादिशब्दानां द्विविधत्वे गौरवमिति तत्सरूपः शब्दविशेषइत्यसंगतम्॥किञ्च भगवन्नामकरणं पुत्रादेर्विद्वद्गोष्ठिगम्यं तद्विरुध्यते॥स्वपुत्रनामग्रहणलब्धसद्गतिकाजामिलोपाख्यानरूपपुराण विरोधश्च॥नाम्नां ब्रह्मरूपत्वं तु विद्वान्नामरूपाद्विमुक्तइति श्रुतिविरुद्धं निर्मूलंच॥एवञ्च वेदवद्भगवन्नाम्नां नित्यत्वकथनं निर्मानम्॥वेदेऽपि विद्वान्नामरूपाद्विमुक्तइत्यादिवचनप्रामाण्यात्प्रवाहानादितैव॥अतएव ऋचःसामानिजज्ञिरे इत्यादिश्रुत्युपपत्तिः॥भगवत्स्वरूपे शरीरत्वभानस्य ग्राहकदोषप्रयुक्तत्वे देहादेः सत्यत्वादि न संगतम् ॥ नहि शुक्तौ रजतत्वभानस्य तथात्वे रजतस्य सत्यत्वादि भवति ॥ किञ्चैवं स्वप्नवज्जागरेऽपि तादृशपदार्थस्य व्यवहारप्रयोजकत्वं स्वीकृतमिति भवत्संमतार्थकेन वैधर्म्याच्चनस्वप्नादिवदित्यनेन विरोधः ॥ प्रादुर्भावस्तु सति नित्यत्वे ॥ तद्यथा नास्ति तथोक्तं प्राक्॥क्रीडन्तंपात्वित्यत्र धातुसम्बन्धे शता॥गोविन्दशब्दस्यगोलाभमात्रप्रयुक्तत्वाभावेनार्थान्तरेण विष्णौ प्रयुक्तस्य तस्य श्रीकृष्णे तदवतारत्वं कुतश्चिज्ज्ञातवतीनां प्रयोगः ॥ पुनर्गोलाभप्रयु-

क्तनामकरणं तु अस्मिन्नवतारे तादृशशब्दस्याऽनेकैः प्रवृत्तिनिर्मित्तैर्विष्णौ प्रयोगप्रदर्शनाय ॥ यद्वा लीलायाः कल्पान्तरीयावतारेष्वपि कृतत्वेन तात्कालिकलीलामादाय प्रवृत्ताञ्शब्दान्कुतश्चित्सर्वज्ञाच्छ्रुतवतीनां तासां तत्प्रयोगः ॥ यत्तु कस्यचिदाच्छादनमित्येव मन्तव्यमित्यत्र मन्तव्यमितिपदमादाय प्रवृत्तायां टीकायां तथासतीदं सिध्यति लीलायाः साक्षात्तत्सम्बन्धिपदार्थानां च प्राकट्याऽप्राकट्ये प्राकट्याऽप्राकट्ययोस्तूत्पत्तिनाशौ तेन प्राकट्याप्राकट्ययोरनित्यत्वं तेन लीलासु तत्सम्बन्धिषु क्रमिकत्वभानमतोन लीलातत्सम्बन्धिनोः स्वरूपनित्यत्वबाधइति लौकिकबोधनानुकूलः पन्थाः ॥ सिद्धान्तस्तु यथा पृथिव्यामेव तत्तद्देशे तत्तत्काले तत्तद्गन्धरूपेणाऽऽविर्भवति न जलादौ तथा तत्तत्काले देशेच तत्तद्रसभोगार्थं तत्रतत्र तथाऽऽविर्भावयिष्यामि तिरोभावयिष्यामीति पूर्वोक्तरीतिकेच्छयैव लीलादिकं क्रमिकतांधत्ते तथा बुद्धिगोचरोवा भवतीति न काप्यनुपपत्तिरिति दिगित्युक्तम्॥तदसंगतम् ॥ प्रथमे पथि पूर्वत्र यानि जगदुत्पत्तिनाशाङ्गीकारे तेन दूषणान्युक्तानि तेषां प्रसरः लीलादेरपि वोत्पत्तिनाशापत्तिः॥ सिद्धान्तभूते तु इच्छयाऽप्याविर्भावे तृतीयानिर्देशात्तस्याहेतुत्वमागतमितीतरस्याऽनित्यत्वं सिद्धं॥किञ्च यदि तत्तद्देशे तत्तत्कालइति पृथिव्यामित्यस्य विशेषणं तदागन्धहीनता क्वचित्कदाचिच्च तस्या वाच्या नच सा प्रमाणसिद्धा॥यदितुतत्तद्देशे तत्तत्काले इत्यस्य विवरणं पृथिव्यामिति तदा दार्ष्टान्तिके तत्रतत्रेत्यस्योपन्यासोऽधिकः॥ पृथिव्यां गन्धस्योत्पत्तिरेवेत्युक्तौ तु नदृष्टान्तसम्भवोऽन्यत्तूक्तम्प्राक् ॥ इदानीन्तनानां गोवर्द्धनोद्धरणविशिष्टानुभवोगन्धर्वनगरानु-

भववद् योगिरचितकायव्यूहाऽनुभववद्वा बोध्यः॥ अपराधवि-
षयेतु समाहितम्प्राक्॥ औपचारिकत्वस्य शब्दधर्मत्वेन रूपे त-
दप्रसक्त्या तद्दृष्टान्तेन नाम्न्यपि तद्वदनुपेक्ष्यः॥ रूपे मायिकत्वं तु
भवत्येव॥अन्यथा कुरुद्विजातिसंस्कारमित्यादिना तु महत्कौशल-
माविष्कृतं देवानांप्रियेण उपक्रमाभावेनातात्पर्यविषयस्य प्रस-
ङ्गापतितत्वमात्रेण दार्ढ्यस्वीकारात्॥ नन्दसुतत्वादि तु देवदत्तसुत-
त्वादिसमानयोगक्षेमम्॥ विशेषे मानाऽभावात्॥ एवमन्यदपि॥
गर्गवाक्यव्यवस्थायाउक्तत्वेन गुणकर्मणामपीत्युक्तिर्हेया ॥ घ-
टादेरपि स्वकपोलकल्पनया त्वया नित्यत्वस्य साधितत्वेन त-
स्याऽपि त्वया भगवदिच्छया ऽऽविर्भावस्य स्वीकृतत्वेन तद्रीत्यैव
निर्वाहेऽन्नत्यः पृथक् श्रमोव्यर्थः॥ इत्येकोनचत्वारिंशखण्डख-
ण्डनम् ॥ ३९ ॥ ॥ श्रुतिरपि गुणकर्मानुरूपाणां प्रत्येकं नि-
त्यत्वाऽभिप्रायेणैवाह॥ तदेजतितन्नैजति तद्दूरेतदंतिकइत्यादि ॥
अन्यथैकस्यैवैकस्मिन्नेव काले क्रियावत्त्वतद्राहित्ये विरुद्धे कथं
बोधयेत्॥ तेन येन रूपेणैजति तस्य रूपस्य तस्यैजनस्य च नि-
त्यत्वेन तत्तथा॥ यच्च रूपं स्थिरं तस्य रूपस्य तस्य स्थैर्यस्य च
नित्यत्वेन नैजत्यपि॥ नच सक्रियाक्रिययोः स्वरूपयोर्भेदः श-
ङ्कनीयः॥ यतएतत्परिहारायैव पुनःपुनर्ब्रह्मवाचकतच्छब्दस्याऽऽवृ-
त्तिमाह पूर्वतच्छब्दस्यैव सर्वत्र सम्बन्धाऽर्हत्वेऽपि॥ तथाचाऽनेक-
नित्यरूपकमनेकनित्यक्रियाकमनेकनित्यनामकं ब्रह्मेति फलितं॥
किञ्च ऋग्वेदेऽपि पठ्यते॥ तावांवास्तून्युश्मसिगमध्यैयत्रगावोभू-
रिश्रृङ्गाअयासः अत्राहतदुरुगायस्यवृष्णःपरमंपदमवभातिभूरीति॥

ता तानि वां युवयोः कृष्णरामयोर्गोपीमाधवयोर्वा वास्तूनि गम-ध्यै प्राप्तुं उश्मसि कामयामहे॥तानि कानीत्याकाङ्क्षायां गूढाऽभिसन्धिमुद्घाटयति॥यत्र गोकुले भूरिशृङ्गादीर्घशृङ्गागावोवसन्तीति शेषः ॥ अथवा आरण्यग्राम्यपशूपलक्षणार्थं भूरिशृङ्गाबहुशृङ्गारुरुप्रभृतयोमृगागावश्चेत्यर्थः ॥ अयासः शुभाः अत्राह अत्र स्थाने भूमौ तत् लोकवेदप्रसिद्धं उरुगायस्योरुकीर्त्तेर्भगवतो वृष्णः गोपिकासु कामान् वर्षतीति वृषा तस्य तत् गोकुलं परमं पदं पदं स्थानं वैकुण्ठः तस्मादप्यधिकं परमं पदं प्रकृतिकालाद्यतीतत्वेनाऽपि वैकुण्ठाद्यपेक्षयाऽतिप्रियत्वेनाऽपि परमं तादृशं पदमवभाति प्रकाशते भूरि बहुतरं ॥ तथाच यदेतादृशं तयोः स्थानं तत्स्थानसम्बन्धीनि वास्तूनि प्रसादत्वेन प्राप्तुं कामयामहे नाऽन्यानीति वाक्यार्थः संपद्यते ॥ भूरिशब्दस्य बाहुल्यार्थत्वेनाऽनेकविधनिकुञ्जगह्वरप्रदेशयमुनापुलिनगोवर्द्धनसान्वादिषु निरन्तरं भगवतः स्थित्या तावद्रूपं प्रकाशतइति तात्पर्यार्थः ॥ भूधातोराप्त्यर्थत्वे व्यापकमितिवा ॥ तथाच परमत्वेन भगवत्स्थानत्वेन भूरित्वेन च नित्यत्वमेव गोकुलस्याऽऽयाति ॥ किञ्च तैत्तिरीयकेऽपि पठ्यते ॥ तेतेधामान्युश्मसिगमध्यैगावोयत्रभूरिशृङ्गाअयासः अत्राहतदुरुगायस्यविष्णोःपरमंपदमवभातिभूरेरिति ॥ ते तव ते तानि धामानि स्थानानि गमध्यै प्राप्तुमुश्मसि कामयामहइति ॥ शेषं पूर्ववत् ॥ भूरेः बहुरूपस्य ॥ रासोत्सवादिषु तथा प्रकटत्वात् ॥ अत्र स्वयं नित्योवेदआभातीति वदन् स्वभानविषयस्य गोकुलस्याऽपि नित्यत्वमेवाह॥अन्येषामभानपक्षेऽपि वर्तमानप्रयोगेण विषयस्याऽपिवर्तमानत्वमेवाऽऽयाति ॥४०॥ ॥ अथ श्रुतिरपीत्यादि-

वर्तमानत्वमेवाऽऽयातीत्यन्तश्चत्वारिंशः खण्डः खण्ड्यते ॥ ॥ तत्र तदेजतीति श्रुतिरपाणिपादइत्यत्रोक्तरीत्या ऽध्यारोपापवादाभ्यां निष्प्रपञ्चपरा॥अधिष्ठानज्ञानकाले अध्यारोपाऽऽश्रयस्यैवाऽपवादाऽऽश्रयत्वज्ञानेनाऽनेकतच्छब्दप्रयोगः॥यथा सैव सर्पोऽसर्पश्च सैव रज्जुरिति॥यथावा सएव नटोमृतः सएवामृतश्चेति॥येनरूपेणेत्यादिस्त्वर्थोऽसङ्गतएव॥शब्दतोऽलाभात् अनेकतच्छब्दानामुपपत्तेरुक्तत्वात् शब्दाऽऽधिक्यमात्रेणाऽर्थाधिक्यस्याऽयुक्तत्वात्॥एवञ्च यत-एतदित्याद्यपि प्रत्युक्तम्॥लट्प्रयोगस्योपपत्तिस्तूक्तैव॥स्वाभाविकीत्यत्र स्वाभाविकत्वोक्त्याऽपि न नित्यत्वसिद्धिः॥प्रवाहानादितयैव तदुपपत्तेरित्याद्युक्तं प्राक्॥ऋग्वेदस्थश्रुतिरप्यध्यारोपपरा॥किञ्च नेयं गोकुलपरा तद्वाचकशब्दाभावाद्ध्रुवां सत्यलोकेऽपि सत्त्वात्सत्यादूर्ध्वंनविद्यते इति बृहत्पराशरेण उक्तत्वात् ॥ अस्तु वा महाभारताद्यपर्वसम्बन्धिनीलकण्ठकृतटीकारीत्या सत्यलोकाऽभिन्नोगोलोकस्तत्परत्वेऽपि तस्य नित्यत्वाद्यप्रमाणमेव ॥ परमशब्दस्योत्कृष्टार्थकत्वेनेतराऽवधिकाऽधिकसुखस्यैव तत्र भानात्॥गोपीषु कामवर्षकस्येति व्याख्यानं तु विटवादित्वेन ॥ सामान्यार्थेनोपपत्तौ विना गमकं जुगुप्सितविशेषपरत्वेन व्याख्यानेऽतिप्रसङ्गात्॥तथा-च यदेतादृशमित्यादिवाक्यार्थस्तु तानि कानीत्याकाङ्क्षायामित्यनयोत्थानिकया विरुद्धः ॥ भूरिशब्देन निकुञ्जादिग्रहणे तात्पर्यग्राहकं नाऽस्ति॥रूढ्यर्थत्यागे व्यापकत्वरूपार्थस्वीकारे च न मानं परिच्छिन्नैतद्ब्रह्माण्डस्थत्वबोधकश्रुतिस्थात्रपदविरोधाच्च॥नच वैश्वानराधिकरणन्यायादेव तत्सिद्धिरिति टीकाकारेण समाहितत्वादिदं न दूषणमितिवाच्यं॥तत्रोपन्यस्तस्य साधारणशब्दविशेषादि-

त्यादिहेतोरदर्शनेन तन्न्यायाऽनवतारात् भूरिशब्दस्यार्थान्तरपरत्वेन त्वयाऽपि व्याख्यातत्वात् ॥ नच व्यापकात्मवादिमते शरीरस्येव भूप्रदेशस्य तद्वृत्तिलाभस्थानत्वादत्रेति ब्रह्माण्डान्तर्गतत्वोक्तिः संगतेति तट्टीकोक्तयुक्त्यन्तरमपि सङ्गतं ॥ तस्याऽपिवैश्वानराधिकरणसमानमूलकत्वात् ॥ यत्रहि मानान्तरेण व्यापकत्वं निश्चितं तत्रहि संदिग्धस्याऽव्यापकत्वस्य वृत्तिलाभेन व्यवस्था निश्चीयते ॥ नचाऽत्र तथाऽस्ति इत्युक्तम् ॥ किञ्च शरीरस्य तल्लाभस्थानत्वेऽप्यात्मनः शरीरेऽस्थितत्वात् अत्र लभ्यतइत्यनुक्तत्वेनोपलब्धिस्थानत्वाऽयोगाच्च नेदं सारं ॥ परमत्वादिकं तु न नित्यत्वप्रयोजकं ॥ मानाभावात् ॥ माधवकृतवेदभाष्येऽयं मन्त्रइत्थं व्याख्यातः ॥ हेपत्नीयजमानौ वां युष्मदर्थं ता तानि गन्तव्यत्वेन प्रसिद्धानि वास्तूनि सुखनिवासयोग्यानि स्थानानि गमध्यै युवयोर्गमनायोश्मसि कामयामहे ॥ तदर्थं विष्णुं प्रार्थयामहइत्यर्थः ॥ तानीत्युक्तं कानीत्याह यत्र येषु वास्तुषु गावो रश्मयो भूरिशृङ्गा अत्यन्तोन्नत्युपेताः बहुभिराश्रयणीयावा अयासो ऽयनागन्तारोऽतिविस्तृताः यद्वा यासो गन्तारो ऽतादृशाः अत्यन्तप्रकाशयुक्ताइत्यर्थः ॥ अत्राह अत्र खलु वास्त्वाधारभूते द्युलोके उरुगायस्य बहुभिर्महात्मभिर्गातव्यस्य स्तुत्यस्य वृष्णः कामानां वर्षकस्य विष्णोस्तत्तादृशं पुराणादिषु गन्तव्यत्वेन प्रसिद्धं परमं निरतिशयं स्थानं भूरि प्रभूतम् अवभाति स्वमहिम्ना स्फुरति इति ॥ इत्थं स्वव्याख्यानमुक्त्वा माधवेनानन्तरमेव निरुक्तव्याख्याप्युपन्यस्ता॥तद्यथा ॥ अयं मन्त्रोयास्केन गोशब्दोरश्मिवाचकइति व्याचक्षाणेन व्याख्यातः ॥ ता तानि वास्तूनि कामयामहे गमनाय यत्र

गावोभूरिश्टङ्गाबहुश्टङ्गाभूरीति बहुनोनामधेयं प्रभवतीति सतः श्टङ्गं श्रयतेर्वा श्टणातेर्वा शम्नातेर्वा शरणायोद्गतमिति शिरसोनिर्गतमिति वा अयासोऽयनाः तत्र तदुरुगायस्य विष्णोर्महागतेः परमं पदं परार्ध्यस्थलमवभाति भूरि पादः पद्यते इति ॥ अत्र निरुक्ते शिरसोनिर्गतमिति प्रतीत्यभिप्रायम् ॥ अस्माकं हि शिरःप्रदेशे रश्मीनां प्रतीतिः ॥ यद्वा शिरः प्रधानेसेनाग्रेशिखरेमस्तकेपिचेति-मेदिनीकोशाच्छिरःशब्दः प्रधानवाची ॥ तेन प्रधानात्सूर्यान्निर्गतमित्यर्थः ॥ एतेन शिरसोनिर्गतमिति विग्रहप्रदर्शनेन गवादिविकारपरताऽपि तत्रत्यश्टङ्गशब्दस्य यास्कसंमतेति टीकाकारोक्तिर्विफलीकृता ॥ तथासति गावइत्यत्राऽप्यर्थान्तरप्रदर्शनस्योचितत्वाच्च ॥ अतएव माधवेनाऽपि गोशब्दः पशुपरः श्टङ्गशब्दश्च तद्विकारपरोनाश्रितः ॥ अन्यथा वास्तुशब्देन विष्णुलोकस्य तदभिमतत्वेन तस्य तदाश्रयणमुचितमेव स्यात् ॥ एवंचेयं व्याख्या यास्कादिविरुद्धत्वेन स्वकपोलकल्पितैव ॥ यत्तु रश्मयोगावउच्यन्तेइति प्रतिज्ञाय यास्केनाऽस्य मन्त्रस्य व्याख्यातत्वेऽपि सूर्यनिरूपणं प्रतिज्ञायाव्याख्यातत्वेन चार्थान्तरोक्तौ न दोषइत्युक्तम् ॥ तन्न ॥ तस्याऽपि तादृशार्थे साधकाऽभावे स्वकपोलकल्पितत्वाद्बाधकन्तूक्तमेव ॥ अदोयद्दारुप्लवते इति लक्ष्मीप्रकाशकमन्त्रस्य माधवेन व्यासेन च पुरुषोत्तममाहात्म्ये जगन्नाथपरत्वेन यद्व्याख्यानं कृतं तत्तु न दृष्टान्तयोग्यं ॥ व्यासस्य सर्वज्ञत्वान्माधवस्य तदुक्त्याधारत्वात् प्रकरणंतु माधवोक्तेऽर्थेऽपि न विरुद्धम् ॥ ईदृशविषये सर्वेवेदायत्पदं वेदैश्च सर्वैरित्यादिश्रुतिस्मृतीरवष्टम्भकतयोपन्यस्यंस्तु अग्निमीळेइत्यादिकमपि कुकविकृतिवद्विष्णौ योजयेत् ॥ यास्केन सूर्यपरत्वेना-

ऽयं मन्त्रोव्याख्यातइत्यपि टीकाकारस्य भ्रमः ॥ महागतेर्विष्णा-
वपि सत्त्वेन सूर्यशब्दस्य निरुक्तेऽदर्शनेन पदार्थमात्रस्य कथनेन
च तदन्वयस्य माधवोक्तरीत्या सम्भवात् ॥ अतएव माधवेन अ-
अयं मन्त्रोयास्केनेत्यादिस्ववाक्ये तुशब्दोन प्रयुक्तोव्याख्यावैल-
क्षण्येतु तत्प्रयोगउगचितः॥एवंच प्रकरणाऽनुरोधाद्यास्कविरुद्धा-
र्थोपपादनमित्यपि निरस्तं॥यास्केनाऽपि विष्णुपरत्वस्यैवोक्तत्वात्॥
एवंचैतन्मन्त्रसम्बन्धिमाधवव्याख्यादृष्टान्तेनाऽपि विटवादिव्या-
ख्यानस्य न सङ्गतिः ॥ किञ्च विरोधाऽभावे व्याख्यान्तरस्याऽदुष्ट-
त्वेऽपि सति विरोधे दुष्टत्वमेवेत्यलम्॥तैत्तिरीयकस्थमन्त्रे प्रथमते-
शब्दस्य तवेति व्याख्यानं तु व्याकरणापरिशीलनात् ॥ तेमया-
वेकवचनस्येत्यत्र पदादित्यधिकारेण तदप्राप्तेः ॥ अव्ययत्वादिक-
ल्पनातु द्वितीयतेशब्दस्य तथार्थकत्वसम्भवेऽयुक्तैव ॥ भूरेरित्यस्य
इन्द्रोमायाभिःपुरुरूपइत्यनेन समानार्थतायाउचितत्वात् ॥ अ-
र्थान्तरे मानाऽभावात् ॥ वेदस्य नित्यत्वं यादृशं प्रागस्माभिरुक्तं
तादृशनित्यत्वेन न त्वदीहितसिद्धिः ॥ तदुक्तत्वमात्रेण नित्यत्वा-
सिद्धावाभातिशब्देन तत्सिद्धिश्चाऽमूलैव ॥ वर्त्तमानप्रयोगस्य ग-
तिस्तूक्ता ॥ मन्त्रार्थस्तु तावांवास्तूनीत्यनेन तुल्यकल्पऊहनीयः॥
इतिचत्वारिंशखण्डखण्डनम् ॥ ४० ॥ ॥ तदनन्तरमेवच पठ्यते
विष्णोःकर्म्माणिपश्यतयतोव्रतानिपस्पशे इन्द्रस्ययुज्यःसखा ॥
तद्विष्णोःपरमंपदꣳसदापश्यन्तिसूरयः दिवीवचक्षुराततमितिमन्त्रद्व-
यं ॥ तथाच पूर्वस्मिन्मन्त्रे यत्रभूरिशृङ्गाअयासस्तदुरुगायस्यप-
रमंपदमित्युक्त्वा तदनन्तरं तत्र कृतानि कर्माण्यपि विष्णोःकर्मा-
णिपश्यतेति मन्त्रेण निरूप्य पुनः पूर्वोक्तं लीलास्थानं तद्विष्णोः-

पदमिति पदेनाऽनूद्य तस्य नित्यत्वनिरूपणायाह सदापश्यन्ति-सूरयइति सूरयोविद्वांसः ॥ तत्त्वंच शब्दब्रह्मपरब्रह्मस्वरूपवित्त्वं ॥ परब्रह्मज्ञानं च भक्त्यैवेति निर्णयः ॥ भक्त्यामामभिजानातीति वाक्यात् ॥ भक्त्याहमेकयाग्राह्यइति वाक्याच्च ॥ तेन सूरिपदेन भक्ताउच्यन्ते ॥ नन्वत्राहतद्विष्णोरुगायस्येति सूरयःसदापश्यन्तीतिवाक्यैकवाक्यतायां भूमौ तत्परमं पदं भक्ताएव सदा पश्यन्तीत्यर्थः संपद्यते ॥ तथाच काननकालिन्दीतत्पुलिनगिरिवरगङ्गाद्यात्मकत्वेनोद्भूतरूपवन्महच्च तत्परमं पदं कथं भक्तैकदृश्यं न साधारणजनचक्षुर्विषयइत्याशंक्य तन्निरासाय दृष्टान्तमाह दिवीवचक्षुराततमिति दिवि स्वर्गे यथा आ समन्तात्ततं व्याप्तं ॥ यन्नदुःखेनेतिवाक्यात्सुखैकसाधनतद्रूपं तत्पदार्थं तत्रस्थानामेव चक्षुः पश्यति नान्येषां तथेत्यर्थः ॥ तेन तल्लीलामध्यपातिनामेव तद्दृश्यमिति साधारणजनाविषयत्वेऽपि न दोषइति भावः॥अथवा-पूर्वोक्ताऽऽशङ्कायामेवोच्यते पूर्वमितएव स्वर्गस्थपदार्थदर्शनाऽभावेऽपि योगधारणया दूरग्रहणाख्यसिद्धिसंपत्तौ योगिनश्चक्षुराततं सर्वतोव्याप्तं सर्वग्रहणसमर्थं सदितएव स्वर्गे पदार्थान् पश्यति यथा तथैतस्याऽपि पूर्वमदृश्यत्वेऽपि तादृशभगवदनुग्रहेण तादृग्भक्तिलाभे सति तदधिकारः सपन्नइति तदर्थं तथा भगवान् प्रकटोभवतीति तदा दृश्यत्वं वतीत्यर्थः॥तेनाऽऽधुनिकानामपि पूर्वोक्ताऽधिकारसंपत्तौ तद्दर्शनं भवतीति सिद्धं॥अथवा दृष्टान्तत्रयमत्र॥तथाहि॥ पूर्वोक्तपरमपदस्य लोकरूपत्वेनेतरलोकन्यायेन दुःखस्याऽपि तत्र सम्भवात् भगवल्लीलायाश्चानन्दरूपत्वात्कथमेतस्यानन्दैकरूपत्वमतउक्तं दिवीवेति ॥ यथाऽन्यलोके दुःखसंभिन्नसुखरूपत्वेऽपि

स्वर्गे दुःखाऽसम्भिन्नसुखरूपत्वं तथा गोकुले आनन्दैकस्वरूपत्व-मित्यर्थः ॥ नन्वित्यादिनोक्ताशङ्कायामाह॥चक्षुरिवेति॥यथा चक्षु-रेवरूपं गृह्णाति न श्रोत्रादिकं इन्द्रियत्वाऽविशेषेऽपि तस्यैव तत्र सामर्थ्यात् वस्तुनएव तथात्वात् तथाऽत्रापीत्यर्थः ॥ यथा दोषा-ऽसहकृतमेव चक्षुर्वस्तुतत्त्वं गृह्णाति भ्रमिकामलादिदोषसहकृ-तं तु महीभ्रमिशङ्खपीतिमादिकं तथाऽविद्यादिदोषरहिताः सूरय-एव गोकुलादिस्वरूपं पश्यन्ति नान्यइत्यपि चक्षुर्दृष्टान्तस्याऽ-भिप्रेतमिति ज्ञेयं ॥ एतेन तत्रस्थवृक्षस्थलादीनां व्रश्चनान्य-थाभावदर्शनादिषूपपत्तिरुक्ता भवति ॥ यद्वा चक्षुरिति द्वितीयै-कवचनान्तं पदं ॥ यथा चक्षुरिन्द्रियं स्वयमतीन्द्रियमेव गोलके स्थितं सत् सर्वं प्रत्याययति गोलकेऽपि चक्षुःशब्दवाच्यतां च वि-धत्ते योगिप्रत्यक्षविषयश्च भवति तथा गोकुलादिकमप्यलौकिकं स्वयमतीन्द्रियमेव साधारणजनदृश्ये स्वयोग्ये स्थाने स्थितं सत्त-त्स्थानं प्रकाशयति स्वव्यपदेशं च प्रापयति तत्रैवच स्थितं भवति पूर्वोक्तसूरित्वे दृश्यं च भवति ॥ तथाचैतादृशं परमं पदं सूरयः स-दा पश्यन्तीतिसम्बन्धः ॥ ननु साधारणजनदृश्यस्याधिष्ठानत्वपक्षे तस्यैव करणदोषादन्यथाभानपक्षेऽपि तत्र स्थितानां लोकानां दुःखकामक्रोधादिकमनुपपन्नं ॥ तस्य परमानन्दरूपत्वाद्गुणाती-तत्वाच्च ॥ नच करणदोषेणैव द्रष्टुस्तत्स्थितलोकदुःखादिदर्शनमिति वाच्यं ॥ करणदोषस्याऽपि तत्र वक्तुमनुचितत्वात् ॥ तत्रैवाऽन्यो-न्यं तथा दर्शनादित्यतउक्तं ॥ आततंचक्षुरिवेति ॥ यथा देवदत्त-चक्षुरिद्रियं विष्णुमित्रशरीरे आसमन्ताद्व्याप्तमपि तैजसं सदप्यनु-द्भूतरूपस्पर्शत्वेन नान्धतमसे प्रकाशयति तापयति वा तथा भगव-

दिच्छयैवाऽप्रकटानुभावत्वेन तस्य पक्षद्वयेऽप्याधुनिकतज्जनदोषदर्शनमुपपद्यतइत्यर्थः ॥ तादृशी भगवदिच्छा तु सर्वमुक्त्यभावायासुरजीवानां व्यामोहाय च ॥ यथा योगिनामेव प्रत्यक्षं तत्तथा भक्तानामेवैतदपीति पूर्वमेवाऽवोचाम ॥ ४१ ॥ ॥ अथ तदनन्तरमेवेत्यादिरवोचामेत्यन्तएकचत्वारिंशः खण्डः खण्ड्यते ॥ ॥ तत्र मन्त्रद्वयस्य तावामितिमन्त्रादनन्तरत्वोक्तिः प्रमादादेवैतयोरतिव्यवहितत्वात्पूर्वपठितत्वाच्च ॥ तावांवास्तूनीति द्वितीयाष्टके द्वितीयाध्याये पठ्यते ॥ विष्णोरित्यादितु प्रथमाष्टके द्वितीयाध्याये ॥ सदापश्यन्तीति तु सदायजन्तीतिवत्प्रयोगः ॥ परब्रह्मज्ञानं भक्त्यैवेत्युक्तिस्तु श्रोतव्योमन्तव्यइत्यादिविरोधादुपेक्ष्या ॥ परम्परया भक्तेर्ज्ञानहेतुत्वं तु न निवार्यते ॥ भगवद्वाक्ययोर्भक्त्येत्यत्र तृतीये तु काशीमरणादित्यत्र पञ्चमीव प्रयोजकहेतौ ॥ स्वर्गस्याऽतिदूरत्वेन दर्शनाभावस्य वक्तुं शक्यत्वेन तद्दृष्टान्तपरत्वेन व्याख्यानं न युक्तं ॥ किञ्च चक्षुःशब्दस्य चक्षुर्विशेषपरत्वे टीकोक्तरीत्योद्भूतरूपादीनामलौकिकप्रत्यक्षमात्रप्रयोजकत्वकल्पने च गौरवम् ॥ अथवेत्यादि द्वितीयव्याख्यानं त्वनेकाऽध्याहारदोषग्रस्तम् ॥ अथवा दृष्टान्तत्रयमित्यादितु इवकाराद्यनेकाऽध्याहारदूषितम् ॥ यद्वा चक्षुरित्यादितु स्वकपोलकल्पितमनेकपदाऽध्याहारदोषग्रस्तंच ॥ तस्मादसन्दिग्धार्थवाक्यान्तरं संवाद्यैव सन्दिग्धार्थस्यास्यार्थोवाच्यस्ततोऽयमर्थः॥दिवि स्वयंप्रकाशएव त्रिपादस्यामृतंदिवीत्यनेनैकार्थ्यात् ॥ एवंच विष्णोः परमं पदं शुद्धं ब्रह्म इवशब्दोऽवधारणे ॥ ननु असूरिभिश्चक्षुषा किन्नदृश्यते तत्राह ॥ च-

क्षुराततमिति ॥ विषयग्रहणे विस्तृतं ॥ तथाच श्रुत्यन्तरं पराञ्चिखानिव्यतृणत्स्वयंभूस्तस्मात्पराङ्पश्यन्तिनान्तरात्मन् कश्चिद्धीरः प्रत्यगात्मानमैक्षदिति ॥ माधवस्तु सूरयोविद्वांसऋत्विगादयोविष्णोः सम्बन्धि परममुत्कृष्टं तच्छास्त्रप्रसिद्धं पदं स्वर्गस्थानं शास्त्रदृष्ट्या सदा पश्यन्ति ॥ तत्रदृष्टान्तः ॥ दिवीव आकाशे यथाऽऽततं सर्वतः प्रसृतं चक्षुर्विरोधाभावेन विशदं पश्यति तद्वत् इति व्याचख्यौ ॥ यत्त्वासुरमोहायेत्यत्र प्रमाणोपन्यासार्थं तट्टीकाकारेण तथाप्यासुरमोहार्थंपरेषांचक्वचित्क्वचित् दुःखाज्ञानश्रमादींश्च दर्शयेच्छुभसद्गुणः क्वव्रणादिक्वचाऽज्ञानंस्वतन्त्राचिन्त्यसद्गुणे दौर्लभ्याच्चैवमोक्षस्यदर्शयेत्तान्यजोहरिरिति ब्रह्माण्डपुराणश्लोकद्वयमुदाहृतं ॥ तत्तु न युक्तं ॥ पूर्वपक्षिणा गोलोकस्थजीवदुःखे आशङ्कितत्वेनात्रेश्वरे समाहितत्वेन विषमत्वात् ॥ किञ्चासुरपदोपादानादिदं रावणादिमोहार्थतां दुःखादिदर्शनस्याह तथा तेषामेव मोक्षस्य दुर्लभतां चाह ॥ अतएव श्रमादीति व्रणादीति च संगतम्॥युद्धस्याऽसुरैरेव कृतत्वाद्युद्धएवच व्रणादेः सुप्रसिद्धत्वात् ॥ मूलंत्वध्याहारादिगौरवादशब्दार्थवर्णनपरत्वाच्च हेयम् ॥ इत्येकचत्वारिंशखण्डखण्डनम् ॥ ४१ ॥ ॥ अथ विष्णोःकर्माणीति मन्त्रोव्याख्यायते ॥ अत्र पूर्वस्मिन् मन्त्रे गोकुलस्यैव निरूपणान्तत्र कृतान्येव कर्माणि यशोदास्तनपानपूतनासुपयःपानरिङ्गणादीनि कर्माणि कर्मपदेनोच्यन्तइत्यवगम्यते ॥ अतएवाह ॥ यतोव्रतानिइति ॥ यतः कर्मभ्योहेतुभूतेभ्योव्रतानि कात्यायन्यर्चनादीनि सांनिध्याद्विष्णुरेव पस्पशे स्पृष्टवान् ॥ तत्फलत्वेन तत्कर्त्रीष्वाविर्भूय तासु सर्वां लीलां कृतवानित्यर्थः ॥ स्पशबाधनस्पर्शनयो-

रिति धातोर्लिटि रूपमिदं ॥ अयंचोभयार्थकः प्रयोगः॥तेन व्रतानि लोकमर्यादाव्रतानि पातिव्रत्यादीनि बबाधइत्यर्थः ॥ वेदमर्यादात्याजकानां कर्मणां सदोषत्वशङ्कापरिहारायाऽयं प्रयोगः ॥ तेन तेषामविकृतत्वमुक्तं भवति ॥ स्वव्रतान्यप्यात्मारामत्वपूर्णकामत्वादीनि नियमरूपाणि बबाधे ॥ अस्मिन्नर्थे नञ्प्रश्लेषे अव्रतानि स्पृष्टवानित्यर्थोयुज्यते ॥ तानि कर्माणि गोपीभिः सह रमणरूपाणि पश्यतेत्युपदेशः ॥ यद्यपि कर्मदर्शनस्य फलत्वेन न स्वकृतिसाध्यत्वं तथापि मोक्षरसाधिकरसानां स्वतः पुरुषार्थरूपाणामतिहृद्यानां स्मरणतस्तत्परवश्यमौत्सुक्यं च श्रुतेः प्रकटयत्येव कथनं ॥ तेन तत्साधनोपदेशः पर्यवस्यति ॥ एतेन कर्मणां नित्यत्वं ज्ञेयं ॥ अन्यथैतदुपदेशाऽसम्भवात् ॥ इन्द्रस्य युज्योयोज्योऽनुकूलः सखा ॥ अयमर्थः ॥ भगवतेन्द्रयागभङ्गे कृते बहुबलात् वृष्ट्यादिभिरिन्द्रेण द्रोहे कृतेऽपि तद्धेतुभूतदोषरूपमदमेव दूरीकृतवान्सर्वसमर्थोऽपि नत्विन्द्रं तदधिकारं वा ॥ तथाच तद्दोषहरणेनत दनुकूलः तदनन्तरमिन्द्राभिषेकगोविन्दनामधारणादिभिस्तत्समानधर्मैस्तस्य सखा ॥ एतेनाप्रपन्नेऽपि प्रत्युतापकारकर्त्तर्यपि स्वयमुद्यम्य तद्दोषनिवर्त्तकस्तद्धर्माङ्गीकर्त्ता च नाऽन्योऽस्तीति परमकृपालुत्वं दर्शितं ॥ तेन भजनौपयिकं रूपमुक्तं भवति ॥ यद्वा यतः कर्मभ्यइन्द्रस्य व्रतानि यागादीनि पस्पशे बबाधे तानि पश्यतेत्यन्वयः ॥ तानि कर्माणि केवलात्मसात्करणरूपाणि ॥ एतच्च यथा तथा दशमस्कन्धविवरणे प्रपञ्चितं पितृचरणैरिति नात्रोच्यते॥ तेन स्वतः साधनराहित्येऽपि विपरीततत्करणेऽपि तन्निवार्य स्वतएवात्मसात्करणलक्षणधर्मोऽसाधरणोज्ञापितोभवति ॥ तेनैतस्यै-

व भजनीयत्वमुक्तं भवति ॥ अन्येहि स्वभक्तसाधनसंपत्तौ फलं ददति नत्वन्यथापीति भावः ॥ युज्योयोज्योगोपिकानां तडिद्रूपत्वेन भगवतश्च नीलमेघश्यामत्वेन तासां योगार्हः सखा समानशीलव्यसनवानित्यर्थः ॥ युजेर्बाहुलकात्क्यप् ॥ किंत्वाद्गुणाभावः ॥ एतन्मन्त्रद्वयाऽनन्तरमेव ऋग्वेदे पठ्यते तद्विप्रासोविपन्यवोजागृवांसःसमिन्धते विष्णोर्यत्परमंपदमिति ॥ एतदर्थस्तु विष्णोर्यत्पूर्वोक्तं परमं पदमस्ति तत्पदं विप्रासोमेधाविनः पुनः कीदृशाविपन्यवोविशेषेण स्तोतारः पुनः कीदृशाजागृवांसः शब्दार्थयोः प्रमादराहित्येन जागरूकाः समिन्धते सम्यग्दीपयन्तिप्रकाशयन्ति ॥ मेधावित्त्वेन यथोक्तभगवल्लीलास्वरूपाद्यनुसन्धानसहिताः ॥ शब्दार्थयोः प्रमादराहित्येन वाच्यवाचकयोर्भगद्रूपनाम्नोर्नित्यत्वेन कुतर्काद्यनुपहतमतयोनिरन्तरकीर्त्तनरूपस्तोत्रादिसाधनैः प्रकटयन्तीत्यर्थः ॥ तादृशसाधनसंपत्त्यां तद्दर्शनसामर्थ्ये सति पश्यन्तीति तथा ॥ अतएव श्रीभागवतेऽप्युक्तं शृण्वन्तिगायन्तिगृणन्त्यभीक्ष्णशःस्मरन्तिनन्दन्तितवेहितंजनाः तएव पश्यन्त्यचिरेणेत्यादि ॥ तथाच स्थितस्यैव परमपदस्य समिन्धनमुक्तमिति नित्यत्वमेव काननपशुपक्षिमनुजादीनां तत्सम्बन्धिलीलानामपि ॥ अपरं च छान्दोग्ये पठ्यते ॥ अथयदिदमस्मिन्ब्रह्मपुरेदहरंपुण्डरीकंवेश्मदहरोस्मिन्नन्तराकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यंतद्वावविजिज्ञासितव्यमित्येतस्याग्रे किं तत्र विद्यते यदन्वेष्टव्यं यद्वा विजिज्ञासितव्यमिति प्रश्ने यावान्वाअयमाकाशस्तावानेषोन्तर्हृदयआकाशउभेअस्मिन्द्यावापृथिवीअन्तरेवसमाहितेइत्यादिनाऽग्निवायुसूर्यचन्द्रविद्युन्नक्षत्राण्युक्त्वा यच्चास्येहास्तियच्चना-

स्तिसर्वंतदस्मिन्समाहितमित्युक्त्वा ब्रह्मपुरंजीर्णंचस्तेवातदाश्रितं-किमवशिष्यतइति प्रश्ने नास्यजरयैतज्जीर्यतिनवधेनास्यहन्यत-एतत्सत्यंब्रह्मपुरमस्मिन्कामाःसमाहिताः एषआत्मापहतपाप्मेत्या-दि ॥ अत्र ब्रह्मपुरशब्देन ब्रह्मणोभगवतः पुरं लीलास्थानं श्रीगो-कुलमथुराद्युच्यते ॥ शरीरार्थकत्वएतत्सत्यं ब्रह्मपुरमित्यग्रिमं वाक्यं विरुध्येत ॥ अस्य नित्यत्वकथनार्थमेतज्जरादिहेतुकतदाश्रितनाशं पूर्वपक्षत्वेनोक्त्वा वस्तुतस्तु तत्र जरावधादिसम्भावनैव नास्ति य-तएतत्सत्यं ब्रह्मपुरं तथापि तुष्यतुदुर्जनइति न्यायेन नास्य जर-येत्याद्युक्तं तर्कितं तदितिज्ञेयं ॥ अतएव भक्तानां सर्वे कामास्त-स्मिन् सम्यगाहिताइत्युक्तं ॥ एतच्चाऽऽनन्दमयाधिकरणे सोऽश्नुतेस-र्वान्कामान्सहब्रह्मणेतिश्रुतिव्याख्याने प्रपञ्चितं ॥ किञ्च ॥ दहर-उत्तरेभ्यइत्यधिकरणेन व्यासैर्दहरशब्दवाच्योऽर्थोभगवानिति नि-र्णीतः ॥ भगवत्स्थानस्याऽपि भगवद्धर्मवत्त्वेन स्थितियोग्यत्वमि-ति वक्तुं श्रीगोकुलस्थभक्तहृदयकमलस्याऽपि दहरत्वमुक्तं ॥ तत्र व्याप्य प्रकटीभूय सर्वव्यवहारहेतुत्वेन स्थितइत्याकाशत्वमुच्य-ते ॥ साक्षात्पुरुषोत्तमलीलोपयोगिपदार्थाआकाशादयोद्युप्रभृत-योभगवदात्मकाएवेति तदन्तःस्थिताएव नतु कालाद्यधीनास्तदा-श्रयावा ॥ येत्यक्तलोकधर्माश्चमदर्थेतान्बिभर्म्यहमितिभगवद्वा-क्याच्च ॥ यावान्वेति परिणामसाम्यमुपलक्षणविधयोक्तमिति ज्ञे-यं॥तेन लीलाख्यपदार्थाः स्वरूपतस्त्वलौकिकाएव तथापि लौकि-करूपाएवेति ज्ञाप्यते॥लोकवत्तुलीलाकैवल्यमिति न्यायात्॥एवं-सति निष्प्रत्यूहं लीलानित्यत्वं श्रुतिवृन्दैरमन्दगीत ममन्दानन्दकन्द-ममन्दभाग्यराशिभिर्मनुजैर्हृदिभावनीयं ॥४२॥ ॥ अथ अथ-

विष्णोरित्यादिर्द्वदिभावनीयमित्यन्तोद्वाचत्वारिंशः खण्डः खण्ड्य-
ते ॥ ॥ तत्र पूर्वस्मिन्नित्यसङ्गतं॥तावामित्यस्याऽतिव्यवहितोत्तर-
त्वात् ॥ तस्योक्तार्थकत्वेन गोकुलस्यैव निरूपणादित्यप्यसङ्गतम् ॥
अन्यदपि तत्रोक्तमूहनीयम् ॥ कर्मशब्देन कर्मानुरूपफलदानानि
गृह्यन्ते॥तेषां दर्शनं योगबलादार्षज्ञानरूपम् सामान्यज्ञानरूपं वा॥
दृशेर्ज्ञानसामान्यार्थतायाउक्तत्वात् ॥ व्रतस्पर्शस्तु तत्फलदानाय
स्वीकारः ॥ श्रुत्यन्तरसंवादात् ॥ किञ्च तावामिति मन्त्रे निरुक्ते
उरुगायस्य विष्णोर्महागतेरित्युक्तत्वेन मन्त्रान्तरस्थविष्णुशब्दो-
ऽपि महागतिवाचकः इति तद्वार्दं ॥ महागतिश्च सूर्यादिष्वप्य-
स्तीति तत्परतायां च तात्पर्यं प्रतीयते ॥ अन्यथा तस्मिन्मन्त्रे
विष्णुपदाभावेन तद्विवरणं न सङ्गच्छेत ॥ एवंचेमावपि मन्त्रौ सू-
र्यादिपरावेव तत्र कर्माणि सर्वोपकारकरणानि पश्यत जानीत
स्वोदयेन त्रयीमयत्वेन च सर्वव्रतप्रयोजकतया तस्य स्पर्शकत्वं
सर्वयज्ञप्रवर्त्तकतयाचेन्द्रसखत्वं ॥ परमंपदमितिपूर्ववद्व्याख्येयं दि-
वीत्यस्य पश्यन्तीत्यनेन सम्बन्धः ॥ दृशिर्ज्ञानसामान्ये ॥ यथा च-
क्षुर्लौकिकवैदिकसर्वव्यवहारोपकारकमेवं जानन्तीत्यर्थः ॥ प्रततं
व्यापकं सर्वोपकारकत्वात्॥वस्तुतस्तु माधवः हेऋत्विगादयोविष्णोः
कर्माणि पालनादीनि पश्यत यतो यैः कर्मभिर्व्रतान्यग्निहोत्रादी-
नि सर्वोयजमानः पस्पशे स्पृष्टवान्॥विष्णोरनुग्रहादनुतिष्ठतीत्यर्थः॥
तादृशोविष्णुरिन्द्रस्य युज्यो योज्योऽनुकूलः सखा भवति ॥ वि-
ष्णोरिन्द्रानुकूल्यं त्वष्टाहतपुत्रइत्यनुवाके ऽथैवतर्हिविष्णुरित्यादिना
तैत्तिरीया आमनन्ति इति व्याचख्यौ ॥ नियमभञ्जकत्वाङ्गीका-
रस्त्वासुराणामेव ॥ वैदिकमर्यादाभञ्जकत्वाङ्गीकारे श्रीकृष्णबुद्धयोः

कोवा विशेषः स्यात् ॥ तस्माद्युष्माभिरेवेदानीन्तनकुलवधूपाति-
व्रत्यबाधनाय तथा व्याख्यायते ॥ मन्त्रस्य सद्धर्मरक्षापरतायाः
स्पष्टं प्रतीयमानत्वात् ॥ एतेन यतः कर्मभ्योहेतुभ्यइत्यारभ्याऽस-
म्भवादित्यन्तस्य ग्रन्थस्य कामुकप्रलापमात्रत्वं स्पष्टीकृतम् ॥ इ-
न्द्रसखत्वं तु पूर्वोक्तरीत्यैवेत्यर्थान्तरकथनं प्रलापएव ॥ विना भ-
क्तिं फलप्रदातृत्वे साधनप्रयासनैष्फल्यम् ॥ गोपीनां तद्विद्रूपत्वे
मानमन्वेष्यम् ॥ गोप्यादिपदाध्याहारे गौरवञ्च ॥ तद्विद्वांसइति म-
न्त्रेऽपि विष्णोर्यत्परमंपदमिति पूर्ववद्व्याख्येयम् ॥ वाच्यवाचकयो-
र्नित्यत्वे तु न मानम्॥अतस्तत्कथनं प्रलापएव॥समिन्धनं तु स्थितस्य
ग्रहणान्नतुनित्यत्वात्प्रमाणाभावात् ॥ एतत्सत्त्यमित्यत्र सत्त्यशब्दो-
नाऽबाधितार्थकः किन्तु यथावदर्थतावदर्थकः ॥ सत्त्यंकृतेचशप-
थेतथ्येत्रिषुतुतद्वतीतिमेदिनीकोशात् ॥ तत्त्वं तु यथाप्रतीयमानत्व-
म् ॥ तथाच ब्रह्मपुरशब्देन तत्र शरीरमेव ग्राह्यम् ॥ अन्यथा ज-
रायाः प्राणवियोगरूपवधस्य च शरीरधर्मतया प्रसिद्धत्वेन गो-
कुले तदभावेन भक्त्याऽपक्षयविनाशयोस्ताभ्यां पदाभ्यां ग्रहणे-
ऽपि ग्रामादेरपक्षयादिना स्वामिनोलोकेऽप्यपक्षयादेरदर्शनेन च
जीर्णत्वहननशङ्कासमाधाने निर्मूले स्याताम् ॥ किञ्च नवद्वारेपुरे-
देहीत्यादौ पुरशब्दस्य देहे प्रसिद्धिरस्ति गोकुले तु क सेत्युदाहर॥
किञ्चैतत् सत्त्यंब्रह्मपुरमित्यत्र देहजरावधाभ्यां जीर्णत्वहननयोर-
नाश्रयोब्रह्मोच्यते॥ब्रह्मैवैतच्छब्देन परामृश्य तत्प्रकरणस्थब्रह्मलोक-
पदवत्सामानाधिकरण्येन ब्रह्मपुरशब्देनोच्यते॥सर्वकामसमाधानस्य
एषआत्मा इत्यादिविशेषणस्य च तत्रैव सम्भवात् ॥ एतेन शरी-
रार्थकत्वे इत्यादि निरस्तम् ॥ तथापि तुष्यत्वित्यादिकुकविकृति-

वद्योजनं तु मूलाभावाद्धेयम् ॥ सर्वेकामा मनोरथाः ॥ नच तेषां प्रतिष्ठितत्वकथनेन भोगोपकरणान्येव कामशब्देन ग्राह्याणीति टीकोक्तं साध्विति वाच्यम्॥परमेश्वरस्य मनोरथानाधारत्वे सर्वाश्रयत्वव्याहतेस्तस्य तदाधारत्वात्॥एतेन सोऽश्नुतेसर्वान्कामानिति श्रुतिव्याख्यानपरस्वगुरूक्त्युपष्टम्भनमपि तस्य निरस्तम् ॥ तेन हि कामपदेन भोगसाधनोपादानेऽशेषग्रहणं बीजमुक्तं ॥ तच्च कामशब्देन मनोरथग्रहणेऽपि नासङ्गतम् ॥ मनोरथानां सुखरूपाणामपि सोऽत्यन्तंसुखमश्नुते इत्यादिदर्शनेनाशनसम्भवात् ॥ एवञ्च हृदयकमलस्यैव पुण्डरीकपदेन ग्रहणं नतु गोकुलस्थभक्तहृदयकमलस्य मानाभावादेवञ्च भगवत्स्थानस्याऽपीत्याद्यप्यपहास्तितम्॥ साक्षात्पुरुषेत्याद्यप्यसङ्गतम् ॥ सङ्कोचे बीजाभावादतिरिक्ताकाशादिसत्त्वस्य निर्मूलत्वाच्च ॥ येत्यक्तलोकधर्माः इत्यत्र लोकधर्मशब्देन राजसेवाकुलधर्मादयोगृह्यन्ते नतु वस्तुस्वभावः ॥ मानाभावात् ॥ तेन तान्बिभर्मीत्यस्य तान् पालयामीत्यर्थः ॥ तेषांनित्याभियुक्तानामितिवाक्येनैकार्थ्यलाभात् ॥ लोकवत्तुलीलाकैवल्यमित्यत्र लीलाशब्दः केलिवाची ॥ लीलाकेलिर्विलासयोरितिमेदिनीकोशात्॥यत्त्वेतत्सूत्रव्याख्यायामेतत्पित्रा नहि लीलायां किञ्चित्प्रयोजनमस्ति लीलायाएव प्रयोजनत्वादित्युक्त्वा ईश्वरत्वादेव न लीला पर्यनुयोक्तुं शक्येत्युक्तं॥तन्नयुक्तं॥तथाहि॥यदि लीलायाएवेत्यनेनेश्वरविषयएव नियमः क्रियते तर्हिसूत्रे लोकवदितिव्यर्थं तद्विरोधश्च॥यदिच सामान्यविषयएव सक्रियते तर्हि ईश्वरत्वादेवेत्यसंगतम्॥ लीलायादुःखाऽभावसुखविलक्षणत्वेन तस्याः प्रयोजनत्वोक्तिर्व्याहतैव॥अतएवैतत्सूत्रव्याख्याने यथा लोके क-

स्यचिदाप्तैषणस्य राज्ञोराजामात्यस्य वा व्यतिरिक्तं किञ्चित्प्रयोज-
नमनभिसन्धाय केवलं लीलारूपाः प्रवृत्तयः क्रीडाविहारेषु भवन्ती-
त्याद्युक्तम् भगवत्पादैः॥अत्र प्रयोजनाभिसन्धानाभावेन प्रवृत्ताया
लीलायाः प्रयोजनरूपत्वाभावः स्पष्टमुक्तः॥प्रयोजनानभिसन्धा-
ने हेतुराप्तैषणस्येति॥आप्तैषणत्वं तु सर्वसुखसंपत्त्या विरक्त्यादिना
वा॥अत्र प्रयोजनमनुद्दिश्यनमन्दोपीतिन्यायेनेश्वरस्याऽऽप्तकामत-
या ऽप्रवृत्तिराशङ्किता पूर्वपक्षिणा ॥ तत्रोच्छ्वासवृथाचेष्टादिषु व्य-
भिचारे दर्शिते गुरुतरसंरम्भतयोच्छ्वासादिसादृश्यं नेति तेनो-
क्ते सूत्रकारइदमाह लोकवदिति ॥ तथाचास्मद्दृष्ट्याऽस्यसंरम्भस्य
गुरुत्वेऽपि तद्दृष्ट्या लौकिकोच्छ्वासादिसदृशीयं लीलेति सूत्रस्य
व्याख्यान्तरं श्रीभगवत्पादैः सूचितमिति सङ्क्षेपः ॥ यच्च सा लीला
कैवल्यं मोक्षः तस्य लीलात्वेऽप्यन्यस्य तत्कीर्तनान्मोक्षइत्यर्थइति
तेनैवोक्तं तदपि न ॥ अध्याहारं विना तादृशार्थाऽलाभात् अध्या-
हारे मानाभावाच्च ॥ तत्कीर्त्तनेन मोक्षे मानाभावाच्च ॥ नान्यःप-
न्थाइति श्रुतिविरोधाच्च ॥ तादृशार्थस्य प्रकृतशङ्कानिवारकत्वा-
भावेनाऽऽधिक्यापत्तेश्च ॥ इति द्विचत्वारिंशखण्डखण्डनम् ॥४२॥
॥ ॥ अपरंच वृहद्वामनपुराणे गीयते उत्तरस्थाने खिले च भृ-
ग्वादीन् प्रति ब्रह्मणोवाक्यानि॥षष्टिवर्षसहस्राणिमयातप्तंतपःपुरा
नन्दगोपव्रजस्त्रीणांपादरेणूपलब्धये तथाऽपिनमयाप्राप्तास्तासां-
वैपादरेणवः श्रुत्वैतद्ब्रह्मणोवाक्यंभृगुःप्राहाऽथसादरं वैष्णवानांपाद-
रजोगृह्यतेत्वद्विधैरपि सन्तितेबहवोलोकेवैष्णवानारदादयः तेषां-
विहायगोपीनांपादरेणुस्त्वयापियत् गृह्यतेसंशयोमेऽत्रकोहेतुस्तद्ब-

द्प्रभो ततोब्रह्माभृगुंप्राहचिंतयित्वापुरातनीं कथांसर्वश्रुतीनांय-
द्रहस्यंपरमाद्भुतं ब्रह्मोवाच नस्त्रियोव्रजसुन्दर्य्यःपुत्रताःश्रुतयः-
किल नाऽहंशिवश्चशेषश्चश्रीश्चताभिःसमाःक्वचित् प्राकृतेप्रलये-
प्राप्तेव्यक्तेऽव्यक्तंगतेपुरा शिष्टेब्रह्मणिचिन्मात्रेकालमायातिगेऽक्षरे
ब्रह्माऽऽनंन्दमयोलोकोव्यापिवैकुण्ठसंज्ञकः निर्गुणोनाद्यनन्तश्चव-
र्त्ततेकेवलेऽक्षरे अक्षरंब्रह्मपरमंवेदानांस्थानमुत्तमं तल्लोकवासीत-
त्रस्थैःस्तुतोवेदैःपरात्परः चिरंस्तुत्याततस्तुष्टःपरोक्षंप्राहतान्गिरा तु-
ष्टोऽस्मिब्रूतभोप्राज्ञावरंयन्मनसीप्सितं श्रुतयऊचुः नारायणादिरू-
पाणिज्ञातान्यस्माभिरच्युत सगुणंब्रह्मसर्वेदंवस्तुबुद्धिर्नतेषुनः ब्रह्मे-
तिपठ्यतेऽस्माभिर्यद्रूपंनिर्गुणंपरं वाङ्मनोऽगोचराऽतीतंततोनज्ञायते-
तुतत् आनन्दमात्रमितियद्वदन्तीहपुराविदः तद्रूपंदर्शयाऽस्माकंयदि-
देयोवरोहिनः श्रुत्वैतद्दर्शयामासस्वंलोकंप्रकृतेःपरं केवलानुभवाऽऽ-
नन्दमात्रमक्षरमध्यगं यत्रवृन्दावनंनामवनंकामदुघैर्द्रुमैः मनोरम-
निकुञ्जाढ्यंसर्वर्त्तुसुखसंयुतं यत्रगोवर्द्धनोनामसुनिर्झरदरीयुतः र-
त्नधातुमयःश्रीमान्सुपक्षिगणसङ्कुलः यत्रनिर्मलपानीयाकालि-
न्दीसरितांवरा रत्नबद्धोभयतटाहंसपद्मादिसङ्कुला नानारासरसो-
न्मत्तंयत्रगोपीकदम्बकं तत्कदम्बकमध्यस्थःकिशोराकृतिरच्युतः
दर्शयित्वैवचप्राहब्रूतकिंकरवाणिवः दृष्टोमदीयोलोकोऽयंयतोना-
स्तिपरंवरं श्रुतयऊचुः कन्दर्पकोटिलावण्येत्वयिदृष्टेमनांसिनः का-
मिनीभावमासाद्यस्मरक्षुब्धान्यसंशयं तथात्वल्लोकवासिन्यःका-
मतत्त्वेनगोपिकाः भजन्तिरमणंमत्वाचिकीर्षाजनिनस्तथा श्रीभ-
गवानुवाच दुर्लभोदुर्घटश्चैषयुष्माकंसुमनोरथः मयानुमोदितःस-
म्यक्सत्योभवितुमर्हति आगामिनिविरश्चौतुजातेसृष्ट्यर्थमुद्यते क-

स्यंसारस्वतंप्राप्यव्रजेगोप्योभविष्यथ पृथिव्यांभारतेक्षेत्रेमाथुरेम-
मण्डले वृन्दावनेभविष्यामिप्रेयान्वोरासमण्डले जारधर्मेणसुस्ने-
हंसुदृढंसर्वतोऽधिकं मयिसंप्राप्यसर्वेपिकृतकृत्याभविष्यथ ब्रह्मो-
वाच श्रुत्वैवंचिन्तयन्त्यस्तारूपंभगवतश्चिरं उक्तकालंसमासाद्यगो-
प्योभूत्वाहरिंगताइति॥अत्रहि श्रुतिभिः सर्ववेदान्तप्रत्ययं गुणाती-
तं वाङ्मनोऽगोचरातीतमानन्दैकरूपं यत्तव रूपं तत्प्रदर्शयेति प्रा-
र्थितोभगवान् गोकुलं तत्स्थितं स्वस्वरूपं लीलां तत्र क्रियमाणांच
प्रदर्शितवानित्युच्यते॥एतत्तदैव घटेत यदि सर्ववेदान्तप्रत्ययत्वादि-
विशिष्टमेतद्भवेत् ॥ एवंसति तन्नित्यता निष्प्रत्यूहा सिद्धा भवति॥
नच तत्स्थितस्वरूपमात्रस्यैव नित्यता न लोकस्याऽपीति वाच्यं ॥
लोकप्रदर्शनवैयर्थ्याऽऽपातात् ॥ अप्रार्थितत्वात् ॥ तथाच स्वरूप-
दर्शनमात्रार्थं प्रार्थितोयद्वृन्दावनादिकमपि प्रदर्शितवान् तेन वृ-
न्दावनाद्युक्तसामग्रीविशिष्टमेव सदाभगवद्रूपं नकेवलमिति ज्ञा-
पयति ॥ वस्तुनएव तथात्वान्नशङ्कालेशोऽप्यत्र ॥ अतएव ब्रह्मध-
र्मस्वरूपविचारे प्रकाशाश्रयवद्वातेजस्त्वादिति सूत्रितं बादरायणेन॥
एतच्च यथा तथा पुरस्तादेवोक्तं ॥ ४२ ॥ ॥ अथापरश्चबृहदि-
त्यादिस्तथापुरस्तादेवोक्तमित्यन्तस्त्रयश्चत्वारिंशः खण्डः खण्ड्य-
ते ॥ ॥ यत्त्वत्र प्रपञ्चप्रवाहस्याऽनादित्वं टीकाकारेणोक्तम् त-
त्तु पूर्वाऽपरविरुद्धम् ॥ अयमध्यायः प्रसिद्धप्रवचनाद्यैर्महाभा-
रतादिभिरलब्धसंवादः ॥ द्वैपायनस्तु महाभारते यदत्राऽस्तितदन्य-
त्रयन्नेहास्तिनकुत्रचिदित्यूचे इति कथमयं विश्वास्यः क्षेपकत्त्व-
शङ्कानपायात्॥किञ्च ब्रह्मज्ञानेन कृतकृत्यत्वबोधकश्रुतिविरुद्धोऽ-
यम्॥किञ्च ब्रह्मणोज्ञानित्वं ज्ञानिनः कृतकृत्यत्वंच वदद्भिर्वचनैरयं

विरुद्धः॥नाहंशिवश्चेतितु सर्वथायुक्तम्॥नवश्रियेमरुतइत्यादिकृग्वेदादिश्रुतिभिः नाहंनयज्ञोनचयूयमन्येइत्यादिभागवतादिभिश्च विरुद्धस्याऽस्याऽङ्गीकारे वेदाःश्रीकृष्णेत्यादिसिद्धान्तविरोधः॥वनद्रोणसौप्तिकदानधर्मादीतिहासरूपमहाभारतेन च श्रीकृष्णोपास्यत्वश्रीकृष्णज्ञानाविषयत्वादेः कथनेन शिवस्यैव पूर्णब्रह्मताप्रतिपादनेन तद्विरोधोऽपि ॥ उक्तश्चायमर्थोभगवतैवेश्वरः सर्वभूतानामित्यादिना ॥ ईश्वरशब्दस्य कोशादितः शिवातिरिक्तबोधकत्वाऽलाभात्॥ अधिकं तु लिङ्गार्चनचन्द्रिकायामस्मत्कृतेशैवसुधाकरे च द्रष्टव्यम् ॥ चिन्मात्रेब्रह्मणिशिष्टे इत्युक्ता वैकुण्ठसंज्ञकोवर्ततइत्युक्तिर्विरुद्धैव ॥ वैकुण्ठस्य विष्णुरूपत्वेन विरोधोद्धारे तु त्वन्मते सर्वस्याऽपि विष्णुरूपत्वेन सर्वं शिष्येत ॥ प्राकृतजनादर्शनविषयत्वेनेतरस्य प्रलयव्यवहारइतिचेत् ॥ वैकुण्ठः किं न प्राकृतजनादर्शनविषयोयेन सोऽवशिष्टइत्युच्यते ॥ भक्तानां तदा वैकुण्ठस्य दर्शनं भवतीति सशिष्टइत्युच्यतइतिचेत्सर्वस्य ब्रह्मरूपत्वेन ब्रह्मणोनित्यत्वेन तेषामितरपदार्थज्ञानस्याऽपि वैकुण्ठज्ञानवद्दुर्वारत्वात् ॥ पराशरेण सत्यलोकात्परस्य निषिद्धत्वेन सत्यपर्यन्तस्य प्राकृतत्वेन वैकुण्ठस्याऽप्राकृतत्वोक्तिरपि न युक्ता ॥ नारायणादिसगुणरूपं ब्रह्म दृष्टं निर्गुणं दिदृक्ष्यते इति तद्दर्शयेति वरं याचमानानां नारायणांऽशश्रीकृष्णतल्लोकादिप्रदर्शनं तु प्रतारणैव ॥ श्रीकृष्णादेर्निर्गुणब्रह्मत्वाऽभावात् ॥ श्रीकृष्णस्य विष्ण्वंशत्वं तु उक्तम् ॥ यथात्वल्लोकवासिन्यइति श्लोकस्तु त्वत्सिद्धान्तविरुद्धः ॥ कासांचिदनादिकृष्णसङ्गस्य कासांचित्तदभावस्य सर्वासां भोगसाम्यस्य च ततोभानात् ॥ किञ्चैवं पुरासिद्धभोगाभ्योगोपीभ्यः

कआसां विशेषोयेनैताएव न स्त्रियइत्यनया स्तुत्या स्वाऽऽराध्य-तयोक्ताः ॥ पूर्वं गोपीभूतानामेव श्रुत्यादिभावे पुनर्गोपीभावइति तु बालोपलालनमेव ॥ तथाहि ॥ बृहद्वामनीयेत्यादिवक्ष्यमाणपञ्चचत्वारिंशखण्डस्थस्वग्रन्थविरोधाच्च ॥ नस्त्रियोव्रजसुन्दर्य-इत्यनेन दुर्लभोदुर्घटश्चैवइत्यनेन च विरुद्धमेतत् ॥ व्रजे गोप्यो-भविष्यथेति भविष्यत्ताकथनं च न तेऽनुकूलम्॥जारधर्मेण कृत-कृत्यत्वोक्तिस्तु सर्वथा शास्त्रविरुद्धैव ॥ त्वन्मायावञ्चितत्वेन पुत्रं त्वां कामितवन्तौ नतु ज्ञानमिति भागवतस्थवसुदेववचनेन पुत्रत्वकामनायाहेयत्वे जारत्वकामनायाः सुतरां तथात्वात् ॥ जारधर्मेण कृतकृत्यत्वसम्भवे त्वन्मायावञ्चितत्वेन त्वां जारं न कामितव-न्ताविन्येव वक्तुमुचितत्वाच्च ॥ सम्प्राप्तेः परं कृतकृत्यत्वोक्तिरपि ते नाऽनुकूला ॥ सम्प्राप्तेरेव त्वन्मते कृतकृत्यत्वरूपत्वात् ॥ तस्मा-न्नायमध्यायः प्रामाणिकैरादरणीयः ॥ अतएवेयंलीलेत्यादिकमु-त्तरग्रन्थमवतारयता उक्तवाक्यानामतिप्रसिद्धत्वाभावात्कुमतीनां शङ्का नापैतीति पूर्वोक्तमेव स्मारयन्ति अतएवेतीति वदता टी-काकृताच स्वस्य मूलकर्त्तुश्च तत्र दृढप्रत्ययाऽभावोध्वनितः ॥ अभ्युपेत्याऽप्युच्यते ॥ सर्ववेदान्तप्रत्ययमिति विशेषणं पुराणात्म-कमूलादधिकम् ॥ गोकुलादिदर्शनन्तु अधिष्ठानदर्शनसौकार्याय नतु तत्स्वरूपत्वबोधाय अन्यथा गोपीनामपि तल्लीलामध्यपाति-तया तासामपि तद्रूपताऽऽपत्तौ वरादिकमिदं सर्वं विप्लवेत॥वस्तुन-एव तथात्वादित्युक्तौ द्वैतवादिवत्स्वीकारे चाद्वैतनिर्विशेषादिपदानां वत्ध्यादिपदवत्पारिभाषिकत्वमेव त्वन्मते स्यात् नतु लोकप्र-सिद्धार्थबोधकत्वम् ॥ एवञ्च सर्वैरपि वादिभिः स्वस्वसंमतेऽर्थे तेषां

तेषां शब्दानां सङ्केतकल्पने विवादमात्रमुच्छिद्येतेत्यलम् ॥ यत्तु-टीकाकृता तस्मान्नभिन्नाएतास्तुआभिर्भिन्नोनवैप्रभुः भूमावुत्तारितंसर्ववैकुण्ठंस्वर्गवासिनम् इति गोपालतापनीयवाक्यमिह सूलतयोपन्यस्तं ॥ तन्नसम्यक् ॥ पूर्वार्द्धस्य महावाक्यैः समानार्थत्वात् ॥ उत्तरार्द्धेतु वैकुण्ठपद तत्संबन्धिपरं स्वर्गवासिनमित्यनेनाऽविरोधाय ॥ नहि स्वर्गैकदेशत्वेऽपि तस्य स्वर्गवासित्वं संगच्छते ॥ यदक्षरेपरेपरमेप्रजाइति तैत्तिरीयवाक्यं तु यस्मिन्सर्वाणिभूतानीत्यादिना तुल्यार्थं ॥ यच्च तच्छ्रुत्यनुरोधाद्वृक्षफलादिवद्भिन्नाभिन्नत्वं गोप्यादेरूचे ॥ तच्च शुद्धाद्वैतमतविरुद्धं मतान्तरप्रवेशकारकंचाऽन्यतरस्य कल्पितत्वाभावे विरुद्धंच ॥ यत्तु तेनैव कुरुक्षेत्रादिषु भगवद्गमनेन तेषां नित्यत्वमाशङ्क्य तावन्मात्रार्थं तत्र गमनेन नित्यलीलास्थानत्वस्याऽशक्यवचनत्वादिति समाहितं ॥ तदप्यसंगतम् ॥ याया लीला यथायथा भगवता कृता तस्यास्तस्यास्तथातथैव नित्यत्वेन भक्तजनदृश्यत्वेनच कुरुक्षेत्रादेरपि नित्यतायाएव वक्तुमुचितत्वात् ॥ अन्यथा लीलान्तरस्याऽपीदृशत्वप्रसङ्गात् ॥ प्रकाशाश्रयवद्वेतितु प्राग्व्याख्यातम् ॥ इति त्रयश्चत्वारिंशखण्डखण्डनम् ॥ ४३ ॥ ॥ अतएवेयं लीला ऋगन्तरेणाऽपि ऋग्वेदे निरूप्यते ॥ तथाहि जज्ञानएवव्यबाधतस्पृधःप्रापश्यद्वीरोअभिपौंस्यंरणं अवृश्चदद्रिमवसस्यदस्त्रजदस्तभ्नान्नाकंस्वप्रस्ययापृथुमिति ॥ जज्ञानएव गोकुलेजातमात्रएव स्पृधः पूतनातृणावर्त्तादिवैरिणोव्यवाधत विविधप्रकारैर्विशेषेण वा हिंसितवान् पश्चात् वीरो विक्रान्तोमथुराद्वारकादिषु अभिपौंस्यं आत्मपौरुषानुरूपं रणं दैत्यैः सह संग्रामं प्रापश्यत् अनुभू-

तवान् कृतवानित्यर्थः॥भूमिष्ठदैत्यानां नाशमुक्त्वा देवेन्द्रमदभङ्गका-
रित्वमाह॥अद्रिं गोवर्द्धनगिरिं अवृश्चत् उत्पाटितवान् सस्यत् प्र-
स्रवदिन्द्रप्रेरितं जलं अवाऽसृजत् अधिक्षिप्तवान् निवारिवान् एत-
या स्वप्रस्यया गोकुलस्थितिकरणकर्मेच्छया पृथुं विस्तीर्णं नाकं
अस्तभ्नात् प्रतिबद्धवान् ॥ इन्द्रादिदेवानांमदस्तम्भं कृतवान् इ-
त्यर्थः ॥ किञ्च ॥ दशमस्कन्धे कात्यायन्यर्चनव्रतानन्तरं वरदाना-
र्थमागतस्य भगवतोव्रजकुमारीषु वरदानवचनं गीयते मयेमारं-
स्यथक्षपाइति॥अत्रेमाः क्षपाः इतीदम्शब्देन ताभ्यः सर्वाः क्षपाः
पुरःस्थिताः कृत्वा प्रदर्शितवानिति ज्ञायते ॥ अन्यथा ताः क्षपाः
इत्येव वदेत् ॥ वदति च प्रातःसमये ॥ तेनैतद्रात्रिसाजात्येन ता-
सामेतस्यामेवेमाइति प्रयोगोजात्यभिप्रायेणेति वक्तुं न शक्यं ॥
बहुवचनाऽनुपपत्तेश्च ॥ नचेदम्शब्दस्य भगवद्बुद्धिस्थतद्वाचकत्वेन
सर्वोपपत्तिरिति वाच्यं ॥ कथनस्य परप्रतिपत्त्यर्थत्वेनैवंकथनेऽपि
कुमारीणां तद्बोधासम्भवेनैतत्कथनवैयर्थ्यापत्तेः ॥ किञ्च ॥ भग-
वतः सत्यसङ्कल्पत्वेन तत्त्वस्य चाऽबाधितविषयत्वेनाऽत्र ता-
सां रात्रीणां सपद्यभावे पूर्वोक्तसत्यसङ्कल्पत्वाऽनुपपत्तिः ॥ नन्वे-
ष्यामितेगृहंसुभ्रुआयास्यइतिदौत्यकैः ज्ञातीन्वोद्रष्टुमेष्यामइत्या-
दिषु स्थलेष्वग्रेभावि भगवदागमनं कथं तदैववर्त्ततइतिवक्तुं शक्यं
तथात्वे वा कथनवैयर्थ्यापत्तिरनुभवविरोधश्चेतिचेत् ॥ मैवम्॥स-
र्वस्याअपि लीलायानित्यत्वे पूर्वसिद्धायाएव क्रमेणाऽऽविर्भावः
परमिति पूर्वमेवोक्तत्वात्तस्याऽगमनस्याधुना चाऽप्रकटितत्वादेत-
त्काले प्रकटितलीलामध्यपातिनां तदनुभवाद्भगवतश्च सर्वज्ञत्वेन
तल्लीलायाअप्यनुभवविषयत्वात्सर्वोपपत्तेः॥नन्वधुना प्रकटितली-

लामध्यपातिनामेवाऽग्ने प्रकटनीयलीलासम्बन्धित्वमवश्यं वाच्यं॥ तथैवानुभवात्तेषां मह्यं पूर्वमुक्तमासीदेष्यामीति तेनागतइति ॥ अन्यथा त्वन्यत्र कथनमन्यत्रगमनमिति सत्यवाक्त्वाऽनुपपत्तिश्च॥उक्तेषु भगवदाशयास्थित्यनुपपत्तिश्चेति कथं नित्यायाएव लीलायाः क्रमेणाऽऽविर्भावः परमिति सङ्गच्छतइतिचेत् ॥ अत्रेदंप्रतिभाति ॥ लीलानित्यत्वं न केवलं लौकिकयुक्तिकं किन्तु जयतिजननिवासइत्याद्युक्तस्मृतिश्रुतिप्रमाणगम्यं ॥ तथाचाऽबाधितप्रामाण्यैरुक्तप्रमाणैः सिद्धं चेन्नानुपपत्तिः काचित्तत्र वस्तुनीत्यभ्युपेयं ॥ प्रमाणतस्तथैव सिद्धत्वात् किन्तु स्वबुद्धिपरिकल्पिता तत्राऽनुपपत्तिः साचैवं परिहरणीया ॥ रसोवैसइति श्रुत्या सर्वरसइति श्रुत्याच भगवतः सर्वरसरूपत्वं निर्विवादं तथाच यत्र यदा वदत्येष्यामीति तेषां भक्तानां तत्कालीनभगवदागमनविषयकपरमार्त्तिलक्षणरसपोषाय भगवता तथोक्ते मद्गृहे सर्वथा समागमिष्यति प्रियस्तत्र चैवमेवं मन्मनोरथपूर्त्तिर्भविष्यतीति निश्चयेनाऽमन्दानन्दरूपारसभावविशेषाश्चाऽतिविलक्षणास्तदा भक्तेषूत्पद्यन्ते ॥ भगवतश्च तद्भावदर्शनजनितस्तत्समयाऽनुरूपोभावविशेषः परमानन्दरूपाऽनुभवविषयोभवति तथाच पूर्वोक्तश्रुत्या स्वरूपात्मकमेवेमं रसं सदैवाऽनुभवतीति सिद्धं ॥ पूर्वोक्तभक्तगृहगमने च पूर्वमवधिं मत्वा तत्समयमतिक्रम्याऽनतिक्रम्य वा समागते प्रियतमे ये रसात्मकाभावविशेषास्तांस्तथाभूतसम्भुक्तन्यायेनाऽऽत्मरूपानेवाऽनुभवति तत्र पूर्वोक्तानामेतेषां च भेदोन शङ्कनीयः ॥ यतः पूर्वं मह्यमेवमुक्तमासीदित्यनुसन्धानएव तथा रसोत्पत्तिर्नान्यथा ॥ तथाच तस्य तस्य रसस्य तादृक्तादृग्रूपत्वाद्रसस्य च भगवद्रूपत्वा-

ध्यत्र योरसोयादृशोयावद्विधः स्वशास्त्रसिद्धः तत्र तावद्विधः सर-सोभगवानेवेति फलितं ॥ भगवांश्चैकएव ॥ तथाच तत्रत्यासर्वा सामग्री तद्रसरूपैवेति सर्वमनवद्यं ॥ तथाच क्षपाणां तथाप्रदर्शनं तन्नित्यत्वएव घटते ॥ अग्निमरमणलीलायाअपि नित्यत्वे कथ-मेतद्व्रतफलत्वेन वरदानमुपपद्यतइति शङ्काप्येतेनैव निरस्ता वेदि-तव्या ॥ भगवतः सर्वरसरूपत्वेनैव सर्वोपपत्तिरित्युक्तत्वात्॥इयमे-वोपपत्तिः श्रीनन्दयशोदयोस्तादृशलीलानन्दानुभवे कोहेतुरिति नन्दःकिमकरोद्ब्रह्मन्श्रेयएवंमहोदयं यशोदावामहाभागापपौय-स्याःस्तनंहरिरित्यादिना राज्ञा प्रश्ने कृते द्रोणोवसूनांप्रवरोधरया-सहभार्यया करिष्यमाणआदेशंब्रह्मणस्तमुवाचह जातयोर्नौमहा-देवेभुविविश्वेश्वरेहरौ भक्तिःस्यात्परमालोकेययांऽजोदुर्गतिन्तरेत् अस्त्वियुक्तःसएवेहव्रजेद्रोणोमहायशाः जज्ञेनन्दइतिख्यातोयशो-दासाधराभवत् ततोभक्तिर्भगवतिपुत्रीभूतेजनार्द्दने दम्पत्योर्नि-तरामासीद्गोपगोपीषुभारतेत्यादिना श्रीशुकेनोत्तरितेऽपि ज्ञेया ॥ एवमेव श्रीदेवकीवसुदेवयोरन्येष्वप्येतादृशेष्वित्यलं विस्तरेण॥इति-श्रुतिशतैरतिस्फुटतरैरपास्तभ्रमैर्विचारभरचातुरीसचिवसत्पुराणैरपि॥ स्फुरद्विह्यतिनित्यतासुनिरणायिगोपीपतेर्मयातिनिजयत्नतःफलतु-तेनसैवेहमे ॥ ४४ ॥ ॥ अथाऽतएवेयंलीलेत्यादिः फलतुतेनसै-वेहमेइत्यन्तश्चतुश्चत्वारिंशः खण्डः खण्ड्यते ॥ ॥ तत्र श्रुतौ ज-ज्ञानेत्यादिभूतप्रयोगैस्तत्तत्क्रियाया अनित्यत्वमायातीति विरुद्ध-हेतूपन्यासः ॥ यत्तु टीकाकृता सदेवसौम्येत्यादिवत्पूर्वकालवृत्ति-त्वमेवाऽत्र भूतकालार्थप्रत्ययेनोच्यते नतु प्रयोगकालाऽवृत्तित्वम-

पीत्युक्तं॥तन्नयुक्तं॥सदेवेत्यत्रैवाऽविप्रतिपन्नश्रुत्यन्तराऽनुकूल्याऽदर्शनात् उक्तविधवर्तमानप्रयोगाणामुक्तविधयोपपत्तेः लिडादीनां भूतत्वांशपरित्यागेन प्रयोगे मानाभावेन लक्षणायाश्छान्दसत्वस्य वा कल्पनायादृष्टान्तमात्रेण स्वीकर्त्तुमशक्यत्वात् ॥ वस्तुतस्त्वयं मन्त्रइन्द्रदेवताकइत्यनुक्रमणिकातोनिश्चिनु ॥ अतएवावृश्चदद्रिमितिलिङ्गसङ्गतिः ॥ नहि वृश्चेरुत्पाटने शक्तिः किन्तु स्वकर्मावयवविभागानुकूले कर्मणि ॥ तच्चेन्द्रे गोत्रभिदि प्रसिद्धमेव ॥ पदान्तराण्यप्येवमिन्द्रपरतया व्याख्येयानि ॥ पुरःस्थिताःकृत्वा इत्यसङ्गतम् ॥ कालस्याकर्षणासम्भवात् ॥ अन्यथा रंस्यथेति भविष्यत्प्रयोगानुपपत्तेश्च ॥ बहुवचनानुपपत्तेश्चेत्यप्यसङ्गतम् ॥ जात्याख्यायामेकस्मिन्नापि बहुवचनानुशासनात्॥एवंकथनेऽपि कुमारीणामित्यप्यसङ्गतम् ॥ बोधस्य जातत्वेन तदसम्भवस्य नहिदृष्टेऽनुपपन्नंनामेतिन्यायपराहतत्वात्॥नच मद्रीत्या जात इति वाच्यम् ॥ प्रमाणाभावात् कौमुदीयंविरच्यते इत्यादौ लोकेऽपि इदंशब्दस्य वक्तृबुद्धिस्थपरामर्शकतायादृष्टत्वेन तयैवोपपत्तेश्च ॥ बुद्धिस्थरात्रिविहारस्याऽबाधितत्वात्सत्यसङ्कल्पताप्युपपन्ना ॥ यत्तु नन्वधुनेत्यादिशङ्कायां अत्रेदंप्रतिभातीत्यादिना सर्वमनवद्यमित्यन्तेन समाधानमुक्तं तत्तु मूकमिवास्ति परन्तु तट्टीकाकारेण तादृग्रूपत्वादित्यस्य तेनैवरूपेणाऽनुभवयोग्यस्वरूपत्वादित्यर्थः कृतः ॥ सर्वमनवद्यमित्यस्य तु भविष्यत्त्वस्य स्वरूपान्तःपातित्वेन नित्यत्वाऽविरोधाद्भगवदिच्छया भविष्यत्त्वाऽनुभवस्याऽपि नित्यत्वाऽबाधकत्वेनाऽनित्यत्वरूपदोषरहितमित्यर्थः कृतः॥तत्र यदि भविष्यत्त्वं वर्त्तमानप्रागभावप्रतियोगित्वं यदिवा भविष्यतीति प्रत्ययार्हत्वं

सर्वथाऽपि विरोधोऽस्त्येव वर्त्तमाने तदभावादित्याद्यूह्यम् ॥ प्रमाणतस्तथैवेत्यत्रत्यप्रमाणपदार्थस्य यजमानः प्रस्तरइत्यादिनासादृश्यमनुसन्धेयम् ॥ अन्यत्तूक्तम्प्राक्॥रस आनन्दः ॥ आनन्दमेव लब्ध्वाऽऽनन्दी भवतीत्यर्थः ॥ तथाच रसंह्येवेत्यादि न रसरूपत्वपोषकम् ॥ सर्वरसइति तु सर्वगन्धइत्यादिवद्भौतिकार्थपरम् तत्प्रायपाठात् इतीश्वरस्य शृङ्गारादिरसरूपत्वकथनं विटवादिनां हेयम् ॥ एवमग्रिमरमणस्य नित्यत्वे व्रतफलत्वमपि चिन्त्यम् ॥ एवं यशोदादिविषयकपिष्टपेषणेऽपि ज्ञेयम्॥एवमेवदेवकीत्यादितु मोहितौदेवमाययेत्यादिभागवतस्थवसुदेववाक्यविरुद्धंच ॥ इति चतुश्चत्वारिंशखण्डखण्डनम् ॥ ४४ ॥ ॥ अथेदं विचार्य्यते ॥ जन्मान्तरसहस्रेषुतपोध्यानेतिवाक्यादनेकजन्मसंचितसुकृतराशेरतिशयितभगवदनुग्रहभाजनस्य महत्तमचरणरजोऽभिषिक्तस्य कस्यचित्पुरुषविशेषस्य पूर्वोक्तन्यायेन नित्यलीलामध्यपातिभक्तभावसजातीयभावोत्पत्तौ तद्भावाऽनुसारेणैव च तदभिलाषेण भजने क्रियमाणे तल्लीलामध्यपातित्वमस्य भवति नवेति ॥ किमत्र युक्तं ॥ नेति ॥ कुतः ॥ यतएतस्याऽपि तादृशलीलारसाऽनुभवकामनया भगवद्भजनस्य कृतत्वेनैतस्मिन्नपि तादृशीं लीलां हरिः करिष्यतीति भवता वाच्यं ॥ तथाचैतस्मिन् क्रियमाणायालीलायाजन्यत्वेन न नित्यत्वं वक्तुं शक्यं ॥ तेनैतदर्थमेव क्वचित्प्रकटीभूयाऽस्मै तादृक्सुखं दत्त्वा स्वस्मिन्नेव प्रवेशयति तमिति न नित्यलीलायां तस्य प्रवेशइतिचेत् ॥ अत्र ब्रूमः ॥ यथा गौतमीयानां मते सर्वज्ञत्वेनेश्वरस्य सर्वविषयकज्ञानस्याऽवश्यवाच्यत्वेन विषयाणां जन्यत्वेऽपि न तद्विषयकतज्ज्ञानस्य जन्यत्वं धर्मिग्रा-

हकप्रमाणेन नित्यत्वेनैवसिद्धे स्तथा पूर्वोक्तप्रमाणैर्लीलायाअपि नित्यत्वेनैव सिद्धायास्तस्याएव तादृग्भक्तविषयमात्रस्यैवाऽत्रवाच्यत्वात्तद्विषयिकायास्तस्याअजन्यत्वात्त्वद्धेत्वसिद्धिः ॥ नच तादृग्भक्तस्यैतद्विषयत्वे मानाऽभावइति वाच्यं॥तस्य पूर्वमेवोक्तत्वात् ॥ तथाहि ॥ बृहद्वामनीयसन्दर्भे स्वस्तुतिसन्तुष्टभगवत्प्रदर्शितस्वरूपाऽवलोकनसंजातमनोरथे श्रुतिभिः कन्दर्पकोटिलावण्येत्यादिना निरूपिते दुर्लभोदुर्घटश्चैषइत्यादिना भगवद्वरदानं निरूप्य पश्चाद्ब्रह्मवाक्यं निरूप्यते उक्तकालंसमासाद्यगोप्योभूत्वाहरिङ्गता इति तदग्रे पठ्यते स्त्रियोवापुरुषोवाऽपिभर्तृभावेनकेशवं हृदिकृत्वागतियांतिश्रुतीनांनात्रसंशयइति ॥ यद्यपि नगराद्पि बहिः स्थितस्यात्यधमस्य कस्यचिन्महाराजान्तःपुरप्रवेशकामनायामपि न तत्र प्रवेशः सम्भवति प्रत्युत दण्डस्तदिच्छाज्ञानेऽपि तथा तादृशस्यैव जीवस्य पूर्वोक्तकामनायामपि न तत्र प्रवेशः सम्भवति प्रत्युताऽयोग्यमिच्छन्पुरुषःपतत्येवनसंशयइतिवाक्यात्पातएव भवेदतएव भगवता श्रुतिष्वपि दुर्घटइत्युक्तं तथापि मयाऽनुमोदितःसम्यक्सत्योभवितुमर्हतीत्युक्त्या तथा भगवदङ्गीकारतएव भवतीति ज्ञायते ॥ सर्वात्मभावेन चेत्तथा भजनं करोति तदा भगवानप्यङ्गीकरोत्येव ॥ अन्यथा येयथामांप्रपद्यन्तइति मर्यादा न स्यात्॥अथवा पूर्वोक्तभक्तसम्बन्धिन्यालीलायावर्त्तमानाया एव यथाक्रमेणाऽऽविर्भावस्तथाऽऽधुनिकभक्तसम्बन्धिन्याअपि तस्याइति नाऽनुपपत्तिः काचित्॥४५॥ ॥ अथाऽथेदंविचार्यतेइत्यादिरितिनानुपपत्तिः काचिदित्यन्तः पञ्चचत्वारिंशः खण्डः खण्ड्यते॥ ॥तत्र त्वन्मते जन्यस्यापीश्वरेच्छया नित्यतायास्सम्भवेन

प्रमाणसिद्धेऽर्थे तर्कस्याऽकिञ्चित्करत्वेन पूर्वपक्षोऽसङ्गतः॥अतएवो-त्तरपक्षोऽपि तथा॥अनेनैव प्रकारेण समाधातुं शक्यत्वे श्रमस्य व्यर्थत्वात्॥गौतममतदृष्टान्तोपन्यासोऽप्ययुक्तः॥सहि तदुक्तार्थप्रामाण्या-ऽभ्युपगन्तॄन्प्रति उपन्यसनीयो नचास्मादृशैस्तस्य प्रामाण्यमिष्यते॥ बुद्धेर्विरम्यव्यापारे मानाऽभावेनोत्पन्नोपादाननष्टहानयोरसम्भ-वात् तदैक्षतेत्यादिश्रुतिषु भूतप्रयोगेण तज्ज्ञानस्य नित्यतायाव-क्रमशक्यत्वाच्च केवलानुमानस्य श्रुतिसाहाय्यरहितमनुमानंनकु-त्रचिदिति कौर्मवाक्येन स्वतन्त्रप्रमाणताया अभावाच्च अप्रत्यक्ष-सिद्धे धर्मादौ न प्रसरतीत्यर्थः॥लीलायाज्ञानादिरूपत्वमात्रताया-अभावेन सामान्यतोभक्तस्य तद्विषयत्वाऽभिधानमयुक्तम्॥क्रिया-याधातुसंज्ञासूत्रमहाभाष्यादितोऽनित्यत्वस्य सत्त्वेन तद्रूपलीलाया-नित्यत्वे मानाभावाच्च॥किञ्च तादृग्भक्तविषयत्वं यद्युत्पन्नं तर्हि ता-दृग्रूपविशिष्टायानित्यत्वमिति पूर्वोक्तं विरुध्यते॥यदि सदेवा वि-र्भूतं तर्हि तदीयश्रमनैष्फल्यम्॥सतआविर्भावस्याऽवश्यम्भावात्॥ ईश्वरेच्छामात्रस्य सर्वत्र त्वया हेतुत्वाङ्गीकाराच्च॥ भर्त्तृभावेनेत्यु-क्तिस्तु पुंस्त्वेऽपि स्त्रीकर्मरुचिं वोद्योतयति॥वामनपुराणनाम्नोपन्य-स्तं वाक्यन्तु वसुदेवनन्दादिभिर्भर्त्तृतायाअनभिलषणान्नकिञ्चित्॥ अयोग्यामिच्छन्पुरुषःपतत्येवेत्यप्यसङ्गतम्॥ईश्वरानीच्छायाः पाति-त्यहेतुत्वे मानाभावात्॥ अपिचेत्सुदुराचारोभजतेमामनन्यभाग् इत्यादिभगवद्वाक्येन प्राणिमात्रनिरूपितायायोग्यतायाईश्वरानौ सत्त्वाच्च॥ सम्यग्व्यवसितोहिसइत्यग्रिमोक्तेः॥ अतएव दृष्टान्तो विषमः॥मर्यादा न स्यादित्युक्तिरसङ्गता॥पुष्टिमार्गे मर्यादात्यागस्य तवेष्टत्वात्॥ अथवेत्यादि तु यद्याविर्भूतमित्यादिना खण्डितम्॥

यत्तु साधनैः प्रतिबन्धनिवृत्तौ लीलाऽनुभवआधुनिकस्याऽपि इति टीकाकारः प्रललाप ॥ तन्नयुक्तम् ॥ तन्मते सर्वस्य नित्यत्वेन प्रतिबन्धनिवृत्तेरयोगात् ॥ ईश्वरेच्छायाः सर्वत्र हेतुत्वेन तन्निवृत्तेरकिञ्चित्करत्वाच्च ॥ तदिच्छयैव तन्निवृत्तेरप्युपपत्तौ साधनप्रयासस्य त्वदीयतद्धेतुत्वकथनस्य चाऽसङ्गतेः॥ पुष्टिमार्गे मर्यादात्यागस्याऽदोषत्वादित्युक्तं बहुशः प्राक्॥यत्तु टीकाकारेण यद्यपि बृहद्वामनपुराणीयसन्दर्भे पृथिव्यांभारतेक्षेत्रेइत्यनेनोक्तं केवलाक्षरमध्यपातिलीलास्थानात् स्थानान्तरमिव प्रतीयते इत्याशङ्क्योक्तविधऋग्वेदश्रुतिच्छान्दोग्यश्रुतिभ्यां वामनपुराणे व्यापिवैकुण्ठसंज्ञितइत्यनेन व्यापित्वेनविशेषणाच्च पृथिव्यां दृश्यमानस्य तस्य तदभिन्नत्वं तद्वृत्तिलाभस्थानत्वं वा वाच्यं तथासति तस्यैवाऽत्रापि सत्त्वाच्छुतिसम्बन्धिन्यपि लीला तल्लोकस्थैवेति नित्यैवेत्याद्युक्तं॥ तन्न ॥ श्रुत्यादेर्गतेरुक्तत्वात् ॥ वामनपुराणे सति बिश्वासे व्यापिशब्दोयौगिकोनतु रूढ्या विभुत्वबोधकः॥ पुराणेषु तस्योपरिदेशविशेषे निरूपणात् ॥ पृथिव्यां स्थितस्य तदभिन्नत्वे व्यापित्वापत्तेश्च ॥ तद्वृत्तिलाभस्थानत्वं तु तदभावेऽपीश्वरेच्छया वृत्तिलाभसम्भवाद्व्यर्थं मानाभावग्रस्तश्च ॥ इति पञ्चचत्वारिंशखण्डखण्डनम् ॥ ४५ ॥ ॥ अतएव ऋग्वेदेऽपि पठ्यते ॥ विचक्रमेपृथिवीमेषएतांक्षेत्रायविष्णुर्मनुषेदशस्यन् ध्रुवासोअस्यकीरयोजनासउरुक्षितिसुजनिमाचकारेति॥एषः विष्णुः क्षेत्रायनिवासार्थं मनुषे स्तुवते देवगणाय दशस्यन् असुरेभ्योऽपहृत्य प्रदास्यन् एतां सर्वां पृथिवीं विचक्रमे ॥ अत्रहि विष्णुमाहात्म्यमुच्यते ॥ तत्र नहीदमेव महत्तमस्य माहात्म्यं किन्त्वितोऽधिकमप्यस्तीत्याशयेना-

ह ॥ ध्रुवासइति ॥ अस्य कीरयः स्तोतारो जनासो भक्ताः ध्रुवासो नित्याएवेत्यर्थः ॥ नित्यत्वं तु स्तोत्रेण सन्तुष्टेन भगवता पूर्वोक्तलीलामध्ये तेषां पातनेनेति ज्ञेयं ॥ अन्यथा जीवस्य स्वतएव नित्यत्वेन अस्य कीरयोध्रुवासइत्यनर्थकं भवेत् ॥ नाऽपि सर्वसंपत्त्या याज्ञाद्यर्थकगमनाऽभावरूपं कादाचित्कं ध्रुवत्वमत्र वाच्यं ॥ सङ्कोचे मानाऽभावात् ॥ तादृशे ध्रुवपदाशक्तेश्च ॥ तस्मादस्मदुक्तएव श्रुतेस्तात्पर्यं वेदितव्यं ॥ सुजनिमा शोभनानि जनिमानि नामाऽनुकीर्त्तनस्मरणादीनि यस्य एतादृशोविष्णुः उरुक्षितिं विस्तीर्णनिवासां चकारेत्यर्थः ॥ किञ्च ॥ अनित्यत्वं लीलासु वदन्वादी प्रष्टव्यः ॥ ध्वंसप्रतियोगित्वं ह्यनित्यत्वं तदत्र कुतस्त्वयाऽवधारितमिति ॥ जन्यभावत्वेनेतिचेद्ब्रूयात् तदा सवक्तव्यः पूर्वसिद्धायाएव तस्याः क्रमेणाऽऽविर्भावएवेति पूर्वमेवोक्तां स्वरूपासिद्धिं नाऽनुसन्धत्सइति ॥ न पश्यामीतिचेद्ब्रवीषि तदा स्वाभिमतेश्वरेऽपि तथा ब्रूहि ॥ धर्मिग्राहकप्रमाणेन सतथैव सिद्धइति तु तुल्यं ॥ ननु न तत्तुल्यं अत्र धर्मिग्राहकमानेऽपि प्रातःकालीनलीलायाः सायंकाले बाल्यस्य च पौगंडादिष्वनिरूपणात् ॥ सत्त्यं ॥तत्रह्युत्तरकाले पूर्वलीलासत्त्वासत्त्वौदासीन्येन लीलानिरूपणं क्रियते नतु पूर्वलीलायाः सत्त्वमसत्त्वं वाऽपि निरूप्यते॥एवञ्च सति सन्देहे तन्निवारणपूर्वकं जयतिजननिवासः बहूनिसन्तिनामानि बृहाद्वामनीयकथा तावांवा स्तूनि तेतेधामानि तद्विष्णोःपरमंपदं तद्विप्रासः ध्रुवासोअस्येत्यादिस्मृतिश्रुतिभिरुक्तरीत्या लीलायानित्यत्वेऽवधारिते सर्वसमाधानार्थं क्रमेणाऽऽविर्भावितायाएव लीलायाः क्रमेण तत्र निरूपणमात्रमि-

ति तत्राऽपि निर्णयात्कथं न तुल्यत्वं॥नहि प्रतिपदंनित्यत्वं निरूप-
णीयं ॥ एकत्र तथा निर्णयस्यैवाऽन्यत्राऽप्यवगंतुं शक्यत्वात् ॥
एकत्र निर्णीतः शास्त्रार्थोऽपरत्राऽपि तथेति न्यायात् ॥ अनन्य-
लभ्यस्य शब्दार्थत्वात् ॥ ननु लीलायाः कर्मरूपत्वेन तस्यचाऽ-
चिरावस्थायित्वनियमेन ननित्यत्वं वक्तुं शक्यं ॥ हन्ततर्हीश्वरज्ञा-
नमपि नित्यं न स्याज्ज्ञानान्तरस्याऽचिरावस्थायित्वात् ॥ धर्मिग्रा-
हकप्रमाणञ्च तुल्यं ॥ ननु लीलासम्बन्धिपदार्थाः सर्वेः सपद्यनु-
भूयमानाएव तद्भिन्नावा ॥ आद्ये तन्नित्यत्वं प्रत्यक्षबाधितं ॥ क-
चिच्छ्रूयमाणवैलक्षण्योपलम्भाच्च न तथा वक्तुं शक्यं ॥ द्वितीये
त्वेतेषामपीतरपदार्थसाधारण्येन तल्लीलारसनिमग्नानामेतेष्वेवाऽ-
साधारणप्रेमाऽनुपपत्तिः ॥ तादृग्भक्तानामेतद्दर्शनादिना तद्रसाऽ-
नुभवेनाऽऽल्हादविशेषस्याऽनुभूयमानत्वेन च न तथावक्तुं शक्य-
मित्युभयतः पाशा रज्जुः ॥ नच भिन्नत्वेऽप्यभिन्नत्वभ्रमात्प्रेमाद्यु-
पपत्तिः ॥ दृश्यते हि स्वप्नप्रतीतप्रमदादर्शनात् पारमार्थिकस्खल-
नादीति वाच्यं ॥ एवं तादृशाऽऽल्हादोपपत्तावपि तत्र तत्र वेणुकिं-
किण्यादिश्रवणतत्सौरभविशेषाऽनुभवप्रदीपाद्यनुभवानां पारमा-
र्थिकानामनुपपत्तेः ॥ नह्यभिमानमात्रेणोक्तानामनुभवः सम्भ-
वति ॥ अन्यथा जागरितस्याऽपि प्रमदास्पर्शाद्यनुभवप्रसंगः ॥
तादृशेषु भ्रमानुपपत्तिश्चेत्यादिशङ्कानिरासस्तु दिवीवचक्षुराततमि-
तिव्याख्यानेनैव कृतइति दिक् ॥ ४६ ॥ ॥ अथ ऋग्वेदेऽपि-
पुठ्यतेइत्यादिः कृतइतिदिगित्यन्तः षट्चत्वारिंशः खण्डः खण्ड्यते
॥ ॥ तत्र ध्रुवःशङ्कौहरेर्विष्णौवटेचोत्तानपादजे ॥ वसुयोगभिदोः
पुंसिक्लीबंनिश्चिततर्कयोः स्त्रीमूर्व्याढ्योःशालिपर्ण्यांगीतिस्रुग्भेद-

योस्त्रिषु संततेशाश्वतेइति मेदिनीकोशान्निश्चितादिषु ध्रुवशब्दस्य वृत्तिसम्भवेन नित्यार्थकस्यैवेह ग्रहणे मानाभावात् ॥ लीलामध्यपातेन भक्तानां नित्यत्वं वदंस्तु नित्यशब्दार्थमजानन्नुपेक्ष्यः ॥ किञ्च स्तुतिमात्रेण तथात्वे मनुषे इत्यनेन देवानामपि स्तोतृत्वोक्त्या तेषामपि तत्र पातः स्यात्॥यथेहकर्मचितइत्यादिश्रुतिविरोधस्तु समः॥एतेनाऽयमर्थः ॥ यथा पुरोडाशंचतुर्धाकरोतीत्यनेनोक्तस्य चतुर्धाकरणस्याऽऽग्नेयंचतुर्धाकरोतीत्यनेनाऽऽग्नेयउपसंहारस्तथा नित्योनित्यानामित्यादिनोक्तस्य जीवनित्यत्वस्य भगवत्स्तोतृषूपसंहारइति न वक्तुं शक्यं ॥पूर्वोपन्यस्तश्रुतिस्मृतिन्यायव्याकोपात् ॥ एवंसति यदत्र ध्रुवत्वश्रावणं तत्र कश्चिद्विशेषोवक्तव्यः सचोक्तरूपएव युक्तः ॥ अन्यथा निष्प्रमाणकस्य वृत्तिसंकोचस्य लक्षणायाश्चापातादितिटीकोक्तं परास्तम् ॥ आपत्तेरभावात् ॥ किञ्च सुजनिमेत्युक्त्या विष्णोर्जन्मवत्त्वेन नित्यत्वस्याभावे तल्लीलानां सुतरां लीलामध्यपातिनां सुतमां तदभावः॥यत्तु जनिमानि नामानुकीर्त्तनस्मरणादीनि यस्येति मूले यच्च रुद्रयत्तेजनिमचारुचित्रमिति जनिमशब्दस्य जन्मनि प्रसिद्धत्वात्तद्याटत्त्यर्थमर्थान्तरमाहुर्नामेत्यादि जनौ प्रादुर्भावे मीयन्तइति जनिमानीति व्युत्पत्त्या तथेति टीकायामुक्तं॥तन्नयुक्तम्॥व्युत्पत्त्या एतादृशार्थोक्तौ मूकत्वात्॥ अभिव्यक्तपदार्थाइतिन्यायेन प्रसिद्धार्थत्यागे बीजाभावाच्च॥टीकोक्तशङ्कायामर्थान्तरे हेतोरेव वक्तव्यत्वस्योचितत्वेन तदनुक्त्वाऽर्थान्तरकथनस्याऽयुक्तत्वेन सन्दर्भाऽसङ्गतेश्च ॥ दशास्यनृचकारेत्युक्त्याऽपि क्रीडाया न नित्यत्वम्॥नकर्मणे-

त्यादिबहुश्रुतिविरोधाच्च ॥ तद्भूतस्यतुनातद्भावोजैमिनेरपिनियमा-त्तद्रूपाभावेभ्य इति टीकोक्तसूत्रस्य त्वयमर्थः ॥ तद्भूतस्य नैष्ठिक-ब्रह्मचार्यादिरूपोर्ध्वरेतोभूतस्य नातद्भावः न ततः प्रच्युतिः नियमात् अत्यन्तमात्मानमाचार्यकुलेऽवसादयन्निति अरण्यमियादिति पदंततोनपुनरियादित्युपनिषदित्यादिनियमात् तद्रूपस्य प्रच्युतिरूपस्य अभावेभ्यः॥किञ्च प्रच्युतेर्विधिर्नाऽस्ति निषेधश्च तस्याभवतीति ॥ नचाऽत्र लीलानित्यत्वबोधनस्य गन्धोऽप्यस्ति ॥ जयतिजननिवासइत्यादेस्तु तात्पर्यं प्रागेव वर्णितम् ॥ क्रमेणाऽऽविर्भाव-इत्यसंगतम्॥आविर्भावस्य निरस्तत्वात्॥किञ्च॥जगत्सत्त्यत्ववादिना त्वयातस्यापिं कारणाद्बहिर्भावस्तस्मिँल्लयइति स्वीकृतमितीहाऽपि भगवदतिरिक्तानामनुभवाऽननुभवयोः सत्त्वाज्जगद्वन्नित्यत्वादि प्रसज्यते ॥ एतावाँस्तु विशेषः॥जगद्योगिनां सर्वदा प्रत्यक्षं लीलातु तेषामपीश्वरेच्छयैवेति सुतरामस्याअनित्यत्वम् ॥ एवञ्च योगिजनाऽप्रत्यक्षत्वेनोभयसंमतेनाऽसद्भावस्तत्काले इत्यनित्यत्वम् ॥ उत्तरलीलायाः पूर्वकाले दशस्यन्नूइतिश्रुतेः पूर्वलीलायास्तूत्तरकालेजज्ञानेत्यादिश्रुतेरसत्त्वम् ॥ अतएव यत्कौमारेहरिकृतमित्यादि संगतम् ॥ तथाच सन्देहस्याऽप्यभावादेवञ्चसति सन्देहेइत्यप्यसंगतम्॥एकत्र कृतोनिर्णयोनान्यत्रोपयोगी॥पृथिव्यां गुडे माधुर्य-निर्णयेऽपि जम्बीरादौतदभावात्॥यावद्वचनं वाचनिकमितिन्यायेन वाचनिकस्य दृष्टान्तमात्रेणाऽसिद्धेश्च ॥ अनन्येत्यादितु नेहोपन्यासार्हम् प्रत्युत प्रतिकूलम्॥प्रतिपदं शास्त्रं वाच्यं न दृष्टान्तमात्रेण साध्यमिति पूर्वपक्षिणाऽनन्यलभ्यस्य शास्त्रार्थतायाउक्तत्वात्॥ त्वया ततोविपरीतार्थस्य स्वीकाराच्च ॥ हन्त तर्हीत्यस्य विषयेतूक्तं

प्राक् ॥ भक्तानुभवविषयस्य पारमार्थिकत्वं तु विप्रतिपन्नं ॥ दिवी-
वचक्षुरित्यस्य त्वद्व्याख्यानं तु दूषितं प्राक् ॥ इति षट्चत्वारिं-
शखण्डखण्डनम् ॥ ॥ ४६ ॥ ॥ ननु प्रभासीयकथायाः क-
थं संगतिरितिचेत् ॥ उच्यते ॥ भगवान् हि सर्वलीलायुतः प्रकटः
सदा तथाच यथा धर्मरक्षा सद्रक्षा देवकार्यकरणं भूभारहरणादि-
कं भगवल्लीला तथैवाऽऽसुरव्यामोहनमपि लीलैव मोहनं च मा-
ययैवेति निश्चयः ॥ एवंसत्यासुरमोहनार्थं या लीला सा मायिकी
मन्तव्या॥तस्यां च लौकिकत्वेन ज्ञानेन भगवत्यपि लौकिकज्ञानम-
सुराणामेवनदेवानां॥यतस्तदर्थमेव तत्करणं॥अतएव भगवताऽप्युक्तं॥
अवजानन्तिमांमूढामानुषींतनुमाश्रितं परंभावमजानन्तोममभूत-
महेश्वरं मोघाशामोघकर्माणोमोघज्ञानाविचेतसः राक्षसीमासुरींचै
वप्रकृतिंमोहिनींश्रिताः महात्मानस्तुमांपार्थदैवींप्रकृतिमाश्रिताः
भजन्त्यनन्यमनसोज्ञात्वाभूतादिमव्ययमिति॥मांअव्ययमितिपदा-
भ्यां यः प्रकटोदृश्यते तमेवाऽविकृतं जानन्तोभजन्तइति गम्यते ॥
अपिच भगवद्गीतास्वेव यदक्षरंवेदविदोवदन्तिविशन्तियद्यतयोवी-
तरागाः यदिच्छन्तोब्रह्मचर्यंचरन्तितत्तेपदंसङ्ग्रहेणप्रवक्ष्ये इत्युपक्र-
म्याऽक्षरस्वरूपतत्प्राप्त्युपायौ निरूप्य स्वप्राप्तौ च विशेषमुक्त्वा
पुनर्भगवतोच्यते॥अव्यक्ताद्व्यक्तयःसर्वाःप्रभवन्त्यहरागमे रात्र्याग-
मेप्रलीयन्तेतत्रैवाव्यक्तसंज्ञके भूतग्रामःसएवायंभूत्वाभूत्वाप्रलीय-
ते रात्र्यागमेऽवशःपार्थप्रभवत्यहरागमे परस्तस्मात्तुभावोऽन्योव्य-
क्तोव्यक्तात्सनातनः यःससर्वेषुभूतेषुनश्यत्सुनविनश्यतीत्यादि॥ए-
तदन्तेच पुरुषःसपरःपार्थभक्त्यालभ्यस्त्वनन्ययेत्युक्त्वा परस्यलक्ष-
णमुच्यते यस्यान्तःस्थानिभूतानियेनसर्वमिदंततं ॥ अत्रच यत्सर्व-

भूतेषु नश्यत्स्वपि स्वयं न नश्यति तस्यैव लक्षणं यस्यान्तःस्थानिभूतानीतिपदेनोक्तं ॥ एतल्लक्षणवत्त्वंच मृत्साभक्षणजृम्भणलीलानिरूपणप्रस्तावे पक्षान्तरनिरासपूर्वकं भगवतोदृश्यस्वरूपस्यैव नैसर्गिकधर्मत्वेन दशमस्कन्धएव निरूपितं ॥ अपिच ॥ अत्रैव दामोदरलीलाप्रस्तावे तस्मिन्नेवोदरे दाम्नामनवच्छेदकत्वं निरूप्यते तेन तस्योदरस्यैव ब्रह्मत्वं निरूपितं भवति ॥ उदरस्याऽब्रह्मत्वे तु दामभिरनवच्छेद्यत्वे देशकालापरिच्छिन्नत्वं ब्रह्मधर्महेतुत्वेन नचान्तर्नबहिर्यस्येत्यादिना न निरूपयेत् ॥ व्यधिकरणत्वापत्तेः ॥ तथाच धर्मिग्राहकमानैर्विग्रहस्य ब्रह्मत्वं निश्चितमिति तद्विरुद्धधर्माणामसतामेव प्रदर्शनमसुरव्यामोहायेति निश्चीयते ॥ अन्यथाऽनुपपत्तेर्बलिष्ठत्वात् ॥ उक्तश्च ब्रह्माण्डपुराणे अमोहायगुणाविष्णोराकारश्चिच्छरीरिता निर्दोषत्वंतारतम्यंमुक्तानामपिचोच्यते एतद्विरुद्धंयत्सर्वंतन्मोहायेतिनिश्चयः अज्ञत्वंपारवश्यंचविधिभेदादिकंतथा तथाप्राकृतदेहत्वंदेहत्यागादिकंतथा आसुराणांविमोहायदोषाविष्णोर्नकर्हिचित्इति ॥ तथाच पद्मपुराणे पाखण्डप्रवर्तनार्थं वृषभध्वजमाज्ञापयता भगवतोक्तं ॥ त्वामाराध्ययथाशम्भोग्रहीष्यामिवरंसदेति ॥ नह्यत्राराधकत्वं भगवति सम्भवति ॥ तस्यजीवधर्मत्वात् ॥ तस्य यथा स्वस्मिन्नसतएव प्रदर्शनं लोकव्यामोहाय तथा तस्या अपीतिमन्तव्यं ॥ अपिच यथेन्द्रजालविद्यायां नटस्य स्वर्गगमनं तत्रयुद्धं तेन तन्मरणं मृतस्याऽत्रपातस्तत्स्त्रियाश्च सहगमनादिकं पूर्वमनुभूतमपि पश्चात्कालीनतदागमनेन प्रत्यक्षप्रमाणसिद्धेन मायिकमिति निश्चीयते तथा जयतिजननिवासइत्याद्युक्तस्मृतिश्रुतिभिः पूर्वपूर्वली-

लायानित्यत्वं प्रसिद्धमित्यनन्यगत्यैवाऽस्यालीलायाः प्रदर्शनमा-
त्रपरत्वमध्यवसेयं ॥ नचैतदनुरोधेन पूर्वलीलानामेव तथात्वं वक्तुं
शक्यते॥तासामुक्तप्रमाणैर्नित्यत्वेनैव सिद्धत्वात्॥नचोक्तदृष्टान्तन्या-
येन पूर्वं तथा सिद्धमपि पश्चाद्बाध्यमिति वाच्यं ॥ तत्र लौकिक-
त्वेन प्रमाणदोषस्याऽपि सम्भवेऽपि प्रकृते दोषाऽसम्भवात् ॥ अत्र
पूर्वोक्तन्यायेन लीलानामन्योन्यं बाध्यबाधकभावेन तथा वक्तु-
मनवसरश्चेत्यलं विस्तरेण ॥ एतेन यदिदंमनसावाचाचक्षुर्भ्यांश्र-
वणादिभिः नश्वरंगृह्यमाणंचतद्धिमायामनोमयं इतिभगवद्वाक्यं
लीलामध्यपात्यन्तरङ्गभक्तं प्रत्युक्तमिति न वास्तवत्वं कस्याऽप्य-
र्थस्य वक्तुं शक्यमिति कुचोद्यं निरस्तं वेदितव्यं ॥ उक्तरीत्याऽऽसु-
र व्यामोहाय प्रदर्श्यमानानामर्थानामेव यदिदमित्यादिना कथना-
त् ॥ अन्यथा नश्वरमिति नोक्तं स्यात् ॥ गृह्यमाणमित्येतावतैव
सर्वप्राप्तेः ॥ एवंसति द्विजशापेन नश्वरमिति गृह्यमाणं तथेत्यर्थः
पर्यवस्यति॥अतएव यदिदंमनसावाचागृह्यतेऽन्यैरपीन्द्रियैः अहमे-
वनमत्तोन्यदितिबुध्यध्वमञ्जसेति भगवतोहंसस्य वचनं गीयते ॥
॥ ४७ ॥ ॥ अथ ननुप्रभासीयकथायाइत्यादिर्हंसस्यवचनंगी-
यतइत्यन्तः सप्तचत्वारिंशः खण्डः खण्ड्यते ॥ ॥ तत्र तावत्
लीलातत्स्थयोर्नित्यत्वे प्रभासलीलादिकमपि नित्यं वाच्यमिति
तत्रत्यसर्वविनाशोक्तिर्विरुध्यते ॥ तथासति प्रमाणयोर्लीलयोश्च
विरोधादिन्द्रजालादिवत्प्रदर्शनमात्रार्थत्वं लीलाया वाच्यं तद्वा-
क्यानां तु अथरथानित्यादिवाक्यतुल्यत्वं कल्प्यं ॥ वैधर्म्यादिति-
सूत्रस्योक्तार्थकत्वेन न तद्विरोधः॥तुष्यतुदुर्जनइतिन्यायेन सत्का-
र्यवादाङ्गीकारेऽपि अंशावतरणकथाया आकाशाद्युत्पत्तिवर्णन-

साम्यम् ॥ अतोनाऽक्रूरराधायुद्धवकथानां पुराणान्तरस्थानां विरोधइति पूर्वपक्षिणोऽभिप्रायः प्रतीयते ॥ उत्तरवादिना तु तदभिप्रायस्याऽज्ञानात्तमप्रदूष्यैव माययाऽऽसुरमोहनार्थाप्रभासादिलीलेत्युक्तम् ॥ तत्र तावच्छ्रीकृष्णस्याऽपि बुद्धवन्मोहकत्वमितिस्थितम् ॥ एवञ्च पुराणेष्वियं लीला मोहनार्थेयं नेति प्रतिपदमनुक्तावपि काश्चिल्लीलामोहनार्थाः काश्चि त्त्वतदर्थाइति विवेचनं वचनान्तरैः कार्यम् ॥ तानिच अवजानन्तिमांमूढाइत्यादिसामान्यपराण्येव ॥ एतादृश्योलीलाआसुरमोहनार्थाइति विशिष्याऽनुक्तत्वात् ॥ तत्रहि मूढाएतादृशं मां जानन्तीत्युक्तम् ॥ तादृशस्य च त्वदभिमतश्रीकृष्णादिदेहनाशादिरूपत्वाऽभावेन त्वदभिमतलीलादिमत्त्वरूपत्त्वेन च त्वय्येव मूढत्वाद्यायाति ॥ तत्राऽवजानन्तीतिश्लोकः प्राग्व्याख्यातस्तत्र कृष्णात्परस्य भावस्य सत्ताऽऽत्मकस्याऽज्ञानात्तव मूढत्वम् ॥ अतएव मोघाशत्वादिकम् ॥ अतएव राक्षस्यादिप्रकृतीः श्रितत्वम् ॥ अनन्यमनस्त्वेन भजनं स्वगतभेदमङ्गीकुर्वतस्ते न सम्भवति ॥ स्वगतभेदसत्त्वे ऽभेदोक्तेर्वाचोयुक्तिमात्रत्वात् ॥ विकारस्य सुवर्णवत्स्वीकृतत्वेनाव्ययत्त्वोक्तेरपि तथात्वात् ॥ दृश्यमानस्याऽविकृतत्वं तु सुवर्णदृष्टान्तेन त्वयैवाऽपहस्तितम् ॥ मायाश्लेषामयेत्युदाहृतवाक्याच्च ॥ प्रभासलीलावाक्येभ्यश्च॥यत्तु मोहनमपि लीलैवेत्यन्तवाक्यव्याख्याने तथाच तदपि लीलात्वात्स्वरूपसाध्यमिति तदानीमपि स्वरूपं नित्यमिति तत्सामर्थ्यैनैव तदुपपत्तिरित्यर्थइत्युक्तं टीकाकृता॥तन्नयुक्तं॥स्वरूपशब्देन श्रीकृष्णात्मनोग्रहणे निरनुयोज्यानुयोगत्वात्पूर्वपक्षिणा तदात्मनोऽनित्यत्वानङ्गीकारात् ॥ देहस्य ग्रहणेतु तत्साध्यत्वं लीलाया-

अशक्यवचनं तदात्मनैव सम्भवात् ॥ अस्मच्छब्दस्य शरीरवाचित्वे प्रमाणाभावात् ममशरीरमिति प्रत्ययाच्चाऽवजानन्तीत्यत्र नाऽस्मच्छब्देन देहग्रहणम् ॥ एवं महात्मानस्त्वित्यत्राऽपि ज्ञेयम् ॥ एतेन मामव्ययमितीत्यादिप्रत्युक्तम् ॥ किञ्चैवंव्यासशुकादीनामपि त्वयाऽऽसुरत्वं वाच्यम् ॥ यतस्तैरपि तथा ज्ञातम् ॥ अज्ञातस्योक्तेरसम्भवात् ॥ प्रतारकत्वं वा तेषां वाच्यम् ॥ अन्यथा ज्ञातस्याऽन्यथा वर्णनात् ॥ एवं भगवान्हिसर्वैत्यादिवदता मोहनस्याऽपि नित्यत्वमुक्तं ॥ तथाच मोहनश्चेत्यादि विरुध्यते ॥ किञ्च तल्लीलायामोहकत्वे समाधिभाषाव्यासस्येत्यपि विरुद्धमापद्येत ॥ इतरपुराणवद्भागवतेऽपि मोहकामोहकवाक्यसत्वात्॥अव्यक्तशब्दार्थउक्तः प्राक्॥जन्माद्यस्येत्यस्येव यस्यान्तःस्थानीतिलक्षणस्योपपत्तिः॥ यत् सर्वेषु भूतेषु सुजनिमत्वादिनोक्तेषु विष्णुशरीरादिषु च नश्यत्सु तस्येदमुक्तन्यायेन लक्षणम् ॥ मृद्भक्षणदामोदरादिलीला तु मायाह्येषेत्यादिवाक्यैर्मायैव॥ रज्ज्वादिनाऽपरिच्छेदस्तु ऐन्द्रजालिकदेहादेरपि दृश्यते इति न सद्ब्रह्मत्वसाधकः किन्तु देशकालवस्त्वपरिच्छेदएव ॥ नचान्तर्नबहिर्यस्येतितु वास्तवरूपकथनम् न देहकथनम् ॥ असत्याएव प्रभासलीलायाः प्रदर्शनस्वीकारे तु तवाऽपि जगतस्तथा स्यात् ॥ स्याच्च वैधर्म्याच्चनस्वप्नादिवत् नाभावउपलब्धेरितिसूत्रयोरसङ्गतिः ॥ तथाच मायिकत्वमेव प्रभासलीलायाज्ञायते ॥ ब्रह्माण्डपुराणवाक्यानान्त्वयमर्थः॥अमोहाय मोहाभावाय आकारो मत्स्यादिः चिच्छरीरितेत्यत्रेन्यन्तोत्तरपदः कर्मधारयः नतु कर्मधारयात्परइनिः॥नकर्मधारयादित्यनुशासनविरोधात्॥एवञ्चैतादृशस्याऽनुसन्धानादिना मोहनाशः सच ज्ञान-

द्वारा तमेवविदित्वेत्यादिश्रुतेः॥एतद्विरुद्धं गुणात्मकविष्णुचिदात्मकशरीरादिज्ञानमित्यर्थः ॥ आसुराणां रावणादीनां देहत्यागादिकं विमोहाय तन्मोहापगमाय येयेहताश्चक्रधरेणदैत्याइति वाक्यादिति इमे दोषामायाकार्यत्वाद्दोषभूताः विष्णोरसङ्गत्वेन क्वचिन्न भवन्तीत्यर्थः ॥ टीकोदाहृतस्य स्त्रीपुम्भावानुषङ्गात्मादेहोनास्यविजायते किन्तुनिर्दोषचैतन्यसुखनित्यांस्वकान्तनुम् प्रकाशयतिसैवेयंजनिर्विष्णोर्नचापराइति ब्रह्माण्डपुराणवाक्यान्तरस्य त्वयमर्थः॥ अस्याऽसङ्गत्वाद्देहादि नजायते ॥ नित्यंस्यात्सन्ततेऽपिच शाश्वतेत्रिष्वितिमेदिनीकोशात्प्रवाहानादिबोधकोनित्यशब्दोनतु शाश्वतबोधकः॥ निर्दोषश्चैतन्यसुखनित्योयस्यामिति वाऽर्थः ॥ तथाच तत्सम्बन्धस्य मायिकत्वमुक्तम् ॥ इतउत्तरं टीकायां प्रदर्शितं तथाप्यसुरमोहार्थमित्यादि तु पूर्वं व्याख्यातम्॥अतएव भागवतेऽपि राजन्परस्यतनुभृज्जननाप्ययेहामायाविडम्बनमवेहियथानटस्येत्युक्तम् ॥ अत्र तनुभृतां यादवानामित्यर्थे न मानम् किन्तु तनुभृदितिभावक्विबन्तभृच्छब्देन तनुशब्दस्य शेषषष्ठ्यन्तस्य तत्पुरुषः तस्य जननशब्देन कर्मधारयस्ततोद्वन्द्वः ॥ यत्तु इमं श्लोकमारभ्येतउत्तरश्लोकद्वयं स्कन्धान्तरस्थान्श्लोकांश्च टीकाकारउपन्यस्य स्वाभीष्टपरतया ससंरम्भं व्याचख्यौ तत्त्वनर्गलतरमितिकृतमतिभिस्ततएव ज्ञातुं शक्यमित्यतिविस्तरभयान्नास्माभिः प्रयत्यते ॥ इदानीं प्रदृश्यमानपाद्मे वङ्गदेशजकायस्थविशेषकृतः प्रक्षेपोऽस्तीति न तन्निर्णयाय प्रभवति ॥ वेदादिचतुष्टयाऽविरुद्धं यत्तदेवमानमिति त्वत्सिद्धान्तविरुद्धं चेदं भागवतस्य ब्रह्माण्डपद्मपुराणादिवाक्यैरन्यथाकरणम् ॥ आराधकत्वं जीवधर्मइत्येतत्त्व-

मानं ॥ समानत्वेतु स्यादेव श्रीकृष्णस्य जीवत्वमुपासनस्य कृतत्वात्॥आरात्ध्यवरंग्रहीष्यामिति कथनं भविष्यदर्थज्ञातृत्वेन सङ्कृतार्थविषयकं नतु मायिकाऽसदर्थविषयकमासुरमोहकस्य वरदानासमर्थत्वशङ्कायास्त्वयैव श्रीकृष्णे मोहकत्ववरदातृत्वयोः स्वीकारेण निरस्तत्वात् असतोभानानुपपत्तेश्च भानाङ्गीकारे च नाभावउपलब्धेरित्यादिव्याससूत्रविरोधात् भानं तु भारतादिसिद्धं ॥ तथाचेदृशपाद्मे सविश्वासेनाऽपि पाखण्डप्रवर्त्तनस्य मोहार्थतायाः स्वीकारे आरात्ध्यत्वस्य मोहार्थत्वं न स्वीकार्यम् ॥ तासामुक्तप्रमाणैरित्यादितु प्रागेवापहस्तितम् ॥ तत्र लौकिकत्वेनेत्यादितु न युक्तं ॥ भागवतस्य तन्मते वेदादितुल्यत्वेन तत्र दोषसत्त्वे त्वदीयदृतान्तान्तरे तथा प्रसङ्गात् ॥ यदिदमितिवाक्येन ब्रह्माऽतिरिक्तं सर्वं मायिकमित्युपपादितम् ॥ नश्वरमित्यनेन द्विर्बद्धं सुबद्धं भवतीतिन्यायेन मायिकत्वे हेत्वन्तरमुक्तम् ॥ व्यामोहायेति तु न सङ्गतं ॥ तादृशभक्तस्याव्यामोहनीयत्वात् ॥ स्वस्वप्रतिकूलत्वमात्रेणाऽसत्यपि प्रमाणे व्यामोहार्थत्वकथनेऽतिप्रसङ्गाच्च ॥ मायिकत्वं पुराणेषु वैराग्यार्थमिति तत्पितृवाक्यविरोधाच्च ॥ इतिपदद्विजशापपदयोरध्याहारे मानाभावात् ॥ मनसावाचेत्यनयोर्वैयर्थ्यापत्तेश्च ॥ हंसवाक्ये सङ्कोचापत्तेश्च ॥ मरणादेर्यदिदंशब्दाभ्यामग्रहणात् ॥ ईक्षेतविभ्रममिदंमनसोविलासंदृष्टंविनष्टमतिलोलमलातचक्रम् विज्ञानमेकमुरुधेवविभातिमायास्वप्नस्त्रिधागुणविसर्गकृतोविकल्पइति हंसगीतावाक्याच्च॥यत्तु टीकायां पूर्वार्द्धस्य जगन्मिथ्यात्वपरत्वं स्वीकृत्य विज्ञानमित्युत्तरार्द्धे त्रिगुणविसर्गकृ-

तोविकल्पोविज्ञानमुरुधाविभानात् मायावत् स्वप्नवदित्यनेन स-गुणसृष्टावेवाऽन्यथाख्यातौ विज्ञानरूपत्वनिगमनेन निरीश्वरस्मार्त्तसृष्टावेव तथा पर्यवसानात् इतिनास्य सदेवेत्यादिश्रुत्युक्तप्रपञ्चमिथ्यात्वापादकत्वम् ॥ अन्यथा पूर्ववाक्यविरोधस्याऽपरिहारेण द्वयोरप्यसङ्गतत्वापत्तेः ॥ तत्रापीन्द्रियग्राह्यस्यैव स्वाभिन्नत्वबोधनात् ॥ अतस्तत्राऽपि विषयभेदोऽवश्यमभ्युपेयइत्युक्तं ॥ तन्न॥सृष्टिद्वयकल्पने मानाभावाद्गौरवाच्च ॥ कारणस्यैकत्वे कार्यभेदे मानाभावाच्च ॥ जीवमायादिकं तु न ब्रह्मणोऽतिरिक्तमित्युक्तं बहुशः प्राक् ॥ सदेवेत्यादिश्रुतेः पूर्ववाक्यस्य च तात्पर्यमुक्तमेव ॥ मिथ्यात्वेऽपि स्वाभिन्नत्वस्योपपत्तिरप्युक्तैव सर्वत्र साक्षात्परंपरया वा ईश्वरस्य हेतुत्वेन निरीश्वरसृष्टेर्वैष्णवंमन्येनाङ्गीकर्त्तुमशक्यत्वाच्च ॥ किञ्चोपक्रान्तस्योपसंहारेणानिगमनं पूर्वमीमांसादिविरुद्धमिति पूर्वार्द्धमपि जगन्मायिकत्वपरतयैव व्याख्येयम् ॥ नतदस्तिपृथिव्यांवादिविदेवेषुवापुनः सत्त्वंप्रकृतिजैर्मुक्तंयदेभिःस्यात्त्रिभिर्गुणैरिति गीतोक्त्या तदतिरिक्तजगदप्रतीतेः॥किञ्च निरीश्वरस्मार्त्तसृष्ट्यङ्गीकारे तादृशसृष्ट्यङ्गीकर्त्तृमतदूषणग्रावपेषणम्॥ अनङ्गीकारेतु तदुक्तिरसङ्गता ॥ नहि दूषणाय तदुक्तिर्दोषाऽनभिधानात् ॥ युक्तीनां शास्त्रतोबाधस्य बहुशस्त्वयोक्तत्वेन तद्बलेन शास्त्रान्यथाकरणं तवाऽनुचितम् ॥ एवमेव तदुक्तद्वादशाध्यायसन्दर्भादावप्यूहनीयम् ॥ इति सप्तचत्वारिंशखण्डखण्डनम् ॥ ४७ ॥ ॥

अत्र विद्वद्भिरेवंज्ञेयं ॥ आदौ निगूढाशयेन शुकदेवेन भूभारराजपृतनाद्युपक्रम्य संजह्रेस्वकुलंविभुरित्यंतेन मोहिकी लीला सामान्यतउक्ता ॥ अत्राऽस्वकुलमिति निगूढपदच्छेदोज्ञेयः ॥ वास्त-

ब्यां नैसर्गिक्यां लीलायां भुवि प्रकटतया सत्यां कथमेवं सम्भ-
वतीति शङ्कानिरासाय स्वमूर्त्येति द्वयेनाग्रे भुवि लीलाप्राकट्यप्र-
योजनाभावं ज्ञापयितुं लीलाप्राकट्यप्रयोजननिष्पत्तिकथनपूर्व-
कं सर्वादृश्यत्त्वलक्षणं पदमगादित्युक्तं ॥ लौकिक्याभूमेरधिष्ठा-
नत्वमात्रउपयोगादस्वाभाविकत्वमिति तद्विलक्षणं पदमिति ज्ञाप-
नाय स्वमित्युक्तं ॥ अग्रेच ब्रह्मण्यानांवदान्यानांनित्यंवृद्धोपसे-
विनां विप्रशापःकथमभूद्वृष्णीनांकृष्णचेतसामिति राजप्रश्नवा-
क्यव्याजेन नित्यलीलामध्यपातियादवस्वरूपनिरूपणेन शापशा-
पानां तद्भिन्नत्वं ज्ञापितं व्यासेन ॥ बिभ्रद्वपुःसकलसुन्दरसन्निवे-
शंकर्माचरन्भुविसुमंगलमाप्तकामः आस्थायधामरममाणउदार-
कीर्त्तिःसंहर्त्तुमैच्छतकुलंस्थितकृत्यशेषइत्युत्तरे तु स्वरूपं लीलां
च भुवि प्रकटीकुर्वन् प्रयोजननिष्पत्तिं ज्ञात्वा धामसहजं नित्यं
यल्लीलास्थानं तदेवास्थाय रममाणएव स्थितकृत्यशेषः स्थितोऽग्रि-
मासुरव्यामोहलक्षणः कृत्यशेषोयस्य तादृशः कुलं संहर्त्तुमैच्छ-
तेत्येकेन शुकैरुक्तं ॥ तेनास्य कुलस्य मायिकत्वं सिध्यति कृत्य-
सिद्धिर्यतस्तथैव भवति ॥ भुवीति पूर्वमुक्तमेवेति तद्भिन्नमेव धाम
वाच्यं तदुक्तमस्माभिः ॥ अतएवाऽग्रेऽपि कालात्मना निसृष्टामु
नयइत्युक्तम् नतु पूर्वलीलाकर्त्रेति ॥४८॥ ॥ अथाऽत्रविद्वद्भिरि-
त्यादिर्नतुपूर्वलीलाकर्त्रैत्यन्तोष्टाचत्वारिंशः खण्डः खण्ड्यते ॥ ॥
तत्रास्वकुलमिति पदच्छेदे प्रमाणाभावोगौरवंच ॥ अतएव संह-
र्त्तुमैच्छतकुलमित्यनेनैकवाक्यता ॥ अतएव संजन्हेऽन्यकुलमिति-
नोक्तम् ॥ पदच्छेदे निगूढताऽप्यतएव निरस्ता ॥ फलाभावाच्च ॥
सर्वादृश्यं पदमगादिति तु सत्यम् ॥ यस्यामतमितिश्रुत्या ब्रह्मणः

फलव्याप्त्यभावेन सर्वादृश्यतया तद्गमने तथोक्तेर्युक्तत्वात् ॥ पर-न्त्विदमपि त्वन्मते न सङ्गच्छते ॥ तत्पदस्य भक्तानां दृश्यत्वेन स-र्वशब्दार्थस्य सङ्कोचापत्तेः ॥ केषांचिदेव यद्दृश्यमित्यर्थेऽपि क्ले-शएव ॥ लौकिक्याभूमेरधिष्ठानत्वकथनन्तु तस्योपहास्यतां सूच-यति ॥ परमेश्वरतल्लीलयोर्लौकिकाधिष्ठितत्वप्रसङ्गात् ॥ अलौकि-क्याएव भूमेर्वृन्दावनादिवत्तन्निरूपिताश्रयतायास्त्वन्मते वक्तुमुचि-तत्वेन दहरवाक्यव्याख्याने त्वया तथोक्तत्वेनच तत्त्यागोक्तिरप्यु-क्तैव ॥ स्वशब्दस्य स्वाभाविकार्थबोधकत्वे मानाभावाच्च ॥ ली-लोपयुक्तानामपि प्राप्तशापानां मायिकत्वे लीलायाअपि मायि-कत्वमापद्येत ॥ एवं बलदेवादीनामपि तथात्वं स्यात् ॥ किञ्चैवं श्रीकृष्णस्याऽपितथात्वं स्यात् ॥ अवशिष्टलोहभागेन व्याधशरा-ग्रस्थेन तद्देहपातात् ॥ तस्याऽपि शापविषयत्वाच्च ॥ तस्मान्न शा-पनाशावेव मायिकत्वभेदप्रयोजकौ किन्तु मायिकत्वादितात्पर्य-वच्छास्त्रादि तच्चोक्तमेव ॥ तत्रतत्र प्रश्नपरतयोपन्यस्तवाक्यस्य तु ब्रह्मण्यत्वादिविशिष्टत्वेन शापाऽयोग्यानां कथं शापइत्येवतात्पर्यं नतु कुलान्तरसत्त्वे ॥ राज्ञस्तज्ज्ञाने ईदृशप्रश्नाऽनुपपत्तेः ॥ अत्रही-दृशवृष्णिशापमनूद्यतत्प्रकारमात्रप्रश्नः ॥ नच भिन्नानां सत्त्वे तेषां शापानुवादोयुक्तः राज्ञस्तदज्ञाने तु व्यासस्य तज्ज्ञापनं न युक्तम् ॥ किञ्च कृत्यशेषशब्देन त्वदुक्तार्थग्रहणेऽपि कुलसंहारेच्छयातत्सं-हारे तेनैवासुरमोहसिध्या निर्मूलं कुलान्तरकल्पनम् ॥ संहारेच्छा-कारणं तु वीर्यादिभिरुद्धतत्वं स्थलान्तरोक्तं ज्ञेयं॥नच वृद्धसेविनां कथमेतदितिवाच्यं ॥ भाविनोऽर्थस्य प्राबल्यादिना तत्सम्भवात् ॥ प्रागुक्तकोशादिप्रामाण्येन तेजआदिसाधारणार्थकधामशब्दस्य

स्थानमात्रपरत्वे तदर्थं लीलेतिविशेषणदाने सहजं नित्यमितिच-विशेषणदाने च मानाभावः॥स्थितकृत्यशेषइत्यस्य स्थितः स्वकु-लसंहारलक्षणस्य कृत्यस्य शेषोयस्य सइत्यर्थउपस्थितत्वान्नतु कृत्यशब्देन व्यामोहग्रहणं युक्तम् ॥ अनुपस्थितत्वात् ॥ व्यामो-हस्य कृष्णकृत्यत्वे प्रागुक्ताऽतिप्रसङ्गाच्च ॥ मायिकत्वे त्वतिप्रसङ्गः॥ यत्त्वत्र टीकाकारेण यथाद्वयाहप्राजापत्याइत्यादावेकगोलके देवासुरभेदभिन्नानीन्द्रियाणि तथैव पुरुषाविष्टभूतन्यायेन तेष्वा-विष्टं यत्कुलं तदेव तथेत्यर्थ इत्युक्तं ॥ तन्नयुक्तं ॥ दृष्टान्ते एक-स्मिन्निन्द्रिये कालभेदेन वृत्तिभेदस्यैवाऽङ्गीकारेणैकत्रगोलके इ-न्द्रियद्वयानङ्गीकारात् ॥ इहापि तथाङ्गीकारेत्विष्टापत्तिः ॥ किञ्चै-वं वदता सत्त्येषु यादवेष्वाविष्टं कुलं विनष्टमित्युक्तं भवति ॥ तत्र कुलशब्देन यद्यस्थूलस्यकस्यचिद्ग्रहणं तर्हि शस्त्रपाताद्यसम्भवः॥ यदि स्थूलस्य ग्रहणं तर्ह्येकत्रोभयस्थितिरयुक्तेति नेदं किंचित्॥एते-न भूतावेशन्यायोऽपि निरस्तः ॥ भूतावेशस्थले स्थूलेऽस्थूलस्यैव प्रवेशात् ॥ कालात्मनानिसृष्टाइत्याद्युक्तिस्तु न तदभिमतसूचिका॥ तन्मते कालस्येश्वरात्मकत्वात् ॥ यत्तु एतदुपोद्बलनार्थं टीकायां यादवानां भूभारत्वमुक्त्वा दुर्भगोबतलोकोऽयंयदवोनितरामपि ये-संवसन्तोनविदुर्हरिमीनाइवोडुपमिति तृतीयस्कन्धस्थस्योद्धववच-नस्योत्तरार्द्धं पूर्वोक्तानां स्वरूपपरमित्युक्त्वा एवंभावश्च न नित्य-लीलास्थेषु घटते इत्युक्तम् ॥ तन्न युक्तम् ॥ नित्यलीलास्थाना-मसिद्धेः ॥ यच्च तेकिंसर्वे उत केचिदित्युत्तरार्द्धस्योत्थापनिकोक्ता तदपि न युक्तम्॥शूद्रामन्दभाग्याये मनुष्यत्वेऽपि वेदानधिकारि-णइतिवद्धेतुहेतुमद्भावबोधकत्वात् ॥ अन्यथा द्वितीयचरणस्थाने

यादवेषुतुतेधिकम् इत्येव वदेत् इतोऽभिमर्षीकोक्तोंऽशावतरणभे-
दस्तु मूलवाक्यानुपन्यासात्प्रलापएवेति गौरवभयादुपेक्षितः ॥
टीकाधृततैत्तिरीयस्थमन्त्रेनुवाक्ये तु विशेषवाचकः कोऽपि शब्दो-
नास्ति येन श्रीकृष्णादिपरत्वेन व्याख्यायेत ॥ वस्तुतस्तु श्रीकृ-
ष्णादिपरऽत्वेपि न नोविद्वेषइति तद्व्याख्यायांदूषणान्यनाविष्कृ-
त्यैवोपरम्यते ॥ किञ्चित्तु व्याख्यायते ॥ तमेवमृत्युममृतंतमाहुरि-
त्यत्राभक्तभक्तज्ञानभेदेन प्रकारपरत्वकथनं निर्मूलम् ॥ किन्तु प्र-
मादंवैवयमितिसनत्सुजातीयवाक्यप्रमाण्येन प्रमादमोक्षस्वरूपत्व-
मेव ब्रह्मणउक्तं ॥ सर्वात्मकत्वात् ॥ सभृतोभ्रियमाणोबिभर्त्तिय-
एवंवेदसत्त्येनभर्त्तुम् इत्यत्र तच्छब्देनेशः ॥ सत्त्येन मायिकभरण-
स्यासत्यत्वापादकत्वाभावेन अबाधितेन रूपेण योविभर्त्तु वेदेत्य-
र्थः ॥ असज्जजानसतआवभूवेत्यत्र सतो ऽसत् सद्विलणं जजान
जज्ञे आवभूवेत्यस्य तु टीकोक्तरीत्या ईषद्बभूव नश्वरं बभूवेत्य-
र्थोक्तावपि न हानिः ॥ यंयंजजानसउगोपोअस्येत्यत्राऽपि टी-
कोक्तरीत्या गीर्वाणी आज्ञात्मिका तद्रक्षकएव सयमुत्पादितवा-
नित्यर्थोक्तौ न नो द्वेषः॥इत्यष्टचत्वारिंशखण्डखण्डनम् ॥ ४८ ॥
॥ ॥ श्रुत्युक्तवैपरीत्येन यन्मोहायहरिःस्वयं प्रदर्शयतितन्मोह-
गमनायनमद्वचः ॥ १ ॥ क्षिपाम्यजस्रमित्युक्तेर्यतस्तन्मोहनित्यता
अतोऽनंगीकृतिस्तेषांयुक्तातामसिनांनृणां ॥ २ ॥ तत्संगादन्यथा-
भूतहृदयाःसात्त्विकाअपि माभवंत्वित्ययंयत्नस्तेनतुष्टोऽस्तुमेहरिः॥
॥ ३॥ कांचनीकरणेशक्तोमणिर्धातुगणस्ययः तस्याश्मनांतथाभा-
वाकरणेऽपिनहिक्षतिः॥४॥नन्वस्तु प्रपञ्चातीतत्वेन लीलानां सत्यत्वं
प्रमाणसिद्धत्वात् न प्रपञ्चस्याऽपि प्रमाणैस्तथासिद्धत्वादितिचेत् ॥

तस्याऽपि सर्गादिलीलामध्यपातित्वेन श्रीभागवतादिषु निरूपणात् ॥ जगदप्रतीतिप्रसङ्गादित्यादिनिरूपणेनैव प्रपञ्चसत्त्वस्याऽपि निरूपितत्वात्पुनर्लिखनेनालं ॥ तत्त्वसूत्रभाष्ये श्रीभावगतविवरणादिष्वयमेवार्थोनिरूपितः पितृचरणैरिति नाधिकमत्र निरूप्यते ॥ किञ्च ॥ महोपनिषदि पठ्यते ॥ एषह्येवशून्यएषह्येवतुच्छएषह्येवाभावएषह्येवाव्यक्तोऽदृश्योचिन्त्योनिर्गुणश्चेति ॥ महाकौर्म्मेऽपि ॥ शमूनंकुरुतेविष्णुरदृश्यःसन्परःस्वयं तस्माच्छून्यमितिप्रोक्तस्तोदनात्तुच्छमुच्यते नैषभावयितुंयोग्यःकेनचित्पुरुषोत्तमः अतोभावंवदंत्येनंनाश्यत्वान्नाशइत्यपि सर्वेषांतदधीनत्वात्तत्तच्छब्दाऽभिधेयता अन्येषांव्यवहारार्थमिष्यतेव्यवहर्त्तृभिरिति ॥ तेन ब्रह्मणोभावरूपत्वेन प्रपञ्चस्यभावाभावरूपत्वेन कथं ब्रह्मात्मकता वक्तुं शक्येत्यपि चोद्यं निरस्तं ॥ येषामप्यसत्त्वेन जगदभिमतं तेषामपि जगन्मध्यपातिभगवन्मूर्तितद्भजनाद्यसहिष्णुतयैव ॥ तेषां तथात्वं तु कलौ तथा भगवदिच्छयैवेत्युक्तं ॥ ४९ ॥ ॥ अथ श्रुत्युक्तवैपरीत्येनेत्यादिर्भगवदिच्छयेत्युक्तमित्यन्तएकोनपञ्चाशः खण्डः खण्ड्यते ॥ ॥ तत्र मोहस्य तन्मते मायाजन्यत्वेन नित्यतोक्तिर्विरुद्धा ॥ किञ्च यन्मोहस्य नित्यता तन्मोहानपगमस्य प्राप्तत्वेन हरेः श्रुत्युक्तवैपरीत्येन दर्शनं व्यर्थम् अज्ञत्वसूचकं वा ॥ क्षिपाम्यजस्रमितिगीतावाक्यं तु तत्रैवाऽजस्रमासुरयोनिप्राप्तिं बोधयति ॥ तथाहि ॥ दैव्यासुर्यौ संपदौ तत्फलंचोक्त्वा आसुरंपार्थमेश्रृण्विति पुनरासुरसर्गकथनाय प्रतिज्ञाय प्रवृत्तिचेत्याद्युक्तं ॥ तत्र पुष्टिमार्गवर्त्तिनां पातिव्रत्यादित्यागोपदेशकत्वेन धर्मप्रवृत्त्यधर्मनिवृत्तिज्ञानं नाऽस्त्येव॥एवं शौचाचारादिविषयेऽपि बोध्यम्॥

तैः सर्वधर्मपरित्यागस्य स्वस्मै भार्याद्यर्पणस्य चोपदेशात्॥एवंचेद्द-
शानुपक्रम्य प्रवृत्तमिदं वचनमीदृशविषयकमेव॥ ये सत्त्वोद्रिक्त-
मतित्वाच्छास्त्रार्थकुशलाः शास्त्रसिद्धमहिमानश्च तांस्तामसान् येतु
तमोऽधिकत्वेन मूर्खास्तान्सात्त्विकान्वदंस्स्वस्य व्यक्तं वञ्चकतां
व्यनक्ति ॥ कौर्मवाक्यानि च न विस्मरणीयानि॥माभवन्त्वितिप्र-
योगोमाङ्लिङ्क्तिसूत्रेण आङ्माङोश्चेतिसूत्रभाष्येणच विरुद्धइति
शब्देन्दुशेखरान्निश्चिनु ॥ काञ्चनीकरणेइत्यादित्वसङ्गतम् ॥ पाति-
व्रत्यादिश्रद्धानाशकत्त्वेन क्षारभूवल्लोहसदृशानां त्वदीयानां मृ-
त्त्वकारकत्वात्॥जगदप्रतीतिप्रसङ्गादितु प्रागेव खण्डितमिति न तेन
प्रपञ्चसत्यतासिद्धिरित्यलं पिष्टपेषणेन ॥ महोपनिषद्वाक्यान्यु-
पन्यस्य महाकौर्मनामाभिहारव्याजेन मध्वोल्लिखितवचनमुपन्य-
स्यताप्रसिद्धशून्यादिरूपत्वं ब्रह्मणोऽपहस्तितम् ॥ एवञ्च तेन ब्रह्म-
णइत्याद्यग्रिमग्रन्थस्तेन स्वयमेव शिथिलीकृतः ॥ भावनायोग्य-
त्वाभावेनाऽभावशब्दाभिलप्यतया प्रसिद्धाभावरूपत्वाऽभावात् ॥
यत्तु टीकायां जगतोब्रह्मात्मकत्वे सिद्धे षड्भावविकारप्रतीतीनामा-
विर्भावतिरोभावविषयत्वमित्युक्तं तदप्येतेनैव प्रत्युक्तम् ॥ शुक्तिर-
जतादिवदधिष्ठानाऽभेदेन ब्रह्मरूपत्वेऽपि मिथ्यात्वाऽनपायेनाऽवि-
र्भावादिविषयत्वश्चमस्याऽकिञ्चित्करत्वात्॥यच्च जायतेइति प्रतीतिः
प्रादुर्भावविषया धात्वर्थस्यैव तथात्वादित्युक्तं तत्तु धात्वर्थाऽनवग-
मात् ॥ कूर्मस्याङ्गानां निःसरणे जायन्ते इति निस्सरणात्प्राङ्नजा-
तानीतिच स्वारसिकप्रयोगप्रसङ्गात् ॥ तस्माज्जनीप्रादुर्भावे इत्य-
त्रास्मत्सम्मतोत्पत्तिवाचकएव प्रादुर्भावशब्दः ॥ सत्कार्यवादयु-
क्तयोनिरस्ताः ॥ तदेतदक्षयमितिटीकोक्तवैष्णववाक्यस्य गतिरु-

क्तैव ॥ सैवतु बिश्वंवैब्रह्मतन्मात्रंसंस्थितंविष्णुमायया यथेदानीं-
तथाचाग्रेपश्चादप्येतदीदृशमितिटीकोदाहृतभागवतवाक्यस्याऽपि
गतिर्ज्ञेया ॥ अतएव विष्णुमाययेत्युक्तम् ॥ इत्यलं पिष्टपेषणेन ॥
एवंचाऽस्तीति प्रतीतिरपि जन्मोत्तरस्थितिविषया स्थितैव॥एवञ्च
विपरिणमते इत्यादेरपि तिरोभावेनोपपत्तिं वदन्नुन्मत्तवदुपेक्ष्यः ॥
प्रसिद्धार्थत्यागापत्तेः॥ यच्च तत्रैव व्यावहारिकप्रपञ्चः स्वापेक्ष-
योत्कृष्टसत्ताकप्रपञ्चपूर्वकः मायिकत्वेनाऽभिमतत्वात् मायिक-
त्वाद्वा स्वाप्नादिप्रपञ्चवदित्युक्तं ॥ तन्नयुक्तं ॥ त्वन्मतेजगतोनि-
त्यतयोत्कृष्टजगदन्तराऽसंमतेः बाधितत्वाच्च स्वरूपासिद्धेश्च तर्का-
ऽभावेनव्याप्त्यसिद्धेश्च भ्रममूलकभ्रमेव्यभिचाराच्च ॥ अतएव नृ-
सिंहोत्तरतापनीयषष्ठखण्डे स्वप्रकाशमानन्दघनंशून्यमभवदित्यु-
क्तम् ॥ परमंब्रह्मात्मकप्रकाशंशून्यंजानन्तइतिच ॥ तत्रैव नवमख-
ण्डे नह्यस्तिद्वैतसिद्धिरात्मैवसिद्धोऽद्वितीयइत्युपक्रम्य माययाह्यन्य-
दिवेत्युक्त्वा मायाच तमोरूपानुभूतेरिति तत्स्वरूपं चोक्त्वा तदेत-
ज्जडंमोहात्मकमनन्तंतुच्छमिदंरूपमस्याव्यञ्जिका इत्याद्युक्तम्॥एते-
न हि ब्रह्मातिरिक्तस्य सर्वस्य मायिकत्वं सिद्धम्॥गौडाचार्यैः शू-
न्यमित्यस्य विशेषशून्यमित्यर्थः कृतः॥यत्तु टीकायां मध्वमतानु-
वर्तिजयतीर्थमतिमनुसृत्य मध्वग्रन्थविश्वासपरस्वगुरूपन्यस्तमहा-
कौर्मवाक्यविश्वासेन आनन्दघनपदादुत्तरमुपादानेन च शून्यप-
दस्याऽन्यसुखाल्पीकर्त्तृत्वमर्थइत्यादि प्रलपितं तन्नयुक्तं ॥ महा-
कौर्मवाक्यस्य सति प्रक्षिप्तत्वाऽभावनिश्चये महोपनिषन्मात्रघट-
कशून्यशब्दार्थवर्णनपरत्वात् ॥ तद्घटकस्यैव शब्दान्तरस्य तत्र व्या-

ख्यातत्वात् ॥ सर्वत्र शमोऽकारमकारयोर्लोपस्य यकारागमस्य च कल्पने गौरवात् ॥ प्रसिद्धार्थत्यागे मानाभावाच्च ॥ अन्यथा तादृशवाक्यस्य वैदिकशब्दमात्रव्याख्यापरत्वे मानाऽभावेन लोकेऽपि तादृशार्थविवक्षया स्वारसिकप्रयोगापत्तेः ॥ विदाज्ञानेनठाः-शून्याइति त्वत्प्रलापेऽर्थासंगत्यापत्तेश्च ॥ किञ्च शंविशेषज्ञानजन्यसुखं ऊनं कारणीभूतज्ञानविषयांशेऽल्पम् अर्थाद्विशेषरहितं कुरुते इत्येवं पुराणवाक्यार्थसम्भवान्नगौडाचार्योक्तार्थे विरोधः ॥ इदञ्च पुराणवाक्यस्य समूलत्वे यतनीयं निर्मूलत्वेतु न किञ्चित् ॥ टीकाकारेणाऽपि हि मध्वग्रन्थइदं दृष्टमित्युक्तम् ॥ यच्च टीकायां तापनीये मायायाव्यञ्जकत्वमेव श्रावितं नतु जनकत्वं तथान्यदिवेत्युक्तं नत्वन्यदेवेत्यादि प्रलपितम् तदपि न युक्तम् ॥ मायान्तुप्रकृतिमित्यादिश्रुत्यन्तरैकार्थ्येन जनकत्वरूपस्यैव व्यञ्जकत्वस्य तत्र विवक्षितत्वात् ॥ अन्यदिवेत्यत्रेवशब्दस्तु वस्तुतोऽन्यत्वाभावबोधार्थम् ॥ एवकारकरणे तु विवक्षितोऽर्थोन सिध्येदितिदिक् ॥ जगदन्तःपातिभगवन्मूर्त्तिभजनादिकन्तु जगतोमिथ्यात्वाङ्गीकारेऽपि नाऽस्माभिर्द्विष्यते किन्तु सत्यत्वाङ्गीकर्त्तृभिरेव जैमिन्यादिभिः ॥ मिथ्यात्वज्ञानस्य भजनद्वेषाऽप्रयोजकत्वान्मिथ्यात्वेपि वेदादिषु श्रद्धा तु प्रागुपपादितैव ॥ इदन्त्वस्ति अर्चायामेवहरयेपूजांयःश्रद्धयेहते नतद्भक्तेषुनान्येषुसभक्तःप्राकृतःस्मृतइत्यादिभागवतादिवाक्यप्रामाण्येन मूर्त्तिसेविनां प्राकृतवैष्णवत्वं ब्रूमः ॥ अतएव यस्यात्मबुद्धिःकुणपेत्रिधातुकेस्वधीःकलत्रादिषुभौमइज्यधीरित्यादिभागवताद्युक्तानिन्दा सङ्गच्छते ॥ भगवत्पादात्प्राक्तनेषु त्वदुदाहृतभागवतादिग्रन्थेष्वपि जगन्मिथ्यात्वोक्तिदर्श-

नेन तेषां तथात्वन्त्वित्यादितदुक्तिरूपैश्वरमार्गनिन्दा विप्रशापवि-षयत्वमाविष्कुर्वन्त्यसङ्गतैव ॥ इत्येकोनपञ्चाशखण्डखण्डनम् ॥ ॥ ४९ ॥ ॥ तस्मादस्माभिरेवोक्तपद्धत्या श्रुतिसिद्धया ॥ ज्ञात्वा ब्रह्मस्वरूपं तत्प्राप्त्यै तद्भजताऽखिलाः ॥ १॥ येषां लौकिकमेव मा-नमधिकं वेदादितोऽलौकिकात्तत्पादानुगतस्तदर्थइतिच प्रच्छन्नबौ-द्धास्तुते॥येषां तद्विपरीततैव विदुषां केषांचिदन्तर्गता तेषामेव मुदे-ऽस्ति मत्कृतिरियं गोपीशसंसेविनां॥२॥वरीवर्त्ति श्रद्धा श्रुतिषु य-दि वा व्यासवचने तदा विद्वांसोऽस्मद्विरचितमिदं मण्डनवरं ॥ य-थोक्तं कण्ठे वा शुकवदथवाऽर्थं च हृदये मुदा कृत्वाऽयत्नं धुनुत परपक्षाभिधतमः ॥ ३ ॥ यदागतं हृदि श्रीमद्गोपीशरतिलक्षणां ॥ शोभां तनोति तदिदं मण्डनं श्रीहरेः प्रियं ॥ ४ ॥ अखण्डवरप-ण्डितप्रसृतचण्डपाखण्डवाग्विखण्डनसुचण्डिमाधरणिमण्डलाख-ण्डलः॥नमन्नृपतिमण्डलीमुकुटताण्डवैर्मण्डितः सपादनखमण्डलः पितुरिहास्तु मे मण्डनं ॥ ५ ॥ पुनरपि नमामि गोपीरतिपतिमार्ग-प्रवर्त्तनाचार्यान् ॥ श्रीवल्लभाभिधानान्पितृचरणान्वाङ्मनःकायैः ॥ ६ ॥ ५० ॥ ॥ अथ तस्मादस्माभिरित्यादिर्वाङ्मनःकायैरि-त्यन्तः पञ्चाशखण्डः खण्ड्यते ॥ ॥ तत्र श्रुतिविरुद्धमतपद्धतेः श्रुतिसिद्धत्वमयुक्तमेव ॥ येषामितिद्वितीयश्लोकपूर्वार्द्धं सत्यार्थं परन्तु तदुदाहरणमारूढपतितएव ॥ जगदप्रत्ययाम्नितइत्यादिना लौकिकमानेन तैर्निर्विशेषब्रह्मपरवाक्यानामन्यथात्वकरणात् ॥ नतु वयं॥निर्विशेषब्रह्मवाक्यबलेनाऽस्माभिर्जगत्प्रत्ययस्याऽन्यथा-त्वकरणात् ॥ तस्मादेतत्कृतेः पूर्वापरविरोधादिना दूषितत्वादुक्त-विधविदुषां तया हर्षासम्भवात्सर्वश्रुतिसारभूतभगवत्पादोक्तिभि-

रेव तेषां तत्सम्भवाच्च ॥ चतुर्थचरणे मत्कृतिरित्याद्यपनीय शंकरकृतिःपुण्यैर्विशुद्धात्मनामितियोज्यम् ॥ टीकाकर्त्तुस्तु देवद्विषां निगमवर्त्मनिधिष्ठितानांपूर्भिर्मयेनविहिताभिरदृश्यतूर्भिः लोकान्घ्नतामतिविमोहमतिप्रलोभंवेषंविधायबहुभाषतऔपधर्म्यम् इतिभागवतश्लोकोद्वेषदूषितहृदयतया ऽन्यपरोभाति ॥ तत्र पूर्भिरित्यादिविशेषस्योपादानात् ॥ पुष्टिमार्गे श्रौतमर्यादात्यागस्य त्वयोक्तत्वेन तदनुसारितायाः कौर्मानुसारेण त्वयि सम्भवाच्च ॥ दृष्टिसृष्टिवादस्य तु श्रौतत्वमुक्तमेवेति न तावन्मात्रेणाऽस्मास्वतिप्रसङ्गः ॥ किञ्च तादृशवक्ता विष्णुरेव नतु शङ्कराचार्यइति नातिप्रसङ्गः ॥ विप्ररूपाणिरक्षांसीत्यादिवैष्णववाक्यंतु त्वद्गुर्वादिविषयमेव ॥ पाद्मेतु कायस्थविशेषकृतः प्रक्षेपोऽस्तीत्यवोचाम प्रथमश्लोकव्याख्यायाम्॥एवञ्च मायावादमसच्छास्त्रंप्रच्छन्नंबौद्धमुच्यते मयैवविहितंदेविकलौब्राह्मणरूपिणेति तन्नाम्ना लिखितः श्लोकोऽविश्वास्यएव॥तस्मिञ्छ्लोके तव विश्वासेतु मायःपीताम्बरेसुरेइति विष्णुवाचकमायशब्दस्यावादशब्देन समासइति त्वदुत्क्षिप्तपाषाणस्य त्वच्छिरस्येव प्रपातः ॥ ब्राह्मणरूपिणेत्यत्र ब्राह्मणैरूपयतिनिरूपयतीत्यर्थे ण्यन्ताण्णिचि णिनौ तृतीया नतु ब्राह्मणस्य रूपं ब्राह्मणरूपं ततोमत्वर्थीयः ॥ नकर्मधारयादितिमत्वर्थीयनिषेधात् ॥ तत्र कर्मधारयपदेन तत्पुरुषमात्रस्य ग्रहणात् ॥ असत्त्वं तु त्वच्छास्त्रस्योक्तमेव ॥ यद्वा स्यान्मायाशाम्बरीक्षपादम्भोबुद्धिश्चेति हेमचन्द्रकोशाद्दम्भोमायाशब्देन ग्राह्यः ॥ तथाच दम्भवादस्त्वन्मते प्रसिद्धएवेति त्वन्मतनिन्दापरोयं श्लोकः ॥ एवञ्च विप्रादिशापपरोक्तविधकौर्मवाक्यैनैकवाक्यता ॥ कारयितुरपि क-

र्तृत्वे बाधकाभावेन मयैव विहितमित्यस्य सङ्गतिः ॥ यद्वा ब्राह्म-
णरूपिणेत्यत्र ब्राह्मणशब्देन कणादाद्यागृह्यन्ते ॥ त्वादृशैरुल्लिखि-
ते पाद्मपाठे तेषामुपक्रमात् ॥ प्रथमंतुमयैवोक्तंशैवंपाशुपतादि-
कम् मच्छक्त्यावेशितैर्विप्रैःसंप्रोक्तानिततःपरम् कणादेनतुसंप्रोक्तं-
शास्त्रंवैशेषिकंमहत् गौतमेनतथान्यायइत्युपक्रम्याऽस्य श्लोक-
स्य पठितत्वात्॥एवञ्च मच्छक्त्यावेशितैरित्युक्तस्यैव निगमनं मया-
विहितमित्यनेनकृतं ॥ त्वदुक्तार्थकत्वेतु इतः प्रागेव वदेत् ॥ प्रथ-
मन्तुमयैवोक्तंशैवंपाशुपतादिकमित्यत्र स्वकृतस्य निन्दित्वात् ॥
अतएव प्रथश्लोकव्याख्योपन्यस्तकौर्मादिवाक्यसंगतिरित्यलम् ॥
श्रुतिव्यासवचनैर्विरुद्धत्वादेतद्ग्रन्थस्य श्रुत्यादिश्रद्धालुभिर्नैतत्स्वी-
कारउचितः ॥ उक्तविधपूर्वापरविरोधादिबहुदोषग्रस्तेनानेन पर-
पक्षनिरासाशा तु दूरएव तेन शोभाऽऽशायास्तु किमु वक्तव्यम् ॥
शुकस्यार्थज्ञानाभावेऽपि शब्दज्ञानस्य सत्त्वेन तृतीयश्लोके तद्दृ-
ष्टान्ताऽसङ्गतिः ॥ चतुर्थे ईश्वररतेः शोभात्वोक्तिरयुक्ता ॥ शोभा-
याः परैर्दृश्यत्वात् ॥ तद्रतेरतथात्वात् ॥ वरपण्डिततयोक्तेषु चण्ड-
पाखण्डवाक्प्रसृतिकथनं विरुद्धम् ॥ आचार्यपदंचाऽऽचिनोतिच-
शास्त्रार्थमाचारेस्थापयत्यपि स्वयमाचरतेयस्मात्तमाचार्यंप्रचक्षते-
इत्यर्थत्रयार्थकम् ॥तत्र वल्लभेन न कश्चिच्छास्त्रार्थआचितः प्रत्यु-
तवेदार्थोभ्रंशितः नवाऽऽचारे ऽतिष्ठिपत् पातिव्रत्यादिनाशोपदेशात्
स्वयंत्वारूढपतनमाचरितमिति नाचार्यपदेनाऽभिलापमर्हति ॥अ-
न्तेवाङ्मनःकायैरिति प्रयोगोऽशुद्धः ॥ द्वन्द्वश्चप्राणितूर्यैत्येकवद्भाव-
स्योचितत्वात् ॥ प्रथमश्लोके त्वार्द्रार्द्रइतिप्रयोगोऽशुद्धः मध्येतु
तदीयप्रयोगाणां प्रायेणाऽशुद्धत्वं दर्शितं ॥ क्वचित्क्वचित्तु विस्त

रभयादुपेक्षितमपीतिशिवम् ॥ इतिपञ्चाशखण्डखण्डनम् ॥ ५० ॥
॥ ॥ यः शुद्धाऽद्वैतमार्त्तण्डमाम्नायान्तैस्सयुक्तिभिः ॥ तिरस्कृत्य पयोमुग्भिस्तेभ्यः प्रादुर्भवेन च ॥ १ ॥ भङ्व्यन्तरेण वज्रेण विन्मण्डनमचूर्णयत् ॥ सोऽयं विबुधहर्षाय चिरं जीयात्सहस्रदृक् ॥
॥ २ ॥ ॥ इति श्रीपरहंसश्रीस्वरूपानन्दसद्यतेः ॥ शिष्येण ससदानन्दयतिवर्य्येण निर्मितः ॥ १ ॥ सहस्राक्षाभिधोग्रन्थः सम्पूर्णः कार्त्तिकेऽभवत् ॥ वर्षे नेत्राऽक्षिनन्देन्दौ विक्रमस्य महौजसः ॥ २ ॥ ॥ इति सहस्राक्षग्रन्थः समाप्तः ॥

PLEASE DO NOT REMOVE
CARDS OR SLIPS FROM THIS POCKET

UNIVERSITY OF TORONTO LIBRARY

B Sadanandagiri
131 Sahastraksah
S34
1870

[redacted]

UTL AT DOWNSVIEW
D RANGE BAY SHLF POS ITEM C
39 13 07 14 09 015 6